
~~D2650~~

Vols 3 & 4





LIST OF PLATES.

No.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA, LL. D.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME III.

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1876.



PREFACE.

The Berlin Catalogue of Professor Weber and the Bodleian Catalogue of Dr. Aufrecht are by far the best specimens of descriptive catalogues of Sanskrit Manuscripts that have yet been presented to the public. Without pretending to give a complete summary of every book, like D'Herbelot's "*Bibliotheque Orientale*" or Taylor's "Examination and Analysis of the Mackenzie Manuscripts," they afford all the information about the codices noticed that can reasonably be expected from works of that description. In preparing the following pages, the author has adopted those works for his models, and followed them as closely as circumstances would admit of. Writing, in many instances, without an opportunity of seeing the texts, and depending in such cases solely on notes prepared by paṇḍits, who do not always enter into his ideas of what is wanted, owing also to the fact of the work being designed to serve only as an inventory—a help to others who may hereafter take up the task of analysis—he has not been able to supply quite as much information as his models do, and make his notices quite as full. It is expected, however, that in the majority of instances, the descriptions given will be found to be all that are needed for a correct understanding of the works enumerated, and in the case of the larger works, to supply a sufficient indication of their nature to help the future analyst in making his choice of what really require further examination. It would have

been a source of satisfaction to the writer if he could have added a few extracts with translations of important passages, but they would have been foreign to the scope of these "Notices," and would have involved the devotion of more time, labour and expense than he was in a position to afford.


The plan followed in collecting information for this work will be found explained in the Prefaces to volumes I and II, and also in the Appendix to this volume.



INDEX TO VOL. III.


CALCUTTA





NOTICES OF SANSKRIT MSS.

No. 1020. नरसिंहपुराणम् ।

Substance, country yellow paper, 15 × 4 inches. Folia, 95. Lines, 8 on a page. Extent, 3136 s'lokas. Character, old Bengali. Date, Sk, 1567. Place of deposit, Navadvípa. Vrajanátha Vidyáratna. Appearance, old. Verse. Correct.

Narasiñha Puráṇa alias *Nṛisiñha Puráṇa*. One of the Upapuráṇas. In extent it is one of the smallest, comprising only 3136 s'lokas; it is also of rare occurrence; but it was well known as a standard work four hundred years ago, in the time of Mádhava Achárya, who quotes from it in his commentary on the Parásara Smṛiti; Kamalákara Bhaṭṭa has also cited it in his Súdra-kamalákara. The MS. under notice, is 229 years old, and bears date 1567 S'aka. The general character of the work is very like that of the other Upapuráṇas. *Contents:* Chapters 1 to 5, Origin of creation. 6, Story of Vas'ishtha and Agastya. 7, Immortality of Márkaṇḍeya and Nṛisiñha. 8, 9, Praise of Vaishṇavas. 10, Márkaṇḍeya's devotions at Prayága, and meeting with Nṛisiñha. 11, Márkaṇḍeya's hymn to Vishṇu. 12, Nṛisiñha's blessings to Márkaṇḍeya. 13, Story of Yama and Yamí. 14, Story of Sávitrí, wife of Kásyapa. 15, Story illustrating the duty of a widow. 16, 17, Allegory of the world as a tree. 18, Praise of Vishṇu; mantra of eight syllables. 19, The race of Áditya. 20, Hymn to Vishṇu, comprising his 108 names. 21, The race of Váyu. 22, The Solar Race. 23, The Lunar Race. 24, Descriptions of the several Manvantaras. 25, 26, History of Ikshváku. 27, History of the Solar Race. 28, History of Sántanu. 29, History of the Lunar Race. 30, Description of the terrestrial sphere. 31, History of Sahasráníka. 32, Rules for performing pujá. 33, Rules for

offering a hundred thousand homas. 34-41, Incarnations of Vishṇu. 42-45, Abstract of the Rámáyaṇa. 46, Praises of sacred pools. 47, Incarnations of Ráma and Kṛishṇa. 48, Incarnation of Kalki. 49, Story of S'ukra's loss of sight and restoration thereof. 50, Rules for consecrating an image of Nṛisiñha. 51, Rules regarding what flowers should be offered in worship and what rejected. 52, 53, Duties of the several castes. 54, Duties of Brahmacháris. 55, Duties of householders. 56, Duties of Yatis. 57, Duties of persons in the fourth order of life. 58, Yoga. 59, Proper places for worship. 60, Rules of worship. 61-63, Various places in India sacred to Vishṇu.

Beginning. ॐ नमो नृसिंहाय । तप्तहाटककेशाग्रज्वलत्पावकलोचन ।
वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते ॥
नखमुखविलिखितदितितनयोरःपरिपतदसृगरुणीकृतगात्रः ।
हिमकरगिरिरिव गैरिकगात्रो नरहरिरहरहरवतु स ह्यस्मान् ॥
हिमवद्वासिनः सर्वे मुनयो वेदपारगाः ।
त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥
येऽर्बुदारण्यनिरताः पुष्करारण्यवासिनः ।
महेन्द्राद्रिरता ये च ये च विन्ध्याद्रिवासिनः ॥
जम्बुमार्गरता ये च ये च सह्यनिवासिनः ।
एते चान्ये च बहवः सशिष्या मुनयोऽमलाः ॥
माघमासे प्रयागन्तु स्नातुं तीर्थं समागताः ।
तत्र स्नात्वा यथान्यायं कृत्वा कर्म जपादिकम् ॥
नत्वा च माधवं देवं कृत्वा च पितृतर्पणम् ।
दृष्ट्वा तत्र भरद्वाजं पुण्यतीर्थनिवासिनम् ॥
तं पूजयित्वा विधिवत् तेन ते च सुपूजिताः ।
आसनेषु विचित्रेषु दृष्यादिषु यथाक्रमम् ॥
भरद्वाजप्रदत्तेषु आसीनास्ते तपोधनाः ।
कृष्णाश्रिताः कथाः पुण्याः परस्परमथाब्रुवन् ॥
कथान्ते तु ततस्तेषां मुनीनां भावितात्मनाम् ।
आजगाम महातेजास्तत्र सूतो महामतिः ॥
व्यासशिष्यः पुराणज्ञो लोमहर्षणसञ्ज्ञकः ।
तं प्रणम्य यथान्यायं स तैश्चापि प्रपूजितः ॥

उपविष्टो यथान्यायं भरद्वाजमतेन सः ।
व्यासशिष्यं सुखासीनं सूतं वै लोमहर्षणम् ॥
तं पप्रच्छ भरद्वाजो मुनीनामग्रतस्तदा ॥
भरद्वाज उवाच । शौनकस्य महासत्रे वाराहाख्या तु संहिता ।
त्वत्तः श्रुता पुरा सूत एभिरस्माभिरेव च ॥
साम्प्रतं नारसिंहाख्यां त्वत्तः पौराणसंहिताम् ।
श्रोतुमिच्छाम्यहं सूत श्रोतुकामा इमे स्थिताः ॥
अतस्त्वां परिपृच्छामि प्रश्नमेतं महामुने ।
ऋषीणामग्रतः सूत यता ह्येषां महात्मनाम् ॥
कुत एतत् समुत्पन्नं केन वा परिपाल्यते ।
कस्मिन् वा लयमभ्येति जगदेतच्चराचरम् ॥
किं प्रमाणञ्च वै भूमेर्नृसिंहः केन तुष्यति ।
कर्मणा तु महाभाग तन्मे ब्रूहि महामते ॥
कथञ्च सृष्टेरादिः स्यादवसानं कथं भवेत् ।
कथं युगस्य गणनं किं वा स्यात्तु चतुर्युगम् ॥
को वा विशेषस्तेष्वत्र का व्यवस्था कलौ युगे ।
कथमाराध्यते देवो नारसिंहोऽत्र मानुषैः ॥
क्षेत्राणि कानि पुण्यानि के च पुण्याः शिलोच्चयाः ।
नद्यश्च काः पराः पुण्या नृणां पापहराः शुभाः ॥
देवादीनां कथं सृष्टिर्मनोर्मन्वन्तरस्य च ।
तथा विद्याधरादीनां सृष्टिरादौ कथं भवेत् ॥
यज्वानः के च राजानः के च सिद्धिं परां गताः ।
एतत् सर्वं महाभाग कथयस्व यथाक्रमम् ॥
सूत उवाच । व्यासप्रसादाज्जानामि पुराणानि तपोधनाः ।
तं प्रणम्य प्रवक्ष्यामि पुराणं त्वहरेरिदम् ॥
पाराशर्यं परमपुरुषं विश्वदेवैकयोनिम्,
विद्याधारं विपुलमतिदं वेदवेदाङ्गवेद्यम् ।
शश्वच्छान्तं शमितविषयं शुद्धतेजोविशालं
वेदव्यासं विततयशसं सर्वदा तं नमामि ॥
नमो भगवते तस्मै व्यासायामिततेजसे ।
यस्य प्रसादाद् वक्ष्यामि नारायणकथामिमाम् ॥

येन कालानलप्रख्यं रूपमास्थाय कोमलैः ।
नखैर्विदारितो दैत्यस्तन्नमामि नृकेशरिम् ॥
सुदुर्लभो महान् प्रश्नस्त्वयायं परिकीर्त्तितः ।
विष्णुप्रसादान्न विना केनापि वक्तुं शक्यते ॥
तथापि नरसिंहस्य प्रसादादेव तेऽधुना ।
प्रवक्ष्यामि महापुण्यम् भरद्वाज शृणुष्व मे ॥
शृण्वन्तु मुनयः सर्वे सशिष्यास्त्वत्र ये स्थिताः ।
पुराणं नरसिंहस्य प्रवक्ष्यामि यथातथम् ॥

End. नेत्रैर्मार्त्तण्डचण्डैस्त्रिभिरनलशिखान्यग्वहद्भिः प्रदीप्तः
पायाद्वो नारसिंहः करखरनखरैर्भिन्नदैत्यस्थिरघः ।
किं किं सिंहस्ततः किं नरसदृशवपुर्देवचित्रं गृहीता
नैवं धिक्कोन्वजीवेद् द्रुतमपनयतां सोऽपि सत्यं हरीशः ॥
चापं चापं नखाङ्कं झटिति दृढदृढ कर्कशत्वं नखाना-
मित्येवं दैत्यनाथं निजनखकुलिशैर्जघ्निवान् यः सरोषात् ॥

Colophon. इति श्रीनरसिंहपुराणे आद्ये धर्मार्थकाममोक्षप्रदायिनि परब्रह्मस्वरूपिण इद-मेकं सुनिष्पन्नं ध्येयो नारायणः सदा नरान्यदेवात्परमस्ति किञ्चित् । श्रीनरसिंहपुराणं समाप्तम् ॥ ६३ ॥०॥

विषयः । अत्र त्रिषष्टिरध्यायाः सन्ति । तत्र—१, २, ३, ४, ५, च सृष्टिकथनम् । ६, वशिष्ठस्य, अगस्त्यस्य च उपाख्यानम् । ७, मार्कण्डेयस्य नृसिंहस्य चिरजीवित्वम् । ८, ९, च वैष्णवमाहात्म्यम् । १०, मार्कण्डेयस्य प्रयागकृत्यादिवर्णनं नृसिंहसाक्षात्कारश्च । ११, मार्कण्डेयकृतविष्णुस्तुतिः । १२, वरदानम् । १३, यमयमीसंवादः । १४, काश्यपपत्न्याः सावित्र्याः पातिव्रत्योपाख्यानम् । १५, कृतभार्य्याचारोपाख्यानम् । १६, संसारस्य वृक्षरूपवर्णनम् । १७, संसारवृक्षारोहणादिवर्णनम् । १८, अष्टाक्षरमन्त्रमाहात्म्यम् । १९, आदित्यवंशवर्णनम् । २०, विश्वकर्मकृतं विष्णोरष्टोत्तरशतनामस्तोत्रम् । २१, मारुतवंशवर्णनम् । २२, सूर्यवंशवर्णनम् । २३, सोमवंशवर्णनम् । २४, स्वारोचिषादिमन्वन्तरवर्णनम् । २५, २६, इक्ष्वाकुचरितम् । २७, सूर्यवंशानुचरितम् । २८, शान्तनुचरितम् । २९, सोमवंशानुचरितम् । ३०, भूगोलवर्णनम् । ३१, सहस्रानीकचरितम् । ३२, पूजाविधिः । ३३, लक्षहोमविधिः । ३४, अवताराणां प्रादुर्भावः । ३५, मत्स्यावतारः । ३६, कूर्मावतारः । ३७, वराहावतारः : ३८, नृसिंहावतारः । ३९, वामनावतारः । ४०, परशुरामावतारः । ४१, रामा-

वतारः। ४२—४५, रामायणकथा। ४६, तीर्थप्रशंसा। ४७, रामकृष्णावतारः। ४८, कल्क्यवतारः। ४९, भूगोलवर्णनम्। ५०, नरसिंहप्रतिष्ठापद्धतिः। ५१, पुष्पादीनां पूजने विहिताविहितत्वकथनम्। ५२, वर्णधर्मकथनम्। ५३, वर्णाचारकथनम्। ५४, ब्रह्मचारिधर्मः। ५५, गृहस्थधर्मः। ५६, यतिधर्मः। ५७, तुरीयाश्रमधर्मः। ५८, योगाध्यायः। ५९, अर्चनस्थानादिनियमः। ६०, पूजनव्यवस्था। ६१—६२ विष्णुचेनकथनञ्चेति।

No. 1021. बृहन्नारदीयपुराणम्।

Substance, country paper, 14 × 3½ inches. Folia, 201. Lines, 6 on a page. Extent, 3467 s'lokas. Character, old Bengali. Date, Sk. 1620. Place of deposit, Navadvípa, Ajita Nyáyaratna. Another copy with Vrajanátha Vidyáratna of the some place. Appearance, old. Verse. Correct.

Bṛihannáradíya Puráṇa. An Upapuráṇa like the last, entitled the greater (Bṛihat), to distinguish it from the Náradiya, one of the Mahá or great Puráṇas. Curiously enough, none of the Bṛihannáradíya P. hitherto met with by Wilson and others (Vishṇu Puráṇa, I, p. 41) contains more than 3500 s'lokas like the MS. now under notice, whereas the Náradiya is said to comprise twenty five thousand verses. *Contents:* 1, Merit of hearing the Puráṇas. 2, Object of the Puráṇa. 3, Vishṇu's attribute of pervading the universe. 4, Story of Mrikaṇḍu. 5, Praise of the worshippers of Vishṇu. 6, Merits of Tulasi leaf, Ganges, Benares &c. 7-9, Story of Sagara. 10, 11, Story of Bali and the Dwarf incarnation. 12, Persons to whom gifts should be made. 13, Ritual for worshipping S'iva and Vishṇu. 14, The different hells described. 15, Story of Bhagiratha's bringing down the Ganges on the earth. 16, 17, Various fasts enjoined. 18, Gift of flags, wells, tanks, &c. 19, Rules of the Purṇimá fast. 20, Fast on the 11th of the month in certain months of the year. 21, Story of the Bhadrasíla who observed that fast. 22, Duties of the four castes. 23, Duties of Brahmacháris. 24, Rules regarding marriage. 25, Etiquette appropriate for householders. 26, Rules regarding S'ráddhas. 27, Rules regarding ceremonies when two lunar dates conjoin in the same day. 28, Expiations. 29, The way to the region of Yama described. 30, Transmigration. 31, Knowledge

and Yoga necessary for salvation. 32, Dispassion, how produced. 33, 34, Story of Devamálí and his death at Benares. 35, Salvation of Kalika, a hunter, and great sinner, by the recitation of the name of Hari. 36, Hymn to Vishṇu by Uttañka. 37, Merit of devotion to Vishṇu. 38, Characteristics of the several Yugas: the name of Hari, the only means of salvation in the Kali age: merit of hearing the Puráṇa.

Beginning. ॐ नमो भगवते वासुदेवाय । वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरम् ।
उपेन्द्रं सान्द्रकारुण्यं परानन्दं विभुं परम् ॥
ब्रह्मविष्णुमहेशाद्या यस्यांशा लोकसाधकाः ।
तमादिदेवं चिद्रूपं विशुद्धं परमं भजे ॥
सूत उवाच । शौनकाद्या महात्मानो ऋषयो ब्रह्मवादिनः ।
नैमिषाख्ये महारण्ये तपस्तेपे मुमुक्षवः ॥
जितेन्द्रिया जिताहाराः सन्तः सत्यपरायणाः ।
यजन्तः परया भक्त्या विष्णुमाद्यं जगद्गुरुम् ॥
अनीर्षा सर्वधर्मज्ञा लोकानुग्रहतत्पराः ।
निर्म्ममा निरहङ्काराः परेशरतमानसाः ॥
त्यक्तकामादिहजिना समाधिगुणसंयुताः ।
कृष्णाजिनोत्तरीयास्ते जटिला ब्रह्मचारिणः ॥
गृणन्तः परमं ब्रह्म जगच्चक्षुःसमौजसः ।
सर्वशास्त्रार्थतत्त्वज्ञास्तस्मिन्नैमिषकानने ॥
यज्ञैर्यज्ञपतिं केचित् ज्ञानैर्ज्ञानात्मकं परे ।
केचिच्च परया भक्त्या नारायणमपूजयन् ॥
एकदा ते महात्मानः समाजं चक्रुरुत्तमाः ।
धर्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ॥
षड्विंशतिसहस्राणां मुनीनामूर्द्धरेतसां ।
तेषां शिष्यप्रशिष्याणां सङ्ख्या वक्तुं न शक्यते ॥
मुनयो भावितात्मानो मिलितास्ते महौजसः ।
लोकानुग्रहकर्त्तारो वीतरागा विमत्सराः ॥
कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ।
कथं वा लभते मुक्तिर्नृणां तापार्त्तचेतसां ॥

कथं हरौ मनुष्याणां भक्तिरव्यभिचारिणी ।
केन सिद्ध्येत च फलं कर्मणस्त्रिविधात्मनः ॥
इत्येवं प्रष्टुमात्मानमुद्यतान् प्रेक्ष्य शौनकः ।
कृताञ्जलिर्महावाक्यमाहेदं विनयान्वितः ॥
शौनक उवाच । आस्ते सिद्धाश्रमे पुण्ये सूतः पौराणिकोत्तमः ।
यजन्मखैर्बहुविधैर्विश्वरूपं जनार्द्दनम् ॥
स एतदखिलं वेत्ति व्यासशिष्यो यतो मुनिः ।
पुराणसंहितावक्ता शान्तो वै लोमहर्षणः ॥
युगे युगे अल्पधर्मान् निरीक्ष्य मधुसूदनः ।
व्यासशिष्यस्वरूपेण वेदभागं करोति वै ॥
वेदव्यासमुनिः साक्षान्नारायण इति द्विजाः ।
शुश्रूमः सर्वशास्त्रेषु सूतस्तु व्यासशासितः ॥
तेन संशासितः सूतो वेदव्यासेन धीमता ।
पुराणानि स वेत्त्येव नान्यो लोके ततः परः ॥
यः पुराणार्थविल्लोके स सर्वज्ञः स बुद्धिमान् ।
स शान्तो मोक्षधर्मज्ञः कर्मभक्तिकलापवित् ॥
वेदवेदाङ्गशास्त्राणां सारभूतं मुनीश्वराः ।
जगद्धितार्थं तत् सर्वं (यः) पुरा सूक्तवान् मुनिः ॥
ज्ञानार्णवो वै सूतस्तु सर्वतत्त्वार्थकोविदः ।
तस्मात् तमेव पृच्छाम इत्यूचे शौनको मुनीन् ॥
ततस्ते शौनकं सर्वे मुनयो वाग्विदां वरं ।
समाश्लिष्य स्तुवन्तस्ते साधु साध्विति चाब्रुवन् ॥
अथ ते मुनयो जग्मुः पुण्यं सिद्धाश्रमं वनम् ।
मृगव्रजसमाकीर्णं मुनिभिः परिशोभितम् ॥
मनोज्ञभूरुहलताफलपुष्पाभिभूषितम् ।
आह्लादसरसां वृन्दमतिथ्यातिथ्यसङ्कुलम् ॥
तत्र नारायणं देवमनन्तमपराजितम् ।
यजन्तमग्निष्टोमेन ददृशू रोमहर्षणम् ॥
यथार्हमर्चितास्तेन सूतेन प्रथितौजसः ।
इच्छन्तस्तदवभृथं तत्र तस्थुर्मखालये ॥
अध्वरावभृथस्नातं मुनिं पौराणिकोत्तमम् ।

पप्रच्छु (स्ते) तथासीनं नैमिषारण्यवासिनः ॥
मुनय ऊचुः। वयन्त्वातिथयः प्राप्ता आतिथयोऽसि सुव्रत।
ज्ञातस्त्वेवोपचारेण पूजयास्मान् यथाविधि ॥
दिवौकसो हि जीवन्ति पीत्वा चन्द्रकलामृतम्।
ज्ञानामृतन्तु वहवो मुने त्वन्मुखनिःसृतम् ॥
येनेदमखिलं जातं यदाधारं यदात्मकम्।
यस्मिन् प्रतिष्ठितं तात यस्मिन् वा लयमेष्यति ॥
केन विष्णुः प्रसन्नः स्यात् स कथं पूज्यते नरैः।
कथं वर्णाश्रमाचारस्त्वातिथेः पूजनं कथम् ॥
सफलं स्याद् यथा कर्म मोक्षोपायः कथं नृणां।
भक्त्या किं प्राप्यते पुंभिस्तया भक्तिश्च कीदृशी ॥
वद सूतमुनिश्रेष्ठ सर्वमेतदशेषतः।
कथतो जायते तुष्टिः श्रोतुं त्वद्वदनामृतम् ॥
सूत उवाच। शृणुध्वमृषयः सर्वे यदिष्टं वो वदाम्यहम्।
गीतं सनत्कुमाराय नारदेन महात्मना ॥
पुराणं नारदीयाख्यं वृहद् वेदार्थसम्मितम्।
सर्वपापप्रशमनं दुष्टग्रहनिवारणम् ॥

End. अज्ञाद्वा यदि वा मोहाद् ये शृण्वन्तीदमुत्तमम्।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon. इति श्रीवृहन्नारदीये पुराणेऽष्टत्रिंशोऽध्यायः ॥०॥ समाप्तञ्चैतदिति ॥०॥

विषयः। इह अष्टत्रिंशदध्यायाः सन्ति। तत्र——१मे, पुराणश्रवणादावभिरोचना। २ये, एतत्पुराणकथने प्रवृत्तिहेतुः स्थाननिर्देशश्च। ३ये, विष्णोः सर्वमयत्वकथनम्। ४र्थे, मृकण्डुचरितवर्णनम्। ५मे, भगवद्भक्तानां माहात्म्यवर्णनम्। ६ष्ठे, गङ्गादीनां तुलस्यादीनां वाराणस्यादीनां च माहात्म्यकथनम्। ७मे, ८मे, ९मे, सगरोपाख्यानम्। १०मे, बलिकर्तृकेन्द्रपराजयः, अदितेस्तपः, बलिरचितसेनादीनां दाहश्च। ११शे, वामनावतारादिकथनम्। १२शे, दानपात्रनिर्णयः। १३शे, शिवविष्ण्वादीनां पूजनप्रकारादिः। १४शे, यमभगीरथसंवादे यथायथं नरकादिवर्णनम्। १५शे, भगीरथकर्तृकगङ्गानयनम्। १६शे, १७शे, विविधव्रतकर्मणामुपदेशः। १८शे, ध्वज-वापि-तड़ागदानादीनामुपदेशः। १९शे, पूर्णिमाव्रतादेः प्रयोगविधानम्। २०शे, शयनैकादश्यादीनां प्रयोगः फलादिकथनञ्च। २१शे, एकादशीव्रतशील-भद्रशीलोपाख्यानम्।

२२शे. सामान्यतश्चातुर्वर्ण्यधर्मकथनम्। २३शे, ब्रह्मचर्यधर्मकथनम्। २४शे, उद्वाहव्यवस्थादिः। २५शे, गृहिणां सदाचारकथनम्। २६शे, श्राद्धविधानम्। २७शे, उभयदिनप्राप्ततिथीनां कार्यविशेषे तिथिनिर्णयः। २८शे, प्रायश्चित्त-कथनम्। २९शे, यममार्गपरिचयकथनम्। ३०शे, पुनर्जन्मवृत्तान्तम्। ३१शे, मोक्षसाधनं ज्ञानं तदुपायश्च योगसाधनमिति निर्णीतम्। ३२शे, वैराग्यो-दयप्रकारः। ३३शे, देवमालिन उपाख्यानं वाराणस्यां तस्य शरीरपतनान्मोक्ष-वर्णनञ्च। ३४शे, आचारभ्रष्टवेदमालिनो हरिनामतः सद्गतिः। ३५शे, दुरात्मनः कलिकनामकव्याधस्य हरिनामप्रसादादुद्धारः। ३६शे, उत्तङ्ककृत-विष्णुस्तवः। ३७शे, विष्णुभक्तिफलवर्णनम्, विष्णुभक्तिप्रसादादेव इन्द्रादीना-मिन्द्रत्वलाभादिवर्णनञ्च। ३८शे, युगधर्मः, कलिधर्मः, हरिनामैवैकः कला-वुद्धारोपायः, बृहन्नारदेतिनामकारणम्, एतस्य पुराणस्य पाठश्रवणयोः फलकथनञ्चेति॥

No. 1022. अध्यात्मसारः।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 10. Lines, 15 on a page. Extent, 487 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct.

Adhyátmasára. A treatise on Vedántic theosophy, and salvation through the medium of knowledge or Jnána, including various rules for the observance of those who have acquired divine knowledge. By Tírtha Svámí. The work comprises twenty-one sections.

Beginning. नमामि गुरुमात्मानं त्वमहंशब्दगोचरम्।
त्वमहंशब्दनिर्मुक्तं यत्तत्पदविवर्जितम्॥ अस्यार्थः——

End. याज्ञवल्क्यः। क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा स्मृता।
यतिस्मृतौ। ब्रह्महा स्वर्णहर्त्ता च सुरापो गुरुतल्पगः।
उपपातकिनश्चैव मुच्यन्ते ज्ञानभिक्षुकाः॥

Colophon. इति तीर्थस्वामिकृतसङ्क्षेपाध्यात्मसारः। ऐक्यमतसङ्ख्या तु—सोम दिगम्बर-जैन-कापिलक बौद्ध-चार्वाक-मीमांसा-सात्वत-साङ्ख्य-पातञ्जल-भाट्ट-न्यायाः॥१२॥ गौणमतानि तु—योगाचार-षट्तीर्थिक-माध्यमिक-शिक्षा-कल्प-निरुक्त-रामा-

मुज-माध्व-सनक-वाजसनेयि-माध्यन्दिना-ऽऽरुणि-वैशेषिक-तन्त्र-पुराणा-ऽऽथर्व-शास्त्र-गान्धर्व-दशप्राकृत-गौणषड्बौद्ध-स्वेच्छात्मकानि ॥ २४ ॥ ४६ ॥

विषयः। इहैकविंशतिपरिच्छेदाः सन्ति। तथा हि—१, ज्ञानिव्यवहारः। २, बद्धाभावः। ३, समाधिलक्षणम्। ४, समाश्रभावः,। ५, मायाभावः। ६, मानाभावः। ७, प्राप्तात्मत्वम्। ८, विधिनिषेधाभावः। ९, आचाराभावः। १०, वाह्यतीर्थनिन्दा। ११, वाह्यवेदनिन्दा। १२, पूजासन्ध्याध्यानानि। १३, गुरुतत्त्वकथनम्। १४, योगादितत्त्वम्। १५, कर्म्मनिन्दा। १६, १७, ज्ञानकर्म्मणोरसामञ्जस्यम्। १८, तर्कदोषः। १९, तत्राकाशादेर्जन्यत्वम्। २०, २१, शान्तिवैराग्ये, ज्ञानमहिमा चेति।

No. 1023. पदार्थतत्त्वम्।

Substance, country-made yellow paper, 16 × 3 inches. Folia, 6. Lines, 5 on a page. Extent, 131 s'lokas. Character, Bengali. Date, Sk. 1745. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, new. Prose. Correct.

Padártha-tattva. A Nyáya dissertation on time, space, mind, matter, and other categories. By Siromaṇi Bhaṭṭáchárya.

Beginning. अथ पदार्थतत्त्वं निरूप्यते। तत्र—दिक्कालौ नेश्वरादतिरिच्येते। मानाभावात्।

End. तस्मात् कार्य्यत्वं कारणत्वञ्च उभयमेवातिरिक्तमिति कृतं पल्लवितेन।

अर्थानां युक्तिसिद्धानां महत्त्वानां प्रयत्नतः।
सर्वदर्शनसिद्धान्तविरोधो नैव दूषणम्॥
अर्था + + क्ता सिद्धान्तविरोधेनापि पण्डिताः।
विना विचारं न त्याज्या विचारयत यत्नतः॥
सर्वशास्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान्।
इदं याचे मदुक्तानि विचारयत सादरम्॥
रीतिरेषा न दोषाय सेविता पूर्वसूरिभिः।
यन्नियुक्तिविचाराय याचन्ते विदुषोऽपरान्॥

Colophon. इति महामहोपाध्यायशिरोमणिभट्टाचार्यविरचितं पदार्थतत्त्व समाप्तम्॥

विषयः । नैयायिकसिद्धान्तितानां दिक्कालादीनां खण्डनम्, अन्यान्यदर्शनसिद्धानां स्वत्वादीनां कतिपयानां स्वीकरणञ्च। तथा हि——दिक्कालो न । श्रोत्रं न। मनो न। परमाणुर्न। द्व्यणुको न। रूपादीनां इन्द्रियग्रहणायोग्यत्वं न। पृथक्त्वं न गुणान्तरम्। परत्वापरत्वे गुणान्तरे न। विशेषो पदार्थान्तरं न। चित्रं नातिरिक्तं रूपम्। स्पर्शोऽपि चाव्याप्यवृत्तिः। कर्मापि चाव्याप्यवृत्ति। अभावस्यानुगतप्रतीतिसिद्धोऽखण्डोपाधिः। गुणत्वं न जातिः।— स्वत्वं पदार्थान्तरमेव। शक्तिरप्यतिरिच्यते। सङ्ख्या च पदार्थान्तरं न तु गुणः। कार्यत्वं पदार्थान्तरम्। कारणत्वञ्च पदार्थान्तरम्। इति। (अस्यैव हि टीका १६५ सङ्ख्यान्विता।)

No. 1024. छान्दोग्यमन्त्रभाष्यम्।

Substance, country-made yellow paper, $18\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 24. Lines, 15 on a page. Extent, 2340 s'lokas. Character, Bengali. Date, Sk. 1694. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Another copy with Vrajanátha Vidyáratna. Appearance, old. Prose. Correct.

Chhándogya-mantra Bháshya. This is a better and complete codex of the work noticed under No. 491, (ante vol. I, p. 7.) The author of the commentary is Guṇavishṇu.

Beginning. शङ्कराय नमस्तस्मै भक्तानां यत्प्रसादतः।
सूक्ष्मान्तर्हितदूरस्था भावा भान्ति यथाश्रुताः॥
स्थाणुरिव भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्————
ॐ क्रव्यादमग्निम्————यजुरिदम्————

End. ॐ अङ्गुष्ठमात्रः पुरुषः अङ्गुष्ठञ्च समाश्रितः।
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक्॥
————प्रीणातु इत्याशंसावाक्यार्थः॥

Colophon. इति छान्दोग्यमन्त्रभाष्येऽष्टमः खण्डः॥ (अयञ्चाष्टमः खण्डः द्वितीयप्रपाठकीयो बोध्यः।)
तत्तद्धर्मप्रयोगार्थं पाठस्खलनभीरुणा।
गुणविष्णुना छान्दोग्यमन्त्रभाष्यं व्यधीयत॥

विषयः। छान्दोग्यानां अथवा सामवेदिनां विवाहादिसंस्कारेषूपयुक्तानां मन्त्राणां व्याख्यानम्॥

No. 1025. प्रागुद्धारसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 13. Lines, 15 on a page. Extent 509 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Práguddhára-sangraha. A dissertation on the non-dual theory as developed severally in the Vedánta, the Tantras, the Smritis and other works, and on salvation, and the best means of attaining it. By Tírtha Svámí. The work is divided into 37 chapters.

Beginning. सर्वशब्दः सर्वस्वरूपं तद्धीनमेव यत्।
तदहं नाहमेवापि न जाने जान एव च ॥

End. मनुस्वर्गखण्डयोर्मते शरीरधारणमात्मनः क्रीड़ा तेन जन्म सम्भवति ॥

Colophon. इति तीर्थस्वामिकृतप्रागुद्धारसङ्ग्रहः समाप्तः ।

विषयः । इह सप्तत्रिंशत्परिच्छेदाः । तथा हि——१, तान्त्रिकाद्वैतम्। २, श्रौताद्वैतम्। ३, स्मार्त्ताद्वैतम्। ४, पौराणिकाद्वैतम्। ५, आगस्त्याद्यद्वैतम्। ६, साङ्कलिताद्वैतम्। ७, ब्रह्मणि नानामतम्। ८, प्रशंसानिन्दे। ९, योगगणना। १०, तत्र ज्ञानयोगमतानि। ११, जीवन्मुक्तिद्वैविध्यम्। १२, उपासनालक्षणम्। १३, गुर्वादिचिन्तनम्। १४, तत्र गुरुपदशक्तिः। १५, योगध्यानसमाधयः। १६, अज्ञानान्यत्वम्। १७, वेदस्य ज्ञेयत्वम्। १८, देहतत्त्वम्। १९, इन्द्रियतत्त्वम्। २०, ऐश्वर्यतत्त्वम्। २१, आत्मविकारस्यात्मत्वम्। २२, द्वैतस्थापनम्। २३, सारयोगादिः। २४, सार्वात्म्यम्। २५, आत्मकोषः। २६, चिन्ताविकल्पः। २७, निरवयवधर्मगणना। २८, आत्मलक्षणम्। २९, चिन्तात्यागः। ३०, अद्वैततुच्छत्वम्। ३१, मुक्तिकारणविकल्पः। ३२, रागाद्दोषः। ३३, संसारत आत्मलाभः। ३४, तत्र महाभूततत्त्वम्। ३५, प्रणवतत्त्वं। ३६, शास्त्रगणना। ३७, गीतागूढार्थश्चेति।

No. 1026. तत्त्वसूत्रम्—तत्त्वसूत्ररत्नञ्च ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folium, 1. Lines, 30. Extent, 54 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nayáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Tattva-sútra with a commentary entitled *Tattva-sútra-ratna.* A series of twenty-six aphorisms on the leading subjects of the Vedánta, viz. Intellect, Soul, Guru, mukti, Prakriti, the elements, &c., with a commentary. By Tírtha Svámí.

Beginning. मूलस्य——अथ चैतन्यम् ॥ १ ॥
टीकायाः——भाववाचिप्रत्ययान्तस्य बोधार्थकधातोरित्यादिः ।
End. मूलस्य——एतैः सर्वे उक्ताः सर्वं उक्ताः ॥ २६ ॥
Colophon. इति श्रीतीर्थस्वामिलब्धं तत्त्वसूत्रं समाप्तम् ।
टीकायाः——इत्याद्यगस्तीयशक्तिसङ्गमतन्त्रवाशिष्ठेराक्तं चिन्त्यम् ।
इति श्रीतीर्थस्वामिकृतं तत्त्वसूत्ररत्नं समाप्तम् ॥
विषयः । इह षड्विंशतिसूत्राणि सन्ति । तत्राद्यैः पञ्चविंशतिसूत्रैः——
चैतन्य—आत्मा—ब्रह्म—गुरु—मुक्ति—प्रकृति—देवदेवी—आकाश—वायु—ज्योतिः—भाव—वेद—जीव—जल—अचला—मन्त्र—शास्त्र—अक्षर—प्राण—मनः—बुद्धि—अहं—त्वं—अभाव—माया—जगत्—अविद्या—इन्द्रिय—देहेत्यूनत्रिंशत्-पदार्थानां सङ्क्षेपतो लक्षणनिर्वचनम्; अन्त्येन तु सूत्रेणानुक्तमानानां लक्षणसङ्ग्रहश्चेति ॥

No. 1027. शाक्तसर्वस्वम् ।

Substance, country-made yellow paper, $11\frac{1}{3} \times 4\frac{1}{2}$ inches. Folia, 6. Lines, 13—14 on a page. Extent, 342 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

S'ákta-sarvasva. An attempt to reconcile the principles of the S'ákta cult with the Vedánta doctrine, or the metaphysics of the Tantra reduced to a philosophical system. By Tírtha Svámí. The work comprises eleven chapters.

Beginning. ॐ ॥ भक्तिः सिद्धेर्गरीयसीत्यत्र सिद्धेः सम्बन्धे भक्तिरेव गरीयसी न तु कर्मादि गरीयः ।
End. विचारदशायां किञ्चित् किञ्चिदन्यमन्यमानाः ॥
Colophon. इति श्रीतीर्थस्वामिकृतं शक्तिसर्वस्वं समाप्तम् ॥

विषयः । इह एकादशपरिच्छेदाः । तथा हि——१, सात्वतीयशब्दार्थः । २, पूजकादीनां ज्ञेयवस्तु । ३, अंशांशिनोरभेदः । ४, अन्तकालीनस्मरणम् । ५, कात्यायनीनिरूपणम् । ६, भक्तितत्त्वम् । ७, मायातत्त्वम् । ८, साक्षात्करणोपायः । ९, आगममान्यम् । १०, आत्मतत्त्वम् । ११, तैर्थिकतत्त्वञ्चेति ।

No. 1028. विचारार्कसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 7. Lines, 14 on a page. Extent, 324 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Vichárárka-saṅgraha. Dissertations on various topics of theology and metaphysics, such as the purport of Víjamantras, the object of the Gitá, Tantras treating of the Vedántic doctrine, expiations, nature of salvation, the true meaning of nonduality, characteristics of transcendental meditation, the highest object of humanity, defects of the Sáṅkhya system, &c. By Rámánanda. The work is arranged under 27 sections.

Beginning. ध्यात्वा गुरुपदद्वन्द्वमालोक्यानेकपुस्तकम् ।
रामानन्दोऽद्वन्द्वनाम्ना विचारार्कं करोम्यहम् ॥

End. रस इत्यास्तिकाः केचित् काम इत्यपरे जनाः ।

Colophon. इति विचारार्कसङ्ग्रहः समाप्तः ॥

विषयः । इह सप्तविंशतिपरिच्छेदाः । तथा हि——१, महावाक्यार्थः । २, गीतार्थः । ३, वेदान्तीयतन्त्राणि । ४, प्रायश्चित्तानि । ५, आत्ममुक्त्योरैक्यम् । ६, गानप्रशंसा । ७, कारणसूक्ष्मता । ८, अद्वैतव्युत्पत्तिः । ९, समाधिलक्षणम् । १०, परमतत्त्वम् । ११, विरोधाभासः । १२, साङ्ख्यदोषः । १३, सात्वतमीमांसा । १४, त्रिदेवैक्यम् । १५, शिवादिलिङ्गतत्त्वम् । १६, नखज्योतिस्तत्त्वम् । १७, अंशलमीमांसादि च । १८, कल्पितशास्त्रे दोषः । १९, कलिधर्मः । २०, जीवन्मुक्तिविभागः । २१, महाभूतगुणाः । २२, स्थितितत्त्वम् । २३, ध्यानतत्त्वम् । २४, अक्षरतत्त्वम् । २५, योगव्युत्पत्तिः । २६, आत्मतत्त्वम् । २७, रसविवरणञ्चेति ।

No. 1029. सङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 4. Lines, 14 on a page. Extent, 185 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Sañgraha. A collection of the leading passages on Metaphysics to be found in the Mahábhárata and other standard works. Anonymous.

Beginning. ओं । महाभारते युधिष्ठिरं प्रति भीष्माद्यः ।
यदि सन्न्यासतः सिद्धिं राजन् कश्चिदवाप्नुयात् ।
पर्वताश्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः ॥

End. एतत्सर्वं तितीर्षुभिर्भाव्यम् ॥०॥

विषयः । महाभारतादिभ्यस्तत्त्वविषयकवचनानां सङ्ग्रहः ।

No. 1030. वाशिष्ठसारः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 4. Lines, 14 on a page. Extent, 156 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Vás'ishṭha-sára. An abstract of the philosophical portion of the Yogavás'ishṭha Rámáyaṇa. By Tírtha Svámí.

Beginning. ओं । भरद्वाजं प्रति वाल्मीकिवाक्यम् ।
भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अपुनः स्मरणं साधो मन्ये विस्मरणं वरम् ॥

End. दशप्रकरणैस्त्रिंशत्या सार उद्धृतः ॥

Colophon. इति तीर्थस्वामिकृतवाशिष्ठसारे चतुर्थः पादः समाप्तः ॥

विषयः । सङ्गृहीतोऽयं ग्रन्थः । अत्र योगवाशिष्ठात् सारवचनान्युद्धृत्य स्थापितानि, तेषु च चत्वारः पादा व्यवस्थिताः ।

No. 1031. वाशिष्ठीयगूढार्थः ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 3. Lines, 14 on a page. Extent, 117 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Vás'ishṭhíya-gúḍhártha. A commentary on the last named work, by its author Tírtha Svámí.

Beginning. हरिगुरुशिवशक्ती मन्त्ररूपोऽहमात्मा
मन इव तनुवच्च स्तोत्रमोचातिबोधः ।
सकलजगदशेषाकाररूपोऽहमेवा-
चिदपि तदपि भावाभावशिष्यप्रशिष्यः ॥
अथ वाशिष्ठीयगूढार्थः । सर्वत्र सञ्ज्ञाशब्दा आख्यायिका दृष्टान्ताश्च प्रतीत्यभि-
प्रायिका इति चीरस्वामिनः ॥

End. उक्तव्याख्यानानां प्रमाणानि विष्णुसहस्रनाम-सातत्यचतुष्क-ब्रह्मविवर्त्त-रुद्राध्या-
यानां टीकासु लिखितानि । शब्दशास्त्रतत्त्वश्चादितत्त्वे लिखितम् ॥

Colophon. इति श्रीतीर्थस्वामिकृतसङ्क्षेपवाशिष्ठसारगूढार्थः समाप्तः ॥

विषयः । स्वसङ्गृहीतवाशिष्ठसारस्य व्याख्यानम् ।

No. 1032. विष्णुसहस्रनामटीका ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 11 on a page. Extent, 154 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Vishṇu-sahasranáma Ṭíká. A gloss on S'aṅkara's commentary on the hymn to Vishṇu comprising his thousand names as given in the Bhágavata Puraṇa. By Tírtha Svámí.

Beginning. नत्वा श्रीशङ्कराचार्यं सहस्रनामदीपकं ।
तट्टीकामवलम्ब्यैतां नामव्याख्यां करोमि च ॥
श्लेषादरादिसिद्धानि पदान्यत्र बहूनि च ।
उपेक्षणीयानि तानि साधनान्यल्पसङ्ग्रहे ॥

End. नाम-समाप्तत्वादन्यनाम्नो द्विरावृत्तिः । न क्रोधः अक्रोधादयो भवन्ति मात्सर्येञ्च न भवति । अनेन वर्त्मना श्रीरामश्रीशिवनाम्नाञ्च व्याख्या समर्था ॥

Colophon. इति श्रीतीर्थस्वामिकृतश्रीविष्णुसहस्रनामव्याख्या समाप्ता ॥

विषयः । विष्णुसहस्रनामव्याख्यानम् ।

No. 1033. भागवतसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 23. Lines, 13 on a page. Extent, 934 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Bhágavata-sañgraha. An abstract of the philosophy of the Bhágavata Puráṇa. By Tírtha Svámí.

Beginning. श्रीमद्भागवते ग्रन्थे साक्षाद् ब्रह्ममतिर्मम ।
पुनश्च सङ्ग्रहं कुर्वे द्वितीयसङ्ग्रहात् परम् ॥
यं ब्रह्मेत्यादि वा । जन्माद्येत्यादि । धर्म इत्यादि । निगमकल्पतरोरित्यादि ।
यं प्रव्रजन्तमित्यादि । यः स्वानुभावमित्यादयः । प्रसिद्धाः । मुनय ऊचुः ।
देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ।
भार्यायामिति । पञ्चम्यां षष्ठी वा । यथार्थस्य, तत्कथय ।

End. चुम्बुकेनापठज्ञेन (?) न श्रोतव्यं कदाचन ।

Colophon. इति तीर्थस्वामिकृतभागवतहृत्सङ्ग्रहः समाप्तः ।

विषयः । भागवतीयसारवाक्यानां स्मरणाय सङ्ग्रहः ।

No. 1034. भावार्थदीपिकासङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 6. Lines, 15 on a page. Extent, 337 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Bhávártha-dípiká-sañgraha. Explanations of some of the leading passages of the *Bhávártha-dípiká*, a work on the purport of the Bhágávata Puráṇa. Anonymous: probably a work of Tírtha Svámí.

Beginning. भावार्थदीपिकामध्येऽन्येषां व्याख्या क्वचित् क्वचित् ।
तन्मतस्य विरुद्धाख्याः किञ्चित् किञ्चिदुपेक्षितम् ॥
सर्वत्र लिखनं दृष्ट्वा बोद्धव्यं बुद्धिमत्तमैः ।
मया सङ्गृह्यते किञ्चिद् यद् यत् तस्य मतं दृढम् ॥
आभासेन स्तोक ऊह्योऽनन्विते शेष उत्तमैः ।
ब्रह्मविद्यारूपमेतत् पुराणमिति दर्शितम् ॥
अत एवापरं भागवतं नाशङ्कनीयम् । क्वचित् पुराणान्तरमिति नाशङ्कनीयं ।
अहैतुकं तर्काद्यगोचरमौपनिषदमित्यर्थः । ननु भक्तिद्वारेण ॥ १।२।८ ॥
श्रुतेन वेदान्तादिश्रवणेन ॥ १।२।१२ ॥

End. भगवानैश्वर्यादिषड्गुणः ।

Colophon. इति भावार्थदीपिकासङ्ग्रहः ।

विषयः । भागवतीयमतानां सव्याख्यानानां सङ्ग्रहः ॥

No. 1035. भागवतमञ्जरी ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 4. Lines, 14 on a page. Extent, 210 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Bhágavata-mañjarí. A dissertation on the nature and contents of the Bhágavata Puráṇa. By Tírtha Svámí.

Beginning. श्रीभागवतस्य गायत्र्या समारम्भत्वाद् यं ब्रह्मेत्यादिस्तोकस्यामूलकत्वमायाति तथापि ग्रन्थवहिर्भूतत्वात् पाठे न दोषः, (?) ग्रहणपुरश्चरणे स्नानसङ्कल्पादिवत् ।

End. यद्यपि नारदीयपूर्त्त्यर्थं सप्तसहस्रमधिकं तथापि स्वामिनाष्टादशसहस्राणि गणितानि वाचनिकसङ्ख्यारक्षार्थम् ।

Colophon. इति श्रीतीर्थस्वामिकृता भागवतमञ्जरी समाप्ता ॥

विषयः । भागवतीयविचारसङ्क्षेपः ।

No. 1036. अद्वैतनिर्णयसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 2. Lines, 10—14 on a page. Extent, 96 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Advaita-nirṇaya-sañgraha. An attempt to identify Vishṇu, S'iva, &c. with the Supreme Bramha. By Tírtha Svámí.

Beginning. प्राचीयविष्णुसहस्रनामटीकायां——देवदेवं जगद्गुरुमित्यत्र परशुरामाद्यवतारेण विष्णुना महादेवाराधनम् ।

End. भक्तिसाधनस्य बहुप्रमाणानि नात्र धृतानि ॥

Colophon. इति श्रीतीर्थस्वामिकृतौ सङ्ग्रहौ समाप्तौ ।

विषयः । शिवविष्ण्वादीनां ब्रह्मैक्यप्रमाणानि ।

No. 1037. दीपिकाप्रकरणक्रमसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 3. Lines, 15 on a page. Extent, 18 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Dípiká-prakaraṇa-krama-sañgraha. An analytical index to the author's Bhábártha-dípiká-sañgraha on the principles of the Vedánta. By Tírtha Svámí.

Beginning. अथ भावार्थदीपिकासङ्ग्रहस्य प्रकरणविभागः । स्थलनिर्णयसङ्केतः क्रमसङ्ग्रहे । तत्र वेदान्तस्य तात्त्विकत्वम् ।

End. शिवत्वेन नामकथने गुरुपदम् ॥

Colophon. इति श्रीतीर्थस्वामिकृतदीपिकादिमङ्ग्रहस्य प्रकरणं समाप्तम् ॥

विषयः । स्वकृतभावार्थदीपिकायाः सविचारसूचीविशेषः ।

No. 1038. सहस्रनाममालाकला ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 6. Lines, 14 on a page. Extent, 262 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Sahasra-náma-málá-kalá. Explanations of the more important words in forty-three hymns, by the author, in praise of the thousand names of Bhuvanes'varí, Annapurṇá, Mahá-lakshmí, Durgá, Káli, Tárá, Tripurá, Bhairaví, Chhinnamastá, Mátangí, Sumukhí, Sítá, S'iva, Ráma, Krishṇa, and Vishṇu. By Tírtha Svamí.

Beginning. तत्र प्रायशस्तटस्थानि नामानि कानि तु स्वरूपाभासानि ।

End. हयशीर्षः । हयरूपो हयग्रीवः पन्था च उच्चैःश्रवाश्च । इति कृष्णः ।

Colophon. इति श्रीतीर्थस्वामिकृतनाममालायास्तत्कृतनामकला समाप्ता ॥

विषयः । स्वसङ्कलितत्रिचत्वारिंशत्सङ्ख्याकेषु सहस्रनामस्तोत्रेषु यानि नामानि गूढार्थानि तान्येवेह व्याख्यातानि । तानि च सहस्रनामस्तोत्रान्तर्गतानि, यथा— भुवनेश्वर्याः १ । अन्नपूर्णायाः २ । महालक्ष्म्याः १ । दुर्गायाः ७ । काल्याः ४ । तारायाः ५ । त्रिपुरायाः ३ । भैरव्याः २ । छिन्नमस्तायाः १ । मातङ्ग्याः १ । सुमुख्याः १ । सीतायाः २ । शिवस्य ७ । रामस्य २ । कृष्णस्य २ । विष्णोः २ । इति ४३ ॥

No. 1039. कादिसहस्रनामकला ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 2. Lines, 42 on a page. Extent, 57 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Kádi-sahasra-náma-kalá. A gloss on a hymn comprising one thousand names of Kálí. The hymn is an extract from the Mahá-kála-sañhitá. By Tírtha Svámí.

Beginning. शक्तिपातः, अष्टादशशक्तीनामशीतिशक्तीनां वा पतनं साधकवश्यता ।

End. सर्वेषां वीरादीनां सिद्धिः सर्ववीरादिसिद्धिः ॥

Colophon. इति कादिसहस्रनामकल्प समाप्त ॥

विषयः । महाकालसंहितोक्ते ककारादिवर्णक्रमगते काल्याः सहस्रनामस्तोत्रे यानि गूढार्थानि पदानि तेषां व्याख्यानम्।

No. 1040. भागवततत्त्वसङ्ग्रहः ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 12 on a page. Extent, 232 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Bhágavata-tattva-sañgraha. A dissertation, in seven chapters, on the philosophy of the Bhágavata Puráṇa. By Tírtha Svámí.

Beginning. अथ श्रीभागवतोक्तमायातत्त्वम् । मायया ब्रह्मणो लीलया ।

End. विधिशिवमाहात्म्यतो हरेरधिकमाहात्म्यकथनञ्च ॥

Colophon. इति श्रीतीर्थस्वामिकृतभागवततत्त्वसङ्ग्रहः समाप्तः ॥

विषयः । श्रीभागवतात् तत्त्ववचनादीनि सङ्गृह्य गूढार्थव्याख्यानसहितानीह कृतानि । अत्र हि सप्तपरिच्छेदाः । यथा——१, मायातत्त्वम् । २, दुर्गातत्त्वम् । ३, शिवतत्त्वम् । ४, निर्घण्टसङ्ग्रहः ५, आत्मादितत्त्वम् ६, नानावक्त्रादेर्हेतुः । ७, भागवततात्पर्य्यञ्चेति ।

No. 1041. शान्तिसन्दर्भः ।

Substance, country-made yellow paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folium, 1. Lines, 26. Extent, 48 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

S'ánti-sandarbha. An explanation of the purport of the poem called S'ánti-s'ataka. By Tírtha Svámí.

Beginning. शान्तिशतकव्याख्या प्राक्कृता पुनः किञ्चिल्लिख्यते । मिश्रो विरक्तस्तपस्वीज्ञान-
सन्न्यासी तत्कृतस्य मान्यत्वमेव ।

End. आर्याच्छन्दः सुच्छन्दो न कृतं विरक्तत्वात् ॥

Colophon. इति श्रीतीर्थस्वामिकृतशान्तिसन्दर्भः समाप्तः ॥
(अत्र शेषपङ्क्तिचतुष्टये भागवततात्पर्यं लिखितमस्ति)

विषयः । शान्तिशतकस्य गूढार्थव्याख्यानम् ।

No. 1042. शान्तिशतकसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folium, 1. Lines, 27. Extent, 54 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct.

S'ánti-s'ataka-sañgraha. An exposition of the main object of the S'ánti-s'ataka. By Tírtha Svámí.

Beginning. फलं कामायत्तं किममरगणैः किञ्च विधिना ।
विधेयं यत्तत्त्वं स्फुरति मम नाद्यापि हृदये ।
विधेयं स्वं स्वं रूपमपि न स्फुरति——

End. पूर्वं तावदित्यादिना यौवने धनसाधनं वार्द्धक्ये प्रत्याहार इति ज्ञापितम् ।

विषयः । शान्तिशतकस्य तात्पर्यवर्णनम् ।

No. 1043. नामसङ्ग्रहः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 3. Lines, 13—14 on a page. Extent, 162 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct.

Náma-sañgraha. Hymns comprising the leading names of Vishṇu, S'aktí, &c. By Tírtha Svámí.

Beginning. भुवनेशी । दृढचत्वरवासिनी । इन्द्राणी । इन्द्रकन्या च ।

End. तस्माद् वेश्या परा मता ।

Colophon. इति श्रीतीर्थस्वामिकृतनाममालासङ्ग्रहः ।

विषयः । शक्तिविष्ण्वादीनां नामसङ्ग्रहः ।

No. 1044. वेदस्तुतिलघूपायः ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folium, 1. Lines, 25. Extent, 40 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Vedastuti-laghúpáya. A summary of the contents of the Veda-stuti section of the Bhágavata Purána. By Tírtha Svámí.

Beginning. श्रुतिस्तुतिटीका प्राक् कृता पुनः किञ्चिल्लिख्यते । ब्रह्मन्नित्यादि ।

End. व्याख्यातं इत्यत्सङ्ग्रहे च बहुस्थलेषु मीमांसा ॥

Colophon. इति तीर्थस्वामिकृतवेदस्तुतिलघूपायः ॥

विषयः । वेदस्तुतिव्याख्यापरिशिष्टम् ।

No. 1045. चण्डीविवरणम् ।

Substance, country-made yellow paper, 11½ × 4½ inches. Folia, 3. Lines, 13 on a page. Extent, 141 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Chandí-vivarana. A summary of the contents of the chapters of the Márkandeya Purána which describe the wars of the goddess Chandí with certain demons. By Tírtha Svámí. An English translation of the Chandí was published in Calcutta some fifty years ago by Cavelli Bentaka Boriah, an assistant of the late Colonel Mackenzie for some time Surveyor General of India, who made a large collection of MSS., and illustrations of oriental antiquarian objects. The Chandí is held in right veneration by the followers of the S'ákta creed, and is religiously read on ceremonial occasions.

Beginning. अर्गलया वक्तुनामर्थ्यदो न सर्वत्र लभ्यो भूमिकाषट्श्लोकाः क्वचित् क्वचिद् दृश्यन्ते ते स्वतन्त्राः ।

End. वैश्रवर्य । श्रेष्ठदानादानवाक्यं दातृयाचकयोर्वचः ॥ देवीमाहात्म्यं समाप्तम् ॥

Colophon. इति चण्डीविवरणं समाप्तम् ॥

विषयः । अर्गलादिदेवीमाहात्म्यात्मकमार्कण्डेयपुराणान्तर्गतसप्तशतश्लोकेषु गूढार्थानां व्याख्यानम् ।

No. 1046. आनन्दकुसुमम् ।

Substance, country-made yellow paper, 11½ × 9¼ inches. Folia, 7. Lines, 13 on a page. Extent, 284 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Correct. Notes on the margin.

Ánanda-kusuma. A Dissertation, in ten chapters, on some of the leading topics of the Vedánta Philosophy. By Tírtha Svámí.

Beginning. अथाद्यन्तभयध्वंसोपायं वच्यामि सङ्ग्रहात् ।
निर्णीय निखिलाध्यात्मशास्त्राणि हि पुनः पुनः ॥

End. यदेवेह तदमुत्रेत्यादिस्वरूपभागस्तुरीयशास्त्रं तत्राहमाकारब्रह्माकारयोरभावः ॥

Colophon. इति श्रीतीर्थस्वामिकृतानन्दकुसुमं समाप्तम् ॥

विषयः । इह दशपरिच्छेदाः सन्ति । तथा च——मायाभावोपायः १ । सुखोपायः २ । गुप्तकालः ३ । स्मृतिमिथ्या ४ । तन्त्रसङ्ग्रहः ५ । व्यासमतम् ६ । पापाभावः ७ । शक्तिगणना ८ । ज्ञानसाधनम् ९ । शास्त्रभागश्चेति दश ॥

No. 1047. प्रेमभक्तिस्तोत्रम् । प्रेमभक्तिस्तोत्रव्याख्या च ।

Substance, country-made yellow paper, 11½ × 9½ inches. Folium, 1. Lines, 44. Extent, 94 s'lokas. Character, Bengali. Date, Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose and verse. Generally correct.

Prema-bhakti-stotra, with a commentary entitled *Prema-bhakti stotra-vyákhyá.* A hymn in praise of Chaitanya, the saint of Nadíyá, who is accepted by his followers as an incarnation of the Deity. By Rámánanda Tírtha. The commentary is by the author himself, and in it he adduces proofs from the S'ástra in support of the identification of Chaitanya with the Supreme Spirit. The author is the same who is generally known by the name of Tírtha Svámí.

Beginning. मू०——नित्यानन्दाभिधानः सकलसुखकरः केवलानन्दरूपो
विष्णुस्वाद्वैतनामा निरवधि भजति प्रेमभावैकसारैः ।
हृष्टा गङ्गोत्तमाङ्गा चिपति शतदलं यस्य पादारविन्दं
तं चैतन्याख्यरूपं तरुणरविरुचिं प्रेमबीजं भजेऽहम् ॥ १ ॥
टी०——नित्यानन्दः शक्तियुक्तेश्वरः ।

End. मू०——य इदं पठति स्तोत्रं प्रेमभक्त्येककारणम् ।
प्रेमभक्तिर्भवेत् तस्य सत्यं सत्यं न संशयः ॥

Colophon. इति श्रीरामानन्दतीर्थस्वामिकृतप्रेमभक्तिस्तोत्रं समाप्तम् ।
टी०——वासुदेवस्य द्वे मूर्त्ती चरञ्चाचरमेव च ।
चरं सन्न्यासिनां प्रोक्तमित्यादि च चिन्त्यम् ।
इति श्रीरामानन्दतीर्थस्वामिकृतप्रेमभक्तिस्तोत्रव्याख्या समाप्ता ॥०॥

विषयः । नवद्वीपजन्मनो गौरविग्रहस्य चैतन्यदेवस्य माहात्म्यकथनं, पश्चान्तरे अध्यात्मविषयकथनम् ।

No. 1048. मन्त्रकौमुदी ।

Substance, country-made yellow paper, $18\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 8. Lines, 15 on a page. Extent, 472 s'lokas. Character, Bengali. Date, Sk. 1694. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct.

Mantra-kaumudí. A collection of the Vedic mantras including the Gáyatrí required in the performance of modern religious rites, with their meanings, purport, and uses explained at length. By Rámakṛishṇa.

Beginning. नमस्कृत्याखिलैर्मन्त्रैर्बोध्यं श्रीपरमेश्वरम् ।
तन्यते रामकृष्णेन रम्येयं मन्त्रकौमुदी ॥
यद्दीतुं दुःशको भावो लोकोक्तेरपि यद्यपि ।
यथोपस्थितिमन्त्राणां तथाप्यर्थः प्रकाश्यते ॥ यथाह भट्टः——

End. एवं परचेति वदन्ति ॥ ० ॥

Colophon. इति चतुर्दशान्तिमन्त्रव्याख्या । समाप्तश्चायं ग्रन्थः ।

विषयः । वैदिककर्म्मणि प्रयुक्तानां वैदिकमन्त्राणां छान्दोग्यभाष्येऽनधिकृतानां व्याख्यानम् । तत्र प्रथमं तावत् विधिवादः । ततो घटस्थापनादिमन्त्रव्याख्या, गणेशादि-पञ्चदेवमन्त्राणां व्याख्या, अधिवासमन्त्राणां व्याख्या, गायत्रीव्याख्यानपूर्वकं चतुर्द्दशाग्निमन्त्रव्याख्यानञ्चेति ।

No. 1049. गुणविष्णुः ।

Substance, country-made yellow paper, 14 × 3½ inches. Folia, 79. Lines, 8 on a page. Extent, 1284 s'lokas. Character, Bengali. Date, Sk. 1694. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Gunavishnu. A manual of Bráhmanic rites in two parts (Kándas), the first comprising all the Vedic mantras used in the performance of the ten principal sacraments; and the second, the mantras used in daily worship. The mantras, in both parts, taken mostly from the Chhándogya Bráhmana, are explained in detail. By Gunavishnu. This work is a standard authority among the Bráhmans of Bengal, and the sacraments are performed according to the rules given in it.

Beginning. प्रथमपत्रं नास्ति । द्वितीयपत्रारम्भे "ति अलुगागमः । शृणुतेति शृणुत इत्यर्थः ।

End. शेषशुष्ठमपायम् । तत्पूर्वेष्टश्रेषे——ॐपितृकृतस्यैनसो अवयजनमसि । पितृकर्म्मणि अस्माङ्ग (इतः परमेवाग्निमं शुष्ठम्) ।

विषयः । अत्र काण्डद्वयम् । प्रथमे काण्डे, विवाहादिदशकर्म्मणि नियुक्तानां मन्त्राणां व्याख्यानम् । द्वितीये, प्रातःकृत्याद्याह्निकमन्त्रपाठनिर्णयपुरःसरं तेषामेव व्याख्यानम् । सर्वमेतत् सामवेदीयम् ॥

No. 1050. षट्कर्म्मव्याख्यानचिन्तामणिः ।

Substance, country-made yellow paper, 13 × 4 inches. Folia, 14. Lines, 7 on a page. Extent, 367 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, fresh. Prose and verse. Incorrect. Notes on the margin.

Shaṭkarma-vyákhyána-chintámaṇi. A guide to the performance of the six principal sacraments, according to the Yajur Veda. By Nityánanda. This work is a sort of abridgment of the last preceding.

Beginning. हरितरुरद्यतु यस्य प्रणवो मूलं प्रकाण्डदण्डः।
ध्वनिरतिविततः शाखा वेदाश्छन्दांसि पत्राणि॥
स जयति परममतिमहत्त्वं विधुरभिभविता सुतेजसा सहसा।
अविकलसकलपदार्थः प्रसरति पुरतः प्रसादतो यस्य॥
निर्घण्टं प्रसमीक्ष्य सारसुव्याख्यान्वाय (?) ब्राह्मणं
व्याख्याब्धिं गुणविष्णुसर्वनिपुणान् शिष्यैकदीक्षागुरून्।
वृद्धान् वा समुपास्य सङ्ग्रहमिमं षट्कर्मणां।
प्रीतये नित्यानन्द उद्धाजहार यजुषां व्याख्यानचिन्तामणिम्॥
स्थाणुरिव तु भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्——

End. अथ जपयज्ञविधिः————न जीर्णेन न नीलेन परिक्लिन्नेन वा जपेत्।
यदि वाग्यमलोपः स्यात् जपादिषु (इतः खण्डितम्)

विषयः। यजुर्वेदिनां विवाहादिषट्कर्मसु गृह्येषु नियुक्ता ये मन्त्रास्तेषां व्यवस्थासहितं व्याख्यानम्।

No. 1051. भक्तिदूती।

Substance, English paper, 13½ × 4 inches. Folia, 4. Lines, 6 on a page. Extent, 69 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, fresh. Verse. Correct.

Bhaktidúti. A poem in praise of devotion to Kṛishṇa, and the means of attaining it. By Káliprasáda S'armá.

Beginning. नत्वा श्रीनाथपादाम्बुजमतिरुचिरं भोगमोक्षैकहेतुं
नित्यानन्दप्रबोधं सकलसुरनरैः सेवितं तत्त्वसारम्।
श्रीमान् कालीप्रसादो द्विजकुलवरजो मुक्तिकान्ताभिलाषी
भक्तिं दूतीं हितज्ञां रचयति चतुरां चारुशीलां मनोज्ञाम्॥ १॥

End. रमणिरपि परा भक्तिदूत्या समाप्ता॥ २२॥

विषयः। भक्तिरसाश्रितं त्रयोविंशतिपद्यात्मकं काव्यं।

No. 1052. अनुमानदीधितिः ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 134. Lines, 5—6 on a page. Extent, 3216 s'lokas. Character, Bengali. Date, Sk. 1658. Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct.

Anumána-didhiti. An old complete and very correct text of S'iromaṇi's gloss on the Anumána-chintámaṇi of Gaṅges'a. Vide ante No. 495, Vol. I. p. 285.

Beginning. ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परजुष्टनयान्निवर्त्तमाना मनमास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥
मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ॥
पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि ।

End. तथापि जन्यत्वशरीरजन्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्तावेवाभावाविति न च भावसम्भव इत्यत्र तात्पर्यम् ॥

Colophon. इति महामहोपाध्यायश्रीमद्भट्टाचार्यात्मजशिरोमणिकृता अनुमानदीधितिः समाप्ता ।

विषयः । महामहोपाध्यायगङ्गेशोपाध्यायकृतचिन्तामणिग्रन्थीयानुमानखण्डस्य व्याख्यानम् । ७८१ सं॰ द्रष्टव्यम् ।

No. 1053. प्रत्यक्षचिन्तामणिदीधितिटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 16. Lines, 7 on a page. Extent, 630 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, fresh. Prose. Correct.

Pratyakshachintámaṇi-didhiti. S'iromaṇi's gloss on the Prataksha-chintámaṇi of Gaṅges'a. Vide ante, No. 495, Vol. I. p. 285.

Beginning. नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरा-
दुर्वीमण्डलमण्डलायितयशोराशेरशेषा गिरः ।
सङ्क्षिप्तोक्तयतिदक्षदीधितिकृतः प्रत्यक्षचिन्तामणेः
व्याख्यां सङ्कुरुते गदाधरसुधीर्मोदाय विद्यावताम् ॥
गुरुकीर्त्तनरूपमङ्गलं कुर्वाण एव स्वीयग्रन्थे प्रेक्षावतात् प्रवृत्त्यर्थं दर्शयति गिरमिति ।

End. धर्मे विशेष्यानुयोगिकविशेषणप्रतियोगिकालौकवैशिष्ट्यभानमवलम्ब्येदम् अ-न्यथा धर्मस्य (इतः खण्डितम्) ।

विषयः । प्रत्यक्षदीधितिव्याख्यानम् ।

No. 1054. बौद्धाधिकारदीधितिटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 12. Lines, 7—8 on a page. Extent, 540 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Bauddhádhikára-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha S'iromaṇi on Udayana's refutation of the atheism of Buddhist philosophy, and defence of Deism against infidelity generally. By Gadádhara. *Vide* Hall's Contributions, pp. 81-82.

Beginning. श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः ।
बौद्धाधिकारविवृतिं व्याकरोति शिरोमणेः ॥

End. शब्दत्वादिधर्मसमूहरूपस्याननुगमात् तथा च तैः (इतः खण्डितम्)

विषयः । बौद्धाधिकारदीधितिव्याख्यानम् ।

No. 1055. कुसुमाञ्जलिव्याख्या ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 27. Lines, 7—8 on a page. Extent, 1215 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, old. Prose. Correct. Notes on the margin.

Kusumáñjali-káriká-vyákhyá alias *Kusumánjali-vyákhá.* A commentary on the Kusumáñjali of Udayana A'chárya. By Haridása Nyáyálañkára Bhaṭṭáchárya. Two editions of this work have appeared in Calcutta, one bearing date 1769, and the other edited by Professor Cowell in his edition of the Kusumáñjali. Hall's Contributions, p. 83.

Beginning. ईषदीषदनधीतविद्यया तातमात्मसुदमाविवर्द्धयन् ।
क्षेपणाय भवकर्मजन्मनां कोऽपि गोपतनयो नमस्यते ॥
इष्टदेवतासङ्कीर्त्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकञ्च मङ्गलं कुर्वन् ग्रन्थनामाह । सत्पचप्रसरः——

End. नावासयेत्ततः किमस्माकम् ॥०॥

Colophon. इति महामहोपाध्यायश्रीहरिदासन्यायालङ्कारभट्टाचार्यविरचिता कुसुमाञ्जलिव्याख्या समाप्ता ॥

विषयः । कुसुमाञ्जलेर्व्याख्या ।

No. 1056. व्याख्याप्रकाशः ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 9. Lines, 9 on a page. Extent, 546 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Purushottama Nyáyaratna. Appearance, fresh. Prose. Generally correct.

Adhikárí-nirṉaya. Persons qualified to perform S'ráddhas. By Gopála Nyáyapañchánana.

Beginning. अथ श्राद्धाधिकारिनिर्णयः । तत्र व्याघ्रः——
 कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च ।
End. चतुर्विंशतिप्रकारा अधिकारिणः । अग्निपिण्डयोस्त्वयं विशेषः, पुत्रासन्निधाने-ऽन्यात्ममामपि यः (?) ॥ ० ॥
Colophon. इति अधिकारिनिर्णयः परिपूर्णः ॥
विषयः । श्राद्धे कस्य कस्याधिकारित्वमित्यस्यैव विचारपूर्वको निर्णयः ।

No. 1098. शुद्धिनिर्णयः ।

Substance, country paper, 17 × 3 inches. Folia, 9. Lines, 5 on a page. Extent, 196 s'lokas. Character, old Bengali. Date, Sk. 1641. Place of deposit, Barddhamána, Dhátrígráma, Brahmavrata Sámádhyáyí. Appearance, decayed. Prose. Correct, having marks of revision in many places.

S'uddhi-nirṉaya. A compendium of rules regarding the impurity of the person resulting from a birth or death in one's family. By Gopála Nyáya-paṉchánana Bhaṭṭáchárya.

Beginning. प्रणम्य करुणागारं कृष्णं गोपालशर्मणा ।
 अशौचनिर्णयं कृत्वा क्रियते शुद्धिनिर्णयः ॥
End. यमः——पृष्ठतो गोर्गजः स्कन्धे सर्वतोऽश्वः शुचिस्तथेति ॥०॥
Colophon. इति गोपालन्यायपञ्चाननभट्टाचार्यविरचितः शुद्धिनिर्णयः सम्पूर्णः ॥
विषयः । अत्र जननमरणयोरशौचः तत्र शुद्धिः, द्रव्यादीनाञ्च शुद्धिश्च निर्णीता ।

No. 1099. तत्त्वचिन्तामणिः ।

Substance, country-made yellow paper, 13 × 4 inches. Folia, 7. Lines, 6 on a page. Extent, 131 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, fresh. Verse. Correct.

Tattva-chintámaṇi. A dissertation on the Vedánta doctrine of salvation. By Púrṇánanda Paramahaṅsa. The MS. is incomplete, containing only the first chapter of the work.

Beginning. दशशतदलपद्मोल्लसत् पूर्णचन्द्रः प्रमुदितकुलपद्मद्योतकः कुन्दकान्तिः ।
अभयवरकराजो(?)योगघूर्णद्द्विनेत्रः कुलजनजननाथः पातु मां देवदेवः ॥१॥
हृदयकमलमध्योज्ज्वलत्कर्णिकान्तः प्रमुदितशिवशक्त्या संस्थिता कापि मूर्त्तिः ।
मुरहरहरमौलिश्रेरमुक्ताप्रवालप्रविलसितपदाब्जा पातु मां मोहकूपात् ॥ २॥
इह खलु दुरन्तदुःसन्तरघोरतरसंसारसागरान्तरुद्दामशोकसन्तानप्रबलबाल-
ज्वालाजालकवलनविकलसकलजनवादार्थविज्ञानदत्तमनाः परमकारुणिको
भगवान् परमशिवः परदेवताराधनरहस्यप्रतिपादनपरानेकशतकोटिविस्तार-
तन्त्रसारमुपन्यस्तवान् तत्र च निरन्तरभावनावाह्यदुरवगाह्यविधितन्त्रस्वतन्त्र-
सिद्धान्तशुद्धिबोधमहाननसङ्गजोद्वेगसमुद्विग्नमनाः श्रीमत्परमहंसपरिव्राजक-
गुरुब्रह्मानन्दमुखारविन्दनिःस्यन्दमानपरमरहस्यनिगममकरन्दसन्दोहतुन्दिला-
नन्दश्रीपूर्णानन्दपरमहंसः श्रीतत्त्वचिन्तामणिं चतुर्दशशताधिकनवनवतिश-
काब्दे वितनोति । ननु किन्तावदात्मवस्तु ।

End. घटप्रत्यक्षसमये प्रकाशोऽभ्यञ्जको यथा ।
तन्मात्रां प्रकृतिं वक्ष्ये दीक्षाविधिपुरःसरां ॥

Colophon. इति श्रीपूर्णानन्दपरमहंसविरचिते श्रीतत्त्वचिन्तामणौ तत्त्वज्ञानविवेचनप्रबोधो नाम प्रथमः प्रकाशः ॥ (इतः परं खण्डितम्)

विषयः । आत्मतत्त्ववस्तुनो निर्णयः ।

No. 1100. अङ्कसञ्ज्ञा ।

Substance, country-made yellow paper, 16 × 2⅓ inches. Folium, 1. Lines, 10. Extent, 17 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, Fresh. Verse. Correct.

Aṅkasañjñá. Memorial verses containing the numerical values of different words used in writing monograms. By Rámánanda Tírtha.

Beginning. एके चन्द्राश्विनीभूमिर्द्वये पक्षाक्षिस्त्वयवः ।
नये रामवह्निगुणाः सिन्धुवेदो युगं ततः ॥ १ ॥

End. कालशब्दद्युतौ रन्ध्र शब्दश्च शून्यवाचकः ॥
Colophon. इति श्रीरामानन्दतीर्थकृता अङ्कसङ्ख्या समाप्ता ॥
विषयः । एकादिसङ्ख्यानां सङ्केतेन बोधनम् ।

No. 1101. कवितावलिः ।

Substance, country-made yellow paper, 16 × 2½ inches. Folia, 14. Lines, 6—10 on a page. Extent, 378 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, Fresh. Verse. Correct.

Kavitávali. A collection of short miscellaneous poetry, by different authors, generally quoted in the same way as proverbs.

Beginning. यः पूतनामारणलब्धकीर्त्तिः काकोदरो येन हतो विदर्पः ।
यशोदयालङ्कृतमूर्त्तिरव्यान्नाथो यदूनामथवा रघूनाम् ॥ १ ॥
End. कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवोपपद्यते ॥०॥
विषयः । विविधरसाश्रितोद्भटकवितानां सङ्ग्रहः ।

No. 1102. वृन्दावनयमकटीका ।

Substance, country-made yellow paper, 16 × 2½ inches. Folia, 13 inches. Lines, 8 on a page. Extent, 377 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, new. Prose. Correct.

Vrindávana-yamaka-ṭiká. A commentary on a poem called *Vrindávana-kávya alias Vrindávana-yamaka,* which is remarkable for a series of alliterations, every two feet being alike in sound though different in meaning. The subject of the work is the love of Krishna and Rádhá. By Ráma Chakravartí.

Beginning. ईश्वरं ज्ञानदं सर्वं प्रणम्य शशिशेखरम् ।
वृन्दावनाख्यकाव्यस्य क्रियते टिप्पनी मया ॥ १ ॥

End. आयतनेत्रः । आयते दीर्घे नेत्रे यस्य स तथोक्तः ॥ ० ॥

Colophon. इति श्रीरामचक्रवर्त्तिविरचिता वृन्दावनयमकस्य टीका समाप्ता ॥

विषयः । वृन्दावनयमककाव्यस्य व्याख्यानम् ।

No. 1103. सरस्वतीस्तोत्रम् ।

Substance, country-made yellow paper, 17 × 3 inches. Folium, 1. Lines, 12. Extent, 22 s'lokas. Character, Bengali. Date, . Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, new. Verse. Correct.

Sarasvatí-stotra. A hymn to Sarasvatí: it is different from the works noticed under Nos. 891 and 892. Anonymous.

Beginning. ह्रीँ ह्रीँ हृद्यैकवीजे शशिरुचिकमले कल्पविस्पष्टशोभे (इत्यादिः) ।

End. प्रयत्नेन पठेन्नित्यं सोऽमृतत्वञ्च गच्छति ॥०॥

Colophon. इति सरस्वत्याः स्तोत्रं समाप्तम् ॥०॥

विषयः । सरस्वतीदेव्याः स्तोत्रम् ।

No. 1104. व्यासकूटः ।

Substance, country-made yellow paper, 16 × 2½ inches. Folia, 5. Lines, 6 on a page. Extent, 60 s lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkaratna. Appearance, new. Verse. Correct. Notes on the margin.

Vyásakúṭa. A collection of stanzas on miscellaneous subjects; every stanza is remarkable for being a double entendre. Anonymous.

Beginning. मदमत्तमयूरस्य गिरेर्माल्यवतस्तटे ।
सीताविरहिणं रामं मुहुर्मुहुररोदयत् ॥

End. को भाति भाले वरवर्णिनीनां का रौति दीना मधुयामिनीषु ।
कश्चिन् विधत्ते शशिनं महेशः सिन्दूरविन्दुर्विधवाललाटे ॥०॥

Colophon. इति व्यासकूटः समाप्तः ॥

विषयः । कतिपयकूटार्थकश्लोकाः ।

No. 1105. शब्दरत्नावलिः ।

Substance, country-made yellow paper, 16 × 4 inches. Folia, 106. Lines, 10 on a page. Extent, 5631 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkasiddhánta. Appearance, old and decayed. Verse. Generally correct.

S'abdaratnávalí. A Dictionary of the Sanskrit Language. By Mathures'a. The work was compiled under the auspices of Murchhá Khán. It follows the plan of the Amarakosha. The following is Professor Wilson's account of this work: "The *Sabda Ratnávalí* is the compilation of Mathures'a, one of the commentators on the Amara Kosha, and follows that work in arrangement, and contents. It is chiefly useful for its introduction of various readings amongst the synonymes, but has made very little addition of any other kind. This work was composed, according to a date in the text, in S'aka 1588, or A. D. 1666, and under the patronage of a Musselman chief whose name, as written in the manuscripts, appears to be Múrchhá Khán. It should be more probably Músá Khán, a name common amongst the Musselman chiefs of the seventeenth century." Essays III, p. 107.

Beginning. वन्दे सदानन्दमयं समन्ताज् ज्योतिः परं ब्रह्म भवादिमेव्यम् ।
ध्यानैकगम्यं जगदेकरम्यं यदिच्छया कारणकार्यभावः ॥
आसीत् क्ष्मातलमण्डले नृपकुलैः संसेवितः श्रीयुतै-
र्भूपालः श्रितमानखान इति यः कीर्त्तिप्रतापोज्ज्वलः ।
यद्दोर्दण्डप्रतापचण्डदहनैः कल्पान्तसूर्यप्रभैः
प्रत्यर्थिक्षितिपालका रणभुवि क्षोभाकुलाः शेरते ॥
तस्यैव जगदेकवीरतनुजः ख्यातो जगन्मण्डले
मूर्च्छाखानमहीपतिः स्थिरमतिर्वङ्गैकरङ्गोत्सवः ।
दीप्तैर्द्वादशभूमिपैस्थिरतरं तीक्ष्णांशुचण्डप्रभैः
श्रीधात्रप्रतिदेशपालनविधौ संसेव्यमानोऽभवत् ॥
एतस्मादजनि प्रतापमिहिरः सत्कीर्त्तिशीतद्युतिः
दीने + + + भूपतिः सुमहिमः श्रीरामदेवः स्वयं ।
मूर्च्छाखानमरानन्दन(?)नृपतिः श्रीमान् महीमण्डलम्
शास्ति द्वादशभूमिपैः पुनरिदं भूनङ्गसाब्दैः क्षितौ ॥

तस्याश्चावशतः सुधारसमयीं सत्काव्यसन्तोषिणीं
नानातन्त्रविचार+ +वणिजं ज्ञानप्रदानोज्ज्वलां ।
धीरः श्रीमथुरेश एष तनुते श्रीशब्दरत्नावलीं
सन्तः सन्तु विनोदिनो नृपसमं सन्तोषयन्तोऽनया ॥
विलोक्य बहुतन्त्राणि शब्दरत्नावलीमिमां ।
वर्गैरेव निबध्नाति प्रायः पर्यायविस्तृतैः ॥
क्वापि च प्रतिसंस्कारेऽनुक्तौ शिष्टप्रयोगतः ।
परपूर्वाभयावृत्तिः सद्दशब्दानुशासनात् ॥
स्त्रीपुंनपुंसकं ज्ञेयं रूपभेदेन कुत्रचित् ।
तद्विशेषविधेः क्वापि साहचर्य्यात् क्वचिद् भवेत् ॥
अनुक्तेष्वेकलिङ्गेषु द्वन्द्वः किल भवेदिह ।
उक्तेषु भिन्नलिङ्गेषु तत्राप्येष न दोषभाक् ॥
लिङ्गत्रये निश्चितिः स्यात् स्त्रीपुंसयोर्द्वयोरिति ।
निषिद्धे शेषलिङ्गन्तु वाच्यलिङ्गन्तु कुत्रचित् ॥
युष्मदस्मत्कतिष्णान्तसङ्ख्याव्ययमलिङ्गकम् ।
प्रायेण क्लीवमेव स्यात् क्रियाव्ययविशेषणम् ॥

End. पाशानां गणा स्यात् गणद्वन्दकम् । सद्दखाणान्तु साद्दखं वर्मणां वार्माणं भवेत् ।
(इतः [सङ्कीर्णवर्गत एव] खण्डितम्) ।

विषयः । शब्दानां लिङ्गानुशासनं ।

No. 1106. कल्पसूत्रं सटीकं ।

Substance, country paper, 10 × 4 inches. Folia, 292. Lines, 4 on a page. Extent, 2336 s'lokas. Character Nágara. Date, ? Place of deposit, Calcutta, Sanskrita College. Appearance, fresh. Prose and verse. Correct.

Kalpa Sútra. A legendary life of the last Tírthañkara Mahávira. By Bhadraváhu, a native of Guzerat, who flourished during the reign of Dhruva Sena. "According to a date embodied in the work itself, it was composed 980 years after the demise of Mahávira, that is to say, A. D. 411." (Stevenson.) The extent of the work, according to native calculation, is 1209 s'lokas, but the different commentaries on them extend to upwards of seventy-six thousand verses. A translation of this work has been published by Dr. Stevenson of Bombay in the Orien-

tal Translation Fund Series, and two lithographed editions are also available. It forms a part of the sacred scriptures of the Jains, and to point out its exact position in the body of those records it is necessary to give an outline of the classification usually adopted by the Jains in describing them.

According to the *Siddhánta-dharma-sára* the Jain scriptures are comprised in fifty different works, collectively called the *Sútras*, and sometimes the *Siddhántas*, and classed, first, under the two heads of *Kalpa Sútra* and *A'gama*, five works coming under the former, and forty-five under the latter head; and secondly, under eight different heads *viz.* I, 11 Angas; II, 12 Upáñgas; III, 4 Múla Sútras; IV, 5 Kalpa Sútras; V, 6 Chheddas; VI, 10 Payannas; VII, Nandi Sútra; and VIII Anuyogadvára Sútra. Some of them have a four-fold commentary under the names of *Ṭíká*, *Niryukti*, *Chúrṇí* and *Bháshya*, and with the original constitutes the five-fold (*pancháñga*) Sútra. The names of these fifty works are :—

I. AÑGAS.

1. A'cháráñga Sútra.
2. Sugaḍáñga Sútra.
3. Bhánáñga Sútra.
4. Samaváyáñga Sútra.
5. Bhagavatí Sútra.
6. Játádharmakáthá Sútra.
7. Upás'akadasá Sútra.
8. Antagaḍadasá Sútra.
9. Anuttarovaváï Sútra.
10. Vipáka Sútra.
11. Prasnavyákaraṇa Sútra.

II. UPÁÑGAS.

1. Upaváyi Sútra.
2. Ráyapaseni Sútra.
3. Jívábhigama Sútra.
4. Pannavaṇá Sútra.
5. Jambudvípapannatti Sútra.
6. Chandapannatti Sútra.
7. Súrapannatti Sútra.
8. Niriyávalí Sútra.
9. Kappiyá Sútra.
10. Kappavaḍiñsayá Sútra.
11. Puppiyá Sútra.
12. Puppachuliyá Sútra.

III. MÚLA SÚTRAS.

1. A'vasyaka Sútra.
2. Vís'eshávasyaka Sútra.
3. Ḍasávaikálika Sútra.
4. Pákshika Sútra.

IV. KALPA SÚTRAS.

1. Uttarádhyayna Sútra.
2. Nisítha Sútra.
3. Kalpa Sútra.
4. Vyavahára Sútra.
5. Jítakalpa Sútra.

V. Chhedas.

1. Mahánisítha-vrihadváchaná.
2. Mahánisítha-laghuváchaná.
3. Madhyama-váchaná.
4. Pinda-niryukti.
5. Augha-niryukti.
6. Paryushaná-kalpa.

VI. Payannas.

1. Chatuh-sarana S.
2. Pachchakhána S.
3. Bhakti-parijñána S.
4. Mahá-pratyákhyána S.
5. Tandula-vaitálika S.
6. Chandá-vijaya S.
7. Gani-vijvá S.
8. Marana-samádhi S.
9. Devendra-stavana S.
10. Sañsthara S.

VII. Nandi Sútra.


VIII. Anuyogadvára Sútra.

The total extent of these fifty works together with their commentaries, according to Jaín belief, is six hundred thousand s'lokas. Although all the fifty are parts of the holy scriptures, they are not all held in the same high estimation. Some are much more prized than others, and the Kalpa Sútra enjoys the highest rank, and on all ceremonial occasions is publicly read and expounded for the benefit of the large multitudes who then assemble in the larger temples. During the Paryyushana fast, in the middle of the rainy season, eight days are devoted to public reading of the scriptures, and five days out of it are allotted to the Kalpa Sútra. MSS. of this work are frequently written in gold, and richly illuminated with gold, colours and illustrations. A specimen of the style of illustration usually adopted is shown in the annexed facsimile (Plate I), copied from a codex about three hundred years old; it is so injured by damp and the chemical effect of the dye stuffs used (mostly mineral) that the paper crumbles down into powder, even under careful handling. The MS. is now in the possession of Dr. Buhler of Bombay. The Doctor has also a MS. of the Ávasyaka Sútra, which bears date Samvat 1189 = A. D. 1132. Plate II. It is the oldest Sanskrit MS. that has come to notice.


Beginning. (मू॰) नमो अरिहन्ताणं नमो सिद्धाणं नमो आयरीयाणं नमो उ वज्झायाणं।
वीरे पञ्चहत्थुत्तरे होत्था तजहा हत्थुत्तराहिं चुइ चइत्तागब्भ वक्कं ते ॥

(टी॰) श्रीकल्पसूत्रनैथुरि मङ्गलीकभ इन्द्रे सेवितलिणेञ्च नमस्कार करीए छ नमस्कार करो उपाणी पञ्च ५।

End. (मू॰) समणे भगवं महावीरे रायगिहे नयरे गुणसीले चेईए बहुं समणाणं बहुणं समणीणं बहुणं सावयाणं बहुणं सावयीणं बहुणं देवाणं बहुणं देवीण मज्झगए



Facsimile of a Page of an illuminated MS. of the Kalpa Sútra supposed to be about three hundred years old.


CALCUTTA PUBLIC LIBRARY

चेव एव मादृक्कदृभासइं पक्वेद् पन्नवेद् पद्योमवणा कप्पा नासं अवबभयणं सअवं सहेवं सकारणं ससुत्तं सअच्छं सउभयं मआगरणभुओ भुओउचद्द्च दंसेत्ति वेमिपद्यो सवणा कप्पो दसासु अखं घस्स अवसवभयणं सम्मत्तंव एत लैकरीश्रीकल्पसिद्धान्तं वारै से नैसो मूलस्रोक सूचैऊर्थै कां नैकभमात उवो अधिको कह्यो ऊवै तेहनै श्रीसंघ ससुचै मिच्छामि दुक्कडं ।

Colophon. श्रीकल्पसूत्रं सम्पूर्णं ।

(टी०) आजअलीया गलीया अलीया कीजै मिच्छामि दुक्कड दीजै ।

विषयः । शेषतीर्थङ्करस्य महावीरस्य जीवनचरितवर्णनं ।

No. 1107. आदर्शः, वा भावार्थचिन्तामणी ।

Substance, country paper, 17 × 3 inches. Folia, 182. Lines, 7 on a page. Extent, 6370 s lokas. Character, Bengali. Date, S'k. 1518 ? Place of deposit, Navadvípa. Harinátha Tarkasiddhánta. Appearance, old. Decayed. Prose. Correct. Notes on the margin.

A'dars'a alias *Bhávártha-chintámaṇi*. A commentary on the *Kávya-prakás'a* of Mammaṭa Bhaṭṭa. By Mahes'vara Nyáyapañchánana Bhaṭṭa.

Beginning. मुखैश्चतुर्भिस्तुवते विधात्रे स्रोत्रे तथा वेदचतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरो हि वर्गान्नमो ददानाय चतुर्भुजाय ॥ १ ॥
दुर्व्याख्याजनितप्रमोहशमनी वैषम्यविध्वंसिनी
वैशद्यादतिरोचनी रसखनी काव्यार्गलोद्घाटिनी ।
टीका विज्ञजनप्रमोदजननी भावार्थचिन्तामणी
भट्टाचार्यमहेश्वरेण रचिता काव्यप्रकाशोपरि । २ ॥
काव्यप्रकाशाख्यविशुद्धकाञ्चने वैषम्यदोषार्पितकालिकाञ्चने ।
अस्मादृशानापि ममास्तु टीका माधुर्यधुर्यैकसुधाघटीका ॥ ३ ॥
दोषो विचारसुलभो यदि दूष्यतां तद्
दूये न तत्र + + + श्रुतैकधीराः ।
ग्रन्थान् यथार्थमतिसंस्कृतमानसत्वाद्
व्याख्या मम प्रथममेव न दूषणीया ॥ ४ ॥

End. तद्देतदिति । सम्पूर्णमिदं काव्यलक्षणमिति तददोषौ च शब्दार्थाविति यत् काव्यलक्षणं तद्विशेषाणां दोषगुणालङ्काराणां कथनात् सम्पूर्णमित्यर्थः ॥

Colophon. इति महेश्वरन्यायपञ्चाननविरचिते श्रीमम्मटभट्टकृतस्य काव्यप्रकाशाख्यग्रन्थस्य टीकारूपे आदर्शग्रन्थसमापकोऽर्थालङ्कारस्य दशमः प्रतिविम्बः ॥
वसुवसुधामतर्कतन्त्रे शाके सहसमलेखि सुन्दरी ।
प्राप्ता काव्यप्रकाशटीका नत्वा शिवं शिवेश्वरेण ॥ १ ॥

विषयः । मम्मटभट्टविरचितस्य काव्यप्रकाशस्य व्याख्यानम् ।

No. 1108. खण्डनप्रकाशः ।

Substance, country paper, 9 × 1½ inches. Folia, 90. Lines, 6 on a page. Extent, 2497 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Harinátha Tarkasiddhanta. Appearance, old. Decayed. Prose. Correct. Notes on the margin.

Khaṇḍana-prakás'a alias ***Prakás'a***. A commentary on the *Khaṇḍana-khaṇḍa-khádya* of S'ríharsha. By Vardhamána, son of Gañges'vara. The MS. is incomplete, but it is the only commentary on the Khandana I have met with. Mr. Hall has named three, the *S'añkarí*, the *Vidyábharaṇí*, and the *S'iromaṇi*, but he adds that he had seen none of them. Hall's *Contributions*, p. 206.

Beginning. यः प्रत्यक्षानुमानाभ्यां युक्तयुक्त्यागोचरः ।
तस्मै वेदान्तवेद्याय नमोऽस्तु परमात्मने ॥ १ ॥
मीमांसान्यायतत्त्वज्ञगङ्गेश्वरतनूद्भवः ।
वर्द्धमानः खण्डनस्य प्रकाशं कुरुते शमी ॥ २ ॥

End. प्रागिति अभावप्रमोत्पत्तिकालेऽभावासत्त्वेऽपि प्राङ्नाशादिद्विशिष्टेत्यभावप्रतीतेस्तत्तात्त्विलीकमभावसत्त्वं तत्रोपयुक्तमित्यर्थः——अथान्यथाभावोपलक्षितत्वमेव विशेषणं विशेषः (इतः खण्डितम्) ।

विषयः । श्रीहर्षविरचितस्य खण्डनखण्डखाद्यस्य व्याख्यानम् ।

No. 1109. षोड़शनित्यातन्त्रम् अथवा कादिमततन्त्रम् ।

Substance, bark, 18½ × 4 inches. Folia, 96. Lines, 9 on a page. Extent, 3212 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkasiddhánta. Appearance, old. Verse. Correct.

Kádimata Tantra alias *Shoḍasá-nityá Tantra*. An original Tantra in thirty-six Paṭalas on various isoteric forms of worship of Sákta divinities. The MS. ends with the first verse of the thirty-sixth chapter. Contents: I, Manifestations of Tantras; II, a diagram called *Nátha-maṇḍala;* III, daily salvation; IV, V, worship of Lalitá; VI, occasional forms of worship; VII, description of Kámes'vari; VIII, do. of Bhaga-máliní; IX, do. of Nityachchhinná; and X, do. of Bheruṇḍá; XI, do. of Vahnívásiní; XII, do. of Rájes'varí; XIII, do. of Bhavadbhutí; XIV, do. of Duritá; XV, do. of Sundarí; XVI, do. of Nityá; XVII, do. of Nílapatáká; XVIII, do. of Vijayá; XIX, do. of Sarvamañgalá; XX, do. of Jválámáliní; XXI, do. of Chhinná; XXII, do. of Kurukuntá; XXIII, do. of Váráhí; XXIV, set formulas in which these goddesses are to be meditated upon; XXV, the Mátrikás or primary mothers; XXVI, mystic mantras of do.; XXVII, regulation of the breath during worship; XXVIII, description of Lokatá; XXIX, altars; XXX, offering of clarified butter on fire, with reference to S'ákta divinities; XXXI, XXXII, advantages of performing homas; XXXIII, various diagrams appropriate for S'ákta divinities; XXXIV, S'ákta sports and amusements; XXXV, various desires appropriate to S'áktas; XXXVI, knowledge of self.

Beginning. अनाद्यन्तोऽपराधीनः स्वाधीनभुवनत्रयः ।
जयत्यविरतो व्याप्तखदिक्कालो विनायकः ॥
भगवन् सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोड़शानाञ्च न + + नि कृत्स्नशः ॥
तेषामन्योन्यसापेक्षाज् जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ॥
शृणु कादिमतं तन्त्रं पूर्णमस्यानपेक्षया ।
गोप्यं सर्वप्रयत्नेन गोपनं तत्र चोदितम् ॥
कथं कादिमतं नाम्ना तन्त्रं ब्रूहि महेश्वर ।
कादि कालीति शक्तीस्ताः पुरा तत्तन्मते मया ॥

Colophon. इति षोड़शनित्यातन्त्रे श्रीकादिमते पञ्चत्रिंशत् पटलम् ॥०॥
पापानां वर्जनं पुण्यकरणे कौतुकं सदा ।
परस्तवननिन्दासु विरतिः (इतः खण्डितम्)

विषयः । इह षट्त्रिंशतपटलाः सन्ति । तत्र १प्रथमे, तन्त्रावतारादिवर्णनम् । २ये,

नाथमण्डलवर्णनम् । ३ये, नित्योद्धारकथनम् । ४र्थ—५मे, च ललिताचर्चनम् । ६ष्ठे, नैमित्तिकाद्यर्चनविधिः । ७मे, कामेश्वरीवर्णनम् । ८मे, भगमालिनीवर्णनम् । ९मे, नित्यक्लिन्नावर्णनम् । १०मे, भेरुण्डावर्णनम् । ११शे, वह्निवासिनीवर्णनम् । १२शे, राजेश्वरीवर्णनम् । १३शे, मङ्गलीवर्णनम् । १४शे, दुरितावर्णनम् । १५शे, सुन्दरीवर्णनम् । १६शे, नित्यावर्णनम् । १७शे, नीलपताकावर्णनम् । १८शे, विजयावर्णनम् । १९शे, सर्वमङ्गलावर्णनम् । २०शे, ज्वालामालिनीवर्णनम् । २१शे, क्लिन्नावर्णनम् । २२शे, कुरुकुल्लावर्णनम् । २३शे, वाराहीवर्णनम् २४शे, ध्यानानि । २५शे, मातृकोक्ता । २६शे, मन्त्रवैभवाः । २७शे, श्रासरूपा । २८, लोकतावर्णनम् । २९शे, कुण्डलाकृतिः । ३०शे, होमकर्म । ३१शे—३२शे, च होमात् कामफलोद्यवर्णनम् । ३३शे, विविधयन्त्राणि । ३४शे, विविधनर्मवर्णनम् । ३५शे, विविधकामनावर्णनम् । ३६शे, आत्मज्ञानमिति ॥

No. 1110. तर्कभाषा ।

Substance, country paper, 17 × 3 inches. Folia, 39. Lines, 7 on a page. Extent, 1535 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Harinátha Tarkásiddhánta. Appearance,old and decayed. Prose and verse. Correct.

Tarkabháshá alias *Tarkaparibháshá*. Terminology of the Nyáya explained and illustrated with examples. By Kes'ava Mis'ra. Hall's *Contributions*, p. 22.

Beginning. बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।
सङ्क्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥

End. परपक्षे दूषिते स्वपक्षसाधनसंशये गावसानं जल्पः (इतः खण्डितम्) ।

विषयः । गोतमोक्तन्यायशास्त्रीयप्रमेयादिपदार्थानां सोदाहरणं बोधनम् ।

No. 1111. कृत्यरत्नावली ।

Substance, country-made yellow paper, 13 × 3½ inches. Folia, 104. Lines, 6—7—8 on a page. Extent, 2730 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Vrajanátha Vidyáratna. Appearance, old. Decayed. Prose and verse. Incorrect.

Kritya-ratnávalí. A calendar of feasts and fasts on particular days of the moon. By Rámachandra, son of Vitthvala Bhatta.

Beginning. नमस्कृत्य रमानाथं भट्टविट्ठलसूनुना ।
कृत्यरत्नावली रम्या रामचन्द्रेण रच्यते ॥
तत्र तिथिकृत्ये तु कृष्णादि व्रते शुक्लादि चैव चेति वचनात् चैत्रकृष्णप्रतिपद-
मारभ्य तिथिकृत्यान्युच्यन्ते ।

End. ततो मूर्त्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमतो गताः ।
आग्नेय्यान्त्याः प्रपूज्यास्तु ——————— ॥
प्राच्यैशान्यादिक्रमेणाग्नेयीपर्य्यन्तं वामावर्त्तेन कुर्य्यात् (इतः परं खण्डितम्) ।

विषयः । चैत्रकृष्णप्रतिपदमारभ्य तिथिकृत्यनिर्णयः ।

No. 1112. कारकाद्यर्थनिर्णयः ।

Substance, country-made yellow paper, $13\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 17. Lines, 7—8 on a page. Extent, 413 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Prose. Correct. Notes on the margin.

Kárakádyartha-nirnaya. The logical purport of the six grammatical cases explained from a Nyáya standpoint. By Bhavánanda Siddhántavágís'a.

Beginning. नत्वा श्रीकृष्णचरणं कारकाद्यर्थनिर्णयः ।
श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥

End. यस्य क्रियया क्रियान्तरं लक्ष्यते इति व्याख्यानन्तु शाब्दिकानां प्रायिकाभि-
प्रायिकमिति दिक् ॥

Colophon. इति श्रीमद्वामदेवोपाध्यायश्रीभवानन्दसिद्धान्तवागीशविरचितायां शाब्दबोध-
मञ्जर्य्यां षट्कारकविवरणं समाप्तम् ॥

विषयः । षट्कारकनिर्णयः ।

No. 1113. ज्योतिःसङ्ग्रहसारः ।

Substance, country-made yellow paper, 13×3 inches. Folia, 6. Lines, 6 on a page. Extent, 135 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, fresh. Prose and verse. Generally correct.

Jyotih-sangraha-sára. Calculation of the prospects of one's life from the presiding zodiacal signs at his birth. By Nandikes'vara.

Beginning. दिननाथं प्रणम्यादौ नन्दिकेश्वरधीमता ।
ज्योतिःसङ्ग्रहसारोऽयं भाषया लिख्यते मया ॥

End. निदानं आग्रहायणस्य षष्ठदिने गते मङ्गलवासरे अर्द्धरात्रौ गतायां कर्कटलग्ने कृष्णपक्षे नवम्यां कृत्तिकानक्षत्रे शिरःशूलरोगेण मृत्युः ॥

Colophon. इति श्रीनन्दिकेश्वरविरचितो ज्योतिःसङ्ग्रहसारः समाप्तः ॥

विषयः । सङ्क्षेपेण मेषादिराशिमतां मनुजानां सामान्यतः यावदायुः फलाफलनिर्णयः ।

No. 1114. शकुनदीपकः ।

Substance, country-made yellow paper, 13 × 2½ inches. Folia, 95. Lines, 4 on a page. Extent, 926 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Vrajanátha Vidyáratna. Appearance, old. Verse. Generally correct.

S'akuna-dípaka. On divination of various kinds and the means of averting impending evils. By Gaṇes'a. The work is divided into eight chapters, thus: I, Anthropomancy in its widest sense, applying to appearances of persons of different ages, sexes, and conditions, and not, as among the Greeks and the Romans, to the appearance of the entrails of human sacrifice. II, Nomancy, Geloscopy, Gyroscopy, &c. referring to the voluntary actions of human beings. III, Divination from the involuntary actions of men and animals, such as, dreams (oneiromancy), sneezing, twitchings of muscles, &c. IV, Do. by jackals. V, Do. by quadrupeds (other than jackals,) and reptiles, including hares, horses, elephants, cats, dogs, camels, buffaloes, mice (myomancy) tigers, goats, sheep, rhinoceroses, musk-rats, civets, bulls, lizards, and serpents. VI, Ornithomancy. VII, Miscellaneous divination. VIII, acoustomancy.

Beginning. वाञ्छाकल्पतरुं नृणां संसाराम्भोधिपारदं ।
लम्बोदरपदाम्भोजद्वन्द्वं वन्दामहे वयम् ॥ १ ॥
अज्ञानतिमिरध्वंसकारकोऽदृष्टदर्शकः ।
तन्यते श्रीगणेशेन मुदा शकुनदीपकः ॥ २ ॥

ज्योतिर्ग्रन्थमहासिन्धुर्गणितावर्त्तदुस्तरः ।
तत्पारगमने शक्तः को भवेत् शङ्करं विना ॥ ३ ॥
अतो गणितहीनेषु सुगमेन हि वर्त्मना ।
असृजच्छाकुनं शास्त्रं सर्वज्ञः सदयः प्रभुः ॥ ४ ॥
तस्मादाकलनं कृत्वा शाकुनं कथ्यते मया ।
नृणां शुभाशुभज्ञानं तत्क्षणाद् येन जायते ॥ ५ ॥
शुभाशुभफलानाञ्च सूचनं येन जायते ।
तदेव शाकुनं प्रोक्तं विभुना शूलपाणिना ॥ ६ ॥

End. आसावमेय उक्तो जात्या चटिका च शूकरिका ।
एवं देशे देशे विद्वद्भ्यः समुपलभ्य नामानि ॥

Colophon. इति श्रीगणेशभट्टविरचिते शकुनदीपके विकृतशकुनाख्योऽष्टमोऽध्यायः ॥

विषयः । मनुष्यशकुनालोकनाभिधाने प्रथमाध्याये—शकुनशास्त्रप्रशंसा, मनुष्यशकुनम्, शान्तदिङ्निरूपणम्, मनुष्यशकुनशान्तिः, नक्षत्रवारविशेषशकुनफलम् ।
उपश्रुतिशकुनाख्ये द्वितीयाध्याये—उपश्रुतिशकुनम्, रोदनशुभाशुभम्, निद्रायुक्तपतनफलम्, क्षुतशकुनम्, क्षुतशकुनशान्तिः ।
स्पन्दनस्वप्नादिशकुनाभिधाने तृतीये—पशुक्षुतशकुनम्, पशुक्षुतशकुनशान्तिः, अङ्गस्पन्दनशकुनम्, मनुष्यशकुनपाकः, स्पन्दनशकुनशान्तिः, स्वप्नशकुनम्, दुःस्वप्नशकुनशान्तिः ।
शिवाशकुनाभिधाने चतुर्थे—शृगालशकुनम्, शृगालतारणनिरूपणम्, शृगालरवशकुनम्, शृगालशकुनशान्तिः, शिवासाधनम् ।
अश्वादिशकुनाख्ये पञ्चमे—अश्वादिशकुनम्, अश्वशकुनम्, हस्तिशकुनम्, विड़ालशकुनम्, विड़ालशकुनशान्तिः, कुक्कुरशकुनम्, क्रमेलकशकुनम्, महिषशकुनम्, मूषिकशकुनम्, शार्दूलशकुनम्, छागशकुनम्, मेषशकुनम्, खड्गशकुनम्, चुचुशकुनम्, नकुलशकुनम्, वृषशकुनम्, वल्लीशकुनम्, सर्पशकुनम् ।
पतत्रिशकुनाख्ये षष्ठे—खञ्जनशकुनम्, कोकिलशकुनम्, मधुमक्षिकाचक्रशकुनम्, कपोतशकुनम्, उलूकशकुनम्, वायसशकुनम् ।
मिश्रशकुनाख्ये सप्तमे—मिश्रशकुनम् ।
विकृतशकुनाख्ये अष्टमे—विकृतशकुनम् ।

No. 1115. त्रिस्थलीसेतुः।

Substance, country-made yellow paper. Folia, 42. Lines, 4—8 on a page. Extent, 1431 s/lokas. Character, Bengali. Date, ? Place of deposit, Vaṭes'vara Vikrampura, Ḍháká, Gaṅgácharana Tarkaratna. Appearance old. Verse. Incorrect.

Tristhalísetu. This is the second part of the work noticed under No. 797 ; (II p. 202.) It treats at length of the merits of performing a pilgrimage to, and religious gifts, fasts, and feasts at, Prayága, or the confluence of the Ganges and the Yamuná, near Allahabad. By Madana Ráya, son of Rames'vara Puri.

Beginning. सुरमुनिदितिजेन्द्रैः सेव्यते येन तन्नै-
गुरुतरदुरितानां का कथा मानवानां।
स च भुवि सुखकर्त्तुं वाञ्छितायास्ति हेतु-
र्जयति विजितयागस्तीर्थराजः प्रयागः॥

End. इमाः कथा यः शृणुयात् नरोत्तमो यः श्रावयेद् वापि विशुद्धचेताः।
स तीर्थराजं वदरीवनञ्च गङ्गाफलं तत् समवाप्नुयाच्च॥०॥

Colophon. इति श्रीमद्रामेश्वरपुरिसूनुना मदनरायणेन विरचिते त्रिस्थलीसेतौ प्रयाग-प्रकरणे प्रयागकृत्यं समाप्तम्॥०॥

विषयः। १, प्रयागमहिमा। २, प्रयागस्मरणमहिमा। ३, प्रयागवासफलम्। ४, वपनमहिमा। ५, वपनविचारः। ६, प्रयागे सामान्यस्नानं। ७, प्रयाग-शब्दः। ८, प्रयागे माघस्नानं। ९, एकाहस्नानं। १०, दिनविशेषफलम्। ११, माघस्नानारम्भः। १२, माघस्नानविधिः। ब्राह्मणभोजनादिप्रभृतयः।

No. 1116. शाक्ताभिषेकः।

Substance, English paper. Folia, 6. Lines, 3—6 on a page. Extent, 81 s'lokas. Character, Bengali. Date, ? Place of deposit, Mándárakhaṇḍa, Vikrampura, Ḍháká, Vaikanthanátha Chakravartí. Appearance, new. Verse. Incorrect.

S'áktábhisheka. A manual of the rites and ceremonies to be performed when initiating a person into the S'ákta cult. Anonymous.

Beginning. स्वस्तिवाचनपूर्व्वकं सङ्कल्पं कुर्य्यात्। ॐ तत्सदद्येत्यादि।
End. गुरवे दक्षिणां दद्देत्॥
Colophon. इति शाक्ताभिषेकः समाप्तः॥०॥
विषयः। तन्त्रसङ्ग्रहः।

No. 1117. स्मरदीपिका।

Substance, country-made yellow paper. Folia, 5. Lines, 5—6 on a page. Extent, 120 s'lokas. Character, Bengali. Date, S'K. 1764. Place of deposit, Vaṭesvara, Vikrampura Ḍháká. Gaṅgácharaṇa Tarkaratṇa. Appearance, old. Verse. Not very correct.

Smaradípiká. A treatise on erotics. Anonymous.

Beginning. हरकोपानलेनैव भस्मीभूतः क्वतः स्मरः।
अर्द्धं गौरीशरीरेण येन तस्मै नमो नमः॥
सम्यगाराधितः कामः सुगन्धिकुसुमादिभिः।
विदधातु वरस्त्रीणां मानग्रन्थिविमोचनं॥
अनेककामशास्त्राणां सारमाक्षय यत्नतः।
कामव्युत्पत्तये स्त्रीणां चित्तसन्तोषणाय च॥
End. न चाभिरमते कामी कामिनीं कामिनीप्रियः।
स भवत्येव कामिन्याः कामसागरपारगः॥०॥
Colophon. इति कामशास्त्रे स्मरदीपिका समाप्ता॥
विषयः। स्त्रीपुरुषयोर्लक्षणादिः।

No. 1118. गोपालचरित्रं।

Substance, country-made yellow paper. Folia, 47. Lines, 2 on a page. Extent, 188 s'lokas. Character, Bengali. Date, ? Place of deposit, Mándárakhaṇḍa, Vikrampura, Ḍháká, Kálíkumára Bhaṭṭácharya. Appearance, old. Prose and verse. Very incorrect.

Gopála-charitra. Hymns in praise of certain incidents in the early life of Krishṇa, during his sojourn with the cowherds of Gokula, when he bore the name Gopála, or "the cowherd-protected." By Chaitanya the great Vaishṇavite reformer. This is the only work the author is known to have written.

Beginning. यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुवन्ति दिव्यैस्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनः
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

End. राधाजीवनमस्त्रौषधिर्भवानिति किमाजीवं विस्मरणीयमित्युक्त्वा सा जगाम ॥०॥

Colophon. इति श्रीचैतन्यदेवविरचितं गोपालचरित्रं पारखण्डं समाप्तम् ॥०॥

विषयः । गोपालचरित्रकथनं ।

No. 1119. दशरथव्रतम् ।

Substance, country-made yellow paper. Folia, 4. Lines, 3 on a page. Extent, 25 s'lokas. Character, Bengali. Date, ? Place of deposit. Mándárakhanda, Vikrampura, Dhákâ, Kálíkumara Bhattácharya. Old, corrupt and illegible. Verse. Incorrect.

Das'aratha-vrata. Rules for observing a fast in honour of Das'aratha, king of Ayodhyá and father of Ráma. Anonymous.

Beginning. ततः कथा । युधिष्ठिर उवाच । प्राप्तं मुनिवरं नाम लोमसं मुनिपुङ्गवं ।
विधिवत् पूजनं कृत्वा पप्रच्छ पार्थिवो मुनिं ॥

End. शेषेऽस्पष्टम् ।

विषयः । दशरथकृतव्रतविशेषकथनं ।

No. 1120. स्पन्दनचरित्रं ।

Substance, country-made yellow paper. Folia, 2. Lines, 1—6 on a page. Extent, 48 s'lokas. Character, Bengali. Date, ? Place of deposit. Mahárájanagara, Vikrampura, Dhákâ, Kálíkrishna Gangopádhyáya. Appearance, old. Prose. Correct.

Spandana-charitra. Divination from the involuntary twitchings of the muscles of one's body, and the means of averting evils when so indicated. Anonymous.

Beginning. अथ स्पन्दनचरित्रं । शिरःस्पन्दनं योग्यमलङ्कारं कथयति । ललाटस्पन्दन-
मैश्वर्य्यं ।

End. उभयचरणस्पन्दनमरिष्टं कथयति ॥

Colophon. इति स्पन्दनचरित्रं समाप्तम् ॥०॥

विषयः । अङ्गस्पन्दनफलाफलं ।

No. 1121. स्वप्नचरित्रम् ।

Substance, country-made yellow paper. Folia, 3. Lines, 6 on a page. Extent, 72 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájnagara, Vikrampura, Ḍháká. Kálíkrishna Gaṅgopádhyaya. Appearance, old. Verse. Incorrect.

Svapnacharitra. Oneiromancy or divination by dreams. Anonymous.

Beginning. बृहस्पतिरुवाच । स्वप्नाध्यायं प्रवक्ष्यामि नानाशास्त्रसमुद्भवं ।
येन विज्ञानमात्रेण बुध्यते सम्पदापदं ॥

End. स्मरेच्च दुःखं प्रविनाशकाय ॥

Colophon. इति स्वप्नचरित्रं समाप्तम् ॥०॥

विषयः । स्वप्नशुभाशुभफलं ।

No. 1122. सारस्वताभिधानं ।

Substance, country-made yellow paper. Folia, 2. Lines, 7 on a page. Extent, 47 s'lokas. Character, Bengali. Date, ? Place of deposit, Mándárakhaṇḍa, Vikrampura, Ḍháká, Kálikumar Bhaṭṭáchárya. Appearance, old. Verse. Incorrect.

Sárasvatábhidhána. An abridgment of a Sanskrit lexicon attributed to Savasvatí, the goddess of learning. Anonymous. Professor Wilson does not notice this work in the preface to the first edition of his Sanskrit Dictionary. The MS. is a mere fragment, and contains nothing worthy of note.

Beginning. सारस्वताभिधानञ्च प्रवक्ष्यामि समासतः ।
गोपालाय(?) करीन्द्राणामायुर्षेऽपि कलत्रतः ॥
रणे मतः षष्टिमतः मदद्दन्दो महाम्गः ।
स्थूलपादो मत्तकौशः कुञ्जरो वारणः करी ॥

End. कवयो ये न जानन्ति तेषां मोहः सदा भवेत्।
जायते यद्वयं मिथ्या सत्यं सत्यं पुनः पुनः॥

Colophon. इति सरस्वतीकृतं सारस्वताभिधानं समाप्तम्॥०॥

विषयः। नामलिङ्गानुशासनं।

No. 1123. नक्षत्राभिधानम्।

Substance, country-made yellow paper. Folia, 2. Lines, 6 on a page. Extent, 37 s'lokas. Character, Bengali. Date, ? Place of deposit, Vaṭes'vara, Vikrampura, Ḍháká, Gañgácharaṇa Tarkaratna. Appearance, old. Verse. Incorrect.

Nakshatrábhidána. A vocabulary of the synonyms of the different names of the twenty-seven Nakshatras or lunar mansions. Anonymous.

Beginning. अश्विनी तुरगो वाजी तुरङ्गश्च तुरङ्गमः।
घोटकोऽश्वो हयो वाहो मयुः सप्तिर्निगद्यते॥१॥

End. अन्त्यभं रेवती पौष्णा पूषा चेति भनामतः॥

Colophon. इति नक्षत्राभिधानं समाप्तम्॥०॥

विषयः। अश्विन्यादिनक्षत्राणां नामान्तराणि।

No. 1124. ग्रहाभिधानं।

Substance, country-made yellow paper. Folia, 2. Lines, 6 on a page. Extent, 37 s'lokas. Character, Bengali. Date, ? Place of deposit, Vates'vara, Vikrampura, Ḍháká, Gañgácharaṇ Tarkaratna. Appearance, old. Verse. Incorrect.

Grahábhidána. A vocabulary of the synonyms of the names of the nine planets. Anonymous.

Beginning. आदित्यः सविता सूर्य्यो भास्करोऽर्को दिवाकरः।
तीक्ष्णांशुस्तपनो भानुः सहस्रांशुः प्रभाकरः॥

End. केतुर्ब्रह्मसुतो ज्ञेयः धूम्रवर्णः शिखी तथा॥

Colophon. इति ग्रहाभिधानं समाप्तम्॥

विषयः। सूर्य्यादिग्रहाणां नामान्तराणि।

No. 1125. कृष्णपदामृतं ।

Substance, country-made yellow paper. Folia, 29. Lines, 5—6 on a page. Extent, 2192 s'lokas. Character, Bengali. Date, ? Place of deposit, Mahárájanagara, Vikrampura, Ḍháká, Kálikrishṇa Gaṅgopádhyáya. Appearance, old. Verse. Correct.

Kṛishṇa-padámṛita. A few Hymns in praise of Kṛishṇa. By S'ríkṛishṇa Sárvabhauma. The work was composed, according to a chronogram at the end, in the S'aka year 1633.

Beginning. माङ्गल्यानां प्रधानं यमभयतमसां शारदं शर्व्वरीशं
पीयूषाणां निधानं मुनिगणमनसामेकविश्रामधाम ।
संसाराब्धिं तितीर्षास्तरणिमतिधनं नारदादेर्म्महर्ष-
र्लक्ष्मीवक्षोऽरविन्दं स्मर हरिचरणद्वन्द्वमानन्दकन्दम् ॥

End. शाके वह्निकृताशषड्विधुमिते श्रीकृष्णसर्व्वोपरि-
लानन्दप्रदनन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे कृष्णपदामृतं त्रिभुवनत्राणाय दानादिभिः
ख्यातश्रीयुतरामजीवनमहाराजाधिराजाद्रुत ॥ २५२ ॥

Colophon. इति महामहोपाध्यायश्रीलश्रीकृष्णसार्व्वभौमभट्टाचार्य्यविरचितं श्रीकृष्णपदामृतं समाप्तम् ॥०॥

विषयः । कतिपयश्रीकृष्णलीलावर्णनं ।

No. 1126. प्रश्नचूड़ामणिः ।

Substance, country-made yellow paper. Folia, 4. Lines, 7—8 on a page. Extent, 84 s'lokas. Character, Bengali. Date, ? Place of deposit, Mandárkhaṇḍa, Vikrampura, Ḍháká, Kálikumára Bhaṭṭácharya. Appearance, old. Verse. Generally correct.

Pras'na-chúḍámaṇi. Divination by dropping grains on a spot of ground having fifty squares drawn on it. Anonymous.

Beginning. पञ्चाशत् कोष्ठानां मध्ये यस्मिन् दुर्व्वा पतति तत् कोष्ठविहितश्लोकैः प्रश्नफला फलं ज्ञेयं । यथा
अकारे विलयं विद्याद् देवार्च्चनं तथैव च ।
सिद्धिर्भवति कार्य्याणां पुत्रवांश्च तथैव च ॥

End. ऋकारे सफलं कार्य्यं सर्व्वसिद्धिः सदा भवेत्।
सर्व्वत्र लभते सिद्धिं द्दिव्यवाक्यं न संशयः ॥

Colophon. इति प्रश्नचूड़ामणिः समाप्तः ॥०॥

विषयः। कोष्ठस्थकाद्यन्यतमवर्णस्पर्शने शुभाशुभफलोक्तिः।

No. 1127. कौतुकमञ्जरी।

Substance, country-made yellow paper. Folia, 7. Lines, 4—5 on a page. Extent, 109 s'lokas. Character, Bengali. Date, ? Place of deposit, Vaṭes'vara, Vikrampura, Ḍháká, Gaṅgácharaṇa Tarkaratna. Appearance, old. Prose and verse. Very Incorrect.

Kautuka-mañjarí. A work on erotics. Anonymous.

Beginning. प्रणम्य वाण्याश्चरणारविन्दं सुरासुराणामपि वन्दनीयं।
यूनां मुदे कामयतां मनोज्ञा प्रकाश्यते कौतुकमञ्जरीयं॥
तावदुद्वाहानन्तरं कान्तालिङ्गमसहमाना परेद्युर्मातर्य्याह "मातः केलिगृहं न यामि शयितुं कस्माच्च चन्द्रानने, जामाता तव निर्द्दयो निजभुजापाशेन मां पीड़ति।
छिन्नाग्रौ च कुचौ करोति करजैर्द्दन्तैः प्रपीड़ेन्मुखं,
नीवीबन्धविमोचणञ्च कुरुते निद्रापि नायाति मे ॥ १ ॥

End. ततो दूतीमुखात् दृत्तान्तं श्रुत्वा झटिति खगृहमायातुः समूढापि त्वां(?) तामालिङ्गितवान्। ततः परेद्युर्दूत्यागत्येदानीं भवति चन्द्रादिकं किम्भूतमनुभवति(?) ततः प्राह,
चन्द्रः पूर्व्वं दयितविरहे चण्डभानुर्ममासी-
न्मन्दोऽप्यासीन्मलयजरुजा मर्म्मभेदी च वज्रः।
कल्पप्राया रजनिरभवत् कान्तयोगादिदानीं
चन्द्रश्चन्द्रो मरुदिव मरुद् यामिनी यामिनीव ॥ २२ ॥
इति समाप्ता ॥०॥

विषयः। नवीनाचरित्रकथनं।

No. 1128. ज्योतीरत्नम्।

Substance, Palm leaf. Folia, 7. Lines, 3 on a page. Extent, 97 s'lokas. Character, Bengali. Date, ? Place of deposit, Maṇḍarkhaṇḍa Vikrampura, Ḍháká, Vaikunṭhanátha Chakravartí. Appearance, old. Verse. Generally correct.

Jyotiratna. Auspicious stellar conjunctions for marriages, &c. By Varáha Muni. The work professes to be an abridgment of the Jyotihsára. The author, in his introduction, calls himself Varáha S'armá, which would indicate that he was not the same with Varáha Mihira, nor a very old author. The word *Muni* in the colophon is evidently erroneous.

Beginning. दुर्बोधानां हितार्थाय क्रतं वराहशर्म्मणा।
ज्योतिःसारस्य सङ्क्षेपाज् ज्योतीरत्नमिहोदितम्॥
विवाहादिकमारभ्य यावद्दोषप्रभचणं।
नानामुनिविनिर्द्दिष्टैः ज्ञायतां लग्ननिर्णयः॥

End. यात्रा+गृहारम्भयोः प्राशने मुनिवाक्यतः।
रेवती मृगो हस्ता च शुभान्येतानि कर्म्मणि॥०॥

Colophon. इति वराहमुनिविरचितं ज्योतीरत्नं समाप्तम्॥०॥

विषयः। विवाहादिकर्मसु शुभाशुभप्रहनचत्रादिविचारः।

No. 1129. कातन्त्रवृत्तिप्रबोधः।

Substance, Palm leaf. Folia, 74. Lines, 3—4 on a page. Extent, 1073 s'lokas. Character, Bengali. Date, Sk. 1726. Place of deposit, Vaṭes'vara Vikrampura Ḍháká, Gangácharaṇa Tarkaratna. Appearance, old. Prose. Generally correct.

Kátantra-vritti-prabodha. A gloss on Ráma's commentary on the Kalápa grammar. By Rámanátha Chakravartí. The MS. comprises only the chapter on declensions, which has the special title of S'abda-ratnávalí.

Beginning. अथ शब्दाः । तत्राकारान्ताः । रामः रामौ रामाः । रामं रामौ रामान् ।
End. ——कल्पनादित्यत्रावर्णाद्देवेति टीकाकृतोक्तमप्यघुटस्वरविषयकमिति बोध्यम् ।
Colophon. इति रामनाथचक्रवर्त्तिविरचिते कातन्त्रवृत्तिप्रबोधे शब्दरत्नावली समाप्ता ॥०॥
विषयः । शब्दानां रूपाणि ।

No. 1130. योग्यतारहस्यम् ।

Substance, country-made yellow paper, 17½ × 4 inches. Folia, 15. Lines, 9—10 on a page. Extent, 522 s'lokas. Character Bengali. Date, ? Place of deposit, Navadvípa, Kríshnakánta S'iroratna. Appearance, old. Prose. Correct.

Yogyatá-rahasya. A part of Raghunátha's commentary on the Anumána-chintámaṇi of Gañges'a ; it treats of consistency in argument. Ante I, p. 295.

Beginning. आकाङ्क्षान्निरूप्य योग्यतान्निरूपयितुं इच्छति—ननु केति ।
End. घटाभाववति भूतले योग्यानुपलब्ध्या यथा इह घटो नास्तीति निश्चयस्तथा इत्यर्थः ।
Colophon. इति योग्यताग्रन्थरहस्यम् ॥
विषयः । गङ्गेशोपाध्यायविरचितशब्दखण्डीययोग्यताग्रन्थस्य टिप्पनी ।

No. 1131. अपूर्ववादरहस्यम् ।

Substance, country-made yellow paper, 17½ × 4 inches. Folia, 15. Lines, 7—10 on a page. Extent, 669 s'lokas. Character, Bengali. Date ? Place of deposit, Navadvípa, Kríshnakánta Siroratna. Appearance, old. Prose. Correct.

Apúrvaváda-rahasya. Another part of Ragunátha's commentary on the Anumána-chintámaṇi of Gañges'a ; it treats of fate or fruit of works in argument.

Beginning. लिङर्थः कार्य्यत्वं पाकादिरूपलौकिकक्रियायामेव प्रथमतोऽन्वेति न तु स्वर्गकामो यजेतेत्यादितः यागादितस्तदन्वयः किन्तु कार्य्यत्वेनैव वैदिकलिङ्वाच्येऽपूर्वे प्रथमतो विषयतया स्वयागाद्यन्वयः ॥

End. अपरा च प्रमाविशेष्यत्वावच्छिन्नाप्रतियोगिता (इतः खण्डितं)

विषयः । गङ्गेशोपाध्यायविरचितशब्दखण्डीयलिङर्थापूर्वविचारस्य टिप्पनी ।

No. 1132. पदार्थखण्डनटीका ।

Substance, country-made yellow paper, 15½ × 3 inches. Folia, 18. Lines, 8 on a page. Extent, 972 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Bhuvanamohana Vidyáratna. Appearance, old. Prose. Incorrect. Another copy at the Sañskrita College, Calcutta.

Padártha-khaṇḍana Ṭíká. A commentary on Raghunátha S'iromaṇi's criticisms on the Vais'eshika categories. By Rámabhadra Sárvabhauma. Raghunátha's work is known under four different names, viz. *Padártha-khaṇḍana*, *Padártha-tattva*, *Padártha-tattva-vivechana, and Padártha-nirúpaṇa*, and the commentary is indicated by adding the term *ṭíká* to any of these names at option ; the first, however, appears to be the name originally assigned to it by the author, as Raghudeva Nyáyálaṅkára Bhaṭṭáchárya styles his commentary on the work, *Padártha-khaṇḍana-vyákhyá,* and it has no aliases. Rámabhadra Sárvabhauma was the son of Raghunátha, the author of the text. Hall's *Contributions*, p. 80.

Beginning. ॐ नमो गणेशाय ।

तातस्य तर्कसरसीरुहकाननेषु चूडामणेर्दिनमणेस्वरणे प्रणम्य ।
श्रीरामभद्रकृती कृतिनां हिताय लीलावशात् किमपि कौतुकमातनोति ॥
तत्र तेषु पदार्थेषु दिक्कालाविति ।

End. प्रायशः कारणतामधिशेते इति प्राञ्चः ।

कथञ्चिदपि संवरणे समर्थानर्थानधीत यदि दीधितिकृद्विवेकः ।
श्रीसार्वभौमविरचितार्थविशुद्धतत्त्वे सिद्धे च तर्हि सुधियः परिशीलयन्तु ॥

Colophon. इति श्रीमहामहोपाध्याय श्रीयुत रामभद्रसार्वभौमभट्टाचार्यविरचिता पदार्थखण्डनटीका समाप्ता ।

विषयः । रघुनाथशिरोमणिकृतपदार्थखण्डनस्य व्याख्यानं ।

No. 1133. पदार्थखण्डनव्याख्या ।

Substance, country-made yellow paper, 16 × 3½ inches. Folia, 36. Lines, 8 on a page. Extent, 1260 s'lokas. Character, Bengali. Date, Sk. 1632. Place of deposit, Navadvípa, Bhuvanamohana Vidyáratna. Appearance, old. Prose. Incorrect.

Padárthakhaṇḍana-vyákhyá. A commentary on Raghunátha's ***Padárthakhaṇḍana.*** By Govínda Bhaṭṭáchárya Chakravarttí. The name of this work is the same as that of Raghudeva Nyáyálaṅkára Bhaṭṭáchárya noticed by Mr. Hall in his *Contributions*, p. 80.

Beginning. ॐ नमो दुर्गायै । प्रणम्य जगतामीशं स्थितिप्रलयकारिणं ।
पदार्थखण्डनव्याख्यां गोविन्दः कुरुते सुधीः ॥
प्रणम्य च गुरून् सर्वान् विचार्य्य च गुरोर्वचः ।
यदुच्यते मया सम्यक् ग्राह्यं तदपि पण्डितैः ॥
पदार्थतत्त्वमिति ।

End. व्युत्पत्त्यन्तरकल्पनाया आवश्यकत्वात् व्युत्पत्तिसिद्ध इति भावः ।

Colophon. इति श्रीमन्महामहोपाध्याय श्रीयुत् श्रीगोविन्दभट्टाचार्य्यचक्रवर्त्तिविरचिता पदार्थखण्डनव्याख्या समाप्ता ॥

विषयः । प्रागुक्त एव ।

No. 1134. तत्त्वप्रदीपिका मानसनयनप्रसादिन्याख्यटीकासहिता ।

Substance, country-made yellow paper, 13½ × 5¼ inches. Folia, 459. Lines 12—16, on a page. Extent, 12565 s'lokas. Character, Bengali. Date ? Place of deposit, Benares, Nadiyárchhattra, S'ivakrishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, new. Text, Prose. Commentary, Verse. Generally, correct. Notes on the margin.

Mánasa-nayana-prasádiní-ṭíká alias *Tattva-pradípiká Ṭíká.* A gloss on Chitsukha Muni's confutation of the Nyáya system on the basis of the Vedánta Aphorisms of Vyása. By Pratyaksvarupa Bhagaván. Chitsukha's work is named by its author ***Pratyak-tattva-dípiká,*** but it is generally known under the names of ***Tattva-pradípiká*** and *Chitsukhí.* The author's original name was Mánottama, and he was a disciple of Gauḍes'vara A'chárya. The title of Chitsukha was adopted

by him on his becoming a hermit, to indicate his entire devotion to the contemplation of the Divine soul. The MS. includes both the text and the commentary, and both are held in very high estimation by Vedántists. The author of the text, in the course of his confutation, has explained the whole of the Vedánta aphorisms, so that his work serves as a commentary on the text of Vyása. Hall's *Contributions*, p. 154.

Beginning. ॐ गोपालाय नमः ।

मूलस्य——स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो
यः पञ्चाननपाञ्चजन्यवपुषा व्यादिष्ट विश्वात्मतः ।
प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणं हरिः
सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः ॥ १ ॥
ज्योतिर्दक्षिणा मूर्त्तिर्व्यासशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥ २ ॥
विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला ।
क्रियते चित्सुखमुनिना प्रत्यक् तत्त्वदीपिका विदुषा ॥ ३ ॥

टीकायाः——यन्नित्यं निरवग्रहस्वमहिमामेयस्वभावं महा-
मायावेशवशाद्विवर्त्तितवियद्वाय्वग्न्यबुर्वीमुखै- ।
र्भावैस्तत्तदनन्तविभ्रममयैर्विध्वस्तभेदोद्भवं
निर्धूतावधिबोधमोदजलधिं वन्दे महीयो महः ॥ १ ॥
उन्निद्रशुभ्रसरसीरुहसन्निषण्णां
निर्गच्छदच्छरुचिनिर्जितचन्द्रकान्तिम् ।
हारोज्ज्वलां लिपितनुं स्फटिकाक्षकुम्भ-
मुद्राक्षपुस्तककरां प्रणमामि वाणीम् ॥ २ ॥
अविरलविगलितमदजलविलुलितमत्तालिमाल्यमनुलम्बः ।
विपुलकपोलोत्पुलको दलयतु लम्बोदरो दुरितम् ॥ ३ ॥
यद्विद्याधवलैर्बिभर्त्ति विबुधैः सर्वा दिवापीन्दुमुन्-
मीलत्कैरवकोरकाकुलरुचिं विश्वम्भरेयं भृता ।
घोराज्ञानदुरन्तपङ्कनिकरप्रोत्सारिविद्यानदी
मूलं नौमि मुनीन्द्रमन्वहमहं विद्यागिरिं तं गुरुम् ॥ ४ ॥
यत्पादपावनसरोजरजःपरागैरेते विनेयनिवहा विरजस्त्वमापुः ।
सत्यप्रकाशपरिशुद्धनिजानुभावं प्रत्यक्प्रकाशमभिनौमि गुरुं यतीन्द्रं ॥ ५ ॥
उद्यद्विद्यासुरसरिदियं निःसृता यत्सकाशात्

यत्पादाब्जं सकलविबुधोत्तंसलीलां बिभर्त्ति ।
हंसानां यद्विमलवक्त्रवाग्‌जीवनं जीवनं तं
वन्दे विद्यागुरुमविरतं मानसं तीर्थमार्य्यम् ॥ ६ ॥
दोषत्वमुज्ज्वलगुणा अपि यान्ति येषु
तैरुन्नतैः किमथवेह तिरस्कृतैः किं ।
दोषोऽपि येषु गुणतामुपयाति भूयां-
स्तेभ्यो नमोऽस्तु सततं भुविसज्जनेभ्यः ॥ ७ ॥
अविनश्वररुचितत्त्वदीपिकालोकनाशिनां क्रियते ।
अज्ञानतिमिरभेत्री मानसनयनप्रसादिनी टीका ॥ ८ ॥

End. मूलस्य——तदेवं श्रुतिस्मृतिपुराणादि दृष्ट्वा जीवन्मुक्तिप्रद्वेषमात्रेण नापलपितुं शक्यते इति सिद्धं ।

Colophon. इति गौड़ेश्वराचार्यपरमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां चतुर्थः परिच्छेदः । इति तत्त्वदीपिका समाप्ता ॥

टीकायाः——फलितमाह,—तदेवमिति ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्रत्यक्प्रकाशपूज्यपादशिष्यस्य प्रत्यक्स्वरूपभगवतः कृतौ तत्त्वप्रदीपिकाटीकायां मानसनयनप्रसादिन्यां चतुर्थः परिच्छेदः समाप्तः ॥

विषयः । वेदान्तप्रस्थानस्य प्रकरणग्रन्थोऽयं, अत्र तावत् चत्वारः परिच्छेदाः । तत्राद्ये—स्वप्रकाशशब्दार्थविचारपूर्वकं तस्य विज्ञानात्मसाधनम् । पुरुषस्य विज्ञानवपुष्ट्‌वसाधनम् । तमः पदार्थस्य भावरूपत्वसाधनम् । जगतो मिथ्यात्वस्थापनम् । तथा तस्याऽज्ञानाश्रयत्वस्थापनम् । अज्ञानस्यानादिभावत्वस्थापनम् । अध्यासस्य निर्णयः । शब्दस्य प्रामाण्यसिद्धिः । शब्दस्य अखण्डार्थबोधकत्वम् । ज्ञानस्य प्रमात्वसंस्थापनम् । शक्तिपदार्थस्य संस्थापनम् । शब्दस्य कार्य्यान्विते शक्तिः । वेदस्यापौरुषेयत्वसंस्थापनम् ।

द्वितीये——भेदस्य खण्डनम् । द्रव्यादिषट्पदार्थस्य खण्डनम् । क्षणिकवादखण्डनम् । षण्णां प्रमाणानां खण्डनम । अभावानां खण्डनम् । भावानां खण्डनम् । परमाणुखण्डनम् । अवयवियुतसिद्धायुतसिद्धानां खण्डनम् । द्वित्वादिसङ्ख्यानां खण्डनम् । द्व्यणुकपरिमाणपिलुपाकपिठरपाककालभेदाभेदखण्डनम् ।

तृतीये——शब्दस्य साक्षात्कारकत्वस्थापनम् । ब्रह्मज्ञानस्य मुक्तिसाधनत्वम् । कर्मरहितब्रह्मज्ञानस्य मुक्तिसाधनत्वं ।

चतुर्थे—— एकजीववादः । षड्‌विधतात्पर्यलिङ्गैर्वस्तुनिर्णयः । मुक्तिविचारश्च ॥

No. 1135. ब्रह्मविद्याभरणं ।

Substance, country-made yellow paper, 13 × 4½ inches. Folia, 260. Lines 15—21, on a page. Extent, 10,595 s'lokas. Character, Bengali. Date, ? Place of deposit, Nadiyárchhatra, Benares, S'ívakrishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, old. Prose. Generally correct. Notes on the margin.

Brahmavidyábharaṇa. A commentary on S'añkara Ácharya's exegesis of the Vedánta Aphorisms. By Advaitánanda, pupil of Bhumánanda Sarasvatí. The MS. is incomplete, wanting the fourth or last book. The extent of the three books is limited to ten thousand five hundred verses, whereas the complete copy noticed by Mr. Hall (*Contributions*, p. 89,) comprised 24,000 s'lokas. From one of the verses quoted below, it will be seen that the author admits his work to be an abridgement of a more elaborate scholium by his tutor Rámánanda Tírtha.

Beginning. ॐ शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावयेत् ॥ १ ॥
वेदान्तनिकुरम्बेन तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥ २ ॥
स्वानन्दाम्बुधिमग्नचित्तमनिशन्निर्धूतमायामलं,
कारुण्यार्ण्णवशान्तिसीरभमसुं देव्या गिरा सेवितम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा,
चित्तेशं कलयामि वेदशिरसस्तत्त्वावबोधाप्तये ॥ ३ ॥
मुग्धं मामनुगृह्य यः करुणया तुर्य्याङ्कुतिप्रस्फुरद्
भासां वेदवतीं विकल्पगलितां विद्यां ददौ चिन्मयीम् ।
भूमानन्दपदस्थितो गुरुरसौ पूज्याधिपूज्यः सदा,
चेतो मे कुरुतादलङ्कृतमतिस्वच्छैः स्वपादाम्बुजैः ॥ ४ ॥

End. तस्मिन् पक्षे ब्रह्मणा रक्षणीयत्वे वचनमुपपद्यते इति ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्भूमानन्दसरस्वतीचरणानुग्रहलब्धसारस्वतपदस्य निरतिशयौदार्य्यादिगुणरत्नखचितयतिकुलोत्तंसश्रीमद्रामानन्दतीर्थमुखारविन्दनिर्गतशारीरकसूत्रार्थस्वर्धुनीप्रवाहनिमज्जनसुहितस्याद्वैतानन्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाभिधायां तृतीयस्याध्यायस्य तृतीयः पादः ॥ १ ॥ (चतुर्थाध्यायस्य व्याख्या न मिलतीत्युद्घोषः)

विषयः । शाङ्करशारीरकभाष्यस्य व्याख्यानं ।

No. 1136. सङ्क्षेपशारीरकं । सङ्क्षेपशारीरकसारसङ्ग्रहदीपिकाभिधटीकासहितम् ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 435. Lines, 11—18, on a page. Extent, 20,307 s'lokas. Character, Bengali. Date ? Place of deposit, Nadiyárchhatra, Benares, S'ívakṛishṇa Vedántasarasvatí Bhaṭṭácharya. Appearance, new. Text, in verse; Commentary in prose. Generally correct. Notes on the margin.

Sañkshepa-s'árîraka with its commentary entitled *Sañkshepa-sárîraka-sañgraha-dípiká*. A commentary on Sarvajñátma Mahámuni's metrical abridgement of S'añkara's exegesis of the Vedánta Aphorisms. By Madhusúdana Sarasvatí, pupil of Vís'vés'vara Sarasvatí. The commentary was written during the reign of a prince named Manukula A'ditya, in the Samvat year 1569. Besides the work of Mudhusúdana, there are five commentaries on the text respectively by Nṛisiñha A's'rama, Rághavánanda Sarasvatí, Ráma Tírtha, and Purushottama Dikshita. Hall's *Contributions*, pp. 91-3203. Madhusúdana was a commentator and Vedántist of great repute, and several works of his are well-known, the most renowned being his commentaries on the Bhágavata and the Bhagavad Gítá.

Beginning. (मूलस्य)—अद्वतं जड़विरोधिरूपमन्तरयमलवन्धनदुःखितावितदं ।
मुरारेः परमं पदं प्रणयादभिष्टवीमि ॥ १ ॥
स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमः स्थितिरस्तमोहा प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥ २ ॥
प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागमेकम् ।
चैतन्यमात्रपरमार्थनिजस्वभावं प्रत्यक्षमच्युतमहं प्रणतोस्मि नित्यम् ॥ ३ ॥
औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्याः ।
विज्ञायते विश्वविवर्त्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम् ॥ ४ ॥
प्रारम्भाः फलिनः प्रसन्नहृदयो यस्मिन्निरस्तामपि,
नो चेद्विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः ।

विश्वैश्वर्यमतो निरङ्कुशमभूद्यस्यैव विश्वप्रभोः,
सोऽयं विश्वहिते रतो विजयते विश्वेश्वरो विश्वकृत् ॥ ५ ॥
वाग्मिस्तरा यस्य बृहत्तरङ्गा, वेलातटं वस्तुनि तत्त्वबोधः ।
रत्नानि तर्कप्रसवप्रकाराः, पुनात्वसौ व्यासपयोनिधिर्नः ॥ ६ ॥
वक्त्रारमासाद्य यमेव नित्या, सरस्वती स्वार्थसमन्वितासीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥ ७ ॥
यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः ।
जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥ ८ ॥
गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः ।
अपि महति जलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीनाः ॥ ९ ॥
शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः ।
शारीरकार्थविषयावगतिप्रधानं सङ्क्षेपतः प्रकरणं करवाणि हृष्यन् ॥ १० ॥

(टीकायाः)—सत्यं ज्ञानमनन्तमद्वयसुखं यद् ब्रह्म गत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतं ।
जातं नन्दतपोबलात्तदखिलानन्दाय वृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानां प्रणम्य पादाम्बुजपुण्यपांसून् ।
तेषां प्रभावादहमस्मि योग्यः शिलापि चैतन्यमलब्धमेभ्यः ॥ २ ॥
पूर्वाचार्य्यवचो विचार्य्य निखिलं तत्सम्प्रदायाध्वना
छित्वोच्छृङ्खलमार्गमागमगिरां तात्पर्य्यपर्य्याप्तितः ।
विच्छिद्यार्थविभागतः प्रकरणान्युद्भिद्य तत्त्वं रहः
कुर्वे सम्प्रति सारसङ्ग्रहमिमं सङ्क्षेपशारीरके ॥ ३ ॥
हित्वा हेयमुपादेयमुपादाय विचारतः ।
प्रायेण पूर्वटीकानामिहार्थः प्रकटीकृतः ॥ ४ ॥
विशेषाद्विश्वदेवस्य प्रत्यग्विष्णोश्च हृद्ययोः ।
व्याख्यानं श्रद्धयालेखि गुरूणां तौ हि नो गुरू ॥ ५ ॥

End. (मूलस्य)—सङ्क्षेपशारीरकमेवमेतत्, कृतं परिव्राजकमुक्तिहेतुः ।
गुरुप्रसादात्परिलभ्य तत्त्वं, त्रयीशिरस्तत्त्वनिवेदनाय ॥
अविरलपदपङ्क्तिः पद्मनाभस्य पुण्या चरणकमलधूलिग्राहिणी भारतीयम् ।
घनतरमुपघातं श्रेयसः श्रोतृसङ्गात् सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः ॥
श्रीदेवेश्वरपादपङ्कजरजःसम्पर्कपूताशयः,

सर्वज्ञात्मगिराङ्कितो मुनिवरः सङ्क्षेपशारीरकम्।
चक्रे सज्जनबुद्धिवर्द्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥
भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥

Colophon. इति श्रीसर्वज्ञात्ममहामुनिविरचिते सङ्क्षेपशारीरके फललक्षणं चतुर्थोऽध्यायः॥

(टीकायाः)—अन्तेऽपि भगवन्नमस्काररूपमङ्गमाचरति,—भुजङ्गमाङ्गेति ॥
इह योऽस्ति विमोहयन्मनः परमानन्दघनः सनातनः।
गुणदोषभृद्देष एव नस्तृणतुल्यो यदयं परो जनः ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यमधुसूदन-सरस्वतीकृतायां सङ्क्षेपशारीरकटीकायां चतुर्थोऽध्यायः ॥

विषयः। शाङ्करशारीरकप्रस्थानवदिदमपि अद्वैतवादात्मकं विशेषस्त्वेतावत्——नच सगुणब्रह्मनिर्गुणब्रह्मणोरुभयोर्निरूपणमत्र तु केवलं निर्गुणब्रह्मणो निरूपणम्। अत एवैतत्प्रकरणस्य सङ्क्षेपेण कथनात् सङ्क्षेपशारीरकमिति नामेत्यपि ज्ञेयम्। अध्यायाश्चत्वारः। समन्वयाविरोधसाधनफलभेदात् आदौ समन्वयात्मके सर्वासां श्रुतीनां ब्रह्मपरत्वेन व्याख्यानं।
द्वितीये अविरोधाभिधे——वेदान्तातिरिक्तानां सकलशास्त्राणां अप्रामाण्योद्भावनेन तैरविरोधोद्भावनम्।
तृतीये साधनाभिधे——निर्गुणब्रह्मण उपासना जीवस्य च गत्यागतीत्यादिकम्।
तुरीये फलात्मके——यावदीयदर्शनप्रतिपाद्यानां मुक्तीनां खण्डनपुरःसरं अद्वैतवादप्रतिपाद्यमुक्तेः संस्थापनम्।

No. 1137. वैद्यमनोत्सवः।

Substance, country-made yellow paper, 12½ × 4 inches. Folia, 21. Lines, 8—11, on a page. Extent, 564 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Nadiyárchhatra, Sívakrishṇa Vedántasarasvatí Bhaṭṭácharya. Appearance, new. Prose. Incorrect. Notes on the margin.

Vaidyamanotsava. A treatise on the practice of medicine. By S'rídhara Mis'ra.

Beginning. ओं नमः शिवाय ॥

प्रणम्य नित्यं शिवसूनुमद्विदं सिद्धिं ददातीति तथा निर्धियः।
कुबुद्धिनाशं सुमतिं करोति मुदं तथा मङ्गलमेव कुर्य्यात्॥ १ ॥
न कोऽपि सञ्ज्ञानमजस्य पारमलच्यमूर्त्तेनु करोति यस्य।
साराणि यो मे विदधाति देवो नतः पुनस्तं करसम्पुटेन ॥ २ ॥
आयुर्वेदस्य शास्त्राणि निरीक्ष्य च पुनः पुनः।
सर्वेभ्यः सारमादाय कुर्वे वैद्यमनोत्सवम् ॥ ३ ॥
आदौ रोगपरीक्षार्थं वक्ष्ये नाड़ीपरीक्षणं।
येन विज्ञायते सर्वरोगाणां सर्वकारणम् ॥ ४ ॥

End: कच्छूविचर्च्चिकादद्रूकृमिभिर्मुच्यते शिशुः।

Colophon. इति श्रीमन्मिश्रश्रीधरविरचिते वैद्यमनोत्सवे प्रदरपुष्पोद्गमवन्ध्यागर्भपातनिवारणप्रसूतिका + भगसङ्कोचकुचदृढ़करणलिङ्गधातुपुष्टिकरणदुर्गन्धिनाशनबालरोगचिकित्सा नाम सप्तमः परिच्छेदः ॥ ७ ॥

विषयः। अस्य परिच्छेदाः सप्त सन्ति, ग्रन्थान्ते "सप्तमपरिच्छेदः" इति दर्शनात् परमादौ प्रथमपरिच्छेदसमाप्तिसूचकवाक्यं दृश्यते, तत एकदैव पञ्चमपरिच्छेदसमाप्तिसूचकवाक्यस्य, ततः पुनरेकदैव सप्तमपरिच्छेदसमाप्तिसूचकवाक्यस्य च दर्शनात् द्वितीयतृतीयतुरीयाणां षष्ठस्य च समाप्तिसूचकवाक्यानि लेखकप्रमादात् पतितानीति मन्यते सुतरां परिच्छेदानां सप्तत्वेऽपि विलम्बभयेन तावद्विषयाः प्रदर्श्यन्ते।

तथा चादौ——नाड़ीपरीक्षा। दूतलक्षणं। वैद्यदूतशकुनविचारः। वैद्यशकुनविचारः। मूत्रपरीक्षा। पित्तकफवायुनिदानानि। तेषां शमनोपचारः॥

द्वितीये = अर्थात् द्वितीयतृतीयतुरीयपञ्चमेषु——ज्वरदशायामुपद्रवकथनं। पित्तज्वरलक्षणानि। कफज्वरलक्षणानि। वायुज्वरलक्षणानि। मलज्वरलक्षणानि। अजीर्णज्वरलक्षणानि। खेदज्वरलक्षणानि। दृष्टिज्वरलक्षणानि। सन्निपातज्वरलक्षणं। ज्वरपाकमर्य्यादा। ज्वरमुक्तलक्षणम्। प्रथमज्वरचिकित्सा। महाज्वराङ्कुशः। सिद्धज्वराङ्कुशः। ज्वरघ्नी गुटिका। पित्तज्वरघ्नचूर्णं। कफज्वरघ्नचूर्णं। कफज्वरनस्यं। वातज्वरघ्नचूर्णं। वातज्वरे क्वाथः। मलज्वरे आरग्वधादिक्वाथः। अजीर्णज्वरे चूर्णं। खेदज्वरचिकित्सा। दृष्टिज्वरचिकित्सा। दोषत्रयचिकित्सा। शीतज्वरचिकित्सा। विषमज्वरचिकित्सा। सान्निपातिकचिकित्सा। अतिसारचिकित्सा। ग्रहणीचिकित्सा। मवेसीचिकित्सा। खूनीमवेसीचिकित्सा। भगन्दरचिकित्सा। गुल्मरोगचिकित्सा। प्लीहादि-

कित्सा। आमवातचिकित्सा। कृमिरोगचिकित्सा। शूलरोगचिकित्सा। पाण्डु-कामलचिकित्सा। क्षयरोगचिकित्सा। हिक्कारोगचिकित्सा। छर्दिरोग-चिकित्सा। श्वासरोगचिकित्सा। कासचिकित्सा। मन्दाग्निचिकित्सा। अथ विसूचिकारोगचिकित्सा। अण्डवृद्धिचिकित्सा। प्रमेहचिकित्सा। मूत्र-कृच्छ्रचिकित्सा। अश्मरीचिकित्सा। मूत्ररोगचिकित्सा। मृगिरोगचिकित्सा। मृग्युन्मादचिकित्सा। कुष्ठरोगचिकित्सा। विचर्चिकादिचिकित्सा। शस्त्रघात-चिकित्सा॥

तृतीये = अर्थात् षष्ठे सप्तमे च——वातरोगचिकित्सा। पित्तकोपचिकित्सा। कफकोपचिकित्सा। गण्डमालाचिकित्सा। मुखरोगचिकित्सा। नासारोग-चिकित्सा। पीनसरोगचिकित्सा। नेत्ररोगचिकित्सा। कर्णरोगचिकित्सा। शिरोरोगचिकित्सा। स्त्रीरोगप्रकारः। गर्भोत्पत्तिप्रकारः। गर्भपातनिवारणं। गर्भसङ्कोचकरणं। योनिदुर्गन्धनाशनः क्वाथः। कुचकाठिन्यकरणं। स्त्रीरोग-चिकित्सा। लिङ्गचिकित्सा। दुर्गन्धिहरणचिकित्सा। बालकरोगचि-कित्सा॥

No. 1138. भेदधिक्कृतिः।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 12. Lines, 13—15, on a page. Extent, 441 s'lokas. Character, Bengali, Date ? Place of deposit, Benares, Nadiyárchhatra, Sívakṛishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, new. Prose and verse. Generally correct.

Bhedadhikkṛiti. A refutation of the Nyáya doctrine of the essential difference between the Supreme and the human souls, and the establishment of the modern Vedánta theory of adualism. By Nṛisiñha A's'rama, pupil of Jagannátha A's'rama. Mr. Hall notices two commentaries, respectively by Náráyaṇa A's'rama and Narasiñha Bhaṭṭa, on this work. The work of the latter is noted below. *Contributions*, p. 158.

Beginning. ओं—वेदान्तवनसञ्चारि लीलाचलगुहाश्रयम्।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम्॥ १॥
किं न त्वं नरसिंह एव यदि वा नाहं न नो चेत्कथम्,
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्तः परः।

भूयाद्‌र्थवद्‌ात्मवन्मद्दर इत्याद्यं वचोऽपौरुषम्,
न त्वं ना तद्दं त्वमेव न्दहरे भूयासमात्मंस्त्वयि ॥ १ ॥
हृदयालयमालम्ब्य करुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धिक्कृतिम् ॥ २ ॥

End. गुरुचरणसकाशाद+तं निर्गतं तद्
+विगुणमगुणं वा वीक्षतां तत्त्वमात्मा ।
अपि+सृजति कश्चित् काचमालावमत्या
शतमखमणिमालां शारदाकाशकल्पाम् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमपूज्यपादशिष्यश्रीमद्वेदान्तसिद्धान्तसाराभिज्ञश्रीनृसिंहाश्रमविरचितो भेदधिक्कारः सम्पूर्णः ॥

विषयः । अत्रादौ जीवानां परस्परमभेदसाधकमनुमानादिकम् । जीवानां जीवेश्वरयोश्च भेदे प्रमाणतया उपात्तस्य मनसोऽप्रामाण्यानुमानमनेकविधं मानसस्य भेदासङ्गित्वनिर्णयः । ईश्वरत्वपदार्थविचारः । अहम्पदार्थस्य अनात्मत्वानुमानम् । भेदज्ञानस्यानर्थहेतुत्वसाधनम् । अद्वैतश्रुतेर्बलवत्त्वसाधनम् । भेदे अर्थापत्तिप्रमाणस्याप्रामाण्यनिश्चयः जीवेश्वरयोरभेदसिद्धिः । पुनर्जीवानामपि परस्परमभेदसाधनमनुमानादिकम् । भेदपदार्थविचारः । उपसंहारे परपक्षे भेदप्रतीतेर्निर्विषयत्वसंस्थापनपूर्वकं स्वमते कथञ्चित्सविषयत्वस्योपन्यासः । चैतन्यात्मकसद्व्यतिरिक्तसत्तायाः खण्डनम् । स्वमते भेदप्रतीतिप्रकारः । तथा भेदस्य साक्षिभास्यत्वं प्रतियोगिज्ञानानपेक्षत्वनिश्चयः । सर्वोपसंहारे परमतप्रसिद्धभेदप्रमाणस्यैवाद्वैतसाधकतयोपन्यास इति ॥

No. 1139. अद्वैतचन्द्रिका, भेदधिक्कृतिटीका ।

Substance, country-made yellow paper, 12 × 5 inches. Folia, 23. Lines, 25 on a page. Extent, 1795 s'lokas. Character, Bengali, Date, ? Place of deposit, Benares, Nadiyárchhatra, Sivakrishṇa Vedántasarasvatí Bhaṭṭácharya. Appearance, new. Prose and verse. Correct.

Advaita-chandriká. A commentary on the work noticed under the last preceding number, by Narasiñha Bhaṭṭa, son of Raghunátha and Siñgámbá, of the family of Náges'vara and the sept of Chinajharí, or Nierilla according to Mr. Hall. The work was written under the

auspices of a prince named Jagannátha of the Kimmuro family. The MS. is incomplete.


Beginning. ओं—यस्याज्ञावशवर्त्तिनोऽनुदिवसं शक्रादिदिक्पालकाः
येन व्याप्तमिदं विभाति हितसद् भातं सुखाद्यात्मना ।
उद्भूतवियदादयो विकृतयो यस्मिन् विवर्त्तात्मना
कस्मैचित् सुखसत्यबोधवपुषे तस्मै सवित्रे नमः ॥ १ ॥
श्रीविद्यानिलयं देवं दक्षिणामूर्त्तिमव्ययम् ।
नमामि वासमुख्यांश्च ज्ञानशास्त्रप्रवर्त्तकान् ॥ २ ॥
श्रीरामचन्द्रार्पितभक्तिसान्द्रम् श्रीरामभद्राश्रमदेशिकेन्द्रम् ।
वेदान्तविज्ञाननिरस्ततन्द्रम् मुदान्तरङ्गं कलये मुनीन्द्रम् ॥ ३ ॥
त्रिणभारिकुलोद्भूतनागेश्वरबुधोत्तमम् ।
तथा शेषा हि नामानं नमामि गुरुसत्तमौ ॥ ४ ॥
शिवाम्बारघुनाथाख्यौ पितरौ शिवसन्निधौ ।
वन्देऽहं यन्नमस्कृत्य मूको वाचस्पतिर्भवेत् ॥ ५ ॥
नरेन्द्रस्य कुलोत्पन्नः नरसिंहाख्यसूरिणा ।
अद्वैतचन्द्रिका टीका क्रियते भेदधिक्कृतेः ॥ ६ ॥
कि+रिकुलसम्भूत-जगन्नाथनृपाज्ञया ।
दक्षिणामूर्त्तितोषाय कृतिरेषा प्रतन्यते ॥ ७ ॥
क्वाहं मन्दमतिः क्वेदं व्याख्यानं भेदधिक्कृतेः ।
तथापि गुरुविश्वासे किमसाध्यं भवेन्मम ॥ ८ ॥


End. वैपरीत्यं निरस्यति अनधिगतेति । भेदाभावस्य मानान्तराज्ञातत्वा
(इतः खण्डितं) ।

विषयः । श्रीनृसिंहाश्रमविरचितभेदधिक्कृतेः "नान्यतोऽस्ति द्रष्टा नान्यतोऽस्ति श्रोता" इत्यादिश्रुतिमुल्लिख्य भेदवारणनिरूपणप्रसङ्गपर्य्यन्तस्य व्याख्यानम् ।

No. 1140. नरेश्वरपरीक्षा, नरेश्वरपरीक्षाप्रकाशसहिता ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 57. Lines, 12 on a page. Extent, 2650 s'lokas. Character, Bengali, Date, ? Place of deposit, Nadiyárchhatra, Benares, Sívakrishṇa Vedántasarasvatí Bhaṭṭáchárya. Appearance, new. Text in verse; Commentary in prose. Incorrect.





Nares'vara-pariksha with a commentary entitled *Nares'vara-pariksha-prakás'a.* The work comprises three books, the first of which, after pointing out the defects of the perfect man as portrayed in the Sáñkhya and other systems of philosophy, describes the particular attributes, the possession of which constitutes perfection ; the second treats of the attributes of the Divinity ; and the third criticises the opinions of the different current systems of philosophy regarding the attributes of the Deity. By Rámakaṇṭha Bhaṭṭa, son of Náráyanakaṇṭha.

Beginning. (मूलस्य)—अथ मेयाब्धिरत्नस्य शङ्करस्यामितद्युतेः ।
परीक्षां लेशतो वक्ष्मि पुम्परीक्षापुरःसरम् ॥ १ ॥

(टीकायाः) तं शक्तिं शक्तिमद्रूपं नत्वा नारीश्वरं परम् ।
नरेश्वरपरीक्षायामक्षरार्थः प्रकाश्यते ॥ १ ॥

End. (मूलस्य)—इत्थं शर्वपरीक्षान्तु पुम्परीक्षापुरःसरां ।
चकार मृदुबुद्धीनां हितायातिस्फुटामिमाम् ॥
सद्यो ज्योतिषमालेयं शिवेन गुरुसत्तमः ।
कृपयैवानुजग्राह द्युशज्योतिर्गुणाकरः ॥

(टीकायाः) एवञ्च पूर्वनयेनेश्वरपरीक्षाक्षिप्तैव नरपरीक्षेति तत्प्रयोजनेनैव सप्रयोजनेति सिद्धम् ॥ नरेश्वरपरीक्षणेति गहनत्वतो नैव यद्गतिर्जगति गम्यते विततबुद्धिवेगेष्वपि । इदं परहितेच्छया सुतनुरामकण्ठस्ततः कुतर्कतमसां नुदं विहितवान् प्रकाशात् स्फुटम् ॥

Colophon. इति श्रीनारायणकण्ठसूनुभट्टरामकण्ठकृतौ नरेश्वरपरीक्षाप्रकाशे परदर्शनप्रसिद्धेश्वरप्रतिक्षेपाख्यं तृतीयं काण्डम् । सम्पूर्णश्चायं नरेश्वरपरीक्षाप्रकाशः । शुभाय भवतु ॥०॥

विषयः । इदञ्च दर्शनं साङ्ख्यवेदान्तादिदर्शनादिवत् पृथगेवेति प्रतीमः ; अत्र खलु त्रीणि काण्डानि सन्ति ।
आद्ये—तावत्साङ्ख्यादिदर्शनलक्षणलक्षितपुरुषस्य खण्डनपुरःसरं तत्तद्विलक्षणलक्षणेन लक्षितं पुरुषं । तच्च नरपरीक्षाभिधम् ।
द्वितीये—स्वमतेनेश्वरलक्षणं श्रुत्यादिप्रमाणतः कृतं तच्चेश्वरपरीक्षानामकं काण्डम् ।
तृतीये तु—ईश्वरवादिन्यायवैशेषिकादितत्तद्दर्शनप्रसिद्धेश्वरस्वरूपप्रतिक्षेपः तच्च परदर्शनप्रसिद्धेश्वरप्रतिक्षेपाख्यं काण्डम् ॥

---

o

No. 1141. वेदान्तशिखामणिः ।

Substance, country-made yellow paper, $12\frac{1}{4} \times 5$ inches. Folia 69. Lines, 18—19, on a page. Extent, 5860 s'lokas. Character, Bengali, Date, ? Place of deposit, Benares, Nadiyárchhatra, Sívakṛishṇa Vedánta-sarasvatí Bhaṭṭácháryа. Appearance new. Prose. Generally correct. Notes in some places.

Vedánta-s'ikhámaṇi. A commentary on the well-known epitome of the Vedánta system, the *Vedánta pari-bháshá.* By Rámakṛishṇa Adhvarindra, son of Dharmarája Adhvarindra, who is the author of the epitome in question : both the father and the son also bore the title of Dikshita.

Beginning. नैदाघभानुकिरणेष्विव वारिपूरः
सर्वो विभाति यदबोधवशात् प्रपञ्चः ।
मालाफणीव च निमीलति यत् प्रबोधात्
तद् ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥ १ ॥
आसेतोराहिमाद्रेरपि भुवि विदितान् धर्म्मराजाध्वरीन्द्रान्
वन्देऽहं तर्कचूडामणिभणिजननक्षीरधींस्तातपादान् ।
यत्कारुण्यान्मयाभूदधिगतमधिकं दुर्ग्रहं स्वच्छधीकै-
रप्यान्तं शास्त्रजातं जगति मखकृता रामकृष्णाङ्कयेन ॥ २ ॥
वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्म्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥ ३ ॥

End. परिच्छेदप्रतिपाद्यमर्थं निगमयति तदेवमिति ॥
प्रमादल्लिखितं यत्तं प्रमादालस्यदोषतः ।
तत्क्षन्तव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥ १ ॥
सुवर्णखचिताकारा कृतिरेषा मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलङ्कृता ॥ २ ॥
अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥ ३ ॥
वन्देऽहं वन्दनीयानां वन्द्यां वाचमधीश्वरीम् ।
कामिताशेषकल्याणकल्पनाकल्पवल्लरीम् ॥ ४ ॥

Colophon. इति श्रीधर्म्मराजाध्वरीन्द्रात्मजरामकृष्णाध्वरीन्द्रविरचिते वेदान्तशिखामणौ प्रथाजनाख्योऽष्टमः परिच्छेदः समाप्तः ॥०॥ समाप्तश्चायं ग्रन्थः ॥०॥

विषयः । श्रीधर्मराजाध्वरीन्द्रविरचितवेदान्तपरिभाषायाः व्याख्यानम् ॥

No. 1142. गौतमीयतन्त्रम् ।

Substance, country-made yellow paper, $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia 76. Lines, 7 on a page. Extent, 2,028 s'lokas. Character Bengali. Date Sk. 1736. Place of deposit, Benares, Nadiyárchhatra, Sivakṛishṇa Vedánta-sarasvatí Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Gau'tamiya Tantra. A Vaishṇavite Tantra, comprising, in thirty-one chapters, a complete system of rituals for the guidance of Vaishṇavas, and the adoration of Kṛishṇa in a variety of forms. The work is designed with a view to apply the rituals of S'ákta worship with all its forms, mysteries and mummeries to the cult of Kṛishṇa, and is alway appealed to as a leading authority in all questions regarding rituals. It is held in high estimation by Vaishṇava householders, but ascetics and more devout and ardent followers of Chaitanya do not implicitly carry out its ordinances. *Contents ;* 1, Ten-syllable mantra of Kṛishṇa ; 2, Derivation of that mantra ; identification of the mantra with the Deity ; the mystic syllable of the mantra the source of the universe ; the application of the eighteen-syllable mantra of Kṛishṇa ; the object of the mystic particles in the mantras ; regulation of the breath ; 3, Mental assignment of the various parts of the body to different tutelary divinities ; 4, Description of Vṛindávana ; the mode of meditating on Kṛishṇa ; 5, Characteristics of spiritual guides and neophytes, time meet for initiation ; 6, Altars ; 7, Initiation ; daily prayers and adorations ; 8, Twelve forms of purifications ; 9, Purification and forms of worship, observances and rituals during worship ; 10, Adoration of Kṛishṇa through the medium of ammonite stones ; 11, Homa or worship through fire ; 12, Offerings ; 13, Imparting of mantras to disciples ; 14, Attainment of mastery over mantras ; 15, Occasional forms of worship, and rosaries ; 16, Daily threefold worship ; 17, Worship of Kṛishṇa in his infantile form ; 18, Derivation and uses of various Vaishṇava mantras ; 19, Means of causing dementation ; mantras for female divinities ; 20,

Differences in the forms of adoration, and advantages of adoring Krishṇa under different forms; 21, Various mantras of Krishṇa; 22, Attainment of superhuman powers, and various mantras; 23, Attainment of eloquence; mantra &c. of Ráma; 24—28, Various mantras &c.; 29, Characteristics of mastry over mantras; 30, Duties of persons accepting particular mantras; 31, Attainment of true knowledge; praise of the Tantra.

Beginning. ॐ बालगोपालाय नमः।

सिद्धाश्रमे वसन् श्रीमान् कदाचिद्गौतमो मुनिः।

तपःस्वाध्यायनिरतो भक्तिमान् पुरुषोत्तमे॥ १॥

End. इत्येवं कथितं प्रश्नं मया ते मुनिसत्तम।

अस्यालोकनतश्चित्ते कृष्णात्मा सम्प्रसीदति॥

Colophon. इति श्रीगौतमीये महातन्त्रे सर्वतन्त्रोत्तमे एकत्रिंशोऽध्यायः॥

समाप्तश्चायं गौतमीयतन्त्राख्यो ग्रन्थः॥०॥

विषयः। अत्रैकत्रिंशत्पटलाः सन्ति। १—कृष्णस्य दशाक्षरमन्त्रफलं। २—दशाक्षरमन्त्रोद्धारः। वीजानामीश्वरादिभावेनोपासना। क्लींकाराज्जगदुत्पत्तिक्रमः। मन्त्रस्य विनियोगादिकथनम्। अष्टादशाक्षरमन्त्रोद्धारः। वीजतत्त्वानां विन्यासः। प्राणायामाः। ३—कामन्यासाः। ४—वृन्दावनवर्णनम्। कृष्णध्यानम्। ५—गुरुलक्षणम्। शिष्यलक्षणम्। दीक्षाकालनिर्णयः। भूमिपरीक्षादयः। ६—यागमण्डपरचना। गेहकुण्डादिरचनाप्रकारः। ७—दीक्षाकथनम्। सन्ध्यात्रयकथनम्। पञ्चप्रकारार्चाकथनम्। स्नानद्वैविध्यम्। गङ्गावाहनादिकम्। विप्रपादोदकपानव्यवस्था। देवादितर्पणम्। कृष्णतर्पणप्रकारः। सूर्य्यपूजाप्रकारः। द्वादशविष्णुकथनम्। ८—वैष्णवानां द्वादशशुद्धिकथनम्। वृन्दावनध्यानम्। भूतशुद्धिप्रकारः। ९—पञ्चगव्येन देहादेः शोधनप्रकारः। पञ्चगव्यस्य मात्रानिर्वचनम्। अथ भूतशुद्धिः। मातृकान्यासादेर्विधानम्। अर्घ्यस्थापनप्रकारः। पीठपूजा। मन्त्रात्मदेवताध्यानम्। त्रिविधयजनक्रमः। विष्णोर्गन्धाष्टकम्। कलापूजनम्। कलाजपः। नवरत्नस्थापनम्। १०—कृष्णस्य पञ्चमुद्राभिरावाहनम्। प्राणप्रतिष्टा। शालग्रामादिजड़पदार्थविशेषेषु कृष्णार्चायाः नित्यकर्त्तव्यत्वम्। शालग्रामलक्षणम्। यन्त्रसामान्यलक्षणम्। यन्त्रविशेषलक्षणम्। कृष्णप्रतिमागठनप्रकारः। प्रतिमाद्वैविध्यम्। आवाहनादिमन्त्राः। आवाहनादिक्रमेण कृष्णपूजाप्रकारः। मुद्रालक्षणम्। ११—कृष्णमन्त्रानुसारेणाग्निज्वालनादिकम्। नित्यहोमः। शिष्याय चरुसमर्पणम्। कम्बलादिशुद्धासने शिष्यस्य

शयनविधिः। १२—मन्त्रसिद्धिचिह्नानि। बलिविधिः। ब्रह्मार्पणम्। १३—आत्मनि कृष्णसंस्कारः। शिष्याय मन्त्रदानम्। गुरुदक्षिणानियमः। १४—पुरश्चर्य्यासमयनियमः। भूमिपरिग्रहः। भक्ष्याभक्ष्यनियमः। पुरश्चरणकृतः प्रात्यहिककर्त्तव्यक्रियोपदेशः। पुरश्चरणस्य स्थानविशेषे फलवैजात्यम्। चक्रविचारविधिः। नानाविधमालानिर्म्माणं तथा तत् शोधनादिकम्। जपादिनियमलक्षणम्। जपदशांशहोमस्तथा तद्दशांशतर्पणादिकम्। १५—नैमित्तिकानुष्ठानव्यवस्था। १६—कृष्णस्य त्रैकालिकार्च्चनविधिः। १७—बालकृष्णस्य मन्त्रपूजादिकम्। १८—कृष्णमन्त्रयोः प्रयोगः। कूर्च्चबीजोद्धारश्च। नृसिंहबीजोद्धारः। वशीकरणप्रकारश्चेति। १९—उच्चाटनप्रकारः। स्त्रीबीजम्। मन्मथगायत्र्यादिकञ्च। २०—कृष्णस्य मासविशेषे फलविशेषाय पूजाविशेषः। २१—कृष्णस्य नानाविधमन्त्राणामुद्धारस्तथा तत्तद्बीजादयश्च। २२—गङ्गावाहनमन्त्रः। तस्य बीजादयश्च। श्रुतिधरभवनप्रकारः। वाक्सिद्धिभवनप्रकारः। कृष्णमहामन्त्रोद्धारः। यन्त्रधारणप्रकारः। २३—वाग्मिभवनप्रकारः। कामगायत्र्यादिकम्। २४—रुक्मिणीवल्लभमन्त्रोद्धारादिकम्। कामनाविशेषे फलदाः मन्त्राः। अष्टराज्यागममन्त्राः। तथा नानाफलदलेनाभिहिता मन्त्राः। २६—अत्रापि फलविशेषप्रापकाः मन्त्रा एव। २७—अत्रापि तथैव। २८—अत्रापि तथैव। २९—मन्त्रसिद्धेर्लक्षणानि। ३०—मन्त्राचारनिदर्शनम्। ३१—कार्य्ययोगकथनम्। मन्त्रयोगकथनम्। समाधिकथनम्। ज्ञानमाहात्म्यम्। तन्त्रमाहात्म्यम्।

No. 1143. दायतत्त्वटिप्पनी।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 14. Lines, 7 on a page. Extent, 477 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, new. Prose. Generally correct.

Dáyatattva-ṭippaní. Notes on the Dáyatattva of Raghunandana, a treatise on inheritance. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय। तत्त्वं—स्वाश्रयप्रतिपादकत्वसम्बन्धेन तादृशस्मृतिव्याहृत्तासाधारणपरं दायभागत्वमिति यावत्॥

End. तत्र पितृतो भागकल्पनेत्याह।

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्यविरचिता दायतत्त्वटिप्पनी समाप्ता ॥

विषयः । श्रीमद्रघुनन्दनभट्टाचार्यकृतदायतत्त्वस्य व्याख्यानम् ।

No. 1144. उद्वाहतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 15. Lines, 7 on a page. Extent, 518 sl'okas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, new. Prose. Generally correct.

Udváha-tattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding marriage. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय । नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्नि
श्रीकान्तकान्तचरणं प्रणिधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्बन्धतत्त्वविवृतिं वितनोति यत्नात् ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुं ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥

End. ननु भुवणीत्यादिवचनस्य छन्दोगपरिशिष्टोयत्वेन छन्दोगमात्रपरत्वमिति पाठः
क्वाचित्कः (इतः खण्डितम्)

विषयः । रघुनन्दनकृतोद्वाहतत्त्वव्याख्या ।

No. 1145. एकादशीतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3 inches. Folia, 47. Lines, 7—6 on a page. Extent, 1,299 s'lokas. Character, Bengali. Date ? Place of deposit, Navadvípa, Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Ekádasítattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding the fast on the eleventh day of the moon. By Kás'iráma Váchaspati.

Beginning. ओं नमो गणेशाय ॥ अथैकादशीतत्त्वस्य टिप्पनी लिख्यते । तत्र वक्ष्यामीति ।

End. एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवमित्यर्थः ॥ (समाप्तिवाक्यं नास्ति)

विषयः । श्रीरघुनन्दनभट्टाचार्य्यविरचितैकादशीतत्त्वस्य व्याख्यानम् ।

No. 1146. मलमासतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia, 249. Lines, 7—6 on a page. Extent, 249 s'lokas. Character, Bengali, Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, old. Prose. Generally correct.

Malamásatattva-ṭippaní. Notes on Raghunandana's summary of the laws regarding intercallary months. By Kás'iráma Váchaspati.

Beginning. नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्नि
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्यक् तनोति विद्वतिं मलमासकस्य ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुम् ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥
मीमांसादिनानाशास्त्रपारदृश्वा श्रीरघुनन्दनभट्टाचार्य्यः प्राचीनविचक्षणगण-नानाविधव्याख्याजनितसन्देहस्य स्मृतिशास्त्रस्य मुन्यन्तरवचनयुक्तिभ्यां तत्त्वं निर्णीयेदानीन्तनानां सुखबोधाय निबन्धांश्चकार । अत्र च स्मृतिशास्त्रस्य स्वभावतो दुर्गमतया कानिचित्कठिनानि सन्ति अतस्तानि मया व्याख्यायन्ते ॥

End. यद्वा सदपि नाम असदेव तत्तन्मासविहितकर्मण्यनर्हत्वादित्याहुः ।
यं प्रासूत समस्तशास्त्रनिपुणः श्रीरामकृष्णात्मजः
श्रीराधोत्तरवल्लभाख्यसुकृती सङ्गीतचूडामणिः ।
तेन श्री + + काशिरामकृतिना यत्नेन निष्पादिता
टीका नातिसुस्फुटस्फुटापि कृतिभिः सानुग्रहैर्दृश्यताम् ॥

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचिता मलमासतत्त्वटिप्पनी समाप्ता ॥

विषयः । रघुनन्दनभट्टाचार्य्यकृतमलमासतत्त्वस्य व्याख्यानम् ।

No. 1147. याज्ञवल्क्यदीपकलिका ।

Substance, Europe paper, 18 × 3½ inches. Folia, 77. Lines 8 on a page. Extent, 3,071 s'lokas. Character, Bengali. Date, Sk. 1793. Place of deposit, Navadvípa, S'rínátha S'iromaṇi. Appearance, new. Prose. Incorrect.

Yájñavalkya-dípakaliká. A commentary on the Institutes of Yájñavalkya. By S'úlapáṇi. The author lived during the reign of Lakshmaṇa Sena of Bengal, in the beginning of the twelfth century.

Beginning. ओं नमो गणपतये ॥ अशेषकलुषध्वंसि नत्वा विष्णोः पदाम्बुजम् ।
याज्ञवल्क्यस्मृतेष्टीकां शूलपाणिः समातनोत् ॥
अज्ञानतिमिरग्रस्तशास्त्रार्थप्रतिपत्तये ।
कृतेयं दीपकलिका कलिकालमलापहा ॥ योगीश्वरमिति ॥

End. त्रयाणां देवानां समाहारस्त्रयी तस्यावर्त्तप्रकाशकमिति ॥

Colophon. इति साङ्डि(यानमहामहो)पाध्यायश्रीशूलपाणिभट्टाचार्य्यविरचितायां याज्ञवल्क्यटीकायां दीपकलिकायां तृतीयोऽध्यायः समाप्तः ॥

विषयः । याज्ञवल्क्यमहर्षिकृतस्मृतेर्व्याख्यानम् ।

No. 1148. तीर्थचिन्तामणिः ।

Substance, palm leaf, 15 × 2 inches. Folia, 184. Lines, 5 on a page. Extent, 4,140 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Srínátha S'iromaṇi Bhaṭṭáchárya. Appearance, decayed. Verse. Generally correct.

Tírtha-chintámaṇi. A summary of the duties to be observed at sacred places. The MS. is defective both at the beginning and at the end, and five chapters only are available. These treat successively of Prayága, Purushottama, Gaṅgá, Gayá and Báṛánasí. Owing to the absence of the end, the author's name cannot be ascertained.

Beginning. (प्रारम्भे पत्रचतुष्टयं खण्डितं) लं घृतमुख्यद्रव्यकं, गच्छन् देशान्तरं यत्तु श्राद्धं कुर्य्यात्तु सर्पिषा । यात्राद्यमिति तत्प्रोक्तं प्रवेशे च न संशय इति भविष्यपुराणवचनात् इदमाभ्युदयिकमिति तु केचित् ।

End. स्नानं कृत्वा तु गन्तव्यं गोप्रचे तु यशस्विनि ।
अहनि होलिका देवि अर्चितव्या प्रय(त्नतः)॥ (इतः परं खण्डितम्)

विषयः । यद्यपि खण्डितत्वादत्र कति विभागाः सन्तीति निर्णेतुमशक्यन्तथापि यावन्तः समुपलभ्यन्ते तावतां खलु प्रयागप्रकाश—पुरुषोत्तमप्रकाश—गङ्गाप्रकाश—गयाप्रकाश—वाराणसीप्रकाशानामेषां यथानिर्देशं तत्तद्विषयाः प्रदर्श्यन्ते,

तत्राद्ये प्रयागप्रकाशे—सामान्यतीर्थयात्राविधिक्रमः। प्रयागतीर्थयात्राविधिः। अथ तत्प्रयोगः।

द्वितीये पुरुषोत्तमप्रकाशे—भारतवर्षप्रशंसा तत्परिचयश्च। तथा तदन्तर्गतोत्कलप्रदेशप्रशंसा तत्परिचयश्च। सत्ययुगे प्रादुर्भूतेन्द्रद्युम्ननामधेयस्य राज्ञ इतिहासः, पुरुषोत्तमयात्राप्रवृत्तिप्ररोचकः। द्वादशाक्षरमन्त्रेण कृष्णपूजनविधिः। कृष्णदर्शनमाहात्म्यं। सुभद्रापूजाविधिः। नरसिंहपूजाविधिः। प्रसङ्गात्तन्मन्त्रोपासनफलकीर्त्तनञ्च। मत्स्यमाधवार्चनम्। पञ्चतीर्थीविधिः। पुरुषोत्तमक्षेत्रे सागरस्नानपूर्वकपुरुषोत्तमार्चनविधिः। इन्द्रद्युम्नसरःस्नानपूर्वकपुरुषोत्तमार्चनप्रकारः। महाज्यैष्ठ्यां पुरुषोत्तमयात्राविधिः। ततस्तत्प्रयोगः। सुभद्रारामसहितमञ्चस्थपुरुषोत्तमदर्शनमाहात्म्यं। कृष्णाभिषिक्तजलेनात्माभिषेकफलम्। सुभद्राबलरामसहितमञ्चस्थपुरुषोत्तमदर्शनप्रयोगः। प्रतियात्राफलम्। दक्षिणोदधेस्तटे वटराजसमीपे भगवत्कृष्णदर्शनविधिः, अथ तत्प्रयोगश्च। तत उत्कलदेशावस्थितकृत्तिवासःक्षेत्रपद्धतिः। तत्रादौ—क्षेत्रपरिचयः। कृत्तिवासोमहादेवस्य पूजनविधिः। ततस्तत्पूजनदर्शनादिमाहात्म्यम्। कृत्तिवासोर्चनप्रयोगः। अथ कोणार्कविधिरत्रैव रामेश्वरविधिरपि। ततो विरजाक्षेत्रप्रयोगः।

अथ तृतीये गङ्गाप्रकाशरहस्ये—गङ्गामाहात्म्यम्। गङ्गाजलमाहात्म्यम्। गङ्गासेवनफलम्। गङ्गाभक्तिफलम्। गङ्गातोयपानफलम्। गङ्गातोयपानप्रयोगः। गङ्गादर्शनफलम्। गङ्गादर्शनप्रयोगः। गङ्गास्मरणफलम्। गङ्गास्मरणप्रयोगः। गङ्गानामकीर्त्तनफलम्। गङ्गानामकीर्त्तनप्रयोगः। गङ्गास्पर्शनफलम्। गङ्गास्पर्शनप्रयोगः। गङ्गाशिलासफलम्। गङ्गाशिलासप्रयोगः। गङ्गास्नानफलम्। गङ्गास्नानप्रयोगः। कालविशेषे गङ्गास्नानफलम्। अथ तत्प्रयोगः। एवं देशविशेषे गङ्गास्नानफलम्। अथ तत्प्रयोगः। गङ्गायामवगाहनफलम्। तथा तत्प्रयोगः। गङ्गाजलेन तर्पणफलम्। अथ तत्प्रयोगः। गङ्गातीरे शिवार्चनफलम्। अथ तत्प्रयोगः। गङ्गापूजाविधिः, अथ तत्प्रयोगः। गङ्गातीरे घृतधेन्वादिदानविधिः, अथ तत्तत्प्रयोगः। गङ्गायां व्रतफलमथ तत्प्रयोगः। गङ्गायां श्राद्धफलमथ तत्प्रयोगः। गङ्गान्तर्जलमरणफलम्। अथ तत्प्रयोगः। गङ्गा-

यामस्थिस्थितिफलम् । अथ गतप्रक्षेपप्रकारः । गङ्गायास्तीरक्षेत्रादिनिर्णयः । गङ्गातीरमृत्तिकाफलमिति ।

अथ तुरीये गयाप्रकाशखण्डे—गयामाहात्म्यम् । ततस्तत्परिचयादिकम् । प्रेतशिलाकृत्यविधिः । अथ गयाकृत्ये फल्गुतीर्थस्नानतर्पणषोडशीप्रभृतिकृत्यादिकं प्रथमदिवसीयम् । ततो द्वितीयदिवसीयकृत्यं प्रेतशिलायां पिण्डदानादिकम् । अथ पञ्चतीर्थीकृत्यम् । पञ्चतीर्थीकर्मापेक्षया यद् द्वितीयदिनकृत्यं तत्कृत्यम् । पञ्चतीर्थीदिनोत्तरतृतीयदिनकृत्यम् । पञ्चतीर्थीदिनोत्तरचतुर्थदिनकृत्यम् । पञ्चतीर्थीदिनोत्तरपञ्चमदिनकृत्यम् ।

पञ्चमे वाराणसीप्रकाशाभिधे—वाराणसीमाहात्म्यम् । वाराणसीक्षेत्रपरिचयादिकम् । वाराणसीक्षेत्रप्रवेशफलम् । वाराणसीवासफलम् । वाराणसीमरणफलम् । तत्रत्यदशाश्वमेधादितीर्थे स्नानदानादिफलम् । तत्रैव च देशविशेषावच्छेदेन च दानादिकार्यविशेषे फलविशेषकीर्त्तनम् । ततो वाराणसीयात्राकालनिर्णयः । यात्रायां विधिविहिततत्तत्कृत्यानि च । (एतत्प्रकाशस्य खण्डितत्वादितः परं किं किमस्तिकृत्यं तन्नोपलब्धम्) ।

No. 1149. शुद्धितत्त्वटिप्पनी ।

Substance, country-made yellow paper, $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 109. Lines, 7 on a page. Extent, 3,815 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

S'uddhitattva-ṭippaní. A gloss on the S'uddhitattva of Raghunandana—a treatise on purification. By Rádhámohana S'armá.

Beginning. ॐ नमो गणेशाय ॥ प्रणम्य परमानन्दं गोविन्दं मोहनद्विजः ।
करोति शुद्धितत्त्वार्थतात्पर्य्यस्यावधारणं ॥

End. तथा शूद्रायाः स्वप्रसवाशौचं सपिण्डमरणाशौ (इतः खण्डितं)

विषयः । रघुनन्दनभट्टाचार्य्यकृतशुद्धितत्त्वस्य व्याख्यानम् ।

No. 1150. मलमासतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 107. Lines, 7 on a page. Extent, 3,745 s'lokas Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Malamása-tattva-ṭippaní. A gloss on the Malamása-tattva of Raghunandana—a treatise on intercallary months. By Rádhámohana S'armá.

Beginning. श्रीगुरवे नमः । प्रणम्य राधानलिनीसुभृङ्गमङ्गं घनश्याममलमच्युतस्य ।
परं चिदानन्दमयं तनोति श्रीमोहनोऽर्थं मलमासतत्त्वे ॥

End. अन्यथा मलमासस्थले द्विचैत्रादिपदप्रयोगानुपपत्तेरिति ॥

Colophon. श्रीमदद्वैतवंशोद्भवश्रीराधामोहनभट्टाचार्यविरचिता मलमासतत्त्वटिप्पनी समाप्ता ।

विषयः । रघुनन्दनभट्टाचार्यकृतमलमासतत्त्वव्याख्या ।

No. 1151. दायतत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 42. Lines, 7 on a page. Extent, 1,470 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Dáya-tattva-ṭippaní. A gloss on the Dáya-tattva of Raghunandana—a treatise on the law of inheritance. By Rádhámohana S'armá.

Beginning. प्रणम्य राधिकाकान्तं कृष्णं संसारलोचनं ।
श्रीराधामोहनो दायतत्त्वव्याख्यां करोत्यसौ ॥

End. क्रमेण धनाधिकारे वानप्रस्थस्यापि सतीर्थाद्यभावे धनसम्बन्धी विवेच्य इति सङ्क्षेपः ।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतमहाप्रभुवंशसम्भवश्रीराधामोहनभट्टाचार्यविरचिता दायतत्त्वटिप्पनी समाप्ता ।

विषयः । श्रीरघुनन्दनभट्टाचार्यविरचितदायतत्त्वस्य व्याख्यानम् ।

No. 1152. प्रायश्चित्ततत्त्वटिप्पनी ।

Substance, country-made yellow paper, 18½ × 3½ inches. Folia, 86. Lines, 6 on a page. Extent, 2,666 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Prasannakumára Vidyáratna. Appearance, fresh. Prose. Generally correct.

Práyas'chitta-tattva-ṭippaní. A gloss on the Práyas'chitta-tattva of Raghunandana—a treatise on expiations. By Rádhámohana S'armá.

Beginning. ॐ नमः परदेवतायै ।

तडिद्दीतोलीनाम्बुदरुचिररूपस्तरुतले
लसद्वंशीनादामृतनिकरवर्षी प्रियसखि ।
नवीनोऽयं किं मे रचयति हृदीनीङ्गितकथा
मृदुस्पन्दा राधा जयति वकशत्रोर्हृदि गता ॥
स्फुटं प्रायश्चित्ततत्त्वव्याख्या मोहनशर्मणा ।
क्रियतेऽद्वैतवंशेन गोविन्दरतिकाम्यया ॥

End. सुरापानस्य जातिमात्रनिषेधात्तदित (इतः खण्डितं)

विषयः । श्रीरघुनन्दनकृतप्रायश्चित्ततत्त्वस्य व्याख्यानम् ।

No. 1153. अनुमानचिन्तामणिटिप्पनी ।

Substance, country-made yellow paper, 18 × 3½ inches. Folia, 230. Lines, 8 on a page. Extent, 8,510 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chúḍámaṇi. Appearance, fresh. Prose. Generally correct.

Anumánachintámani-ṭippaní. A commentary on the Anumána Khaṇḍa of Gañges'a. By Mathuránátha Tarkavágis'a. (See vol. I., p. 295.)

Beginning. ओं नमो गणेशाय ।

नवीननीरदश्याममञ्जुमञ्जुललोचनं ।
वल्लवीवल्लभं वन्दे वृन्दावनविहारिणं ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दृश्यन्ते द्वितीयमणिफक्किका ॥

प्रत्यक्षं निरूपितमिदानीमनुमानं निरूपणीयं, अतः शिष्यावधानाय प्रतिजानीते प्रत्यक्षानन्तरमित्यादिना ।

End. तथाप्युद्भावने कथकसम्प्रदायसिद्धप्रकारभेदोऽनेन दर्शित इति न काप्यनुपपत्तिरिति सङ्क्षेपः ॥

Colophon. इति महामहोपाध्यायश्रीमथुरानाथतर्कवागीशभट्टाचार्यविरचिता अनुमानटिप्पनी समाप्ता ॥

विषयः । गङ्गेशोपाध्यायविरचितानुमानखण्डस्य बाधान्तस्य व्याख्यानं ।

No. 1154. अभिधादिवादचिन्तामण्यालोकटिप्पनी ।

Substance, country-made yellow paper, 17½ × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 260 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chúḍámaṇi. Appearance, old. Prose. Generally correct.

Avidhádiváda Chintámanyáloka-ṭippaní. A commentary on a portion of the S'abdakhaṇḍa of Gañges'a. By Mathuránátha Tarkavágis'a. See vol. I., p. 295.

Beginning. अपि च सङ्कल्पादीनां समुच्चितानां प्रवर्त्तकत्वमेकस्यैव मतमिति भ्रमनिवारणाय मतभेदं सूचयति——अभिप्रेत्यादिना ।

End. विधित्वानुपपत्त्या च नोचितमिति सर्वत्र न हेतुद्वयान्वय इति यदुक्तं तद्बीजं स्वयमेवाह हेतुद्वयमित्यादिना ।

Colophon. इत्यभिधावादादिसिद्धव्याख्या सम्पूर्णा ॥

विषयः । अभिधावादचिन्तामण्यालोकव्याख्यानं ।

No. 1155. सन्निकर्षविचारः ।

Substance, country-made yellow paper, 15½ × 3½ inches. Folia, 13. Lines, 8 on a page. Extent, 565 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭácharya. Appearance, decayed. Prose. Incorrect.

Sannikarsha-vichára. A Nyáya dissertation on perceptible evidence. By Govinda.

Beginning. ओं नमो गणेशाय । प्रत्यक्षानुमित्युपमितिशाब्दभेदेन प्रमा चतुर्विधा, तत्रे-
न्द्रियसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं ।

End. द्रव्यविषयतायां लौकिकत्वनिवेशादिति समासः ।

Colophon. इति सन्निकर्षविचारः ॥

विषयः । षड्विधप्रत्यक्षाणां कारणनिर्वचनम ।

No. 1156. आत्मतत्त्वविवेकटीका ।

Substance, country-made yellow paper, 16½ × 3½ inches. Folia, 18. Lines, 8 on a page. Extent, 819 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭácharya. Appearance, decayed. Prose. Incorrect.

A'tmatattva-viveka-ṭíká. A commentary on the A'tmatattva-viveka of S'ankara A'chárya. By Govinda.

Beginning. ओं नमः परदेवतायै ।

नत्वा कृष्णपदद्वन्द्वं श्रीगोविन्देन धीमता ।

आत्मतत्त्वं प्रवक्तव्यं केवलं मोक्षहेतवे ॥

End. विशिष्टखप्रतियोगिसमानाधिकरणसम्बन्धेन तथाविधसंयोगनाशस्य तत्र खन्त-
(इतः खण्डितं)

विषयः । आत्मतत्त्वविवेकस्य कियदंशस्य व्याख्यानं ।

No. 1157. काव्यप्रकाशभावार्थः ।

Substance, country-made yellow paper, 17 × 2½ inches. Folia, 29. Lines, 7 on a page. Extent, 1,027 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Bhuvanamohana Vidyáratna Bhaṭṭácharya. Appearance, decayed. Prose. Incorrect.

Kávyaprakás'a-bhávártha. A commentary on the Kávyaprakása of Mammaṭha Bhaṭṭa—a treatise on Rhetoric. By Rámakṛishṇa.

Beginning. ओं नमः कृष्णाय ॥

सर्व्वैः काव्यैरुच्यमानं प्रणम्य परमेश्वरं ।

काव्यप्रकाशभावार्था रामकृष्णेन गीयते ॥

End. भावप्रत्ययस्वरूपतद्धितार्थस्यैव विधेयतया भानेऽलच्य (इतः खण्डितं)

विषयः। काव्यप्रकाशस्य व्याख्यानम्।

No. 1158. चणभङ्गुरवाददीधितिटिप्पनी।

Substance, country-made yellow paper, 15½ × 3 inches. Folia, 7. Lines, 8 on a page. Extent, 346 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Bhuvanamohana Vidyáratna Bhaṭṭácharya. Appearance, decayed. Prose. Incorrect.

Kshanabhangura-váda-dídhiti-ṭippaní. A gloss on the commentary of Raghunátha on the section on mutability of matter in the *Anumána-chintámaṇi* of Gaṅges'a.

Beginning. (प्रारम्भे चतुर्विंशत्यधिकशतपत्राणि न सन्ति) यतं, विभिन्नकालावच्छिन्नैक-धर्म्मिणि कार्य्यकारित्वाकारित्वसत्वं।

End. सङ्गाद्यसङ्गात्मकभाव इति भावं स्पष्टयति तथा चेति, ननु व्याप्य (इतः खण्डितं)

विषयः। चणभङ्गुरवाददीधितिव्याख्यानम।

No. 1159. प्रत्यचालोकरहस्यं।

Substance, country-made yellow paper, 17 × 3 inches. Folia, 49. Lines, 7 on a page. Extent, 3,738 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Haramohana Chuḍámaṇi. Appearance, decayed. Prose. Incorrect.

Pratyakshá loka-rahasya. A gloss on Jayadeva Mis'ra's commentary on the Pratyaksha Khanda of Gaṅges'a's Chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. नमो गणेशाय।

श्रीमता मथुरानाथतर्कवागीशधीमता।

विशदीकृत्य दर्श्यन्ते प्रत्यचालोकफक्किकाः॥

निर्विघ्नं प्रारीप्सितग्रन्थसमाप्तिकामनया कृतं स्तुतिपूर्वकं भगवत्प्रार्थनरूपं मङ्गल शिष्यशिचायै आदौ निबध्नाति—वक्षाणीति॥

End. ऋप्रामाण्यग्राहकेति ॥ प्रकृतप्रामाण्याश्रये ज्ञाने प्रकृतप्रामाण्यविरोधिग्राहकेत्यर्थः
श्च (इतः खण्डितं)

विषयः। प्रत्यक्षालोकव्याख्यानं।

No. 1160. सामान्यलक्षणाव्याख्या।

Substance, country-made yellow paper, 8¼ × 4½ inches. Folia, 26. Lines, 11—13 on a page. Extent, 482 s'lokas. Character, Bengali. Date, Sk. 1785. Place of deposit, Navadvípa. Haramohana Chuḍámaṇi. Appearance, new. Prose. Incorrect.

Sámánya-lakshná-vyákhyá. A gloss on Jagadís'a's commentary on the commentary of Raghunátha on the section on the major term in the Anumána Chintámaṇi of Gaṅges'a. By Haramohana.

Beginning. श्रीरामो जयतु ॥
श्रीराममिव मत्तातं श्रीरामं पुरुषोत्तमं।
शिरोमणिनतयाख्यातं वन्देऽहमतियत्नतः ॥
सामान्यलक्षणा व्याख्या जगदीशेन या कृता।
तां टिप्पनीं श्रिया युक्तास्तनुते हरमोहनः ॥
नानाशास्त्रविचारणारणरटच्छङ्काहिसम्मर्द्दिन-
स्तच्छ्रीरामशिरोमणेः पितुरिदं पादाम्बुजं प्रार्थये।
टीका श्रीहरमोहनेन बहुशो यत्नात्कृता साम्प्रत-
मन्तेवासिगणस्य तोषजननी भूयाद्विपश्चिन्मुदे ॥
न्यायादिशास्त्रनिपुणानतिधीरगण्यान्
विज्ञान् प्रणत्य विततं परिवद्दयामि।
दूष्यं वचो यदि पुनः परिशोधनीयं
तस्मात्परोपकृतये च सतां हि यत्नः ॥

End. सैव प्रागभावव्यञ्जका इत्यपि वदन्ति।
नत्वा रामपदारविन्दयुगलं प्रोत्फुल्लपङ्केरुहं,
रम्यं श्रीहरमोहनद्विज इहच्छात्रेच्छयैवेत्यहं।
शाके बाणवसुद्धधीन्दुविमितेऽब्दः पुस्तकं निर्ममे ॥

विषयः। सामान्यलक्षणाजागदीशीटिप्पनीव्याख्यानं।

No. 1161. कारककौमुदी ।

Substance, country-made yellow paper, 18 × 3 inches. Folia 12 Lines, 7 on a page. Extent, 467 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Krishṇakánta S'iroratna. Appearance, old. Prose. Correct.

Káraka-kaumudí. A commentary on the section on cases, in the Sanskrit grammar called Kátantra.

Beginning. अथापादानम् । तत्र यतोऽपैति तदपादानमिति कातन्त्रसूत्रम्,

End. एवं देवदत्तस्य स्वामीत्यत्र षष्ठ्या देवदत्तस्वकः स्वामीति गम्यते ।

Colophon. इति कारककौमुदी समाप्ता ।

विषयः । कातन्त्रसूत्रमूलकः कारकार्थविचारः ।

No. 1162. क्रियायोगसारः, पद्मपुराणान्तर्गतः ।

Substance, country-made yellow paper. Folia, 226. Lines, 6—7 on a page. Extent, 3,411 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa. Krishnaka'nta S'iroratna. Appearance, decayed. Prose. Incorrect.

Kriyáyogasára. A part of the Padma Purána. It is reckoned to be the most authentic portion of the Purána in question. It has been twice printed in Calcutta, and MSS. are common.

Beginning. श्रीहरये नमः ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
लक्ष्मीनाथपदारविन्दयुगलं ब्रह्मेश्वराद्यामर-
श्रेणीनम्रशिरोमणिप्रविमलं वन्दामहे सन्ततम् ।
भक्त्या योगिमनस्तड़ागसुषमासन्दोहहृद्यान्तमं
गङ्गाम्भोमकरन्दविन्दुनिकरं संसारदुःखापहम् ॥

यां मूर्त्तिं बहुधा विधाय भगवान् रचत्यशेषं जगत्
यत्पादार्च्चनतत्परा न हि पुनर्मज्जन्ति विश्वार्णवे ।
सर्वप्राणिहृदम्बुजेषु वसतिर्यस्य प्रभोः सन्ततं
सव्यक्रोड़धृतेन्दिराय हरये देवाय तस्मै नमः ॥
वेदेभ्य उद्धृत्य समस्तधर्म्मान् योऽयं पुराणेषु जगाद देवः ।
व्यासस्वरूपेण जगद्धिताय वन्दे तमेकं कमलासमेतम् ॥

End. इदमतिशयगुह्यं निर्गतं व्यासवक्त्रात्-
सरसतरपुराणं प्रीतिदं वैष्णवानां ।
चिरममरवरौघैर्वाञ्छिताङ्घ्रेर्मुरारेः
सकलभुवनकर्त्तुश्चक्रिणः प्रीतयेऽस्तु ॥

Colophon. इति श्रीपद्मपुराणे क्रियायोगसारे व्यासजैमिनिसंवादे युगधर्म्मनिरूपणं नाम पञ्चविंशोऽध्यायः ॥ समाप्तश्चायं क्रियायोगसारः ॥

विषयः । अत्र पञ्चविंशतिः अध्यायाः सन्ति, तत्र प्रथमे—सूतशौनकसंवादः । जैमिनिवाक्यम् । व्यासवाक्यम् । भगवत्कथाश्रवणफलम् ।

२—सृष्टिप्रक्रिया । सागरनामानि । भगवद्भक्तमाहात्म्यलक्षणे । मधुकैटभप्रसङ्गः । ब्रह्मकृतस्तुतिः । वैष्णवमाहात्म्यलक्षणे ।

३—क्रियायोगतत्त्वमाहात्म्य । गङ्गाया गुणः । विष्णुपूजाफलम्, दानादीनां फलं, एकादशीभक्तिः, धात्रीभक्तिः, तुलसीभक्तिः, अतिथिपूजनम्, एतेषां गुणसंवादः फलसंवादश्च ।

४—प्रयागमाहात्म्यम् । इतिहासः । गङ्गासागरसङ्गमः ।

५—माधवचरित्रम् । चन्द्रकलाप्रसङ्गः ।

६—गन्धिनीप्रसङ्गः । सुलोचनावाक्यम् । विद्याधरप्रसङ्गः । प्रचेष्टप्रसङ्गः ।

७—सुलोचनावाक्यम् । भीमनादवाक्यम् । धर्म्मबुद्धिराजप्रसङ्गः । गण्डकनिपातनम् ।

८—वीरवरवाक्यम् । माधववाक्यम् । महाविष्णोः प्रतिमा । माधवकृतस्तवः । माधवं प्रति भगवद्वाक्यं । पुनर्गङ्गामाहात्म्यम् ।

९—विष्णुपूजाफलम् । माघे तदाधिक्यं । पुष्पफलमाहात्म्य । यमदूताः । विष्णुदूताः । नारायणनाममाहात्म्य ।

१०—प्रातःकृत्यानि । तत्र नारायणस्मरणं, निद्राभञ्जनं, विष्णुगृहमार्ज्जनं, भगवत्पूजादिकञ्चेति । विष्णुपादोदकमाहात्म्य । नैवेद्यमाहात्म्य ।

११—फाल्गुनादिमासविशेषे द्रव्यविशेषदानफलानि । अश्वत्थसेचनादि-

फलम्। ब्राह्मणकृतस्तुतिः। भगवतो ब्राह्मणस्य वरलाभः। अश्वत्थमाहात्म्यम्॥

१२—ज्यैष्ठे विष्णुपूजनं। आषाढे तथा। श्रावणभाद्रयोरपि। वैष्णवजनस्य रात्रिभोजननिषेधः। एकवस्त्रपरिधानेन पूजननिषेधः। सर्वकार्य्येष्वेव तिलस्यावश्यकत्वं। बाहुद्वये शङ्खचक्रादेरङ्कनप्रशंसा। आश्विने कार्त्तिके च विशेषपूजादिकं। ब्राह्मणकृतशिवस्तुतिः। शिवकर्त्तृकं ब्राह्मणाख्यानवर्णनम्।

१३—अग्रहायणपौषयोः पूजाविशेषोपाख्यानम्। पूजासमये पाषण्डजनसम्भाषणनिषेधः। वैनतेयाङ्कितघण्टाप्रशंसा। वीणादिवाद्यविशेषाणां वादनप्रशंसा। मुखवाद्यफलम्। मासे मासे हरिपूजनप्रशंसा।

१४—नारायणमाहात्म्यम्। सर्वास्वेव क्रियासु विष्णोः स्मरणं। सत्ययुगीयसत्यवसुनामकस्य वैश्यस्य आख्यानम्। रामनाममाहात्म्यम्। विष्णुदूतयमदूतयोः कलहः। ततः परस्परयुद्धे यमदूतस्य पराभवः, पराजितस्य तस्य यमनिकटे अभियोगः, यमस्य मीमांसा। षड़क्षररामसन्त्रस्य प्रशंसा।

१५—महाविष्णुमाहात्म्यम्। चक्रिकोपाख्यानम्। तत्कृतस्तोत्रम्।

१६—पुनर्विष्णुमाहात्म्यम्। भद्रतनूपाख्यानम्। सुमध्यवाक्यम्। मार्कण्डेयवाक्यं। दान्तभद्रयोः परस्परालापः। अष्टोत्तरशतं नामानि। भद्रतनुरचितजगन्नाथस्तोत्रम्।

१७—पुरुषोत्तमतीर्थमाहात्म्यम्। अनन्तसमुद्रयोर्माहात्म्यम्। बलभद्रसुभद्राश्रीकृष्णदर्शनं। फाल्गुनमासे गोविन्ददर्शनं। एवं चैत्रादिमासे जगन्नाथदर्शनफलम्। गुण्डिचामण्डपे श्रीकृष्णदर्शनफलम्। शयने उत्थाने च श्रीजगन्नाथदर्शनफलम्॥

१८—पुनः श्रीकृष्णमाहात्म्यम्। उर्व्वीशोपाख्यानम्। विष्णुनैवेद्यमाहात्म्यम्। खञ्जनेरुपाख्यानम्। स्वप्ने केशवदर्शनं। खञ्जनिकृतस्तवः। ब्राह्मणवाक्यम्। भगवद्वाक्यम्।

१९—दानतपोमाहात्म्यम्। हरिशर्म्मोपाख्यानम्।

२०—पानार्हणाविवेचनम्। ब्राह्मणप्रशंसा। विष्णुबुद्ध्या ब्राह्मणे नमस्कारविधिरवस्थाविशेषे च निषेधव्यवस्था। विप्रपादसेचनमाहात्म्यप्रस्तावे हरिशर्म्मणः पूर्वजन्मवृत्तान्ताद्युपन्यासः।

२१—एकादशीमाहात्म्यं। दशमीकृत्यम्। विष्णुमन्दिरे शङ्खादिचित्रलेखनप्रशंसा। विष्णुपूजा।

२२—कोटिरथाख्यराजोपाख्यानम्। पुण्यात्मनां पापिनाञ्च पथिनिर्द्देशः। नरकवर्णना।

२३—तुलसीमाहात्म्यन्तथा धात्रीमाहात्म्यम् ।

२४—अतिथिसत्कारमाहात्म्यम् ।

२५—सत्यत्रेतादियुगानां माहात्म्यम्, पाठफलं श्रवणफलञ्चेति ॥

No. 1163. सत्काव्यकल्पद्रुमस्य प्रथमखण्डः ।


Substance, country paper, 13½ × 5½ inches. Folia, 20. Lines, 9—10—11 on a page Extent, 725 s'lokas. Character, Bengali. Date, Sk. 1795. Place of deposit, Navadvípa. Krishṇakánta S'iroratna. Appearaance, new. Verse. Incorrect.

Satkárya-kalpadruma. Volume first of a collection of miscellaneous verses from standard authors interspersed with verses composed by the compiler. By Krishnakánta Kavi.

Beginning. ध्यात्वा शङ्करपादपद्मयुगलं प्राचीनपद्यावलीं
सङ्गृह्य स्वकृतं तथा सुकविताहन्दं सदानन्ददम् ॥
साहित्यार्णवरत्नराजिसदृशं श्रीकृष्णकान्तः कवि-
र्धीराभीष्टफलप्रदस्मृतनुते सत्काव्यकल्पद्रुमम् ॥

End. संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ॥

विषयः । अत्र महाकविरचितानामुद्भटप्रायाणामपि प्रसिद्धमहाकविप्रणीतग्रन्थेभ्यः सङ्गृहीतश्लोकानां स्वकृतानाञ्च सङ्ग्रहस्तत्र यत् स्वविरचितं पद्यं तत् स्वल्पीदृश (*) चिह्नाङ्कितमिति । तत्रादौ आशीर्वादश्लोकाः । ततः शक्तिविषयकश्लोकाः । रामविषयकश्लोकाः । कृष्णविषयकश्लोकाः । काशीविषयकश्लोकाः । चैतन्यदेवविषयकश्लोकाः । ग्रीष्मकालवर्णना । वर्षाकालवर्णना । शीतकालवर्णना । वसन्तवर्णना । अशैत्यसौगन्ध्यमान्द्यत्रिविधगुणयुक्तवायुवर्णना । प्रभातकालवर्णना । अथ व्यवहारोपयिकनानातात्पर्य्यप्रकाशकनानाविधश्लोकास्तत्र सहायप्रशंसा । नारिकेलतरुविषयकश्लोकाः । दशो वर्णना । गुणप्रशंसा । कूटकविताः । संस्कृतवङ्गहिन्दिपारस्यभाषासङ्कलितश्लोकास्तथा संस्कृतवङ्गहिन्दीलण्डभाषामिश्रितश्लोकः । समस्यापूरणम् । ततः कतिचित्साधारणश्लोकाः ।



Facsimile of the last page of a MS of the Institutes of Manu, three hundred and forty-three years old

No. 1164. सत्काव्यकल्पद्रुमस्य द्वितीयखण्डः ।

Substance, S'rírámapura paper, 12½ × 4 inches. Folia, 9. Lines 9. on a page. Extent, 303 s'lokas. Character, Bengali. Date, Sk. 1795. Place of deposit, Navadvípa. Krishṇakánta S'iroratna. Appearance, new. Verse. Generally correct.

Satkávya-kalpadruma. Volume second of the collection described in the last preceding Number.

Beginning. अथादिरसश्लोकाः ।

स्निग्धमालपसि रुक्षमेव वा त्वत्कथैव सखि मे रसायनम् ।
शीतलं सलिलमुष्णमेव वा पावकं हि शमयेन्न संशयः ॥

End, इयं सुरतरङ्गिणी न पुनरत्र नौ सङ्गमोऽ-
भवत्तरणिमज्जनं पथिक नैव भीतिं भज ।
कुरुष्व गुरुसाहसं विपुलचारुकुम्भद्वयम्
इषद्घनघनागमे घनरसस्य पारं व्रज ॥

समाप्तोऽयं सत्काव्यकल्पद्रुमः ॥

सत्काव्यकल्पद्रुम एष धीराः सम्पन्न आसीत् भवतां सुदृष्टैः ।
सर्वं गृहीत्वा फलमेतदीयं कुर्वन्तु दीनग्रहसार्थकत्वम् ॥

Colophon. श्रीकृष्णकान्तशर्म्मणा स्वसङ्गृहीतैः स्वकृतैश्च श्लोकैः सङ्कलितमिदं पुस्तकम् ॥

विषयः । प्रसिद्धकविविरचितग्रन्थेभ्यः सङ्गृहीतानां उद्भटानां श्लोकानां स्वरचितानां पद्यरत्नराजानामादिरसप्रोद्दीपकानां नानाविधानां समुच्चयः ।

No. 1165. मानवधर्म्मशास्त्रं ।

Subtance, Palm leaf. 13½ × 2 inches. Folia, 174. Lines, 4 on a page. Extent, 2,684 s'lokas. Character, Bengali. Date, Sk. 1453. lace of deposit, Government of India. Appearance, very old and decayed. Verse. Scrupulously correct.

Mánava-dharma-s'ástra. This codex of the Institutes of Manu bears date S'aka 1453, and is 343 years old. It is written in a clear,

firm, practised hand, and is throughout most scrupulously correct ; but the letters are cramped, and most of them have an antique look (vide plate III). It differs in several places from the published texts, using in some places synonymous words, but in others new words which alter the sense of the passages in which they occur. The following is a list of the variations from the text of the Calcutta editions of 1832, and 1865, and of Sir Graves Chamney Haughton's London edition of 1825.

श्रीभवानीचरणवन्द्योपाध्यायकर्तृकमुद्रितमानवधर्म्मशास्त्रपाठात् प्राचीनमानवधर्म्मशास्त्रस्य पाठान्तरं ।

१—अ ४२—श्लोके मनुष्याश्च स्थाने मानुषाश्च ।

१—अ ४६—श्लोके स्थावराः स्थाने तरवः ।

२—अ ११—श्लोके ते मूले स्थाने ते तूभे ।

२—अ ७९—श्लोके त्वचेवाहिः स्थाने त्वचा वाऽहिः (१) ।

२—अ ९१—श्लोके पञ्चैषां स्थाने पञ्चैव ।

२—अ ९७—श्लोके त्यागश्च स्थाने त्यागाश्च ।

२—अ ९९—श्लोके पात्रादिवोदकं स्थाने पादादिवोदकं । *

२—अ १२१—श्लोके आयुर्विद्या स्थाने आयुः प्रज्ञा ।

२—अ १५६—श्लोके वृद्धः स्थाने स्थविरः ।

२—अ १६०—श्लोके वेदान्तोपगतं स्थाने वेदान्ताधिगतं ।

२—अ १९०—श्लोके विधीयते स्थाने प्रचक्ष्यते ।

२—अ २४५—श्लोके गुर्व्वर्थमाहरेत् स्थाने गुर्व्वर्थमाचरेत् ।

२—अ २४६—श्लोके छत्रोपानहमासनं स्थाने छत्रोपानहमन्ततः ।

३—अ १२—श्लोके क्रमशो वराः स्थाने क्रमशोऽवराः । †

३—अ २०—श्लोके प्रेत्यचेह स्थाने प्रेत्येह च ।

३—अ २३—श्लोके विद्याद्धर्म्मान्नराक्षसान् स्थाने विद्याद्धर्म्म्यानराक्षसान् ।

३—अ २४—श्लोके पैशाचश्चाष्टमोधमः स्थाने पैशाचः प्रथिताष्टमः ।

३—अ ४७—श्लोके शेषास्तु स्थाने शेषाः स्युः ।

---

(१) इवार्थे वाशब्दः ।

* Haughton gives the old reading.

† Haughton gives the mark of the elided a.

३—अ ५९—श्लोके सदा पूज्याः स्थाने सदाभ्यर्च्याः ।

३—अ ८७—श्लोके सानुगेभ्यः स्थाने सान्वयेभ्यः ।

३—अ ८८—श्लोके क्षिपेद्‌ब्रह्माः स्थाने हरेद्‌ब्रह्माः ।

३—अ ९३—श्लोके तेजोमूर्त्ति स्थाने तेजोमूर्त्तिः । *

३—अ ९५—श्लोके गुरोः स्थाने गुरौ ।

३—अ १०६—श्लोके स्वर्ग्यञ्चातिथिपूजनं स्थाने स्वर्ग्यञ्चातिथिभोजनं ।

३—अ ११३—श्लोके सत्कृत्यान्नं स्थाने प्रकृत्यान्नं ।

३—अ १३३—श्लोके ग्रासान् स्थाने पिण्डान् ।

३—अ १६३—श्लोके भेदकोयश्च स्थाने भेदकश्चैव ।

३—अ १८७—श्लोके सम्यग् विप्रानथोदितान् स्थाने सम्यग् विप्रांस्तथोदितान । †

३—अ २०२—श्लोके राजतान्वितैः स्थाने रजतान्वितैः ।

३—अ २०७—श्लोके नदीतीरेषु स्थाने जलतीरेषु ।

३—अ २२३—श्लोके प्रयच्छत स्थाने प्रयच्छेत्तु ।

३—अ २२९—श्लोके नास्रमापातयेत् स्थाने न चास्रं पातयेत् ।

३—अ २४०—श्लोके अभिवीक्ष्यते स्थाने अभिवीक्षितं ।

३—अ २४०—श्लोके कर्म्मणि स्थाने हविषि । एवं यथातथं स्थाने यथायथं ।

३—अ २५३—श्लोके अनुज्ञातस्ततो द्विजैः स्थाने अनुज्ञातस्तु तैर्द्विजैः ।

३—अ २७७—श्लोके पितॄन् सर्व्वान् स्थाने पितॄनर्च्चन् ।

३—अ २८३—श्लोके कृत्स्नमाप्नोति स्थाने सर्व्वमाप्नोति ।

३—अ २८४—श्लोके सनातनी स्थाने पुरातनी ।

४—अ ३५—श्लोके शुक्लाम्बरः स्थाने शुद्धाम्बरः ।

४—अ ४४—श्लोके तेजस्कामः स्थाने श्रेयस्कामः ।

४—अ ७०—श्लोके न स्त्रजोष्टञ्च स्पृद्धीयात् स्थाने न स्त्रजोष्टं विस्पृद्धीयात् ।

४—अ १४१—श्लोके रूपद्रव्यविहीनांश्च स्थाने रूपद्रविणहीनांश्च ।

४—अ १४७—श्लोके वेदमेवाभ्यसेन्नित्यं स्थाने वेदमेव जपेन्नित्यं ।

४—अ २०७—श्लोके पदास्पृष्टञ्च स्थाने पादस्पृष्टञ्च ।

५—अ ५२—श्लोके ततोऽन्यो नास्त्यपुण्यकृत् स्थाने न ततोऽन्यास्त्यपुण्यकृत् ।

---

* Haughton has the old reading.

† Bharatachandra S'iromani has given the old reading, but Haughton has adopted the new form.

५—अ ५९—श्लोके त्र्यहमेकाहमेव च स्थाने त्र्यहमेकाहमेव वा ।

५—अ १२२—श्लोके काष्ठञ्च स्थाने काष्ठानि ।

५—अ १२५—श्लोके घ्राणकर्णविट् स्थाने कर्णविन्नखाः । *

६—अ ६६—श्लोके रतः स्थाने वसन् ।

७—अ ४९—श्लोके तज्ज्ञावेतावुभौ स्थाने तज्ज्ञौ ह्येतावुभौ ।

७—अ ५५—श्लोके किन्तु राज्यं स्थाने किमु राज्यं । †

७—अ २१७—श्लोके अहार्य्यैः स्थाने अभेद्यैः ।

८—अ १४८—श्लोके तद्द्रव्यमर्हति स्थाने तद्धनमर्हति ।

८—अ २६८—श्लोके नाङ्गुलिच्छेदमाप्नुयात् स्थाने नाङ्गुलिच्छेदमर्हति ।

९—अ १४७—श्लोके वृथोत्पन्नं स्थाने मिथ्योत्पन्नं ।

९—अ २४२—श्लोके दोषेण स्थाने पापेन ।

१०—अ २०—श्लोके व्रात्यानिति विनिर्द्दिशेत् स्थाने व्रात्यानित्यभिनिर्द्दिशेत् ।

१०—अ ५०—श्लोके विज्ञानाः स्थाने विज्ञाताः ।

१०—अ १०५—श्लोके पापेन स्थाने दोषेण ।

१०—अ ११०—श्लोके शूद्रादप्यन्त्यजन्मनः स्थाने शूद्रस्याप्यन्त्यजन्मनः । ‡

११—अ २६—श्लोके लोभेनोपहिनस्ति स्थाने लोभेनापहरेत्तु ।

११—अ ५२—श्लोके निन्द्यैर्हि स्थाने निन्दितैः ।

११—अ ७२—श्लोके द्वादशसमाः स्थाने द्वादशाब्दानि ।

११—अ ७६—श्लोके सर्व्वस्वं वेदविदुषे स्थाने सर्व्वस्वं वा वेदविदे ।

११—अ ८०—श्लोके विमुच्यते स्थाने विशुद्ध्यति ।

११—अ १६७—श्लोके कणान्नता स्थाने कणान्नभुक् ।

११—अ १९७—श्लोके व्यपोहति स्थाने विशुद्ध्यति ।

११—अ २४२—श्लोके संवर्द्धयन्ति स्थाने सम्पादयन्ति ।

११—अ २४४—श्लोके पुण्यमुत्तमं स्थाने पुण्यमुद्भवं ।

१२—अ १०—श्लोके शत्रुषु स्थाने दस्युषु ।

१२—अ ९८—श्लोके प्रसूयन्ते स्थाने प्रसिध्यन्ति ।

---

* The old reading occurs in Haughton's edition.

† Haughton gives the old reading.

‡ Haughton gives the old reading.

No. 1166. विशिष्टवैशिष्ट्यविचारः ।

Substance, country-made yellow paper, 14½ × 3½ inches. Folia, 17. Lines, 10—12 on a page. Extent, 871 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Kríshṇakánta S'iroratna. Appearance, old. Prose. Generally correct.

Vis'ishṭa-vais'ishṭya-vichára. A Nyáya dissertation on the relation of the attribute to the subject. The author's name is not given in the MS. Mr. Hall notices a treatise entitled *Vis'ishṭa-vais'ishṭya-bodha-vichára* as the work of Harirámа Tarkavágís'a Bhaṭṭácharya, but its extent is limited to 400 s'lokas. He adds that Raghudeva Bhattácharya is said to have composed a similar work with this identical title, but he does not give its extent, and I have no means of ascertaining whether the work under notice is the same or not.

Beginning. तद्धर्म्मनिर्विकल्पकानन्तरं तद्धर्म्मविशिष्टवैशिष्ट्यबोधानुदयात्तद्धर्म्मप्रकारकज्ञानं हेतुः ।

End. एकयुक्त्यैवोभयहेतुतासिद्धिरित्यप्यालोचनीयं ।

Colophon. इति विशिष्टवैशिष्ट्यविचारः सम्पूर्णः ॥

विषयः । विशिष्टप्रतियोगिकवैशिष्ट्यबोधस्य विशिष्टानुयोगिकवैशिष्ट्यबोधस्य च निरूपणम् । विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वे निर्णीते सति व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्व्यभिचारादिकप्रदर्शनेन सोन्दड़ोपाध्यायमतपरित्यागस्तत्र च दीधितिकृतप्रमाणप्रदर्शनमपि । अनाहार्य्यविशेषणतावच्छेदकप्रकारकज्ञानस्यैव विशिष्टवैशिष्ट्यप्रत्ययस्य हेतुत्वे युक्तिः ।

घटशृङ्गं नास्तीत्यत्र प्रतिबध्यप्रतिबन्धकभावविचारः । एवमत्र बहवो विचाराः सन्ति ।

No. 1167. योग्यानुपलब्धिविचारः ।

Substance, country-made yellow paper, 17½ × 3 inches. Folia, 7. Lines, 8 on a page. Extent, 647 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Kríshṇakánta S'iroratna. Appearance, old. Prose. Incorrect.

Yogyánupalabdhi-vichára. A Nyáya dissertation on probability. Author not known.

Beginning. ॐ नमस्तस्मै ॥ विशेषणतासम्बन्धेन वृत्तिमत्तावादिनां प्रत्यक्षे विशेषणता प्रत्यासत्तेर्हेतुत्वम् ।

End. इत्यादिबाधाभावघटितात्मनिष्ठसामग्र्याः फलजननप्रसङ्गादिति दिक् ॥

Colophon. इति योग्यानुपलब्धिरहस्यं सम्पूर्णम् ।

विषयः । योग्यानुपलब्धिविचारस्तत्कार्य्यकारणविचारश्च ।

No. 1168. योग्यविशेषगुणविचारः ।

Substance, country-made yellow paper, 18 × $3\frac{1}{4}$ inches. Folia, 2. Lines, 8, on a page. Extent, 99 s'lokas. Character, Bengali. Date, ? Place of deposit, Navadvípa, Kríshṇakánta S'iroratna. Appearance, old. Prose. Generally correct.

व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा।
तत्र स्थिता निशा चान्या तत्प्रमाणं तपोधनाः॥
नैवाहस्तस्य न निशा नित्यस्य परमात्मनः।
उपचारस्तथाप्येष तस्य प्रश्नस्तु कथ्यते॥
इत्येव मुनिशार्दूलाः कथितः प्राकृतो लयः।
इत्यादिब्रह्मपुराणं समाप्तं। शुभमस्तु॥

विषयः। अत्र त्रयोविंशत्यधिकशताध्यायाः, श्लोकाश्च दशसहस्रसङ्ख्यकाः।
१ अध्याये, सङ्क्षेपेण सृष्टिवर्णनं। २ अ, मन्वादिवंशकथनं। ३ अ, देवासुराणामुत्पत्तिवर्णनं। ४ अ, पृथोरुत्पत्तिचरित्रकीर्त्तनं, भूमेर्मेदिनीतिसञ्ज्ञाव्युत्पत्तिकथनञ्च। ५ अ, मन्वन्तरानुकीर्त्तनं। ६ अ, आदित्योत्पत्तिः, सञ्ज्ञापरिणयः, मार्त्तण्डनामव्युत्पत्तिः, छायाजननं, शनैश्चरस्य जन्म, अश्विनीकुमारयोरुत्पत्तिवर्णनञ्च। ७ अ, सूर्य्यवंशवर्णनं, इलोपाख्यानं, युवनाश्वादीनां चरित्रकीर्त्तनं, धुन्धुवधः, सत्यव्रतोपाख्यानकथनञ्च। ८ अ, त्रिशङ्कूपाख्यानं, हरिश्चन्द्रादीनामुत्पत्तिः, सगरनामव्युत्पत्तिः, हैहयादीनां निधनकथनं, सगरवंशवर्णनं, निषधवंशकीर्त्तनञ्च। ९ अ, चन्द्रौषधीनां जन्मकथनं, चन्द्रकृतराजसूययज्ञकीर्त्तनं, बुधस्य जन्मविवरणञ्च। १० अ, पुरूरवआदीनामुपाख्यानं, कावेर्य्या सह जह्नोर्विवाहः, तद्वंशे विश्वामित्रादीनामुत्पत्तिः, कौशिकीनदीविवरणं, हव्यादीनां वंशकीर्त्तनञ्च। ११ अ, आयुरादीनामाख्यानं, दिवोदासप्रसङ्गेन वाराणसीवर्णनञ्च। १२ अ, ययातिचरित्रकीर्त्तनं। १३ अ,

विषयः। ययातिवंशकीर्त्तनं, कार्त्तवीर्य्यार्ज्जुनचरित्रवर्णनञ्च। १४ अ, क्रोष्टुवंशकीर्त्तनं, श्रीकृष्णजन्मकथनञ्च। १५। १६ अ, वृष्णिवंशकथनं, स्यमन्तकोपाख्यानवर्णनञ्च। १७ अ, द्वीपानां वर्षाणाञ्च वर्णनं। १८ अ, भूमिसागरद्वीपानां परिमाणादि-कीर्त्तनं। १९ अ, पातालविवरणं। २० अ, नरकवर्णनं। २१ अ, चन्द्र-सूर्य्यनक्षत्रमण्डलादीनां संस्थानकथनं। २२ अ, ध्रुवसंस्थितिकीर्त्तनं। २३ अ, तीर्थवर्णनं, तन्माहात्म्यकीर्त्तनञ्च। २४ अ, ऋषिभिः सह ब्रह्मणः संवाद-कथनं। २५ अ, कर्म्मभूमिप्रशंसा, भारतवर्षपरिमाणादिकीर्त्तनञ्च। २६ अ, कोणादित्यतीर्थतन्माहात्म्यकथनं। २७। २८। २९ अ, सूर्य्यपूजा, द्वादशा-दित्यकीर्त्तनं, सूर्य्यमाहात्म्यवर्णनं, ऋतुभेदेन सूर्य्यस्य वर्णभेदकथनं स्तवराज-कीर्त्तनञ्च। ३०। ३१ अ, सूर्य्योत्पत्तिपरिणयादिकीर्त्तनं, तदष्टोत्तरशतनाम-कथनञ्च। ३२। ३३ अ, पार्व्वतीजन्मतपस्या-तद्ब्राह्मसंवादादीनां कीर्त्तनं। ३४ अ, पार्व्वतीस्वयम्वरे ब्रह्मादीनामागमनं, पार्व्वत्युत्सङ्गवर्त्तिपञ्चमुखशिशुकर्त्तृकं शक्रादीनां बाहुस्तम्भनं, देवानां शिवस्तुतिः, उद्वाहतत्स्थानवर्णनञ्च। ३५। ३६ अ, देवानां शिवस्तुतिकरणं, गौरीकर्त्तृकहिमालयपरित्यागवर्णनञ्च। ३७। ३८ अ, दक्षयज्ञभङ्गविवरणं, भद्रकालीवीरभद्रयोरुत्पत्तिः, दक्षकर्त्तृक-महादेवस्तुतिकीर्त्तनञ्च। ३९ अ, एकाम्रक्षेत्रवर्णनं, तत्र विन्दुसरोनामतीर्थ-कीर्त्तनञ्च। ४० अ, उत्कलदेशवर्णनं, तत्र वैतरणीनदीकीर्त्तनं, पुरुषोत्तम-माहात्म्यकथनञ्च। ४१ अ, अवन्तीपुरवर्णनं। ४२। ४३ अ, क्षेत्रवर्णनं, पुरुषोत्तमपूर्व्ववृत्तान्तकथनञ्च। ४४। ४५ अ, क्षेत्रवर्णनं, इन्द्रद्युम्नस्य अश्वमेध-यज्ञः, भगवत्प्रासादनिर्म्माणवर्णनञ्च। ४६ अ, इन्द्रद्युम्नस्य भगवत्प्रतिमानि र्म्माणचिन्तावर्णनं। ४७ अ, तत्कृतपुरुषोत्तमकारुण्यस्तुतिकीर्त्तनं। ४८ अ, इन्द्रद्युम्नस्य स्वप्ने वासुदेवसन्दर्शनं, वृक्षच्छेदनकाले ब्राह्मणवेशेन हरिविश्व-कर्म्मणोः तत्समीपागमनं, भगवत्प्रतिमानिर्म्माणकथनञ्च। ४९ अ, इन्द्रद्युम्नं प्रति साक्षाद् भगवतो वरदानं, ब्रह्मकर्त्तृकपुरुषोत्तमदर्शनकाल-तन्माहात्म्य-कीर्त्तनञ्च। ५०। ५१ अ, मार्कण्डेयस्य वटमूलाश्रयणं, प्रलयदर्शनकथनञ्च। ५२। ५३। ५४ अ, मार्कण्डेयस्य भगवत्कुक्षिपरिभ्रमणं, भगवतः स्तुतिः, भगव-द्दर्शनलाभकीर्त्तनञ्च। ५५ अ, मार्कण्डेयह्रदमाहात्म्यवर्णनं, श्रीकृष्णमाहात्म्य-कीर्त्तनञ्च। ५६ अ, नरसिंहमाहात्म्यवर्णनं। ५७ अ, श्वेतमाधवमाहात्म्य-कीर्त्तनं। ५८ अ, समुद्रस्नानविधानं। ५९ अ, श्रीकृष्णपूजाविधिः। ६० अ, समुद्रस्नानमाहात्म्यकथनं। ६१ अ, पञ्चतीर्थमाहात्म्यकीर्त्तनं। ६२ अ, महा-ज्यैष्ठीप्रशंसा। ६३ अ, श्रीकृष्णस्य स्नानमाहात्म्यकीर्त्तनं। ६४ अ, गुण्डिचा-

विषयः। यात्रामाहात्म्यकथनं। ६५ अ, द्वादशयात्राफलकीर्त्तनं। ६६ अ, विष्णुलोकानुकीर्त्तनं। ६७ अ, क्षेत्रस्य विशेषमाहात्म्यकथनं। ६८ अ, अनन्त-वासुदेवस्य माहात्म्यकथनं। ६९ अ, क्षेत्रे देहत्यागफलकथनं। ७० अ, कण्डूपाख्यानं। ७१। ७२ अ, विष्णोर्नानाविधमूर्त्तिवर्णनं। ७३ अ, अंशावतारकथनं। ७४ अ, श्रीकृष्णजन्मविवरणं। ७५ अ, पूतनावध-शकटासुरहनन-यमलार्ज्जुनमोचनादीनां कीर्त्तनं। ७६ अ, कालीयनागदमनं। ७७ अ, धेनुकासुर-प्रलम्बासुरयोर्बधः, गोवर्द्धनगिरिपूजनकीर्त्तनञ्च। ७८ अ, गोवर्द्धन-धारण-कृष्णेन्द्रसंवादादीनां वर्णनं। ७९ अ, गोपीकृष्णयोः सङ्गीतकीर्त्तनं। ८० अ, अक्रूरस्य वृन्दावनयात्रा, केशिबधकथनञ्च। ८१ अ, रामकृष्णयोर्मथुराप्रयाणं, अक्रूरस्य जलमध्ये रामकृष्णसन्दर्शनवर्णनञ्च। ८२ अ, कंस-रजकबधः, रामकृष्णयोर्मालाकारेण सह संवादवर्णनञ्च। ८३ अ, कुब्जादर्शनं, धनुर्भङ्गः, कुवलयापीड़हननं, देवक्यादीनां रामकृष्णसन्दर्शनं, मुष्टिकचाणूरयोर्निपातनं, कंसबधवर्णनञ्च। ८४ अ, पञ्चजनाभिधदैत्यहननं, कृष्णस्य पाञ्चजन्यशङ्खप्राप्तिविवरणं, गुरुदक्षिणादानकीर्त्तनञ्च। ८५ अ, जरासन्ध-कर्त्तृकमथुरारोधवर्णनं। ८६ अ, मुचुकुन्दकर्त्तृकश्रीकृष्णस्तुतिकीर्त्तनं। ८७ अ, बलदेवस्य गोकुले प्रत्यागमनवर्णनं। ८८ अ, बलदेवस्य वारुणीलाभः, तत्-क्रीड़ावर्णनञ्च। ८९ अ, रुक्मिणीहरणवर्णनं। ९० अ, शम्बरबधपूर्व्वकं प्रद्युम्नागमनवर्णनं। ९१ अ, कृष्णमहिषीणां वर्णनं, रुक्मिणः पौत्र्या सह अनिरुद्धस्य विवाहः, बलरामरुक्मिणोः द्यूतक्रीड़ा, रुक्मिबधकीर्त्तनञ्च। ९२ अ, नरकासुरबधवर्णनं। ९३ अ, पारिजातहरणं। ९४ अ, कृष्णस्य शताधिक-षोड़शसहस्रदेहपरिग्रहकथनं। ९५ अ, उषायाः स्वप्ने अनिरुद्धदर्शनं। ९६ अ, उषानिरुद्धयोर्विलासवर्णनं। ९७ अ, पौण्ड्रकाभिधवासुदेवबधकीर्त्तनं। ९८ अ, शाम्बकर्त्तृकदुर्य्योधनकन्याहरणं, बलदेवेन सह कौरवाणां युद्धकीर्त्तनञ्च। ९९ अ, द्विविदनामकवानरबधवर्णनं। १०० अ, शाम्बस्य उदरात् मुषलोत्पत्तिः, उद्धवस्य वदरिकाश्रमगमनं, यादवानां निधनं, रामकृष्णयोः स्वधामगमनवर्णनञ्च। १०१ अ, रामकृष्णादीनामौर्द्धदेहिकक्रिया-सम्पादनं, दस्यूनां समीपे अर्ज्जुनस्य पराजयः, अर्ज्जुनस्य व्याससमीपगमनं, अष्टावक्रेण सह अप्सरसां संवादकथनं, पाण्डवानां वनप्रवेशकथनञ्च। १०२ अ, ब्रह्मकर्त्तृकहिरण्यकशिपुवरदानकथनं, विष्णोर्दशावतारवर्णनञ्च। १०३ अ, यमलोकवर्णनं। १०४ अ, पापकर्म्मणां पृथक् पृथक् यातनाकथनं। १०५ अ, पुण्यजनककर्म्मकीर्त्तनं, श्राद्धविधिकथनञ्च। १०६ अ, सदाचारकथनं,

विषयः। धार्म्मिकानां यमलोकगमनवर्णनञ्च। १०७। १०८ अ, येन येन कर्म्मणा तिर्य्यग्‌योनित्वं भवति तद्विस्तारकथनं, संसारचक्रवर्णनञ्च। १०९ अ, पितृलोकोपाख्यानं, विस्तरेण श्राद्धविधिकथनञ्च। ११० अ, नित्यनैमित्तिकादिश्राद्धविधानं, श्राद्धे विहिताविहितद्रव्यकथनञ्च। १११। ११२ अ, विस्तरेण वर्णाश्रमाचारधर्म्मनिरूपणं। ११३ अ, केन केन कर्म्मणा द्विजः शूद्रत्वमाप्नोतीति कीर्त्तनं। ११४। ११५ अ, स्वर्गगमनोपायादिकीर्त्तनं। ११६ अ, हरिस्मरणमेव संसारबन्धनमोचनमित्याख्यानं। ११७ अ, वैष्णवादीनां गतिकथनं ११८ अ, हरिवासरमाहात्म्यं, गीतमाहात्म्यकथनप्रसङ्गेन चण्डालोपाख्यानकीर्त्तनं ब्रह्मराक्षसस्य स्वोत्पत्तिविवरणकथनं, उर्व्वशीब्राह्मणसंवादकीर्त्तनञ्च। ११९ अ, विष्णुमायाकथनं, विविधोपाख्यानवर्णनञ्च। १२०। १२१ अ, कलियुगधर्म्मकथनं। १२२ अ, नैमित्तिकप्रलयकीर्त्तनं। १२३ अ, प्राकृतप्रलयकथनं, साङ्ख्यकथनं, ब्रह्मवादकीर्त्तनञ्च॥

No. 1183. कृष्णतत्त्वामृतं।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 24. Lines, 8 on a page. Extent, 484 s'lokas. Character, Bengali. Date ? Place of deposit, S'ántipura, Kálídása Vidyávágís'a. Appearance, new. Prose and verse. Correct.

Kṛishṇa-tattvámṛita. A dissertation on the divinity of Kṛishṇa; the means of attaining salvation through him; and the dualistic philosophy of the Vaishṇavas. By Rádhámohana Gosvámi.

Beginning. श्रीकृष्णं परमानन्दलक्षणं पीतवाससं।
प्रणम्य तत्त्वमयमस्तं भावभावितं॥
संसारानलतापार्त्तिहारि भूरिसुखोदयं।
समुद्भावयति श्रीलमोहनो निगमार्णवात्॥
तत्र ब्रह्मसंहितायां।
"ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्व्वकारणकारणं॥"
अत्र कृष्णपदं कृष्णशरीरोपलक्षितपरतत्त्वपरं, यशोदास्तनन्धये नवतमालश्यामलत्विषि कृष्णशब्दो रूढ इति भगवचतन्यदेववाक्यात् कृष्णवर्णत्वात् पापकर्षणाच्च यौगिकरूढमपीत्यादि।

End. "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेदिति" सप्तमीयात् "कृष्ण एव परो देवस्तं ध्यायेदिति" गोपालतापनीवचनात् "असारे खलु संसारे सारं कृष्ण-पदार्चनमिति" गौतमीयात् "ईश्वरः परमः कृष्णः" इत्यादिवचनात्, अन्य-निरपेक्षो निरन्तरं श्रीकृष्णं भजेदिति शं ।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतवंशसम्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्य-विरचितं श्रीकृष्णतत्त्वामृतं समाप्तं ॥

विषयः । श्रीकृष्ण एव नित्यनिरतिशयज्ञानानन्दाश्रयः परमेश्वर इति निरूपणं । आत्मनो ज्ञानाश्रयत्वकथनं । ज्ञानस्वरूपत्वकीर्त्तनं । प्रकृतितत्त्वनिरूपणं । मायास्वरूपकीर्त्तनं । प्रसङ्गाद् भ्रमकथनं । परमात्मजीवात्मनोर्भेदः । आत्मज्ञानस्यैव मोक्ष-हेतुत्वं । श्रीकृष्णस्य गुणभेदेन ब्रह्मपरमात्म-भगवन्नामधेयत्वनिरूपणं । भगव-च्छरीरकथनं । गुणावताराः । प्रकृतेरुपादानकारणत्वकथनं । परमाणुवाद-खण्डनं । ब्रह्मोपादानवादिमतनिरासः । साङ्ख्यमतखण्डनं । वृन्दावनलीला-तिमधुरं श्रीकृष्णरूपमेव सर्व्वतो मनोहरमिति वर्णनं । भक्तिरेव तत्प्राप्त्युपाय इति कथनं । रूपादीनामप्राकृतत्वादिना शास्त्रे तस्यारूपादिविशेषणदान-मिति कथनं । विष्णुपुराणायुक्तकेशावतारकथादीनां मीमांसा । भगवद्भक्ति-निरूपणं, तद्विभागादिकञ्च । इति समाप्तिः ॥

No. 1184. कविकान्ता ।

Substance, country paper, 16 × $2\frac{3}{4}$ inches. Folia, 95. Lines, 6 on a page. Extent, 3,548 s'lokas. Character. Bengali. Date, SK., 1599, Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old and decayed. Prose. Generally Correct.

Kavikántá. A commentary on the Raghuvañs'a of Kálidása. By A'chárjya Gopínátha Kavirája.

Beginning. अव्याज+ +व निजङ्गतोपि ——————————— ।
अर्द्धार्द्धसम्भानकृतैकदेहौ गौरीगिरीशौ शिवमावहेतां ॥
विश्वं यशोभिरवदाय तु कालिदासो वाचा वि+ + +नवः पुरुषावतारः ।
पुंसां प्रसादयति यस्य गिरां प्रपञ्चो वाणै+ + + + +क+ इवाम्बु सद्यः ॥
कविराजगोपीनाथ+ + +रघुवंशकाव्यस्य ।
व्यञ्जितरसभावशेषं कविकान्ता रच्यते टीका ॥

श्रीकालिदाससुकवेर्वचसि प्रसङ्गाद्बोधितैरजलदाम्बुवचो मदीयं।
आदीयतां सुकृतिभिः कुसुमस्य योगात् रम्भागुण + + + + बहवो वहन्ति ॥
मनुमहाराजकुलजमहीपतीनां चरितानि विवर्णयिष्यन् सकलकविसार्थवाहः श्रीकालिदासः परदेवतानमस्करणमैहिकामुष्मिकफलप्रदमिति आशीर्वाद-वस्तुनिर्देशावुद्दिश्य देवतानमस्काररूपं महाकाव्यमुखमाह । वागर्थाविति ।

End. रघुवृषभो रघुश्रेष्ठः सैनिकैः सह ++++ समीयिवान् सङ्गतः सन् स्वमन्दिरं न्यवर्त्तयत ॥ श्रीः ॥

Colophon. इति श्रीमदाचार्य्यगोपीनाथ++कविराजकृतौ कविकान्ताख्यायां रघुवंशटीकायां नवमः सर्गः ॥ श्रीः ॥

पूर्व्वसर्गान्ते दशरथस्य पुत्रो + + + + + + नपुत्रोदयो भण्यते इति सर्गयोः सुसम्बन्धं ॥

नवनवशरचन्द्रे टिप्पनीं वै रघोस्तु,
समलिखदिति शाके सम्मिते सौम्यवारे ।
शशधरपरिपूर्णे श्रावणस्य तृतीये.
मिहिर + + + + + + + + कृष्णशर्म्मा ॥ (अतः परं खण्डितं)

विषयः । रघुवंशव्याख्यानं नवमसर्गान्तं ॥

No. 1185. बालरामायणं ।

Substance, country paper, 17 × 4 inches. Folia, 178. Lines, 5—6 on a page. Extent, 3,783 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura. Rámadhana Vidyávágis'a. Appearance, old. Prose and verse. Incorrect.

Bálarámáyaṇa. A drama founded on the incidents described in the Rámáyaṇa and the life of Ráma. By Rájasekhara Kavirája. The work is held in high estimation as a dramatic composition of great merit, and a very good edition of it has lately been published by Paṇḍit Bála S'ástrí of the Benares Sanskrit College.

Beginning. प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना ।
यदात्मानो विद्याः परिणमति यस्यार्थवपुषा
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥

नान्द्यन्ते सूत्रधारः। ससंरम्भं परिक्रम्य। पुरोऽवलोक्य च सप्रश्रयमञ्जलिं बद्धा, भो भो भुजस्तम्भाल्लानितलक्ष्मीकरेणुना रघुकुलैकतिलकेन महेन्द्रपालदेवेन अधिकृताः सभासदः सर्व्वानेव वो गुणनिधिर्विज्ञापयति, विदितमेवैतद् भवतां। ++++++++++++++++++++++

End. वशिष्ठः। रामं प्रति, किन्ते भूयः प्रियमुपकरोमि।

रामः। अतः परमपि प्रियमस्ति।

भग्नद्वाजगवं न चापि कुपितो भर्गः सुरग्रामणीः

सेतुश्च ग्रथितः प्रसन्नमधुरो दृष्टश्च वारांनिधिः।

पौलस्त्यश्च हतः स्थितश्च भगवान् प्रीतः श्रुतीनां कविः॥

प्राप्तं यानमिदञ्च याचितवते दत्तं कुवेराय च॥

तथापीदमस्तु। सम्यक् संसारविद्याविषदमुपनिषद्भूतमर्थाद्भुतानां

ग्रथ्नन्तु ग्रन्थिबन्धं वचनमनुपतत् सूक्तिमुक्ताः सुयुक्ताः।

सन्तः सन्तर्पितान्तःकरणमनगुणं ब्रह्मणः काव्यमूर्त्ते-

स्तत्त्वं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु॥

इति निष्क्रान्ताः सर्व्वे।

इति राघवानन्दो नाम दशमोऽङ्कः॥

Colophon. इति श्रीकविराजराजशेखरविरचितं बालरामायणं नाम महानाटकं समाप्तं।

विषयः। आपाणिग्रहणाद् राजपदप्राप्तिपर्य्यन्तं रामचरित्रमवलम्ब्य दशभिरङ्कैः विरचितमिदं महानाटकं। तत्र शुनःशेफप्रवेशमुखेन प्रभातवर्णनं। तापसच्छद्मना प्रविष्टस्य रावणस्य तेन सह संलापः। प्रहस्तकेन सह रावणस्य जनकालयगमनं। तत्र सीतां पश्यतस्तस्य औत्सुक्यं, अकृतार्थता च धनुर्भङ्गाय कृतोद्यमस्य सत्यन्योन्यसमरोद्योगे जनकरावणयोः, माध्यन्दिनीं सन्ध्यामनुष्ठातुं निश्चक्राम रावणः। इति प्रतिज्ञापौलस्त्यो नाम प्रथमोऽङ्कः।

शिवस्य चात्मनोऽवस्थां वर्णयतो भृङ्गिरिटेः स्वप्रकृतिमनुचिन्तयता नारदेन सह परशुरामरावणयोः वीर्य्यविषयकं कथोपकथनं। सीतामनुस्मृत्य रावणस्य मदनचेष्टितं। याचितपरशुना परशुरामेण यदभिहितं, रावणसमीपे मायामयस्य तत्कथनं। भार्गवदशमुखयोर्युद्धं। इति परशुरामरावणीयो नाम द्वितीयोऽङ्कः।

गृध्रमिथुनसंवादप्रसङ्गेन ताड़कानिधनपूर्व्वकं रामचन्द्रेण मारीचो निगृहीत इति सूचना। रावणसमीपे 'सीतास्वयम्वराभिधान'नाटकस्य अभिनयः। तत्र, विश्वामित्रेण सह रामलक्ष्मणयोः स्वयम्वरसभाधिष्ठानं। रामस्य सीता

विषयः। सौन्दर्य्यपक्षपातः। तत्त्वेन सीतामनुसन्धाय रावणस्य उन्मादः। हेमप्रभया समं सीतायाः समागतराजदर्शनं। तत्र नरकासुरपाण्ड्यराजादीनां प्रशस्तिवर्णनोन्मुखायां सत्यां प्रतिहार्य्यां तत्त्वबुद्धा तद्वधार्थं रावणेन गृहीते चन्द्रहासे प्रहस्तकर्तृकं तन्निवारणं। पुनः, चेदिपति-सिंहलेश्वर-मथुरानाथावन्तिनाथ-क्रथकैशिकाधिपति-काञ्चीपुरेश्वर-लाटेश्वरप्रभृतीनां प्रशस्तिवर्णनं। धनुर्भङ्गे राजकुलस्य अक्षतार्थता तद्भङ्गाय दशमुखस्य उत्थानेच्छा। रामेण कृतेऽपि धनुर्भङ्गे प्रथमतो नाटकधिया तस्य अविश्वासः। जनकेन समर्पितायां जानक्यां रामचन्द्रकरे तस्य च पुनः संरम्भः। सन्ध्यावर्णनं। इति विलक्षलङ्केश्वरो नाम तृतीयोऽङ्कः।

रामचन्द्रं प्रति श्रुतभार्गवसमरसंरम्भेण शक्रेण दशरथः सत्वरं सुरलोकात् तत्र प्रहित इति उपाध्यायवटुसंवादेन सूचितं। पुरन्दरस्यन्दनस्य चतुर्द्दिशं सत्तवारणीयफलकेषु परशुरामचित्रं लिखितमस्तीति वाचमाकर्ण्य मातलेः, सौदामिन्या सह हरकृताखोपदेश-रेणुकाशिरश्छेदनादिभार्गवचरित्रचित्रं पश्यतो दशरथस्य विमानाद् विदेहराजमन्दिरावतरणं। सीतां प्रति जनकशतानन्दयोः सुनयोपदेशः। जनकदशरथयोरन्योन्यमाप्यायनं। भार्गवसमीपे रामस्य विनयः। भार्गवनिग्रहाय जनकस्य धनुर्ग्रहणं। विश्वामित्रस्य तन्निवारणं। राममुद्दिश्य भार्गवस्य वैष्णवधनुरर्पणं। लक्ष्मणकर्तृकं तत्र ज्यारोपणं। उर्म्मिलादिभिः सह लक्ष्मणादीनां विवाहः। इति भार्गवभङ्गो नाम चतुर्थोऽङ्कः।

माल्यवतो मिथिलानिवासिना स्पर्शेन प्रहितस्य लेखस्य वाचनं। विरचिता सीताप्रतिकृतिः रावणोपच्छन्दार्थं यन्त्रकारेण विशारदनामकेनेति मायामयवचनमाकर्ण्य, मयापि सीताधात्रेयिका कारिता सिन्दूरिका नाम, किञ्च, तत्प्रदर्शनेन दशाननः प्रलोभनीयस्त्वयेति तत्प्रति माल्यवत आदेशः। सीतासन्दर्शनाभिलाषिणो रावणस्य मायामयवाक्यस्मरणात् सीतानयनाय प्रहस्तं प्रति समादेशः। सीतां पश्यतः तस्य पूर्व्वरागः। तत्र सिन्दूरिकायाः सीतापूर्व्वरागवर्णनञ्च। सीतां प्रति तस्य स्वागतप्रश्नः। सीताया अनुरागव्यञ्जनं। तत्करस्पर्शेन सारिकाधिष्ठितं सीताप्रतिकृतियन्त्रमिति रावणस्य निश्चयः। तस्य चित्तविनोदनार्थं लीलोद्यानप्रवेशः। ऋतूनां वर्णनं। तत्र तस्य वैधुर्य्यवर्णनञ्च। रावणकृतमदनोपालम्भः। मन्दरकामिनी-हिमगिरिसुन्दरीप्रभृतीनां तत्सेवनार्थमागतानां 'पर्व्वतकलत्राङ्गसङ्गो नितरां तापायेति' तासां विसर्ज्जनं। रम्भामेनकादीनामप्सरसां ताम्रपर्णीमुरलाप्रभृतीनां नदीनाञ्च

विषयः। तदुपचारः। वारुणीलक्ष्मीसरस्वतीनां तल्लनतिरस्कृतिः। इन्दीवराकर चन्द्रबिम्बमवलोक्य 'पुरन्दरोऽयं सीतामालिङ्गतीति' बुद्ध्या तस्य पुनः चन्द्रहासस्मरणं। अत्रान्तरे छिन्ननासायाः शूर्पणखाया रावणसमीपे स्वावस्थाप्रदर्शनं। रावणकर्त्तृकतत्समाश्वासनञ्च। इति उन्मत्तदशाननो नाम पञ्चमोऽङ्कः।

शूर्पणखामायामययोर्माल्यवता सह संवादः। अथैकदा कैकेय्या सममसुरानीकविजयाय दशरथे पुरुहूतं समुपस्थितवति तद्रूपधारिणौ रामचन्द्रं सपदिछलयितुमयोध्यां शूर्पणखा अहञ्च प्रापतुः। ततश्च मन्थरारूपधारिण्या शूर्पणखया 'महाराज! अद्य कैकेयी त्वया प्रतिपन्नं वरद्वयं याचते' इत्युक्तेन मया निर्व्वासितो राजपुत्रः प्रवृत्तश्च गन्तुं वनायेति माल्यवत्समीपे मायामयस्य कथनं। अत्रान्तरे कैकेय्या सह दशरथस्य अयोध्याप्रवेशः। वामदेवप्रमुखात् रामस्य निर्व्वासनं श्रुत्वा तयोर्मूर्च्छा। लक्ष्मणशत्रुघ्नयोस्तयोर्विलापादि च। सुमित्राया वामदेवप्रदत्तपत्रिकावाचनं। तत्र समागतस्य सुमन्त्रस्य सर्व्वेषां समीपे नर्म्मदापरपारगमनपर्य्यन्तं रामवनवासवृत्तान्तकथनं। अनन्तरमागतस्य जटायुर्दूतस्य रत्नशिखण्डस्य तेषां पुरतः, 'रामकृतमायामृगानुसरण-सीताहरण-जटायुःपतनादि'वृत्तान्तकीर्त्तनं। इति निर्दोषदशरथो नाम षष्ठोऽङ्कः।

वैतालिकयुगलप्रवेशमुखेन रामकृतखरदूषणबध-बालिनिग्रहादीनां हनूमत्कृतसमुद्रोल्लङ्घनाशोकवनदलनादीनाञ्च कीर्त्तनं। समुद्रकूलोपविष्टस्य रामस्य चेष्टावर्णनं। रामेण परित्यक्ते आग्नेयास्त्रे गङ्गायमुनाभ्यां सह समुद्रस्य तत्पुरतो विनयः। सेतुबन्धनं। तत्र राक्षसैः सह वानराणां युद्धं। रामलक्ष्मणादीनां पुरतो दशमुखस्य सीताशिरश्छेदनं। रामस्य विलापः। निर्ङ्गनादपि तन्मुखात् समुल्लासमाकर्ण्य तेषां विस्मयः। सिंहनादेन सह रामस्य युद्धं। इति असमपराक्रमो नाम सप्तमोऽङ्कः।

सुमुखदुर्मुखाभिधानराक्षसयोः संवादकथनव्याजेन सिंहनादबध-लक्ष्मणशक्तिशेलादीनां कथनं। रामरावणादीनां पुरतः तुलाद्यूते ताराकुमारेण कुमारो राक्षसपतेर्निहत इति वर्णनं। करङ्ककङ्कालाभ्यां सह रावणस्य लक्ष्मणमेघनादयोरन्योन्यं सम्प्रहारदर्शनं। कुम्भकर्णप्रबोधः। वानरैः सार्द्धं तस्य युद्धं। कुम्भकर्णादीनां निधनं दृष्ट्वा रावणस्य मूर्च्छा। इति वीरविलासो नामाष्टमोऽङ्कः।

पुरुहूतसमीपे चित्रगुप्तस्य लङ्कालेख्यकवाचनं। रामरावणयोर्युद्धदर्शनाय चारणमिथुनाभ्यां समं देवराजदशरथयोस्तत्र प्रवेशः। तयोर्घोरसमरवर्णनं। संवृत्ते रावणबधे रामलक्ष्मणयोरुपरि पुष्पवृष्टिः। इति रावणबधो नाम नवमोऽङ्कः।

विषयः । अलकया सह समशोकायां लङ्कायाः प्रवेशमुखेन सीताया वह्निशुद्धिः, भरतस्य पार्श्वे हनूमान् प्रेषितश्चेति सूचना । विमानमानेन रामलक्ष्मणादीनाम् अयोध्यायात्रा । तत्र सीतामुद्दिश्य रामस्य युद्धस्थलीप्रदर्शनं । पुरन्दरप्रेरितस्य विद्याधरस्य तेषां पुरतो रामदिव्यचरितकीर्त्तनं । सीतामुद्दिश्य तस्य हिमालयकैलासमानससरोवरादीनां वर्णनं । तत्र सुग्रीवादीनां समुद्रवर्णना । सिंहलस्य । समुद्रकूलस्य । माल्यवतः । मलयस्य । ताम्रपर्णीनद्याः । अगस्त्याश्रमस्य । तत्र रामलक्ष्मणप्रभृतीनामगस्त्येन समं साक्षात्कारः । द्रविड़देशस्य वर्णनं । सप्तगोदावरीतीरे परशुरामस्य । कावेर्य्याः । महाराष्ट्रदेशस्य । नर्म्मदायाः । लाटदेशस्य । उज्जयिनीस्थमहाकालनाथस्य । मालवदेशस्य । यमुनायाः । पञ्चालदेशस्य । महोदयनामकनगरस्य । कान्यकुब्जस्य । प्रयागस्य । वाराणस्याः । मिथिलायाश्च वर्णनं । अयोध्याप्राप्तिः । भरत-शत्रुघ्नपुरःसरेण वशिष्ठेन सह सर्व्वेषां सम्भाषणादिः । इति राघवानन्दो नाम दशमोऽङ्कः ।

समाप्तोऽयं ग्रन्थः ।

No. 1186. शब्दखण्डः ।

Substance, country paper, 22 × 5 inches. Folia, 154. Lines, 9—12, on a page. Extent, 7,535 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭácharya. Appearance, very old. Decayed. Prose. Correct.

S'abdakhaṇḍa—Being the last part of Gaṅges'a's *Tattva-chintámaṇi*. The work treats from a logical standpoint the value of Testimony as a proof. In the course of his dissertation, the author reviews at length the opinions of his predecessors. The MS. is a very old and remarkably correct one. Vide ante I. p. 295.

Beginning. अथ शब्दो निरूप्यते । प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणं । ननु शब्दो न प्रमाणं । तथा हि, करणविशेषः प्रमाणं, करणञ्च तद् यस्मिन् सति क्रिया भवत्येव । न च शब्दे सति प्रमाणं भवत्येवेति नायं शब्दः प्रमाणं । इत्यादि ।

End. ऐतिह्यञ्च आप्तोक्तत्वेन शब्द एव अन्तर्भवति । अर्थापत्त्यनुलब्ध्योस्तु यथायथमन्तर्भावः प्रागेव चिन्तितः । अतः सिद्धं चत्वारि प्रमाणानीत्युपरम्यते ।

धीराः कुशाग्रमतयो भवतः प्रणम्य
मौलौ निधाय करवारिरुहे समीहे ।
वाणीयमर्थरहितापि विशृङ्खलापि
सानुग्रहेण हृदयेन विलोकनीया ॥ शिवं ।

Colophon. इति महामहोपाध्यायगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ शब्दखण्डस्तुरीयः परिच्छेदः समाप्तः ॥०॥

विषयः । शब्दलक्षणं । तत्प्रामाण्ये सौगतमतं । वैशेषिकमतं । स्वीयमतं । जरन्मीमांसकमतं । प्राभाकरमतञ्च । आकाङ्क्षानिरूपणं । तत्र नव्यमतं । योग्यतानिरूपणं । आसत्तिनिरूपणं । तात्पर्य्याधीनं शब्दप्रामाण्यमिति कथनं । अत्र मीमांसकमतं । वेदस्य पौरुषेयत्वकथनं । वेदलक्षणं । पौरुषेयत्वलक्षणं । शब्दानित्यत्वकथनं । उच्छिन्नत्वेन अभिमतो वेदो नित्यानुमेय इति निर्णयः । वाक्यलक्षणं । स्मृत्याचारयोर्वेदमूलत्वमिति कथनं । प्रलयस्थापनं । प्रवर्त्तकज्ञाननिरूपणं । तत्र नव्यमतं । हिंसानिरूपणं । विधिविचारः । तत्र नव्यमतं । आचार्य्यमतं । गुरुमतं । विषयनिरुक्तिः । अपूर्ब्ववादः । शक्तिवादे । कार्य्यान्विते । अन्विते । स्वर्गलक्षणं । देवतालक्षणं । पदार्थनिरूपणं । तत्र प्रभाकरमतं । जातौ शक्तिरिति । जातिविशिष्टव्यक्तावेव शक्तिरिति कथनञ्च । योगरूढविचारः । अत्र मीमांसकमतं । शब्दसाधुत्वविचारः । लक्षणा । तत्र नव्यमत । समासविचारः । अत्र नव्यादीनां मतं । आख्यातविचारः । अत्र भट्टमतं । मण्डनाचार्य्यमतं । उपसर्गद्योतकताविचारः ।

No. 1187. श्रीकृष्णस्तोत्रं, क्वचित् २ व्याख्यायुक्तं ।

Substance, country paper, 13 × 3 inches. Folia, 16. Lines, 4 on a page. Extent, 168 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

S'ríkṛishṇa-stotra. A hymn in praise of the perfection of Krishṇa's person. By S'aṅkara Ácharya. There is no reason to believe that the great S'ivite Sannyási who commented on the Vedánta Sútras of Vyása wrote this hymn, and it is therefore to be inferred that either the work is a forgery, or the author is a homonymous person of a different and much later age.

Beginning. लक्ष्मीभर्त्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं विभाति ।
पायाद् वः पाञ्चजन्यः स सकलदितिजत्रासनैः पूरयन् स्वै-
र्निध्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥ १ ॥

End. मोदात् पादादिकेशस्तुतिमिति रचितां कीर्त्तयित्वा त्रिधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतमतिर्मस्तकेनानमेद् यः ।
उन्मुच्यैवात्मने नो निचयकवचतां पञ्चतामेत्य भानो-
र्बिम्बान्तर्गोचरं स प्रविशति परमानन्दमात्मस्वरूपं ॥ ५ ॥

Colophon. इति श्रीशङ्कराचार्य्यविरचितं श्रीकृष्णस्तोत्रं समाप्तं ।

विषयः । श्रीकृष्णस्तोत्रव्याजेन तद्रूपमाहात्म्यवर्णनं ।

No. 1188. अद्वैतरहस्यं ।

Substance, country paper, 12 × 3 inches. Folia, 4. Lines, 4 on a page. Extent, 44 s'lokas. Character, Bengali. Date, ? Place of deposit, Kálidása Vidyávágís'a. Appearance, Fresh. Prose and verse. Correct.

Advaita-rahasya. A dissertation in support of the non-dual theory of the Vedánta. By Rámánanda Tírtha. The author was one of the foremost professors of this school of philosophy.

Beginning. इह किल प्रातीतिकभ्रमत्यागार्थमात्मज्ञानरहस्यं चातुर्य्याक्षेपमुद्रया नमस्कार-
व्याजेन दर्शयति ।
निराभासाय शान्ताय ज्ञानातीताय ते नमः ।
मह्यमज्ञेयरूपाय नित्यमुक्तचिदात्मने ॥ इत्यादि ।

End. अवस्व तात ! अवस्व निशामय निशामय ।
येनैव निर्वृतिः स्यात्तु तेनैव विहरानघ ! ॥
अथ वा यासि सङ्कोचं लोकदृष्ट्या तु मूढधीः ।
तदा नैव सुखं यासि लोकभ्रष्टोऽसि हे सुत ! ॥

Colophon. इति श्रीरामानन्दतीर्थकृताद्वैतरहस्यं समाप्तं ॥

विषयः । ब्रह्मणो लक्षणादिकथनपुरःसरमद्वैतवादसंस्थापनं ।

No. 1189. अवधूतषट्कं ।

Substance, country-made yellow paper, 11 × 4 inches. Folium, 1. Lines, 8. Extent, 19 s'lokas. Character, Nágara. Date, ? Place of deposit, S'ántipura. Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

Avadhúta-shatka. A hymn in six stanzas in praise of Avadhútas, a class of houseless hermits, to which its author S'ankara Áchárya belonged.

Beginning. न योगी न भोगी न वा मोक्षकाङ्क्षी
न वीरो न धीरो न वा साधकेन्द्रः ।
न शैवो न शाक्तो न वा वैष्णवो वाऽ-
वधूतश्चिदानन्दरूपोऽहमात्मा ॥ १ ॥

End. विभूतिं त्रिशूलं तथा रक्तवासो
दधानः कपालं गले नागहारं ।
प्रसन्नान्तरात्मा सदा हृष्टचेता
विरेजेऽवधूतो द्वितीयो महेशः ॥ ६ ॥

Colophon. इति शङ्कराचार्य्यविरचितमवधूतषट्कं समाप्तम् ।

विषयः । अवधूतप्रकृतिवर्णनं ।

No. 1190. आलोकः ।

Substance, Palm-leaf, 14 × 2 inches. Folia, 92. Lines, 6 on a page. Extent, 3,956 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old and decayed. Prose. Correct.

A'loka. A commentary on the Tattva-chintámani of Gańges'a. By Gadádhara. The MS. comprises the first three books only, but it is very old and correct. (Vide ante I p. 295, and Hall's Contributions, p.)

Beginning. वक्त्राणि पञ्च कुचयोः प्रतिबिम्बितानि
दृष्ट्वा दशाननसमागमसम्भ्रमेण ।

भूयोऽपि शैलपरिवृत्तिभयेन गाढ-
मालिङ्गितो गिरिजया गिरिशः पुनातु ॥
अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥
प्रसङ्गान्मङ्गलस्य समाप्तिहेतुतां स्थापयितुं भूमिकामाचरति, इहेति । इह खलु वाक्यालङ्कारे एकवाक्यता अविप्रतिपत्तित्वेन भ्रममूलकता निराकृतेत्यादि ।

End. अदण्डव्यावृत्तधीकरणतावच्छेदको दण्ड इति शब्दादकामेऽपि तद्वृत्त्यादण्डव्यावृत्त्यप्रतीतेः सर्व्वसिद्धत्वादिन्द्रियासन्निकर्षादिना प्रत्यक्षसामग्र्याभावात्, तस्माद् यथोक्तं विशेषणपदप्रवृत्तिनिमित्तं विशिष्टधीविषयस्तु विशेषण इत्यतः खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । चिन्तामणेः व्याख्यानं ।

No. 1191. आलोकरहस्यं ।

Substance, country paper, 17 × 4 inches. Folia, 26. Lines, 8 on a page. Extent, 1,518 s'lokas. Character, Bengali. Date, Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

A'loka-rahasya. A gloss on the last named work. By Mathurá-nátha Tarkavágís'a. The codex comprises only the third book.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीरामसखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षालोकफक्किकाः ॥
निर्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं स्तुतिपूर्व्वकभगवत्प्रार्थनारूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति, वक्त्राणीति । गिरिशो महादेवः पुनातु पवित्रं करोतु प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकं पापं नाशयतु इत्यादि ।

End. सामानाधिकरण्यविरहव्यभिचारादिनिश्चयात्मकघटादिव्यतिरेकज्ञानप्रतिबध्यायां घटादिनिश्चयेति अतः खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । जयदेवकृतप्रत्यक्षखण्डालोकस्य व्याख्यानं ।

No. 1192. कृष्णभक्तिरसोदयः ।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 12. Lines, 5 on a page. Extent, 180 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rádhikánátha Gos'vamí. Appearance, new. Prose and verse. Correct.

Krishna-bhaktirasodaya. A treatise on the Bhakti system of the Vaishṇavas. By Rádhámohana S'armá. The MS. is incomplete.

Beginning. गोपीनयनचकोरी—स्वादितसुरमास्मिताङ्गरुचिः ।
कोऽपि व्रजेन्द्रतनयो नीरदनीलो विधुर्जयति ॥
श्रीमदद्वैतवंशेन राधामोहनशर्म्मणा ।
क्रियते परमामोदः कृष्णभक्तिरसोदयः ॥
श्रीमद्रसामृताम्भोधिर्गोस्वामिभिरुदाहृतः ।
तस्मादुद्धृत्य यत्किञ्चिदन्यतश्च निवेद्यते ॥
क्षन्तव्यं मम चापल्यं तद्गन्धेरितचेतसः ।
वैष्णवैः कृष्णसम्बन्धगुणमात्रपरिग्रहैः ॥ तत्र भक्तिलक्षणमित्यादि ।

End. आनुगत्यञ्च शास्त्रादिप्रसिद्धासु रागात्मिकाङ्गश्रवणकीर्त्तनस्मरणपादसेवनवन्दनात्मनिवेदनप्रायतनपरिपाटीषु प्रवृत्त्या स्पष्टीकरणमित्यतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । भक्तिलक्षणं । अनुशीलनस्वरूपप्रदर्शनं । उपवासस्य भजनाङ्गत्वकथनं । भक्तिलक्षणपरिष्क्रिया । भक्तिप्रयोजननिर्देशः । तद्विवरणकथनञ्च । रुचिलक्षणं । केवलयुक्तेरप्रतिष्ठता । साधनसाध्यभेदेन भक्तेर्द्वैविध्यकीर्त्तनं । साधनभक्तिलक्षणं । वैधीलक्षणं । रागलक्षणं । चतुःषष्टिमद्भुतानि भक्त्यङ्गानि । सन्ध्योपासनादीनां कर्त्तव्यताकथनादिः । भक्त्यनुकूलवैराग्यलक्षणं । तत्प्रतिकूलवैराग्यलक्षणञ्च । रागानुगालक्षणं । अतः परं खण्डितं ।

No. 1193. तत्त्वचिन्तामणिप्रत्यक्षखण्डः ।

Substance, country paper, 17 × 4 inches. Folia, 49. Lines, 5—8 on a page. Extent, 1,650 s'lokas. Character. Bengali. Date, ? Place of deposit, S'antipura, Gosvámi Bhaṭṭácharya. Appearance, old. Prose. Correct.

Pratyaksha Khanda. The third book of Gaṅges'a's Tattva-chintamaṇi. This, like No. 1186, is a remarkably old and correct codex.

Beginning. गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमय-
स्त्रिमूर्त्तिर्यः सर्गस्थितिविलयकर्म्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥
आन्वीक्ष्यानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलं ।
तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिं ॥
यतो मणेः पण्डितमण्डनक्रिया प्रचण्डपाषण्डमतस्तिरस्क्रिया ।
विपक्षपक्षे न विचारचातुरी न च स्वसिद्धान्तवचो दरिद्रता ॥
इह खलु सकलशिष्टैकवाक्यतया अभिमतकर्म्मारम्भसमये तत्समाप्तिकामा मङ्गलमाचरन्ति । इत्यादि——

End. सविकल्पकज्ञानानां जात्यादियोजनया हीनानां इन्द्रियजानां प्रत्यक्षत्वापाकरणादितः परं खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । मङ्गलवादः । प्रामाण्यवादः । तत्र प्रामाण्यं स्वतो ग्राह्यमिति पूर्व्वपक्षः । प्रामाण्यं परतो ग्राह्यमिति सिद्धान्तः । प्राभाकरमतनिरासः । प्रामाण्यस्वरूपविचारः । अन्यथा-ख्यातिकथनं । प्रत्यक्षलक्षणं । तत्र सन्निकर्षविशेषस्य कारणतासंस्थापनं । विषयालोकसंयोगस्य विषयोद्भूतरूपस्य महत्त्वस्य च प्रत्यक्षकारणत्वकथनं वायुर्न प्रत्यक्ष मनोजन्य इति कथनं । सुवर्णं प्रत्यक्षं तैजसञ्चेति कीर्त्तनं । मन इन्द्रियमणु चेति निर्द्देशः । ज्ञानं मानसमिति कथनादि । सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षस्य च द्वैविध्यकथनञ्च इत्यतः खण्डितं ॥

No. 1194. प्रत्यक्षमणिफक्किका वा प्रत्यक्षखण्डटीका ।

Substance, country paper, 18 × 3½ inches. Folia, 28. Lines, 8 on a page. Extent, 1,710 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭácbárya. Appearance, old and decayed. Prose. Correct.

Pratyaksha-maṇi-phakkiká. A commentary on the last named work. By Mathuránátha Tarkavagís'a. *Vide ante* I, p. 295.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
विशदीकृत्य दर्श्यन्ते प्रत्यक्षमणिफक्किकाः ॥
निर्व्विघ्नं प्रारिप्सिततत्त्वचिन्तामणिनामग्रन्थसमाप्तिकामनया कृतं महादेवनमस्कारूपं मङ्गलं शिष्यशिक्षार्थमादौ निवध्नाति, गुणातीत इतीत्यादि ।

End. मङ्गलस्य सफलत्वं व्यवस्थाप्य मोक्षसाधनीभूततत्त्वज्ञानचिकीर्षावतां स्वीयग्रन्थोपादानप्रवृत्तये मोक्षसाधनीभूतफलवदान्वीक्षिकीप्रतिपादितप्रतिपादकत्वेन हेतुना मोक्षसाधनीभूततत्त्वज्ञानजनकतां स्वीयग्रन्थस्य प्रतिपादयितुं तादृशहेतुमत्त्वं स्वीयग्रन्थस्य दर्शयति अथेत्यादिना विविच्यत इत्यन्तेन । अथ मङ्गलस्य समाप्तिहेतुतानिरूपणानन्तरमित्यतः खण्डितत्वात् शेषवाक्यं नास्ति ।

विषयः । प्रत्यक्षचिन्तामणिव्याख्यानं ।

No. 1195. नारदस्मृतिः ।

Substance, country-made, yellow paper, 22 × 4 inches. Folia, 30. Lines, 7 on a page. Extent, 997 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Bharatachandra S'iromaṇi. Appearance, old. Prose and verse. Generally correct.

Nárada Smṛiti. The Institutes of Hindu Law. By Nárada. In the preface, the work is described to comprise four thousand stanzas, but the codex contains only one thousand stanzas, and still professes to be complete. Contents: Chapter 1; Courts of law defined; 2, Jurisprudence; 3, Debts; 4, Documents; 5, Witnesses; 6 Fire ordeal; 7, Ordeal by drinks; 8, Ordeal by poisons; 9, Money; 10, Loans; 11, Rules of guilds and trades; 12, Gifts; 13 and 14, Wages; 15, Sales of property by persons whose right to it is questioned; 16, Payment of value of purchases; 17, Duties of purchasers; 18, Oaths; 19, Boundaries; 20, Connexion of the sexes; 21, Inheritance; 22 and 23, Punishments of various kinds, reprimands, &c.; 24, Venial offences.

Beginning. इति ह स्माह भगवान् मनुः प्रजापतिः सर्व्वभूतानुग्रहार्थमाचारस्थितिहेतुभूतं शास्त्रं चकार यत्रादौ लोकसृष्टिभूतप्रविभागसदेशप्रमाणपरिषल्लक्षणं वेद-

वेदाङ्गयज्ञविधानमाचारो व्यवहारः कण्टकशोधनं राजवृत्तं वर्णधर्माश्रमप्रविभागो विवाहन्यायस्त्रीपुंसविकल्पो दायादनुक्रमः। श्राद्धविधावशौचकल्पो भक्ष्याभक्ष्यलक्षणं विक्रेयाविक्रेयमीमांसा। पातकभेदः स्वर्गनरकानुदर्शनप्रायश्चित्तान्युपषदो रहस्यानीत्येवं चतुर्विंशतिप्रकरणानि तदेतत् श्लोकशतसहस्रमासीत् तेनाध्यायसहस्रेण मनुः प्रजापतिरुपनिबध्य देवर्षये नारदाय प्रायच्छत्। स च तस्मादधीत्य महत्त्वात् नायं ग्रन्थः सुकरो मनुष्याणां शक्यो धारयितुं इति द्वादशभिः सहस्रैः सञ्चिक्षेप। तच्च सुमतये भार्गवाय प्रायच्छत्। स च तस्मादधीत्य तथैवायुर्ह्रासादल्पीयसी मनुष्याणां शक्तिरिति ज्ञात्वा चतुर्भिः सहस्रैः सञ्चिक्षेप। तदेतत् सुमतिकृतं मनुष्या अधीयन्ते।

End. हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः।
एतानि सततं पश्येन्नमस्येदर्चयेत् स्वयं।
प्रदक्षिणञ्च कुर्वीत यथास्यायुः प्रवर्द्धते॥

Colophon. इति नारदीये धर्मशास्त्रे प्रकीर्णकं नाम व्यवहारपदमष्टादशं समाप्तम्॥

विषयः। अत्र १ अध्याये, परिषल्लक्षणं। २, व्यवहारलक्षणं। ३, ऋणशोधनं। ४, धनस्वामिसंशयोच्छेदकलिखनसाक्षिभोगरूपत्रिविधप्रमाणान्तर्गतलिखनप्रमाणकथनं। ५, साक्षिप्रमाणकथनं। ६, पापिपरीक्षार्थमग्निसंस्कारकथनं। ७, पापिपरीक्षार्थं पानीयविधिकथनं। ८, विषपानरूपपापिपरीक्षाकथनं। ९, परीक्षाविषये कोषविधिकथनं। १०, ऋणदानस्य विशेषनामकथनं। ११, वणिक्प्रभृतयः सम्भूय यत् कर्म कुर्वन्ति तत् सम्भूय समुत्थानं नाम तस्य विवरणं। १२, दत्ताप्रदानकथनं। १३, भृत्यानां वेतनदानादानविधिकथनं। १४, वेतनस्यानपाकर्मकथनं। १५, अस्वामिकृतविक्रयस्य सिद्धत्वासिद्धत्वकथनं। १६, विक्रेयपण्यस्यासम्प्रदानकथनं। १७, क्रयकर्त्तुरनुवादकथनं। १८, समयस्यानपाकर्मकथनं। १९, सेतुकेदारसीमाकथनं। २०, स्त्रीपुंयोगकथनं। २१, दायभागकथनं। २२, साहसकथनं। २३, वाक्पारुष्यदण्डपारुष्यकथनं। २४, द्यूतसमाह्वयकथनं। प्रकीर्णककथनं॥०॥

ग्रन्थादौ चतुर्भिः सहस्रैः सञ्चिक्षेप एतस्य उक्तत्वात् एतद्ग्रन्थस्य चतुःसहस्रश्लोकात्मकत्वं सूचितं, अस्मिन् ग्रन्थे किञ्चिदधिकसहस्रसङ्ख्यकश्लोकानां प्राप्तत्वेनास्य सखण्डत्वमनुमितं। समाप्तमित्यनेन यत् समाप्तिसूचकं वाक्यं तद्भ्रमपतितं॥

———

No. 1196. शब्दालोकः ।

Substance, country paper, 18 × 3 inches. Folia, 18. Lines, 6—7 on a page. Extent, 3,650 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Nṛis'iñhaprasáda Gos'vámí. Appearance, old. Prose. Correct.

S'abdáloka. A commentary on the last book of Gañges'a's *Tattva-chintámaṉi.* By Jayadeva. (*Vidê ante* I, p. 295.)

Beginning. न जाने श्रीजाने विरचितमिह ग्रन्थगहने
समर्था नैवार्थानधिगमयितुं निर्म्मितिरपि ।
तथाप्येतावत्यामपि किल विगत्यामहमिह
प्रवृत्तो यत्तस्मिंस्तव चरणसेवैव शरणं ॥
अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
शब्दचिन्तामणेरित्यमालोकोऽयं प्रकाश्यते ॥
अथेति । इहाथशब्दस्य आनन्तर्य्यवचनत्वेन उपस्थितस्य उपमाननिरूपणस्यैव प्राप्तत्वात तस्येत्यादि ।

End. अन्वयव्यभिचारवारणाय योग्यतादीति लक्ष्ये व्यभिचारवारणाय अनुपपत्तीत्यर्थः । अन्यथेति । अन्यलभ्येऽपि शक्तौ विशेषणद्वयं त्यक्त्वा पदात् । इत्यतः खण्डितम् ।

विषयः । गङ्गेशकृततत्त्वचिन्तामण्यन्तर्गतशब्दखण्डव्याख्यानं ।

No. 1197. शब्दखण्डटीका ।

Substance, country paper, 17 × 3½ inches. Folia, 9. Lines, 8 on a page. Extent, 400 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Nṛisiñhaprasáda Gos'vámí. Appearance, old. Prose. Correct.

S'abdakhaṉḍa ṭiká. A commentary on the last book of Gañges'a's Tattva-chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा ॥

श्रीमता मथुरानाथतर्कवागीशश्रीमता ।
विषदीकृत्य दृश्यन्ते तुरीयमणिफक्किकाः ॥
आन्वीक्षिकीपण्डितमण्डलीषु सत्ताण्डवैरध्यनं विनापि ।
मदुक्तमेतत् परिचिन्त्य धीरा निःशङ्कमध्यापनमातनुध्वं ॥
प्रत्यक्षादिप्रमाणत्रयं निरूपितमिदानीं चरमप्रमाणं शब्दो निरूपणीयोऽतः शिष्यावधानाय प्रतिजानीते, अथेत्यादिनेत्यादि ।

End. विशेषणविशेष्यभावेति । परस्य विशेष्यविशेषणभावेन स्वार्थनावच्छेदकावाच्छिन्नानुभवजनितेत्यतः खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । गङ्गेशकृततत्त्वचिन्तामणन्तर्गतशब्दखण्डव्याख्यानं ।

No. 1198. विल्वमङ्गलं ।

Substance, country paper, 11½ × 3 inches. Folia, 15. Lines, 6 on a page. Extent, 281 s'lokas. Character, Bengali. Date, Sk., 1616. Place of deposit, S'ántipura, Rádhikánátha Gosvámí. Appearance, old. Verse. Generally correct.

Vilvamañgala. A hymn in praise of Krishṇa. By Vilvamañgala.

Beginning. यं वेदविदपि प्रियमिन्दिराया यन्नाभिनीरजगर्भभटो न धाता ।
गोपालबाललललना वनमालिनन्तं गोधूलिधूसरशरीरमरीरमंस्ताः ॥ इत्यादि ।

End. ददातु वः शं किल व्रजेशः पीताम्बरोऽसौ वृन्दावनेशः ।
मन्दारमाली वर्हावतंसी, सतां हृदिस्थोऽमरारिध्वंसी ॥
यात्यतो वेदवध्योऽसि चरणन्विदमुत्थित ।
अनेन मूलं खड्गेन पतितं वेत्स्यसि चितौ ॥

Colophon. इति विल्वमङ्गलं समाप्तं ।
ऋतुविधुरसपृथ्वी शाकके शुभ्रपक्षे
वृषगकमलबन्धौ पञ्चदश्यां पदाब्जं ।
नगवरधर ते श्रीरामदेवः प्रणम्य
अलिखदपदविल्वमङ्गलं नाम काव्यं ॥

विषयः । श्रीकृष्णस्तवनं ।

No. 1199. भारतभावदीपः ।

Substance, country-made yellow paper, 12 × 4½ inches. Folia, 170. Lines, 10 on a page. Extent, 4,887 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kalidása Vidyávágís'a. Appearance, new. Verse. Generally correct.

Bhárata-bhávadípa. A perpetual gloss on the Mahábhárata. By Nílakantha Súri. The codex examined is very imperfect, containing only the commentary on the Gítá portion of the work. A complete and very correct MS. of the entire work exists in the Library of the late Rájá Pitámbar Mitra, Surá; copies more or less perfect also exist in the Libraries of the late Rájá Sir Rádhákanta Deva, of Rájá Komalkrishṇa Bahádur, of the Asiatic Society of Calcutta, and of the Sanskrit Colleges of Calcutta and Benares.

Beginning. ॐ नमो ब्रह्मवादिभ्यो ब्रह्मविद्यासम्प्रदायकर्त्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः ।

प्रणम्य भगवत्पादान् श्रीधरादींश्च सद्गुरून् ।
सम्प्रदायानुसारेण गीताव्याख्यां समारभे ॥
भारते सर्व्ववेदार्था भारतार्थाश्च कृत्स्नशः ।
गीतायां सन्ति तेनेयं सर्व्वशास्त्रमयी मता ॥
कर्म्मोपास्तिज्ञानभेदैः शास्त्रं काण्डत्रयात्मकं ।
अन्ये तूपासनाकाण्डस्तृतीयो नातिरिच्यते ॥
तदेव ब्रह्म विद्धि त्वं नेदं यत्तदुपासते ।
इति श्रुत्यैव वेद्यस्य ह्युपास्यादन्यतेरिता ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रिकेण हि ।
कर्म्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते ॥
तत्र युद्धोद्यमं श्रुत्वा श्रीतुक्यादग्रिमं वृत्तान्तं बुभुत्सुः धृतराष्ट्र उवाच, धर्म्मक्षेत्रेति ।

End. कृतिरैश्वर्य्यं सर्व्वनिदन्तृत्वं, नीतिर्नयश्च, एतत् सर्व्वं तत्र तस्मिन् पक्षे ध्रुवमिति मम मतिः । अतः पाण्डवैः सह सन्धिरेव कर्त्तव्य इति भावः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणज्ञमर्य्यादाधुरन्धरवंशावतंसश्रीगोविन्दसूनोः श्रीनीलकण्ठसूरिवर्य्यस्य कृतौ भारतभावदीपे भीष्मपर्व्वणि गीतार्थव्याख्यानेऽष्टादशोऽध्यायः ॥

विषयः । भगवद्गीताव्याख्यानं ॥

No. 1200. लीलावतीप्रकाशः ।

Substance, country paper, 18½ × 3½ inches, Folia, 7. Lines 6 on a page. Extent, 212 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Líláratí-prakás'a. A commentary on the Lílávatí of Vallabha Ácharya. By Vardhamána. The Lílávatí is an abridgment of the principal doctrines enunciated in the Chintámaní of Gaṅges'a. The work is of considerable repute, but rare in Bengal. Mr. Hall does not notice it in his *Contributions.*

Beginning. एकत्र शूलमपरत्र विषप्रसून-मन्यत्र कीर्त्तिरपत्र च पीतवासः ।
तत्पातु वर्ष्म शशलक्ष्मकलाकिरीट-निश्लिष्टकैटभहृदोर्मम वाञ्छितानि ॥
न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्र भवते नमः ॥
विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं मङ्गलं निबध्नाति, नाथ इति ।

End. किञ्च । प्रतियोग्यधिकरणवद्‌योगव्यवच्छेदस्य न विचारसहत्वमित्याह, अपि चेति । अतः खण्डितम् ।

विषयः । न्यायलीलावतीव्याख्यानं ।

No. 1201. लीलावतीप्रकाशरहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 12. Lines, 19 on a page. Extent, 507 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidásá Vidyávagís'a. Appearance, old. Prose. Correct.

Líláratí-prakás'a-rahasya. A commentary on the last named work. By Mathuránátha Tarkavágís'a.

Beginning. निर्व्विघ्नं प्रारिप्सितग्रन्यसमाप्तिकामनया कृतं हरिहरात्मकभगवत्प्रार्थनरूप मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति एकत्रेत्यादि ।

End. जातिमत्येव सत्त्वेत्यादौ अन्यस्मिन् लक्षणाव्यवच्छेदस्य शक्तिबललभ्य इत्याहुरिति सङ्क्षेपः । विस्तरस्तस्मत्कृतदीधितिरहस्येऽनुसन्धेयः ॥

Colophon. इत्यन्तं प्रचरन्ती माथुरी समाप्ता ।

विषयः । वर्द्धमानोपाध्यायकृतलीलावतीटीकाया व्याख्यानं ।

No. 1202. लीलावतीरहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 21. Lines, 8 on a page. Extent 924 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Lílávati-chintámaṇi-rahasya. A commentary on the *Lílávatí* of Vallabha Áchárya. By Mathuránátha Tarkavágís'a. This is a commentary on the original text of Vallabha, whereas No. 1201 is a gloss on the commentary of Vardhamána.

Beginning. श्रीमता मथुरानाथतर्कवागीशधीमता ।
विविच्यते फक्किकार्थो लीलावत्या विशेषतः ॥
निर्व्विघ्नं प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं श्रीकृष्णनमस्काररूपं मङ्गलं शिष्य-शिक्षार्थै आदौ निबध्नाति नाथ इति ।

End. द्रव्यत्वगुणत्वादीनां षण्णां यद्विच्छेदषट्कं तेन निवर्ज्जिता । अतःपरं खण्डितं ॥

विषयः । मूललीलावतीव्याख्यानं ।

No. 1203. लीलावतीदीधितिटिप्पनी ।

Substance, country paper, 17½ × 4 inches. Folia, 27. Lines, 8 on a page. Extent, 1039 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágis'a. Appearance, old. Prose. Correct.

Lílávatí-didhiti-ṭippaní. A gloss on Raghunátha S'iromaṇi's commentary on the Lílávatí of Vallabha. By Jagadís'a Tarkálaṅkára.

Beginning. कर्पूरकुन्दकुमुदकैलासोदरसोदरं ।
विघ्नविध्वंसकं धाम नमामः शैवदैवतं ॥
कणभक्षमुनेः पक्षरक्षाविन्यस्तवासनाः ।
वचांसि जगदीशस्य चिन्तयन्तु विचक्षणाः ॥ इत्येत्यादि ।

End. यन्नद्वितीयवाल्यदेहः तज्जन्यत्वस्यैव, यूनि यन्नद्वे सत्त्वात् तद्व्यवच्छेदासम्भवः ॥
इत्यतः खण्डितं ।

विषयः । शिरोमणिकृतलीलावतीटीकाया व्याख्यानं ।

No. 1204. अभिधारहस्यं ।

Substance, country paper, 17½ × 4 inches. Folia, 11. Lines. 7 on a page. Extent, 352 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidásá Vidyávagís'a. Appearance, old. Prose. Correct.

Abhidhá-rahasya. A gloss on Jayadeva's Abhidhá-vichára, or a commentary on the *Abhidhá* section of the last book of the Tattva-chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. ननु वेदः साचादेव प्रवर्त्तयतु किं द्वारेण भवतु वा द्वारं, अन्यदेव हि किञ्चि द्भविष्यति यदि चेच्छां विना न प्रवृत्तिः, विधिज्ञानानन्तरमिच्छा अनुभूयते । इत्यादि ।

End. यदुक्तं तद्वीजद्वयं स्वयमेवाह हेतुद्वयेत्यादिना ।

Colophon. इति अभिधारहस्यं समाप्तं ॥

विषयः । जयदेवमिश्रकृताभिधाविचारस्य टीका ।

No. 1205. नैषधटीका ।

Substance, country paper, 19½ × 3½ inches. Folia, 38. Lines, 7 on a page. Extent, 1,380 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Gosvámi Bhaṭṭácbárya. Appearance, old. Prose. Incorrect.

Naishadha-ṭíká. A commentary on the well-known poem, the Naishadha. By Vaṅs'ivadana S'armá. The MS. is incomplete.

Beginning. श्रीरामचरणौ नत्वा वंशीवदनशर्म्मणा ।
नैषधीयप्रबन्धेऽस्मिन्नतिसङ्क्षिप्य लिख्यते ॥
अत्र द्वाविंशतिः सर्गाः श्रीहर्षकविना कृताः ।
नलभैम्यभिधाप्राप्तिवद्दुर्गागुणैः प्रियाः ॥
प्रथमे भीमजारूपश्रवणाद् विरही मिषात् ।
गत्वा वनं सरस्तीरे धृत्वा हंसं नलोऽत्यजत् ॥ इत्यादि ।

End. सौरभातिशयमविन्दत लेभे । किन्तु,—इत्यतः खण्डितम् ।

विषयः । श्रीहर्षकृतनैषधचरितस्य व्याख्यानं ।



No. 1206. कुसुमाञ्जलिप्रकाशः ।

Substance, palm leaf, 13½ × 2¼ inches. Folia, 214. Lines, 6 on a page. Extent, 30,816 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágisa. Appearance, very old. Prose. Correct.

Kusumáñjali-prakás'a. A commentary on the *Kusumáñjali* of Udayanácharya. By Vardhamána. MSS. of this work are exceedingly scarce.

Beginning. (प्रथमपत्रं नास्ति) उपकारलब्धं श्रमदुःखिनमुपकर्त्तुं व्याप्रियमाणमित्यर्थः । तथापि भूयसो धूमादिविषयकस्य स्वीयस्य सत्त्वात् किमनेन इत्यत आह ईशस्य पदयुगेति । इत्यादि ।

End. तत्र न्यायकुसुमाञ्जलेर्यत् समर्पणं तेन भवान् प्रीतोऽस्तु ॥
यस्तर्कतन्त्रशतपत्रसहस्ररश्मिर्गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिविषमं कुसुमाञ्जलिं तं प्राकाशयत् कृतिमुदे बुधवर्द्धमानः ॥

Colophon. इति महोपाध्यायश्रीवर्द्धमानविरचितो न्यायकुसुमाञ्जलिप्रकाशः सम्पूर्णः ॥

विषयः । उदयनाचार्य्यकृतकुसुमाञ्जलेर्व्याख्यानं ॥

No. 1207. राजभूषणी ।

Substance, country-made yellow paper, 9½ × 5 inches. Folia, 28. Lines, 13 on a page. Extent, 773 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Verse. Correct.

Rájabhushaṇí. A treatise on civil polity. By Rámánanda Tírtha. Contents: the uses of kings; the importance of government; punishment; the attributes proper for ministers; do. of clerks; do. of priests; do. of Bráhmaṇas; do. of kings; do. of ambassadors; royal robes; rules of warfare, treatise &c.; military expeditions; diurnal duties of kings; rules of government; law of inheritance; witnesses; swearing in court; punishment of perjury; division of time; intercalation; punishment of priests who fail to perform their duties; fees to priests; wages; punishment for venial offences; punishment for mischief; do. for theft; do, for adultery; do. for gambling; do. for boundary disputes; inauguration of kings.

Beginning. राजलक्ष्मी च धर्म्माय राजदण्डाय ते नमः ।
दिक्पालाः साक्षिणः सर्व्वे विजयध्वं सभागृहे ॥
राजा जयतु सद्धर्म्मैर्मन्त्रिणस्तु वसुन्धरा ।
ब्राह्मणाः सत्प्रजागारः कुर्व्वेऽहं राजभूषणीं ॥
ग्रन्थेऽनुक्ते मनुर्ज्ञेयष्टीका कुल्लूकसम्मता ।
अन्ये ग्रन्थाः प्रवक्तव्या मया सन्देहभित्तता ॥ इत्यादि ।

End. गोदावरी भीमरथी तुङ्गभद्रा प्रणी तथा ।
चन्द्रभागा शिवा गौरी अभिषिञ्चन्तु पान्तु वः ॥

Colophon. इति श्रीरामानन्दतीर्थकृता राजभूषणी समाप्ता ॥

विषयः । राजप्रशंसा । राजदण्डप्रभावः । दण्डध्यानवर्णनं । मन्त्रिलक्षणं । लेखकलक्षणं । पुरोहितलक्षणं । ब्राह्मणमहिमा । राजलक्षणं । दूतलक्षणं । राजवासप्रकार-कथनं । युद्धक्रमः । तत्र सन्धिविग्रहादिप्रयोगकथनादिः । युद्धयात्रा । राज-नित्यकृत्यं । राज्यपालनक्रमः । दायभागः । साक्षिलक्षणतद्भेदकथनादिः । शपथक्रमः । मिथ्यासाक्षिदण्डक्रमः । पत्रादिलक्षणं । वृद्धिव्यवहारक्रमः । कलिगादित्यागदण्डकथनं । दक्षिणा । वेतनव्यवस्था । निग्राहकादिदण्डक्रमः । द्रव्यहिंसादण्डः । चौरदण्डप्रकारकथनं । परदारभोगदण्डः । द्यूतशासनं । सीमाशासनं । राजाभिषेकप्रकारकथनञ्च । इति समाप्तिः ।

No. 1208. लिङ्गानुशासनटीका ।

Substance, country paper, 14 × 3 inches. Folia, 14. Lines, 8, on a page. Extent, 679 s'lokas. Character, Bengali. Date, Sk. 1617. Place of deposit, S'ántipura, Rádhikánátha Gos'vámí. Appearance, old, decayed. Prose. Correct.

Lingánus'ásana-ṭíká. A commentary on the Vocabulary of Amara Siñha. By Mukunda S'armá. The author says he has followed the opinion of the learned Vopadeva, but a commentary by Vopadeva on the Amarakosha is not known. Perhaps he means that his commentary is based on the grammatical system of Vopadeva.

Beginning. नत्वा कृष्णपदद्वन्द्वं वोपदेवकवेर्म्मतं ।
ज्ञात्वा टीका विरचिता श्रिया मुकुन्दशर्म्मणा ॥

सलिङ्गशास्त्रैः पाणिनिवररुचिसर्व्ववर्म्मादिप्रणीतैर्वक्ष्यमाणलक्षणसूत्रविषयसङ्गि-
तैरित्यादि ।

End. क्यप्प्रत्ययेऽपि ब्रह्महत्यादेः स्त्रीत्वं ।

Colophon. इति मुकुन्दविरचिता लिङ्गानुशासनवर्गटीका समाप्ता ।
लिङ्गादिसङ्ग्रहस्यापि श्रीमुकुन्देन धीमता ।
विरचिता टिप्पनीयं लिखिताम्बष्ठेन यत्नतः ॥ शकाब्दाः १६१७ ॥

विषयः । अमरसिंहकृतनामलिङ्गानुशासनीय-लिङ्गानुशासनवर्गव्याख्यानं ।

No. 1209. मुग्धबोधटीका ।

Substance, country paper, 14 × 3 inches. Folia, 203. Lines, 8 on a page. Extent, 8,740 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rathatalá, Gopála Bhaṭṭácharya. Appearance, old, decayed. Prose. Correct.

Mugdhabodha-ṭíká. A commentary on the *Mugdhabodha* grammar. By Kás'is'vara or Kás'is'a. Colebrooke mentions a *Mugdhabodha paris'ishṭa* (a supplement to the Mugdhabodha) by the same author. Essays. II. 46. First Ed.

Beginning. ब्रह्मेशाद्यैर्नुतपदयुगं सच्चिदानन्दमीशं
संसाराब्धेस्तरणिमजरं रामचन्द्रं प्रणम्य ।
श्रीकाशीशः परहितमना मुग्धबोधस्य टीकां
चक्रे मोदं वहतु विदुषां श्रीप्रदाप्यस्तु सेयं ॥
आदौ समस्तविघ्ननाशकत्वेन सकलशिष्टाचारप्राप्तमभीष्टदेवं नमस्कुर्व्वन्निति ।

End. पर्व्वभिरित्यादि तु प्रातिशाख्ये प्रसिद्धमिति शं ।

Colophon. इति महोपाध्यायश्रीकाशीश्वरविरचिता मुग्धबोधटिप्पनी समाप्ता ॥

विषयः । वोपदेवकृतमुग्धबोधस्य व्याख्यानं ॥

No. 1210. न्यायदर्शनटीका ।

Substance, country paper, 16½ × 3 inches. Folia, 38. Lines, 6 on a page. Extent, 997 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old, decayed. Prose. Correct.

Nyáya-dars'ana-ṭíká. A commentary on the Nyáya Sútras of Gotama. Author's name not ascertained. As far as I can see, it is neither the Bháshya of Vátsyáyana nor the Vritti of Vís'vanátha.

Beginning. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।
अत्र प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनं च दृष्टान्तौ च सिद्धान्ताश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डाश्च हेत्वाभासाश्च छलानि च जातयश्च निग्रहस्थानानि च तेषामिति द्वन्द्वसमासार्थकथनवाक्यं, निर्द्देशे यथावचनं विग्रह इति वदता भाष्यकारेण न्यवेदि, इत्यादि।

End. यत्किञ्चिद्वितण्डाव्यक्तिमादाय तद्वृत्तिकथाविभाजकोपाधिमत्त्वं वितण्डात्वमित्यपि वदन्ति॥ खण्डितं।

विषयः। गोतमसूत्रव्याख्यानं।

No. 1211. नञ्वादः।

Substance, country paper, 17 × 3 inches. Folia, 3. Lines, 5 on a page. Extent, 83 s'lokas. Character, Bengali. Date, ? Place of deposit S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Prose. Correct.

Nañ-váda, alias *Nañ-artha-váda* or *Nañ-váda dídhiti.* A commentary on the Chapter on Negation in the S'abda Khaṇḍa of Gañges'a. By Raghunátha S'iromaṇi. Vide *ante.*, Vol. III. p. 128.

Beginning. संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थः, तत्र अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यमित्यादि।

End. तेन न पचति न राज्ञ इत्यादौ क्रियादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयते—इत्याहुरिति दिक्।

Colophon. इति तार्किकशिरोमणिविरचितो नञ्वादः सम्पूर्णः॥

विषयः। नञर्थनिरूपणं।

No. 1212. सर्व्वानुक्रमणिका ।

Substance, country paper, 8 × 4 inches. Folia, 253. Lines, 7 on a page. Extent, 7,612 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Generally correct.

Sarvánukramaṇiká. A complete index to the S'ákala S'ákhá of the Rig Veda Sañhitá. By Kátyáyana. See Max Müller's Ancient Sanskrit Literature, 2nd Ed. p. 215.

Beginning. अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीक ऋर सङ्ख्या ऋत्य इति दीर्घाभावपक्षे गुणाभावः ।

End. आग्नेयं सूक्तं काकुभप्रगाथं च । काकुभप्रगाथेन ॥ खण्डितं ॥

विषयः । ऋग्वेदाम्नाये शाकलकसूक्तानां ऋषिदैवतच्छन्दसां निरूपणं ॥

No. 1213. शुकसप्ततिका ।

Substance, country paper, 13¼ × 8¼ inches. Folia, 61. Lines, 27—28 on a page. Extent, 1440 s'lokas. Character, Nágara. Date, ? Place of deposit, Government of India. Appearance, old. Prose and verse. Generally correct.

S'uka-saptatiká. Seventy tales by a parrot. There are several works current under this name. According to the text under notice;—in the city of Chandrapura, during the reign of Vikramasena, there lived one Haridatta whose wife S'ringára-sundarí bore him a son Madana-vinoda, who was married to Prabhávatí. Madana-vinoda heeded not the words of his father, and turned out a debauchee. This gave great pain to his parents. At last a friend of Haridatta, a Bráhman, Trivikrama by name, presented him with a wise parrot with its spouse a *S'ariká.* These were made over by Haridatta to his son, who hung them up in his bed-room, and profiting by the seventy moral tales which the parrot recited, gave up his evil ways, became obedient to his father and passed the rest of his life happily with Prabhávatí. A MS. noticed by Wilson (Works, I. p. 157. II. p. 108.) is of this character. Taylor, in Vol. II. p. 453, of his Catalogue Raisonèe, gives the following description of a codex he had seen: " Seventy tales

of a parrot (supposed to be a translation). *Dinácápanica* daily tales. *Suca* a parrot told the same to a king named *Vanni Bhvpati.* Some refer to the *Rámáyanam* and other great works, for incidents. It is not known whether this, or the Persian work, is original." Another codex, which like the former, is said to consist of *slocas*, is thus described :—(p. 455.) "Dinálápanica 1—70 daily tales. Told by a *rishi* in the form of a parrot, to *Váni Bhupati*, a chief, to amuse him." A third codex, (Telugu translation) incomplete, containing up to a part of the fourteenth tale, is thus described :—(p. 642.) "*Vicramárca* for some cause assumed the form of a bird. It went to a town named *éca dwipa chacram*, and was kept in the house of *Retnacara*, a merchant. There lived in that town the king and his son named *Nandirája.* The merchant had occasion to go to sea in a ship. After *Nandirája* became King, in a public procession he saw the merchant's wife, and she saw him. Both became enamoured. She was preparing at night to go to the king; when the bird interposed, with a tale—occupying her attention till morning—and the like for successive nights—as far as 13 here."

A Canarese imitation (the copy contains only 30 tales) is noticed at p. 817, and two other copies of the same are noticed at pp. 828-829. The Persian *Túti-námeh* and its Hindi version *Totá-kahání* are well known; they were evidently formed on the mode of one of the latter Sanskrit originals.

Beginning. प्रणम्य शारदां देवीं दिव्यविज्ञानशालिनीं ।
वच्मि चेतो विनोदार्थमुदारं कीरसंमतः ।
अस्ति चन्द्रपुरं नाम नगरं तत्र विक्रमसेनो नाम राजा बभूव। तस्मिन्नगरे हरिदत्तनामा बभूव ॥

End. तस्मिन् महोत्सवे दिव्यमाला पतिता । तद्दर्शने शुकसारिका चिविक्रमानां शापमोहोत्सर्यमनं (?) बभूव । मदनोपि प्रियया प्रभावत्या सह सुखानि भुङ्क्ते ॥

Colophon. इति श्रीशुकसप्ततिका समाप्ता ॥

विषयः । अस्ति चन्द्रपुरं नाम नगरं । तत्र विक्रमसेनो राजा बभूव । तत्र नगरे हरिदत्तनामा एको बभूव । तस्य भार्य्या शृङ्गारसुन्दरी, तत्पुत्रो मदनविनोदनामा बभूव । तस्य पत्नी प्रभावती । मदनविनोदस्तु अतीवविषयासक्तः पितुः कुपुत्रः उपदेशं न शृणोति । तस्य द्यूतमृगयावेश्यामद्यादिषु अतीव आसक्तिः । तं पुत्रं दृष्ट्वा तत्पिता हरिदत्तः सपत्नीकः अतिशयदुःखितोऽभवत् । तं दुःखितं दृष्ट्वा तस्य

सखा त्रिविक्रमनामा द्विजः निजगृहात् नीतिदक्षं सारिकापत्नीसहितं शुकं नीत्वा तस्मै ददौ। स तं निजपुत्राय मदनविनोदाय दत्तवान्। स तं सपत्नीकं शुकं नीत्वा शयनगृहे संस्थापितवान्। ततः क्रमेण मदनविनोदः शुकस्य सप्रतिसङ्कुकाभिरुपदेशरूपाभिर्वाग्भिर्नीतिं प्राप्य पित्रनुगतो भूत्वा पत्न्या प्रभावत्या सह सुखेन निजगृहे प्रतिवसतिस्म॥ इति सङ्क्षेपः॥

No. 1214. स्वात्मानन्दप्रकाशिका।

Substance, country paper, 8¼ × 5 inches. Folia, 15. Lines, 9 on a page. Extent, 228 s'lokas. Character, Nágara. Date, Sk. 1743. Place of deposit, Benares. Vámana A'chárya. Appearance, old. Verse. Correct.

Svátmánanda-prakás'iká. A treatise on self-knowledge from the Vedántic point of view. By S'añkaráchárya.

Beginning. श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वं।
शान्तिग्रहोपशान्तिं पांशुमयं यस्य भसितमातनुते॥

End. अज्ञानान्धनिहन्ता विरचितविज्ञानपङ्कजोल्लासः।
मानसगगनतले मे भासयति श्रीनिवासगुरुभानुः॥

Colophon. इति श्रीमत्शङ्कराचार्य्यविरचिता स्वात्मानन्दप्रकाशिका समाप्ता।

विषयः। अत्र अन्नप्राणमनोमयविज्ञानानन्दरूपपञ्चविधकोशविवेकादात्मतत्त्वविवेचनं।

No. 1215. मानसोल्लासः।

Substance, country paper, 9½ × 3½ inches. Folia, 31. Lines, 12 on a page. Extent, 914 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Paṇḍit Vámana A'chárya. Appearance, old. Verse. Correct.

Mánasollása. A treatise on Architecture and allied subjects. The latter part is taken up with a description of royal pleasures. In two chapters. By the Chalukya King Somesvara. The subjects are treated of in this order: The proper instant to commence the building of a dwelling. The sixteen sorts of buildings. Palaces. Worship of the presiding genius of the house. Entree into a new building. Paint and picture in a house. *Vajralepa*, hard cement. Pencils (?). Enjoyment of *pán* or dressed betel-leaf. Of unguents.

Of clothes. Of garlands. Of ornaments. Of seats. Of children. Of food. Of drinks. Of collyrium. Of vehicles. Of umbrellas. Of beds. Of incense. Of women. This work is not to be confounded with that of the same name in Taylor's Catalogue Raisonèe. Vol. I. p. 1, and its commentary, *Mánasollása-vrittánta-prakás'a* in Weber's Berlin Catalogue, p. 179.

Beginning. अथ मन्दिरारम्भमुहूर्त्तनिर्णयो लिख्यते ।——
उपभोगाः प्रवक्ष्यन्ते विस्तरेण महात्मना ।
नाम्ना ये पूर्व्वमुद्दिष्टा विंशतिस्तु यथाक्रमं ॥

End. राज्ञः सप्ताङ्गपूर्णस्य निःशेषीकृतवैरिणः ।
विंशतिं प्राह भोगानां श्रीमत्सोमेश्वरो नृपः ॥
कन्दर्पोत्सवहेतुरद्भुतरसप्रोल्लासलीलास्पृश-
द्विद्वन्मानसरञ्जनीजननतया सत्कीर्त्तिता प्रत्यहं ।
साश्चर्य्यामुपभोगविंशतिमिमां सोमेश्वरो भूपति-
र्वाग्देवीकुलनन्दनः कथितवान् प्रत्यर्थिभूतान्तकः ॥

Colophon. इति श्रीमहाराजाधिराजसत्याश्रयकुलतिलकचालुक्याभरणश्रीमद्भूलोकमल्लश्री-सोमेश्वरविरचिते मानसोल्लासे राजोपभोगकथनं द्वितीयोऽध्यायः ।

विषयः । अत्र प्रथमं मन्दिरारम्भमुहूर्त्तकथनं, षोड़शप्रकारगृहलक्षणं, राजगृहलक्षणं, वास्तुदेवपूजाविधिः, गृहप्रवेशकथनं, गृहवर्णनं, गृहचित्रवर्णलक्षणं, वज्रलेप-लक्षणं, लेखनीलक्षणं, ताम्बूलभोगकथनं, विलेपनोपभोगकथनं, वस्त्रोपभोग-कथनं, माल्यभोगकथनं, भूषाभोगकथनं, आसनभोगकथनं, पुत्रादिभोगकथनं, अन्नभोगकथनं, पानीयभोगकथनं, अभ्यङ्गभोगकथनं, यानभोगकथनं, छत्रभोग-कथनं, शय्याभोगकथनं, धूपभोगकथनं, स्त्रीभोगकथनं ।

No. 1216. स्वधर्म्माध्वबोधः ।

Substance, country paper, 14 × 6 inches. Folia, 47. Lines, 18—20 on a page. Extent, 4,761 s'lokas. Character, Bengali. Date, Sk. 1717. Place of deposit, S'ántipura, Rádhikánátha Gos'vamí. Appearance, old. Prose and verse. Generally correct.

Svadharmádhvabódha. An elaborate exposition of the Vaishṇava doctrines. By Nimbárka or Nimbáditya, the disciple of Nárada. His

followers are called Sanakadi Sampradáyís or Nimáwats, and they have been noticed in Wilson's Essay on the Religious Sects of the Hindus (Asiatic Researches, XVI. 108-8). He mentions previous preceptors named *Krishna, Hamsa* and *Aniruddha.* The four *Sampradáyas* named after *S'rí*, *Brahmá*, *Rudra* and *Sanaka* are also mentioned. The mention of the first three would make him posterior to Rámánuja, who lived about the middle of the twelfth century, to Mádhváchárya who lived in the beginning of the fourteenth century and to Vallábháchárya who lived in the beginning of the sixteenth century. Dr. Hall (Contributions, pref. XXVI.) classes Nimbárka among "the more recent Indian schismatics." It might be probable that the work under notice has been manipulated towards the introduction and the prelude by devout disciples, for in the former he is described as an *avatára*, and the latter contains a salutation to himself. This MS. was written in the mouth of Chaitra, Sk. 1717 by Rámachandra Chaṭṭopádhyáya for his own use.

Beginning. आश्रित्य कृष्णाङ्घ्रिसरोजमात्मनो धर्म्माध्वबोधं विदधे नियोजितः ।
दुर्व्वादसन्दिग्धजनभ्रमापहं सत्सम्प्रदायादिविविक्तये ध्रुवं ॥
येनानिरुद्धादिभिरादि नात्मनोऽनुक्रम्य रूपैस्तनुपञ्चपञ्चकं ।
प्रद्युम्नमुख्यैरिव तत्त्वसंहतेः षड्विंशकं कृष्णमये प्रवर्त्तितं ॥
यैः कृष्णशिष्यैरनुशिक्षितेन तु सन्दिष्टमादाय हि पञ्चपञ्चकं ।
पर्य्येमि तांस्तञ्च गुरून् सशिष्यकान् वन्दे कुमारान् स्वगुरुञ्च नारदं ॥ इत्यादि ।

End. दैन्यादिरतिपर्य्यन्तामुपदिश्यत्यनुक्रमात् ।
अन्तर्व्वहिःसु साक्षाद्वै भक्तिं गुरुस्वरूपतः ।
भक्त्याप्यते स्वयं कृष्ण इति राद्धान्ततः क्रमः ॥
नमः कृष्णाय हंसाय निम्बार्कायानिरुद्धतः ।
आचार्य्याय चतुर्व्यूहपरम्पराप्रवर्त्तिने ॥

Colophon. इति स्वधर्म्माध्वबोधे श्रीभगवन्निम्बादित्यविनिर्म्मिते मूलग्रन्थनिबन्धे श्रीकृष्णाप्ति-प्रवृत्तिनिर्द्देशो नाम पञ्चमोऽभ्यासः ।
शाके वाणार्कसप्तक्षितिपरिगणिते मासि चैत्रे प्रणम्य
श्रीकृष्णं रामचन्द्रो द्विजवरतनयस्तट्टवंशप्रसूतः ।
व्यालेखीदात्मबोधाय हि परभगवन्निम्बसूर्य्यप्रणीतं
ग्रन्थं धर्म्माध्वबोधं हरिपदयुगलप्राप्तिहेतुं सुरम्यं ॥ शक १७१७ ॥

विषयः । सनकसम्प्रदायमतोपपादनं । शास्त्रारम्भप्रयोजनादिकथनं । अनिरुद्धतत्त्वं । निम्बार्कस्य सुदर्शनावतारतत्त्वं । ग्रन्थनामनिरुक्तिः । प्रवृत्तिपञ्चकोद्देशः । संस्कारपञ्चकं । कालपञ्चकं । व्रतपञ्चकं । रसपञ्चकं । पर्य्यायेण प्रवृत्तिपञ्चकादिविधानं । शास्त्राधिगम-प्रणालीकथनञ्च । इति प्रवृत्तिपर्य्यायो नाम प्रथमोऽध्यासः॥

कृष्णशब्दवाच्यवाचकनिर्णयः । मन्त्रलक्षणं । ऐतिह्यलक्षणं । कृष्णनामनिरुक्तिः । तन्मन्त्रकथनादि । राधाकृष्णयोरभेदकथनं । राधां विहाय श्रीकृष्णपूजने दोषः । तारस्य पञ्चावयवकथनं । नादः । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपप्रणवाङ्गचतुर्थकनिरूपणं । गोपीजनवल्लभेत्यादीनां निरुक्तिः । सगुणनिर्गुणभेदेन भगवतस्वरूपद्वैविध्यं । तत्स्वरूपकथनं । चतुर्व्यूहनिरूपणं । निर्गुणत्रिगुणभेदेन सम्प्रदायस्य चातुर्व्विध्यं । गुणभेदेन ब्रह्मरुद्रप्रभृतीनां भगवदुपासना । चतुःसनविवरणकथनप्रसङ्गेन सम्प्रदायप्रवृत्तिवर्णनं । सम्प्रदायप्रवर्त्तकनिर्द्देशः । चैतसम्प्रदायः । बैाढीनसम्प्रदायः । ब्रह्मचारिसम्प्रदायः । ब्रह्मचर्य्यलक्षणं । गार्हस्थ्यसम्प्रदायः । वनस्थसम्प्रदायः । वैखानस-वालखिल्योदुम्बरफेणपानां लक्षणं । कुटीचर-बहूदक-हंस-निष्क्रियाणां लक्षणं । नैयासकसम्प्रदायः । आर्त्तरुद्रसम्प्रदायः । जैज्ञासवब्रह्मसम्प्रदायः । अर्थार्थिलक्ष्मीसम्प्रदायः । ज्ञानिचतुःसनसम्प्रदायः । वस्तुतः श्रीब्रह्मरुद्रसनकभेदेन सम्प्रदायस्य चतुर्व्विधत्वमिति कथनं । चतुर्व्विधसम्प्रदायस्य प्रकारभेदेन सप्तविधत्वकीर्त्तनं । शिष्यपरम्पराकथनं । कलिकालवर्णना । वहिरन्तर्भेदात् भगवतो हितोपदेष्टृत्वं द्विधेति कथनं । मनश्चित्तबुद्ध्यहङ्काराणामधिष्ठातृत्वेन चन्द्रलेवज्ञब्रह्मरुद्रान् निर्द्दिश्य तेषु अनिरुद्धादिचतुर्व्यूहसंस्थापनं । सम्प्रदायविहीनमन्त्रस्य निष्फलत्वं । सच्चिदानन्दरूपायेत्यादितो मन्त्रोद्धारः । निर्विशेषनिर्गुणब्रह्मणः कृष्णाभिन्नत्वं । सच्चिदानन्देत्यादिश्लोकार्थः । गुरुः । वासुदेवप्रद्युम्नसङ्कर्षणानिरुद्धानां क्रमेण सत्त्वादित्रिगुणनिर्गुणसम्प्रदायाचार्य्यत्वं । क्लीमितिमन्त्रप्रणवयोरैक्यं । निम्बार्कसम्प्रदायस्य निर्गुणत्वात् प्राधान्यकथनं । एकस्यैव निर्गुणसम्प्रदायस्य उपाधिभेदेन चातुर्व्विध्यं । सात्त्वतभक्ताः । औदयिकीनामेव तिथीनां ग्राह्यता । चक्रादिधारणावश्यकता । सत्यादियुगाचार्य्यव्यूहकथनं । आचार्य्यमाहात्म्यं । प्रेमभक्तिरेवापवर्गः । कामवीजकथनं । मन्त्रजपप्रकारः । अत्र ध्यानं । मन्त्रराजपरिज्ञानमाहात्म्यं । द्वैताद्वैतस्वरूपकथनादिः । जागरणस्वप्नसुषुप्तीनां त्रिगुणात्मकत्वं । परमात्मतत्त्वं । जीवात्मतत्त्वं बन्धमोक्षयोरनादिता । मायातत्त्वं । अत्र लौकिकमतं । वैदिकमतं । यौक्तिक मतं । तात्त्विकमतञ्च । अनिरुद्धतत्त्वं । रङ्गदेवीवृत्तान्तः । निम्बादित्यनाम-

निरुक्तिः। रङ्गदेवीध्यानं। द्राविड़देशीयनिम्बग्रामकथनं। हरिः श्रीनिवासादिरूपेण कलौ कृष्णकीर्त्तनरूपं भक्तियोगमुपदिशतीति कथनं। न्यासद्वयकथनं। गुणातीतलक्षणं। सखीभावः। भगवत्तनुः। अष्टादशदैहिकदोषकथनं। नैर्गुण्यत्रैगुण्यभेदेन चतुर्व्विधगतिकथनं। ब्रह्मणः सविशेषनिर्व्विशेषोभयरूपत्वकीर्त्तनं। सविशेषभगद्रूपानङ्गीकारे दोषः। बद्धमुक्तभेदात् जीवद्वैविध्यं। जीवेश्वरयोर्भेदः। तयोरभेदकथनञ्च। केवलभेदवादिनां केवलाभेदवादिनाञ्च निम्बार्कमतैकदेशित्वं। जीवः कृष्णांशः। मुक्तिस्वरूपं। भगवच्छक्तिः। जीवेश्वरयोश्चिद्रूपत्वं। जगतः सत्यासत्यत्वं। भक्तिः। प्रत्यक्षादिप्रमाणचतुष्टयं। द्वैताद्वैतयोः साध्यसाधनतया द्वैतमेव मुख्यमिति कथनं। संवेद्यासंवेद्यभेदेन अद्वैतस्य द्विविधत्वं। पुनश्च भावाद्वैतं। क्रियाद्वैतं। द्रव्याद्वैतं। द्वैतस्य त्रैविध्यं,——ओघद्वैतं। गुणद्वैतं। विग्रहद्वैतञ्च। मुक्तिकाले अविद्यैव विद्या भवतीति निरूपणं। सारूप्यमुक्तिः। सायुज्यमुक्तिः। ज्ञानभक्त्योस्तारतम्यं। भक्तेः श्रेष्ठत्वं। मुक्तौ भक्तानां स्पृहा नेति कथनं। द्विविधसालोक्यकथनं। भक्तिं विना मुक्तिर्नेति कीर्त्तनं। विष्णुसेवैव मोक्षः। ज्ञानभक्त्योः समफलं। भक्तानुग्रहार्थं ईश्वरस्याकारग्रहणं। तस्य दुस्तर्क्यमहिमा। अद्वैतविवक्षया जीवस्यैकत्वव्यवस्थापनं। द्वैतविवक्षया पुनर्जीवानन्त्यं। कृष्णो जीवो मायेति तत्त्वत्रयं। श्रुतीनां परोक्षापरोक्षार्थता। परोक्षार्थप्रशंसा। वर्णाश्रमधर्म्मादिः। ब्राह्मणः। वैष्णवः। क्षत्रियः। वैश्यः। शूद्रः। सावित्रप्राजापत्यादिभेदेन चतुर्व्विधब्रह्मचर्य्यकथनादिः। गृहाश्रमचातुर्व्विध्यं। वनाश्रमचातुर्व्विध्यं। न्यासाश्रमचातुर्व्विध्यञ्च। भिक्षुधर्म्मकथनादिः। साधारण्येन वर्णाश्रमधर्म्माः। प्रतिलोमजातिलक्षणं। अनुलोमजातिः। अत्र सर्पयुधिष्ठिरसंवादकथनं। विष्णुभक्तस्य श्वपचस्यापि द्विजाद्यपेक्षया श्रेष्ठत्वं। विष्णुभक्तिहीनानां ब्राह्मणादीनां शूद्रत्वकथनं। वैष्णवे न जातिविचारः। महावैष्णवलक्षणं। दण्डपरित्यागोपदेशः। ब्रह्मसूत्रधारणावश्यकता। भगवद्भक्तस्य वर्णाश्रमाचाराभिमानपरित्यागकथनं। शरणापत्तिः। परमहंसधर्म्मः। तेषां कर्म्मत्यागे न दोषः। भक्त्यैव पुरुषार्थसिद्धिः। जन्मोत्तमादिश्च। श्रुतेर्दुर्ज्ञेयत्वं। वैष्णवो न पापैर्लिप्यते इति कथनं। तस्य न पुनः कर्म्मबन्धनं, यमादभीतिश्च। अवैष्णवाद्दीक्षाग्रहणनिषेधः। प्रमादादिना ततो दीक्षाग्रहणे पुनर्दीक्षावश्यकताकथनं। श्रीकृष्णवाक्यानुसारेण सम्प्रदायमतं संस्थापितमिति कीर्त्तनं! निम्बार्कसम्प्रदायप्रणालीकथनञ्च। इति परम्पराप्रवृत्तिनिर्द्देशो नाम द्वितीयोऽध्यायः॥

श्रीकृष्णलीलावतारादिकथनं। कलौ कृष्णकीर्त्तनमेव श्रेयः। इति लीलाप्रवृत्तिनिर्द्देशो नाम तृतीयोऽध्यायः॥

तुलसीमम्भवकथनं । तन्मालाधारणकर्त्तव्यता । भक्तिरेव तुलसीरूपधारिणीति कथनं । एकैव निर्गुणा भक्तिर्जीवप्रकृतिगुणभेदेन नानैव भातीति कथनं । कृष्ण एव भक्तिदातेति कथनञ्च । इति प्रवृत्तिनिर्देशो नाम चतुर्थोऽध्यासः ॥

श्रीकृष्णकृपाप्रवृत्त्युपायकथनं । सन्तोषमिश्रितं दैन्यमेव तन्निदानमिति निर्देशः । तत्कृपाफलानि । कृष्णरतिकामेन गुरूपसदनं कर्त्तव्यमिति कीर्त्तनं सद्गुरुलक्षणं । भक्तिरेव कृष्णाप्तिकारणमिति कथनञ्च । इति कृष्णाप्तिप्रवृत्तिनिर्देशो नाम पञ्चमोऽध्यासः ॥

P. S.—The North West Provinces' Catalogue, Vedánta, 21, makes Nimbárka author of *Mádhva-mukha-marddana*, an adverse criticism of Mádhva's doctrines.

No. 1217. माण्डूक्योपनिषद्भाष्यम् ।

Substance, country paper, $9\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 7. Lines, 9 on a page. Extent, 241 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Vámana A'chárya. Appearance, old. Prose and verse. Generally correct.

Mánḍukyópanishad-bháshya. An explanation of the Mánḍukya Upanishad from a Vaishṇava standpoint. By A'nanda Tírtha.

Beginning. पूर्णानन्दज्ञानशक्तिस्वरूपं नित्यमव्ययं ।
चतुर्द्धा सर्व्वभोक्तारं वन्दे विष्णुं परं पदं ॥

End. एकोऽपि निर्व्विशेषोऽपि चतुर्द्धा व्यवहारभाक् ।
यस्तं वन्दे चिदानन्दं विष्णुं विष्वादिरूपिणम् ॥

Colophon. इति मदानन्दतीर्थभगवत्पादाचार्य्यविरचितं माण्डूक्योपनिषद्भाष्यं समाप्तम् ॥

विषयः । मण्डूकरूपिवरुणकृतविष्णुमहिमस्तुतिः । माण्डूक्योपनिषदाभासरूपं ।

No. 1218. तलवकारोपनिषद्भाष्यम् ।

Substance, country paper, $8\frac{1}{2} \times 3$ inches. Folia 4. Lines, 8—7 on a page. Extent, 56 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Vámana A'chárya. Appearance, old. Verse. Generally correct.

Talavakáropanishad-bháshya. An interpretation of the Talavakára Upanishad from a Vaishṇava standpoint. By Ánanda Tírtha.

Beginning. अनन्तगुणपूर्णत्वादगम्यो यः सुरैरपि ।
सर्व्वैष्टदाचे देवानां नमो नारायणाय ते ॥

End. सच्चिदानन्दः सच्छक्तिः सम्पूर्णो भगवान् परः ।
नमोऽस्तु विष्णवे तस्मै प्रेष्ठाय प्रेयसाञ्च मे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितं श्रीतलवकारोपनिद्भाष्यं समाप्तम् ।

विषयः । तलवकारोपनिषद्भाष्यरूपं ।

No. 1219. अनुवाकानुक्रमणिका ।

Substance, country paper, 7¾ × 4 inches. Folia, 5. Lines, 10 on a page. Extent, 78 s'lokas. Character, Nágara. Date, 18— ? Place of deposit, Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Generally correct.

Anuvákánukramaṇiká. An Index to the Anuvákas of the Rig Veda Sañhitá. By Saunaka. Max Müller's A. S. Literature, p. 217. The MS. is dated in the eighteenth century of the Samvat era. The last two numerals cannot be decyphered.

Beginning. पितृदेवर्षिसाध्येभ्यो आत्मणेभ्यश्च सर्व्वशः ।
आचार्य्येभ्यो गुरुभ्यश्च प्रणम्य प्रयतः शुचिः ॥
मधुच्छन्दः प्रभृतिभिर्ऋषिभिर्हि तपोबलात् ।
दृष्टानामनुवाकानामृजु वक्ष्याम्यतन्द्रितः ॥ इत्यादि ।

End. चत्वारि शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि ॥ ४० ॥

Colophon. इत्यनुवाकानुक्रमणिका समाप्ता ॥ संवत् १७ + + वर्षे ।

विषयः । ऋग्वेदशाकलशाखीयशैशवीयसंहितोक्तसूक्तानां सङ्ख्यादिनिरूपणम् ।

No. 1220. आपस्तम्बसूत्रभाष्यम् ।

Substance, country paper, 9½ × 4 inches. Folia, 69. Lines 6—9 on a page. Extent, 740 s'lokas. Character, Nágara. Date, Sk. 1634. Place of deposit, Benares, Bábu Haris'chandra. Appearance, old. Prose. Incorrect.

Apastamba-sutra-bháshya alias *Kapardi-bháshya.* A commentary on the Sútras of Ápastamba. By Kapardi-svámí. The MS. is incomplete, and comprises only the Paribháshá chapter. Bühler's Gujerat Catalogue, I. D. 92. A Kapardi-Káríká and a Kapardi-bháshya appear in Dr. Kielhorn's Catalogue under the class Dharma.

Beginning. आदिपत्रं खण्डितं ।

End. यथा दक्षिणाग्नेर्दर्शपूर्णमासार्थे होमे शाश्वते ॥

Colophon. इति कपर्दिस्वामिनो भाष्ये परिभाषापटलं समाप्तम् । शकाब्दाः १६२४ ।

विषयः । आपस्तम्बसूत्रव्याख्यानं ।

No. 1221. प्राकृतसप्तशती, सटीका ।

Substance, country paper, 11 × 3¾ inches. Folia, 18. Lines, 15 on a page. Extent, 798 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Correct.

Prákṛita-Saptas'atí, saṭíká. Seven hundred s'lokas in the Prákrita language on amatory subjects. By S'áliváhana (?). With a Sanskrit commentary styled *Saptas'atakabhávales'a-prakás'iká* by Gaṅgádhara Bhaṭṭa.

Beginning. मू०। पसुवइणो रोसारुण-पडिमा-संकंत-गोरि-मुहअंदं ।
गहि अग्घपंकअं विअ संञ्झासलिलं जलिं णमह ॥
टीका । नत्वा ढुण्ढिपदाब्जं गङ्गाधरभट्टनिर्म्मिता टीका ।
सप्तशतकभावलेशप्रकाशिका शोध्यतां विज्ञैः ॥

End. शेषे खण्डिता ।

विषयः । प्राकृतभाषया शृङ्गाररसवर्णनम् ।

No. 1222. राजवाहकौस्तुभः ।

Substance, country paper, 11½ × 5 inches. Folia, 8. Lines, 12 on a page. Extent, 282 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Correct.

Rájaváha-kaustubha. A treatise on civil polity, compiled under the patronage and orders of King Rájaváha. The author's name is

wanting, the copy being incomplete and imperfect. A *Rája-kaustubha* is noticed in Bühler, III. E. 281, where too the author's name is not given. A Telugu *Rájaváhana-Vijayam* by Ádityasurya Kavi is described in Taylor's Catalogue, II. p. 703.

Beginning. दृष्ट्वा पूरितमात्ममूर्द्धिकलशं धृत्वा व्रजन्तीं व्रजे,
काचिद् गोपकुमारिकां क्व नु गतिर्मुक्तेति + + + + ।
दृष्ट्वा श्रीमुरलीधरः स्मितमुत भ्रूयुग्मभङ्ग्या यया,
तस्यै सूचितवान् + + + समुचितां पायात् तया मे मतिं ॥ ———
राजवाहनृपतेरनुज्ञया + + + ——— ।
श्रीराजवाहस्य तु कौस्तुभेऽस्मिन्——इत्यादिः ॥

End. ग्रंथे खण्डिता ।

विषयः । राज्याभिषेकविधानम् । तत्र राज्याधिकारिनिर्णयः । राज्याभिषेककालनिरूपणम् । अभिषेकात् पूर्वं कर्त्तव्यम् । अद्भुतशान्तिः । राजलक्षणं । पट्टमहिषीलक्षणम् । मन्त्रिलक्षणम् । पुरोहितलक्षणम् । ज्योतिर्विल्लक्षणम् ।

No. 1223. वृषभानुजा नाटिका ।

Substance, country-made yellow paper, 12 × 5½ inches. Folia, 26 Lines, 9 on a page. Extent, 658 s'lokas. Character, Nágara. Date, Sm. 1910. Place of deposit, Benares, Bábu Haris'chandra. Appearance, new. Prose and verse. Very incorrect.

Vṛishabhánujá-nāṭiká. A play in four Acts, on the loves of Rádhá and Kṛishṇa. By Mathurádása, a Káyastha by caste, and an inhabitant of the city of Suvarṇas'ekhara in the Madhyades'a. Rádhá is called Vṛishabhánujá from the name of her father Vrishabhánu. (Padma and Brahma Vaivartta Puránas, in Wilson's Works. I. 70. 109) This work is new to Wilson's list of Hindu Plays.

Beginning. कपोले पत्राली पुलकिनि विधातुं व्यवसितः
स्वयं श्रीराधायाः करकलितवर्त्तिर्मधुरिपुः ।
अभूद् वक्रेन्दौ यन्निहतनयनः कम्पितभुज-
स्तदेतत् सामर्थ्यं तदभिनवरूपस्य जयति ॥
सूत्रधारोक्तिः ।———अस्मत्प्रियसुहृदा अतिप्रबलया भगवद्भक्त्या कायस्थकुलावतंसेन जह्नुकन्या-कालिन्दीतीरावलग्नमध्यदेशशिरःशेखरीभूते सुवर्ण-

शेखरनाम्नि नगरे समवाप्तपरार्द्धजन्मना श्रीमथुरादासेन विरचिता विदग्ध-जनहृदयकुमुदानन्दैककौमुदी वृषभानुजा नाम अपूर्व्वनाटिका——

End. चम्पकलता । कृष्णं प्रति संस्कृतेन । नागर ! यदि प्रसन्नो भवान्, तर्हि किमतः परमस्ति । तथाप्येतदस्तु——

सदा गच्छत्वेवं रतिरिव मनोजेन सुमुखी
सखी नः संयोगप्रकृतिरमणीयेन भवता ।
भवत्वस्माकञ्चाव्यवहिततया लोचनसुखं
विलोक्यान्योन्यस्य व्यतिकरमतिश्लाघ्यमनघं ॥ इति निष्क्रान्ताः सर्व्वे ।

Colophon. इति श्रीमथुरादासेन विरचितायां श्रीवृषभानुजा-नाम-नाटिकायां चतुर्थोऽङ्कः। इति वृषभानुजा नाम नाटिका समाप्ता । संवत् १९१० ॥

विषयः । तत्र १ अङ्के।—वनरचिकासमीपे वृन्दायाः राधाकृष्णयोः परस्परसंयोगोपाय-कथनम् । प्रियालापेन सह श्रीकृष्णस्य वनप्रवेशः । तत्रैव राधासमीपे चम्पक-लतायाः स्वीयस्वप्नवृत्तान्तकथनम्। श्रीकृष्णस्य राधासन्दर्शनञ्च । २ अ० ।—मदनार्चनसमये राधासमीपे श्रीकृष्णस्य हठादुपस्थितिः। परस्परं प्रणयानुकूलं सन्दर्शनञ्च । ३ अ०।—राधाकृष्णयोः पूर्व्वरागवर्णनं । ४ अ०।—मिलितयो राधाकृष्णयोर्विलासवर्णनम् ।

No. 1224. शाण्डिल्यशतसूत्रं, भाष्यसहितं ।

Substance, country paper, $12\frac{3}{4} \times 5$ inches. Folia, 38. Lines, 9 on a page. Extent, 812 s'lokas. Character, Nágara. Date, ? Place of deposit, Benares, Bábu Haris'chandra. Appearance, new. Prose and verse. Generally correct.

S'andilyas'ata-sútra, Bháshya sahita. The Bhakti S'útras of S'ándilya, with a commentary by Svapnes'vara. The work has been edited in the Bibliotheca Indica. Kielhorn's catalogue, XXI. 4-19, notices two other commentaries entitled *Bhakti-chandriká* by Naráyaṇatírtha, and *S'andilya-sutrábhinava-bháshyam* by Bhavadeva Mis'ra. There is nothing to shew that No. 8 of the same Catalogue is a separate treatise.

Beginning. मूलप्रा० । अथातो भक्तिजिज्ञासा ।

भाष्यप्रा० । प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥

End. मूलश्०। ?

भाष्यशे०। अभ्यासोऽध्यायसमाप्तिद्योतकः। इति शब्दः शास्त्रसमाप्तौ।

Colophon. इति श्रीस्वप्नेश्वराचार्य्यविरचिते शाण्डिल्यशतसूत्रीयभाष्ये तृतीयस्य द्वितीयमाह्निकं। समाप्तश्चायमध्यायः। समाप्ता चेयं त्रिलक्षणा भक्तिमीमांसा।

विषयः। शाण्डिल्यसूत्राणां व्याख्यानं शाण्डिल्यसूत्रेषु तु भक्तिपदार्थनिरूपणम्।

No. 1225. उषारागोदया नाटिका।

Substance, country-made yellow paper, 6¾ × 4⅝ inches. Folia, 19. Lines, 9 on a page. Extent, 726 s'lokas. Character, Nágara. Date, Sm. 1914. Place of deposit, Dháká, Pandit Ramesvara Chakravartí. Appearance, new. Prose and verse. Generally correct.

Ushá-rágodayá-Náṭiká. A play in four Acts, on the loves of Ushá and Aniruddha. By Rudra-chandra Deva. The story is to be found in the Vishṇu Puráṇa, Book V. Chapters 32, 33. This work is not included in the list of Hindu Plays which Wilson has appended to the Introduction to his Hindu Theatre (Vol. I. p. lxx.). Of Rudra Deva the author of the Yajáti-Charitra, Wilson makes the following remarks—" He is not likely to be the same as Rudra Bhaṭṭa, the author of the *S'riṅgára Tilaka*, who is amongst the writers mentioned in the *S'árṅgadhara Paddhati.* A prince, named Rudra Deva, is highly praised for his liberality in some of the examples quoted by Áppáya Díkshita, in his *Kuvalayánanda.* Áppáya flourished in the reign of Krishṇa Deva of Vijayanagar, about A. D. 1526, and the prince alluded to may possibly be Pratápa Rudra Deva, sovereign of Telingáná in the beginning of the fourteenth century. We have also a Rudra, the author, real or supposed, of a vocabulary, whose date appears to be about the same, the thirteenth or fourteenth century." (Hindu Theatre, II. 388.). The occurrence of the word *Pratápa* in the adjective-phrase prefixed to the name of the author in this MS. lends colour to Wilson's conjecture that Rudra Deva is the same as Pratápa Rudra Deva, but a Prataparudra Deva of Orissa was a devoted pupil of Chaitanya and greatly attached to the mystic faith of Bhaktí, and it is not at all unlikely that he should be the author of such a work. Kielhorn's C. P. Catalogue VI. 9. N. W. P. Catalogue, Sáhitya. 69 is a commentary on this play by an unknown writer. The treatise under notice is the same as the Uparágodayá Náṭiká noticed before. Ante, Vol. I. p. 64.

Beginning. प्रणयकलहकोपात्पाटलिम्नि प्रजाते
मुखशशिनि परार्द्धे पाण्डुरत्वे च सद्यः ।
प्रकटितनिजदेहद्वन्द्वभीमाविभेदं
वपुरथ शिवयोस्तद्भूतये शश्वदास्तां ॥
नान्द्यन्ते सूत्रधारः । अलमतिप्रसृतेन । नेपथ्याभिमुखमवलोक्य । आर्य्ये इत-स्तावत् । उपसृत्य । नटी । इयम्हि आणवेदु अज्जउत्तो ।

End. इति निष्क्रान्ताः सर्वे । चतुर्थोऽङ्कः समाप्तः ॥

Colophon. इति श्रीकूर्म्मगिरिवरेश्वरश्रीमत्प्रतापचारितारितमो (?) भास्करश्रीमद्रुद्रचन्द्र-देवविरचितोषारागोदया नाम नाटिका परिपूर्णतामगमत् ।

विषयः । नाटिकायामस्यां शृङ्गाररसः प्रधानः । नायकः कुमारश्रीमदनिरुद्धः । नायिका च नवानुरागवती उषानाम्नी वाणकन्या । अन्ये च पात्रा बहवः ।

चतुरङ्किकेयं, तत्र प्रथमाङ्के ।—नटी-सूत्रधारयोः कथोद्घातरूपा प्रस्तावना । उद्धवनामपात्रप्रवेशानन्तरं विष्कम्भकः । कुमारस्य प्रवेशः । वैतालिकयोः प्रवेशः । विदूषकोत्तेजितेन उषानुरागवता कुमारेण रक्ताशोकमण्डपं प्रविश्य उषानुध्यायिता । तत्र——कुमारस्य प्रथमभार्य्यासहचरीरूपलेखायाः प्रवेशः । तया देव्यनुसरणाय कुमारो ज्ञापितः । ततो मणिवेदिकायां यथानिर्द्दिष्टायां देव्याः प्रवेशः । देवीयुवराजयोर्दोलाधिरोहणं । दोलनञ्च । परिवारवनिताभिः स्वस्वकृत्यस्य नाटनं । कुमारेण दोलनावस्थावर्णनं । देव्यागमनप्रार्थना । कुमारेण वर्षावर्णनपूर्वकं तन्निवारणं सर्वेषां निष्क्रमणं ।

द्वितीयाङ्के ।—रूपलेखाविदूषकयोः कौतुकं । उषारागरञ्जितकुमारस्य प्रवेशः । वसन्तोत्सवदर्शनाय विदूषकेन सह कुमारस्य क्रीड़ापर्वतारोहणं । तद्वर्णनञ्च । रूपलेखया विज्ञापितस्य कुमारस्य देवीसन्निधाने गमनं । तत्र सङ्गीतादिश्रवणं । देव्या पटवासकुङ्कुमादिना कुमारस्यार्चनं । परस्परयोश्चन्दनादिभिः सिञ्चनं । सपरिवारदेव्याः निष्क्रामणं । प्रतिहारिणः दारुकेस्य प्रवेशः । तेन च वाणविध्वंसानन्तरं जयलाभोत्साहिनो भगवतः कृष्णस्य लोहितपुरात् स्वपुरप्रत्यागमन-कथनं, युद्धविवरणकथनञ्च ।

३ अङ्के ।—मुनिकुमारयोः प्रवेशः । ताभ्यां उषा वर्णिता पर्वतनामर्षेः प्रवेशः । उषाऽनिरुद्धसम्बन्धघटनाय तेषां कथोपकथनं । नारदमहर्षये तन्निवेदनार्थं निष्क्रामणं । चित्रलेखाहस्तार्पित-करकिशलयायाः उषायाः प्रमोदोद्यानप्रवेशः । तत्र सङ्केतकतरुतले गमनं । चित्रफलकदर्शनं । चित्रफलकस्थकुमारानिरुद्ध-स्याग्रे गाथालेखनं । नलिनीपत्रे शयननाटनं, तत्रोपवेशनञ्च । मूर्च्छानाटनं ।

तत्र कुमारस्यागमनं ज्ञात्वा उषया लुक्कायितं। कुमारेण बहुविलापपूर्वकं उषायाः रूपलावण्यं वर्णितं। ततो लज्जां नाटयित्वा चित्रलेखाकरावलम्बिन्या उषाया उपस्थितिः। ततो विदूषकचित्रलेखयोर्निष्क्रामणं। कुमारस्य सरागाभिनिवेशपूर्वकं नायिकावलोकनं, संस्पर्शप्रार्थनञ्च। मालतिकया सह कञ्चुकिनः प्रवेशः। तेन च गृहीतनारदाज्ञायाः वाणदुहितृपरिणयव्यग्रायाः कुमारस्य पुरगमनादेशकथनं। नारदवचनेन युवराजानुरोधेन च वाणदुहितुः भगिनीत्वेन सम्भावनीयता देव्या स्वीकृता इत्यादिज्ञापनं। कुमारस्य चित्रलेखया सह उषायाः पुरगमनादेशः। सर्वेषां निष्क्रामणं।

४ अङ्के।—कुमारस्य पुरगमनं। परिजनसहितदेव्या ससम्भ्रमनाटनं। नारदस्य प्रवेशः। तेन देवीं प्रति विवाहो प्रस्तावितः। देव्या आदिष्टाभिः रूपलेखादिभिरुषा तत्रानीता। देवी सविनया उषाकरं स्वभर्तृकरे समर्पयति। विदूषकेन दम्पत्योरञ्चलग्रन्थिबन्धनं। देव्याः स्मितनाटनं। सुवर्णकलसार्पणञ्च। सर्वेषां निष्क्रामणं।

चतुरङ्किकेयं नाटिका। नायकः कुमारश्रीमदनिरुद्धः। नायिका च उषानाम्नी वाणकन्या। सा चानिरुद्धेन सह नवानुरागवती। तत्र १। २ अङ्के। वाणावरोधपरिमुक्तस्य उषा-विरह-विधुर-कुमारस्य देव्या सह वसन्तोत्सवादयः। वाणनिधनश्रवणं। ३ अङ्के।—प्रमदोद्याने उषया सह कुमारस्य पुनः सन्दर्शनं। विवाहसूचना। '४ अङ्के।—उषायाः कुमारस्य च पुरगमनं। गृहीतनारदाज्ञया देव्या स्वभर्त्रा उषापाणिग्रहणं सम्पादितञ्च॥

No. 1226. आपस्तम्बसूत्रं।

Substance, country paper, 9 × 4 inches. Folia, 161. Lines, 8-9-10 on a page. Extent, 2,898 s'lokas. Character, Nágara. Date, ? Place of deposit, Government of India. (No. 643.) Appearance, old. Prose. Correct.

A'pastamba Sútra. The rituals of the Rig Veda and canons regarding domestic rites and ceremonies. By A'pastamba. According to a MS. in the possession of a Brahman at Tanjore (the only complete one known to exist, and noticed by Dr. A. C. Burnell in the *Indian Antiquary*, I, p. 5), the work comprises thirty chapters or *Prasnas*, some of which are subdivided into several sections or *paṭalas*. The first three chapters (I to III) treat of the Darsa and the Paurṇamása sacrifices: the next five (IV to VIII) the A'gnádheya and the other Havir-yajñas;

the 9th prescribes the expiations *Práyaschittas ;* the next eight (X to XVII), the Soma sacrifices; the next (XVIII) the Vájapeya and the Rájasuya ; the next (XIX) the Sautrámaṇí, the Káṭhaka-chitti, and the Kámyeshṭi ; the next (XX) the As'vamedha and the Purushamedha ; the next (XXI) the Dvádas'áha and the Mahávrata ; the next (XXII) the Utsarginám-ayana ; the next (XXIII) the S'attráyana ; the next (XXIV) comprises the Paribhusútra, the Pravara-khaṇḍa and the Hautraka ; the next two (XXV, XXVI) contain the canons for Grihya rites ; the next (XXVII) is called the Grihya-tantra ; the next two (XXVIII, XXIX) the Sámayá-cháiika-dharma Sútras on domestic duties, and the last (XXX) the Shulva sútras or rules for making altars. Mr. Burnell is of opinion that the Pitrimedha-sutra and the Bharodvaja Sutra are in addition to these. Of these the MS. under notice, No. 643 of the Government Collection, contains chapters I to IX ; No. 490, chapters X and XI, the last defective ; No. 648, chapters X to XV ; No. 634, chapter XV ; Nos. 635 and 644, chapter XX ; Nos. 633, 646, chapter XXI ; No. 645, chapter XXIII. The Asiatic Society's Library contains chapters XXVIII and XXIX. (Ante II, p. 144) and an edition of it has been published by Dr. Buhler. Max Muller has published in the German Oriental Society's Journal, IX a translation of the first section of the XXIV, and I have a MS. of the Pitrimedha Sutra. Thus only chapters XVI, XVII, XVIII, XIX, XXII, XXIV, XXV, XXVI, XXVII and XXX remain to render the entire work accessible to Europeans. Of commentaries on this work Mr. Burnell notices five, of which that of Rudradatta is the oldest ; but he says that this author did not comment on more than the first fifteen chapters. Kapardí Svámí and Durva Svámí, he continues, have commented on the first twenty-four, and the last has been annotated upon by Kásikaráma. The Durva Svámí is, I believe, the same with the Dhúrta Svámí of the Government MSS. Nos. 643 and 646 which extend to 17 chapters. Government MS. No. 652 of Káusikaráma on this Dhúrta Svámí breaks off at the 8th chapter. It is, I believe, the same with the Kásikaráma of Mr. Burnell. Max Muller notices a comment by Gurudeva Svámí, and Mr. Burnell has seen a comment on the first three chapters by Chauṇḍáppá, and refers to comments on parts of the text by Ahobala, Haradatta Mis'ra, Darsanárya or Sudarsanárya, Karavinda Svámí, Kapardi Svámí and Sundararája,— The last three on chapter XXX ——— of all which he has copies.

Beginning. (प्रथमप्रश्नावधिपञ्चप्रश्नाणि न सन्ति ।)

End. यस्य व्रत्येऽहन् अुतिलक्षणं प्रायश्चित्तं अुतिलक्षणं तदग्निहोत्रीयस्याहवनीयेऽनुद्वाते यस्याज्यमनुत्पूतस्कन्ना पञ्च ।

Colophon. इत्यापस्तम्बसूत्रे नवमः प्रश्नः ॥

विषयः । अत्र प्रथमावधिनवमप्रश्नपर्य्यन्तं वर्त्तते । तत्र प्रथमादित्रयेषु दर्शपौर्णमासयागविवरणं । ४ र्थे, याजमानव्याख्यानं । ५-मे, अग्न्याधानकर्म्मविवरणं । ६-ष्ठे अग्निहोत्रकर्म्मविवरणं । ७-मे, पशुबन्धयागविवरणं । ८-मे, चातुर्मास्ययागविवरणं । ९-मे, विध्यपराधनिमित्तकप्रायश्चित्तकथनं ।

No. 1227. आपस्तम्बसूत्रं ।

Substance, country paper, 10½ × 6½ inches. Folia, 58. Lines, 13-14 on a page. Extent, 2,415 s'lokas. Character, Nágara. Date, ? Place of deposit, Government of India. (No. 648.) Appearance, old. Prose. Corrected.

Ápastamba Sútra. Chapters 10 to 15 of the work described in the last preceding number. There is a second MS. in the Government Collection, No. 490, which comprises Chapters VII to X and a part of XI and a third No. 634 which has Chapter XV only.

Beginning. सोमेन यक्ष्यमाणो ब्राह्मणोऽनार्षेयान्दत्विजो वृणीते ॥

End. संवत्सरमग्निं नरो यदि सोमो यदि सत्राय यदि कलमे यदि सद्यो दश ॥

Colophon. इत्यापस्तम्बसूत्रे पञ्चदशः प्रश्नः ॥

विषयः । अत्र दशमप्रश्नावधि पञ्चदशप्रश्नपर्य्यन्तं वर्त्तते । सर्व्वेषु तेषु सोमयागविवरणं ।

No. 1228. आपस्तम्बसूत्रं ।

Substance, country paper, 10 × 2¼ inches. Folia, 7. Lines, 12-13-14, on a page. Extent, 250 s'lokas. Character, Nágara, Date, ? Place of deposit, Government of India. (No. 635.) Appearance, old. Prose. Corrected.

Ápastamba Sútra. Chapter XX of the work described under No. 1226. There is a second MS. of this Chapter in the Government Collection, No. 644.

Beginning. राजा सार्व्वभौमोऽश्वमेधेन यजेताथ सार्व्वभौमश्चित्रानक्षत्रं पुण्यनामदेवयजन-मध्यवस्यति। यत्रापः पुरस्तात् सुखाः स्रूपावगाह्या अनपस्रराघैत्र्यां पौर्णमास्यां साङ्ग्रहण्येष्ट्या यजते॥

End. यद् ब्राह्मणानां दिक्षु वित्तं तत्सभूमि सपुरुषं ददाति यथाश्वमेधे यथाश्वमेधे॥

विषयः। अश्वमेधपुरुषमेधयागविषयकविंशतिप्रश्ननिर्द्देशः।

No. 1229. आपस्तम्बसूत्रं।

Substance, country paper, 9½ × 4 inches. Folia, 9. Lines 11-12 on a page. Extent, 357 s'lokas. Character, Nágara, Date, Sm. 1904. Place of deposit, Government of India. (No. 633.) Appearance, old. Prose. Corrected.

A'pastamba Sútra. Chapter XXI of the work described under No. 1226. There is a second MS. of this Chapter in the Government Collection, No. 646.

Beginning. द्वादशाहेन प्रैव जायतेभि स्वर्गं लोकं जयत्येषु लोकेषु प्रतितिष्ठति साग्निचित्या भवति॥

End. द्वादशाहेन श्वोभूते ततो दशममहः प्रायणीयवद्गवामयनेनोपाक्रते व्याख्यात उदयनीय उत्सर्गिणामयनमष्टौ।

Colophon. इत्यापस्तम्बसूत्रे द्वादशाहप्रश्नः समाप्तः॥

विषयः। द्वादशमहाव्रतविषयक एकविंशतिप्रश्ननिर्द्देशः।

No. 1230. आपस्तम्बसूत्रं।

Substance, country paper, 10 × 4½ inches. Folia, 7. Lines, 10 on a page. Extent, 144 s'lokas. Character, Nágara. Date, Sm. 1804. Place of deposit, Government of India. (No. 645.) Appearance, old. Prose. Correct.

A'pastamba Sútra. Chapter XXIII of the work described under No. 1226.

Beginning. चतुर्व्विंशतिपरमाः सत्रमासीत् तेषां द्वादशाहेन सत्रभूतेन कल्पो व्याख्यातो यानि पुरस्तात् संवत्सराद् गवामयनेनेतरेषामुभयेषामुभयतोऽतिरात्राणि भवन्ति॥

End. ब्रह्मणः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यतदुपयन्ति ।

Colophon. इत्यापस्तम्बसूत्रे त्रयोविंशतिः प्रश्नः ॥

विषयः । सत्रायणविवरणं ।

No. 1231. आपस्तम्बसूत्रभाष्यम् ।

Substance, country paper, 9½ × 4¼ inches. Folia, 212. Lines, 10 on a page. Extent, 4,240 s'lokas. Character, Nágara. Date, ? Place of deposit, Government of India. Appearance, old. Prose. Correct.

A'pastamba-sútra-bháshya. A commentary on the aphorisms of A'pastamba, by Dhúrta Svámí, it is incomplete, and extends only to the close of Chapter XI.

Beginning. अथातो दर्शपूर्णमासौ व्याख्यास्यामः । अथोपोद्घातयज्ञं व्याख्यास्याम इति । परिभाषायां यज्ञजातिशब्देनैकविंशतिसंस्थस्य यज्ञस्य व्याख्या प्रतिज्ञाता ।

End. द्वादशपद्यां यद् द्वादशषोड़शपद्यां षोड़श उष्णीषं दीर्घनारिकं तेन । दशम प्रश्नीयकतिपयपर्य्यन्तं ।

विषयः । आपस्तम्बसूत्रीयैकावधिनवमप्रश्नपर्य्यन्तव्याख्यानं ।

No. 1232. आपस्तम्बसूत्रभाष्यम् ।

Substance, country paper, 14 × 5¼ inches. Folia, 160. Lines, 10 on a page. Extent, 4,300 s'lokas. Character, Nágara. Date, ? Place of deposit, Government of India. Appearance, new. Prose. Incorrect.

A'pastamba-sútra-bháshya. Continuation of the work noticed under the last preceding No. It extends from the middle of Chapter X to the close of Chapter XVI.

Beginning. अग्निहोत्रहोमार्था धेनुरग्निहोत्री उपसृष्टा सङ्गता वत्सेन स्तनपानार्थेन सापदि वा श्येनशब्दं कुर्य्यात् । इत्यादीनि दशमप्रश्नान्तर्गतानि ।

End. प्रहिरण्यमिति चतस्रो वरिष्यन्तो बङ्क प्रीयि सर्व्वे रसमहमे वाधिक्रियते तज्ज्ञानेतरे । अष्टमः पटलः ॥

विषयः । आपस्तम्बसूत्रीयदशमप्रश्नीयमध्यावधिषोड़शप्रश्नपर्य्यन्तस्य व्याख्यानं ॥

No. 1233. धूर्त्तस्वामिभाष्यटीका ।

Substance, country paper, 12 × 5, 14 × 5½ inches. Folia, 211. Lines, 9 on a page. Extent, 4,510 s'lokas. Character, Nágara. Date, Sm. 1866, Place of deposit, Government of India. (No. 652.) Appearance, old. Prose. Incorrect.

Dhúrta-svámí-bháshya-tíká. A gloss on Dhúrta Svámí's commentary on the Aphorisms of A'pastamba. By Kausikaráma. The MS. is a mere fragment, and contains only the first four chapters.

Beginning. आदौ तावत् परिभाषायामेकविंशतिर्यज्ञा व्याख्येयतया प्रतिज्ञाताः । तेषु पाकयज्ञाः सप्त गृह्ये व्याख्याताः । शेषेषु हविर्यज्ञाः सप्त कर्म्माणि । अथातो दर्शपूर्णमासौ व्याख्यास्याम इत्यारभ्य यथान्वारम्भणीयेत्येवमन्तेनोक्तानि दर्शपूर्णमासादीनि पिण्डपितृयज्ञाधानाग्निहोत्राग्रयणपशुबन्धचातुर्मास्यानि नित्यानि अकरणे प्रत्यवायात् भवन्ति ॥

End. सायमग्निहोत्रमिति वक्तव्यं, सन्निष्ठत इत्यस्य न्यायप्राप्तानुवादत्वात् न तन्निर्देशक्रमो विवक्षित इति ॥ सप्तमः पटलः ॥ समाप्तः प्रश्नः ॥

विषयः । आपस्तम्बीयचतुर्थप्रश्नपर्य्यन्तधूर्त्तभाष्यस्य व्याख्यानं ॥

No. 1234. जटापटलं, व्याख्यासहितं ऋग्वेदीयं ।

Substance, English paper, 7¾ × 4¼ inches. Folia, 9. Lines, 5-7 on a page. Extent 110 s'lokas. Character, Nágara. Date, ? Place of deposit Government of India. Appearance, New. Prose and verse. Incorrect.

Jaṭápaṭala. Directions for reciting and reading the Rig Veda Sañhitá in different arbitrary ways so as to prevent interpolation. By Hayagriva. No ancient nation took more precautions to prevent interpolations in the text of their scriptures than the Hindus, and if such precautions, in the absence of printing, could secure absolute authenticity, the Sañhitá of the Rig Veda might be pronounced to be the most authentic ancient text extant. From a period of remote antiquity all its hymns, verses and half verses, were duly numbered ; they were grouped into collections of fixed numbers, and the initial and terminal words of every group separately written down and committed to memory along with the text, and every Bráhman was required to repeat a portion of that text regularly every morning as a religious duty.

This practice has been kept up even to this day by the more strict among the Bráhmans in different parts of India. In addition to this the text has been preserved by repeating it in various arbitrary and different ways, so that not a single letter may by any possibility, be erroneously or incorrectly pronounced. These ways are respectively called *Pada*, *Sañhita*, *Krama*, *Jaṭá* and *Ghana*. The following is Professor Ráma-kṛishṇa Gopál Bhandárkar's account of these arbitrary ways of reading. "*Padas* are the different words of a *mantra* repeated separately. *Saṇhitá* consists in putting them together according to the Sandhi rules and using the Sandhi accents. In *Krama* the first word is repeated along with the second, the second with the third, the third with the fourth and so on. The last word of a *mantra* or half of a Ṛik verse is simply repeated with the word *iti* placed between. This repetition is called *veshṭana*. In the *Jaṭá* arrangement, the first word and the second, the second and the first, and the first and the second again, are repeated together, joined by the Sandhi rules and having Sandhi accents. In the same manner, the second and the third, the third and the second, and the second and the third are put together, and thus it goes on, each word in succession beginning a new *jaṭá* arrangement, up to the end of a half Ṛik or of a mantra, when the last word is simply repeated, as in the *Krama*. In the *Ghana* there is first a Jaṭâ arrangement of two successive words, and then the third is added on, then the three are put together in the reverse order, and again in the converse. A *Ghana* is thus composed of the first and the second; the second and the first; the first and the second again, then the third; the third, the second, and the first; and the first, the second, and the third. The second word begins the next *Ghana*, and we have the second, third; third, second; second, third, fourth; fourth, third, second; second, third, and fourth, put together. In this manner it goes on to the last word, which cannot begin a new *Ghana*, and is therefore simply repeated, as in the other cases. Whenever there is a compound, there is, in addition, what is called an *avagraha*, i. e. a dissolution of it into its parts, in all these schemes, as in the cases of *samúḍham* in the above." *Indian Antiquary*, vol. III, p. 134.

To illustrate these peculiarities by examples, let us take the first four words of the verse: *Idam vishṇurvichakrame*, &c. As here written down it is called the *Saṇhitá páṭha*, because the words *vishṇuḥ*, *vi* and *chakrame* are joined according to the rules of Sandhi. In the

Pada form, the sandhis are dropped, and each word stands by itself, separated from its neighbour by an upright stroke or *dandi*, thus: *Idam* | *vishnuh* | *vi* | *chakrame* | . To convert these into the *Krama* form, the first two words are first pronounced, and then the second with

1 2 2 3 3 4 4 5
the third thus:—*Idam vishnuh* | *vishnurvi* | *vi chakrame* | *chakrame tre-dhá.* In the *Jatá* each word after the first is repeated six times thus:

1 2 2 1 1 2 2 3 3 2 2
Idám vishnur-vishnur-idam-idam vishnuh | *vishnur-vi vi vishnur-vishnur-*
3 3 4 4 3 3 4 4 5 5
vi | *vi chakrame chakrame vi vi chakrame* | *chakrame tredhá tredhá*
4 4 5
chakrame chakrame tredhá | In the *Ghana* the repetitions occur

1 2 2 1 1 2 3 3
several times, thus: *Idam vishnur-vishnur-idam-idam vishnur-vi vi*
2 1 1 2 3 2 3 3 2 2 3 4
vishnur-idam-idam vishnur-vi | *vishnur-vi vi vishnur-vishnur-vi chakrame*
4 3 2 2 3 4 3 4 4 3 3
chakrame vi vishnur-vishnur-vi chakrame | *vi chakrame chakrame vi vi*
4 5 5 4 3 3 4 3 3 4 5
chakrame tredhá tredhá chakrame vi vi chakrame vi vi chakrame tredhá |
4 5 5 4 4 5 6 6 5 4
chakrame tredhá tredhá chakrame chakrame tredhá ni ni tredhá chakrame
4 5 6
chakrame tredhá ni | .

In recitation the stops and accents are indicated both by the modulation of the voice and by particular movements of the right hand. It is doubtful whether these forms were adopted solely to preserve the authenticity of the text, or with some mystic motive to give a cabalistic character to the text—probably both objects were held in view; any how they have unquestionably preserved the text in the most authentic form possible. Unfortunately no MSS. are extant of the text written in all these several forms, and the labour of reducing the text from the recitation of the chanter of the Vedas would be so immense that none can venture to undertake it. The first two are the forms in which the Rig Veda is generally met with, and, though the *Pada* text is well calculated to check the errors of the *Sanhitá* text, still there is room for doubt, and occasionally, though rarely, the true reading of particular passages may be open to question. I have heard of MSS. of the *Krama* and *Jatá* forms, but as yet I have met with none. From the directions given in the MS. under notice it would seem that the

Ghana form was also at one time written, but no pandit can assure me that he has seen any. These five forms of recitation are limited to the Sañhitás of the Rig and the Yajur Vedas, but never extended to their Bráhmaṇas. The Sáma Veda is recited in the first three forms, but MSS. exist of only the first two forms, the *Krama* being read from the *Pada* text. Only one verse (Araṇyagáṇa III. 6. 1.) is ordinarily called a *Jaṭá*, and recited in a manner closely like a *Jaṭá*, but it is not a regular *Jaṭá*. There is no *Ghana* in the Sáma Veda, nor are these different forms at all wanted for it, as the texts are all, or nearly all, taken from the Rig Veda, and the *Jaṭá* and the *Ghana* of the latter serve for the former.

Beginning. क्रमे यथोक्तं पदजातमेव द्विरभ्यसेदुत्तरमेव सर्वम् ।
अभ्यस्य पूर्वञ्च तथोत्तरे पदेऽवसानमेवं हि जटाभिधीयते ॥ १ ॥

End. नरा च शंसं दैव्यं, दैव्यञ्च नराशंसं, नराशंसं दैव्यं, नराशंसमिति नराशंसं ।
चेति च । अयं प्रकार उत्तमः ।

Colophon. इति सर्वेषामाचार्याणां हयग्रीवप्रोक्तं जटापटलं सम्पूर्णम् ।

विषयः । जटापाठप्रकारकथनं ।

No. 1235. स्वराङ्कुशः, वा जटापटलः, ऋग्वेदीयः ।

Substance, English paper, $8\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 3. Lines, 8 on a page. Extent, 42, s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Svaráṅkus'a alias *Jaṭápaṭala*. On the vowel accents of the Rig Veda. By Jayantasvámí.

Beginning. हेरम्बं चण्डिकां नत्वा शम्भुं सूर्यं हरिं गुरुम् ।
सरस्वतीं कविवरान् वक्ष्येऽहं स्वरनिर्णयम् ॥ १ ॥

End. जयन्तस्वामिना प्रोक्ता श्लोकानामेकविंशतिः ।
स्वराङ्कुशेति विज्ञेयो बह्वृचां स्वरसिद्धये ॥ २१

Colophon. इति स्वराङ्कुशः समाप्तः ।

विषयः । उदात्तादिस्वरविचारः ।

No. 1236. पाराशरी शिक्षा, यजुर्वेदीया ।

Substance, country paper, 11½ × 4½ inches. Folia, 10. Lines, 3-7 on a page. Extent, 161, s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Parásarí Sikshá. Phonetics of the Yajur Veda according to the school of Parás'ara, by an unknown author. Nine works of this class, besides a commentary on one of them, have already been met with. Of these, three, viz. the Amoghánandiní S'ikshá of the Yajur Veda, the Kaus'ika S'ikshá of the Rig Veda, the Manduka S'ikshá of the Atharva Veda, the Náradíya S'ikshá of the Yajur Veda, the Lomashí S'ikshá of the Sáma Veda, and the S'ikshá-vivaraṇa have already been noticed, (ante Nos. 132, 133, 134, 135 and 136). None of these is accompanied with a commentary, and MSS. are more or less corrupt.

Beginning. अथ शिक्षां प्रवक्ष्यामि पाराशरमतं यथा ।
यथा वेदेषु विश्वात्मा यथा तीर्थेषु पुष्करम् ॥ १ ॥
तथा पाराशरी शिक्षा सर्वशास्त्रेषु गीयते ।

End. अरञ्जपञ्च अर्द्ध + + + मा का भवन्ति ।
एषा मिश्रो वसवश्चैव अञ्जनाश्च प्रकीर्त्तिताः ॥ १५० ॥

Colophon. इति पाराशरी शिक्षा समाप्ता ।

विषयः । यजुर्वेदीयकण्डिकाक्षरसङ्ख्यादिः । ह्रस्वदीर्घवर्णकथनादिः । यमघोषाघोषाद्यक्षरकथनं । वकारभेदः । वाक्यलक्षणादिः ब्रह्मज्ञानप्रशंसा ।

No. 1237. पाणिनीयशिक्षा, यजुर्वेदीया ।

Substance, country paper, 11½ × 4½ inches. Folia, 5. Lines, 7 on a page. Extent, 73 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Paniniya S'ikshá. Phonetics of the Yajur Veda according to the School of Páṇini. Anonymous.

Beginning. अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥

End. विनयनमभिमुखविनिःसृतामिमां य इत्थं पठेत प्रयतश्च सदा द्विजः ।
स भवति धनधान्यबहुपुत्रकीर्त्तिमानतुलञ्च सुखं समश्नुते दिवीति दिवीति॥५८॥

Colophon. इति शिक्षा समाप्ता ।

विषयः । वर्णसञ्ज्ञा । वर्णोत्पत्तिः । वर्णोच्चारणस्थानानि । संवृतघोषाघोषादिवर्ण-कथनं । वर्णोच्चारणप्रकारः । अङ्गुलिद्वारा उदात्तादिस्वरज्ञानादिः । ह्रस्व-स्वरकृतवेदपाठप्रसंशादिः ।

No. 1238. केशवी शिक्षा, यजुर्वेदीया ।

Substance, country paper, $11\frac{1}{2}\times4\frac{1}{2}$ inches. Folia, 5. Lines, 7 on a page. Extent, 75 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose, and verse. Incorrect.

Kes'avi S'ikshá. Phonetics of the Yajur Veda. By Kes'ava.

Beginning. नत्वा गणपतिं वेदपरिभाषाङ्कसूचकं ।
उच्यते केशवेनेदं वेदाध्यायिसुखाप्तये ॥ १ ॥

End. हल्युतायुतस्योरेकारस्य ॥ ७ ॥ ह्रस्वं किञ्चिद्दीर्घं हल्युतायुताकारे हल्विसर्ग-युतवर्णे च न संहितायां ॥ ८ ॥

Colophon. इति कात्यायनाचार्यकृतनवसूत्राणि समाप्तानि ॥

विषयः । व्यञ्जनविशेषस्य द्वित्वविधिः । र-ष-वर्णव्यत्ययसाधनादिः । अनुस्वारस्य आदेशविधिः । ह्रस्वदीर्घादिसञ्ज्ञा । पञ्चवर्गीयवर्णविशेषाणां द्वित्वविधिः । वर्णोच्चारणविधिः । (अत्र ४ पत्रस्याभावाद् द्वित्वात्परविषयो न प्राप्तः ।)

No. 1239. कात्यायनी शिक्षा, यजुर्वेदीया ।

Substance, English paper, $8\frac{1}{2}\times5\frac{1}{2}$ inches. Folia, 14. Lines, 10 on a page. Extent, 288 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Kátyáyaní S'ikshá. Phonetics of the Yajur Veda. According to its name the work should belong to the School of Kátyáyana, but it opens with the name of Yájñavalkya. The MS. being incomplete I have not been able to determine who is the real author.

Beginning. याज्ञवल्क्य उवाच । अथातस्वैस्वर्यलक्षणं व्याख्यास्यामः ।
उदात्तस्यानुदात्तस्य स्वरितस्य तथैव तत् ।
लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥ १ ॥

End. (खण्डितं)

विषयः । उदात्तादिलक्षणं । वेदाध्ययनविधिः । अष्टविधस्वरलक्षणं । स्वरस्पर्शादिवर्णानां शुक्लपीतादिवर्णकथनं । स्वराणां ब्राह्मणादिजातिः । सन्धिकथनं । स्वरभक्तिकथनं । उदात्तादिव्यवस्था । स्वल्पविशेषे वर्णविशेषप्रयोगाप्रयोगव्यवस्था । ह्रस्वदीर्घादिव्यवस्था । वर्णविशेषभेदकथनं । विद्यालाभोपायकथन । वर्णोच्चारणप्रकारकथनादिः । पाठकलक्षणं । सप्तविधसंयोगपिण्डकथनादिः । वर्णोच्चारणस्थानप्रयत्नादिकथनं । (खण्डितत्वादस्य सर्वविषयो न प्राप्तः ।)

No. 1240. सर्व्वसारः ।

Substance, country-made yellow paper, 15 × 8 inches. Folia, 953. Lines, 26 on page. Extent 52,672 slokas. Character Bengali. Date ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose and verse. Generally correct.

Sarvasára. A Tántric miscellany, containing extracts from various Tantras and Puráṇas on the worship of the different S'ákta and S'aiva divinities, hymns in their praise, stories regarding them, their origin and manifestations, interspersed with dissertations on various subjects of literature, art, domestic duties, minerals, precious stones, &c. some of which are designed to reconcile the differences of the Vaishṇava and the S'ákta cults. The work is Vaishṇava in its tendency, and intended to uphold the modern forms of worship and religious duties. By Vishṇuchandra. The MS. is incomplete.

Beginning. प्रणम्य परमं गुह्यं नानातन्त्रादिदीपितं ।
परमानन्दसन्दोहं तत्त्वज्ञानप्रदं गुरुं ॥
नत्वा शैलसुतां त्रिलोकजननीं लम्बोदरं श्रीगुरुं
दृष्ट्वा वेदपुराणतन्त्रसकलान् श्रीविष्णुचन्द्रः प्रभुः ।
ग्रन्थं नाम तनोति संसदि चितं श्रीसर्व्वसारं मुदा
सभ्यैर्धीरगणैर्धरामरवरैः श्रीवैद्यरत्नेन च ॥
अथ रुद्रयामले । आनन्दभैरव्युवाच ।
कथयामि महाकाल परमाद्भुतसाधनं । इत्यादिः ।

End. परमं कारणं ब्रह्म गोविन्दाख्यं महत्पदं।
वृन्दावनेश्वरं नित्यं निर्गुणस्यैककारणं।
तद्रहस्यस्य माहात्म्यं किमाश्चर्य्यञ्च सुन्दरं।
तद् ब्रूहि देवदेवेश श्रोतुमिच्छाम्यहं प्रभो॥ (इतः खण्डितं।)

विषयः। पुराणतन्त्रादिभ्यः प्रमाणानि सङ्गृह्य निर्म्मितोऽयं ग्रन्थः। तत्र.—राकिणी-सङ्गमनाथाभिधेयं रुक्मिणीकण्ठोरष्टोत्तरसहस्रनामयुगलस्तोत्रकीर्त्तनं। सरस्वतीस्तोत्रं। पञ्चवक्त्रशिवस्तोत्रं। सामान्यतः स्वरलक्षणकथनं। वगलामुखीशतनामस्तोत्रं। रुद्रचण्डीकथनं। यात्रादौ योगिनीस्थित्यादिनिरूपणं। यात्राकाले बाधादिकथनं। तीर्थयात्राप्रकारादिकथनं। प्रतिमालक्षणकथनं। तत्र आकारपरिमाणादिनिरूपणं। त्र्यम्बकेश्वररूपवर्णनं। अर्द्धनारीश्वररूपवर्णनं। उमामहेश्वररूपवर्णनं। शिवनारायणरूपवर्णनं। नरसिंहरूपवर्णनं। त्रिविक्रमरूपवर्णनं। ब्रह्मरूपवर्णनं। कार्त्तिकेयरूपवर्णनं। गणेशरूपवर्णनं। दशभुजारूपवर्णनं। इन्द्ररूपवर्णनं। प्रभाकररूपवर्णनं। वह्निरूपवर्णनं। यमरूपवर्णनं। वरुणरूपवर्णनं। वायुरूपवर्णनं। कुवेररूपवर्णनं। धवलेश्वररूपवर्णनं। ब्राह्म्यादिमातृकाणां रूपवर्णनं। लक्ष्मीरूपवर्णनं। क्षेत्रपालरूपवर्णनं। कन्दर्परूपवर्णनं। पीठिकालक्षणादिकथनं। लिङ्गलक्षणादिनिरूपणं। सामान्यतो देवप्रतिष्ठाविधिकथनं। आचार्य्यलक्षणकथनं। अधिवासनविधानं। प्रतिष्ठाप्रकारकीर्त्तनं। स्नपनविधिः। देवमुद्दिश्य अन्नपानीयादिदानपरिमाणादिकथनं। वसनासनादिलक्षणं। पूजायां दिङ्निरूपणं। दक्षिणानिरूपणं। वाचकलक्षणं। कुलीनलक्षणं। पारायणप्रकारः। पुष्पादिदानविशेषकथनं। पर्य्युषितादिलक्षणं। ध्वजारोपणविधिः। राजधर्म्मप्रकरणं। सेनापतिलक्षणं। प्रतिहारलक्षणं। दूतलक्षणं। राजाङ्गरक्षक-(गार्ड्) लक्षणं। सारथिलक्षणं। पाचकाध्यक्षलक्षणं। धर्म्माधिकारिलक्षणं। लेखकलक्षणं। धनाध्यक्षलक्षणं। चिकित्सकलक्षणं। गजाध्यक्षलक्षणं। अश्वाध्यक्षलक्षणं। दुर्गाध्यक्षलक्षणं। स्थपतिलक्षणं। अन्तःपुराध्यक्षलक्षणं। राजकार्य्याणि। प्रजारक्षणोपायः। राजकीयजनकर्त्तव्यता। दुर्गनिर्म्माणयोग्यस्थानादिकथनं। तत्र राजगृहादिस्थाननिरूपणं। अश्वशालादौ कुक्कुट-वराह-मर्कटादिस्थापनावश्यकता। दुर्गे सञ्चययोग्यद्रव्याणि। विषनाशनद्रव्यनिरूपणं। अगदोपायकीर्त्तनं। वस्त्रालङ्कारभोज्यादिपरीक्षाकथनं। राजधर्म्मानुशासनं। मृगयापानाक्षादिवर्ज्जनं। सप्ताङ्गराज्यकथनं। दैवपुरुषकारयोः पौरुषस्यैव श्रेष्ठत्वकथनं। साम-भेद-दान-दण्ड-उपेक्षा-माया-इन्द्रजालरूपसप्तविधप्रयोगकथनं। सामविधिः। भेदविधिः। दानप्रकारः। दण्डप्रशंसा। चौरदण्डकथनं। मूल्यमादाय द्रव्यस्य अदाने दण्ड-

वाच्यां भूमिखननादिषु पापकथनं। एवं कन्याविक्रय-एकादशीभोजन-मातापितृप्रा-लनदैवसिकनिष्ठुवन-परस्त्रीमुखस्तन-श्रोणीप्रभृतिदर्शन-नरघातनादिपापकीर्तनं। वृहस्पतेर्विलापवर्णनादिकं। ब्रह्मेन्द्रादीनां संवादः। सम्वर्त्तकृतोतथ्यपत्नीहरण-कथनं। अङ्गिरसो भार्य्यायाः पुंसवनव्रतानुष्ठानवृत्तान्तकीर्तनं। वृहस्पतेरुत्पत्ति-कथनं। शिवेन सह तस्य संवादः। वैष्णवमाहात्म्यं। भक्तानां श्रीकृष्णे भक्तिं विना मोक्षाभिलाषो नास्तीतिकथनं। श्वेतद्वीपाद् विष्णोरागमनादिकथनं।

५८, ५९ अ०—शुक्रालयवर्णनं। तत्र ब्रह्मादीनां गमनविवरणं। ताराभिक्षा-कथनं। बलात्कारेण स्त्रीणां सतीत्वहानिर्न जायते, वस्तुतः प्रायश्चित्तानुष्ठानेन शुद्धिर्भवतीति कथनं। बुधस्य जन्मकथनं। तेन सह चित्रायाः पाणिग्रहणकथनं। अधिरथादीनां जन्मादिकथनं। सुरथस्य शरत्कालीनमहापूजाद्यनुष्ठानादि-कथनं। ध्रुवगोत्रस्य नन्देः सुरथराजधानी-कोलारोधविवरणं।

६०, ६१, ६२, ६३ अ०।—सुरथवैश्ययोः प्रकृतिसन्दर्शनकथनं। नवधाभक्तिल-क्षणकीर्तनं। मूलप्रकृतिध्यानादिकथनं। षोड़शोपचारमन्त्रादिकथनं। बलि-दानयोग्यच्छागादिलक्षणकथनं। बोधनादिकालकथनं। ज्ञानकथनं। मधुमा-माद्यौ श्रीकृष्णकृतदुर्गापूजाकथनं। दुर्गास्तोत्रकथनं। ब्रह्माण्डमोहनाभिधान-दुर्गाकवचकीर्तनं। प्रकृतिखण्डफलश्रुतिः। समाप्तिः।

No. 1249. धातुदीपिका।

Substance, country-made yellow paper, 11 × 6 inches. Folia 102. Lines 24 on a page. Extent, 2,907 s'lokas. Character, Bengali. Date ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Dhátu-dípiká. A commentary on the Kavikalpadruma, of Vopadeva. By Durgádása. The Kavikalpadruma is a list of Sanskrit roots arranged under the ten heads of Sanskrit conjugation. The work of course belongs to the school of Vopadeva, and differs from others in having its own peculiar symbols and technical terms.

Beginning. नत्वा शङ्करचरणसरोजं श्रीदुर्गादासेन धीमता।
विदधे धातुदीपिका नाम टीका कविकल्पशाखिनः॥
कति कति सन्ति हे सन्तः सन्तोषं नो + + + इतरगुणे।
ये परगुणमनुलुब्धा दुर्गादासश्रमो भवेत्तेभ्यः॥

सुखाय च्चाववर्गाणामवेति परिभाष्यते ।
अन्तस्थाः सुर्यवरला आद्या इत्याद्यः खराः ॥
ऊष्मसञ्ज्ञाः शषसहा अन्त्यात् प्रागुपधा भवेत् । श्रीवोपदेवो धातुपाठं चिकीर्षितप्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति,—शब्दाकरकरग्राममर्थमित्यादिः ।

End. सर्व्वेखं + + + + + + मन्येषां हेमराशिवत् ।
कविकल्पद्रुमस्य प्रदीप्यते धातुदीपिका ॥

Colophon. इति श्रीदुर्गादासविरचिता + ———— कविकल्पद्रुमटीका समाप्ता ।

विषयः । वोपदेवविरचितकविकल्पद्रुमाभिधेयधातुपाठस्य व्याख्यानं ॥

No. 1250. माध्यन्दिनशतपथब्राह्मणभाष्यं ।

Substance, country-made yellow paper, 14 × 8 inches. Folia, 487. Lines, 24—25—26—27—28 on a page. Extent, 18,201 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

S'atapatha-bráhmaṇa-bháshya. A commentary on the S'atapatha Bráhmaṇa of the White Yajur Veda. By Mahidhara. Large extracts from this work have already been printed in Dr. Weber's edition of the Bráhmaṇa. See also Weber's Catalogue of the Berlin Collection, and Max Müller's *Ancient Sañskṛit Literature.*

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
तत्कटाक्षेण तद्रूपं दधतो बुक्कभूपतेः ।
कृते चेतर+चीरसागरादिव चन्द्रमाः ॥
विजेता राजते जातो वीरः श्रीरत्नमा+ग्रः ।
धर्म्मब्राह्मणस्यान्यः समादिशन् सायणाचार्य्यः ॥
ऋग्यजुःसामशाखानामेकैका व्याकृता त्वया ।
तावता तत्समानार्थं ज्ञातुं शक्या ++पराः ॥
वासना+ + + + + मन्त्रार्थानामशेषतः ।

प्रायेणाध्वर्य्यवं कर्म्म पू+ + +न्तरैर्विना ॥
करतलामलक+ परं तत्त्वं प्रकाशितं ।
सका+सदृशी शाखा त्वया व्याख्यायतामिति ॥
सर्व्वतः सायणाचार्य्यो विप्रश्रेष्ठोदीरिता+ + ।
माध्यन्दिने शतपथे + + व्याख्यां करोति + ॥
सञ्चारः पदवाक्यार्थन्यायानां दर्शितः पुरा ।
वेदानामर्थवस्त्वादि यच्चान्यदुपयुज्यते ॥
सर्व्वशाखासु यत्नेन विज्ञेयं तदिहाखिलं ।
यत्र सन्दिग्धमज्ञातमत्र तद्विचरिष्यते ॥
सम्मत्या कल्पसूत्राणां ब्राह्मणानाञ्च सङ्ग्रहात् ।
इह हि चरमे चतुर्द्दशे काण्डिके करतलामलकवत् परं तत्त्वं प्रकाशितं । ततः प्राकृतैश्च + + + + +काण्डैः त्रेताग्निसाधर्म्म्यप्राधान्येन । इत्यादिः ।

End. यदा मलिम्लुचो भवति, तदा त्रयोदश, अतोऽस्या इष्टेर्द्वादशकपालसंस्कृतहविर्युक्तत्वात् संवत्सरसम्मितत्वं । अतः संवत्सररूपाया इष्टेर्द्वादश त्रयोदश वा दक्षिणा युक्ता इत्यर्थः । इति पञ्चमं ब्राह्मणं ।
वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon. इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीबुक्कभूपालसाम्राज्यधुरन्धरसायणाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणे पञ्चमकाण्डे पञ्चमोऽध्यायः । समाप्तञ्च पञ्चमकाण्डं ।

विषयः । शुक्लयजुर्वेदीयमाध्यन्दिनशतपथब्राह्मणस्य व्याख्यानं ।

No. 1251. गङ्गावाक्यावली ।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 137. Lines, 25 on a page. Extent, 3,211 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose and verse. Generally correct.

Gangá-vákyávalí. A treatise on the religious merits of the River Ganges, including directions for visiting, saluting, and worshipping the river, for bathing in it on different auspicious occasions, consecrating gifts, performing s'ráddhas, special merits of Gangáságara and Prayága,

&c., &c. By Vidyápati. The author was a distinguished poet, and, according to tradition current in Tirhoot, lived during the reign of Rájá S'iva Siñha of Tirhoot, who granted him a patent conveying a small plot of land in the year two hundred and ninety-three of Lakshmaṇa Sena's era, which would be equal to the Christian era 1400. The Sadukti-karṇámrita (*ante* No. 1180) however, quotes from the works of a Vidyápati, and the Sadukti itself was completed in the year 1205, A. C., or nearly two hundred years before S'iva Siñha. Thus we have two Vidyápatis, and it is doubtful who wrote the work under notice. Tirhoot tradition assigns it to the second.

Beginning. स्वस्त्यस्तु वस्तुहिनरश्मिर्भ्रतः प्रसादादेकं वपुः श्रितवतो हरिणा समेत्य।
तन्नाभिपङ्कजसहोत्थमृणाललीलामाविष्करोति हृदि यस्य भुजङ्गराजः॥
यावद्गङ्गा विभाति त्रिपुरहरजटामण्डलं मण्डयन्ती
मल्लीमाला सुमेरोः शिरसि सितमहावैजयन्ती जयन्ती।
याता पातालमूलं स्फुरदमलरुचिः शेषनिर्म्मोकवल्ली
तावद्विश्वासदेव्या जगति विजयतां गाङ्गवाक्यावलीयं
अथ भक्तिश्रद्धापुरःसरमेव सर्व्वकर्म्मविशेषमाह। अतो भक्तिश्रद्धे अवश्यमेव कर्त्तव्ये, तथा च यमः।——
श्रद्धा भक्तिश्च काम्यानां वृद्धिक्षेमकरे हि ते। इत्यादिः।

End. गङ्गातीरं परित्यज्य येऽन्यतीर्थाभिलाषिणः।
तोयान्तरे रतिर्येषां ते वै रौरवगामिनः॥
यावत् स्वर्गतरङ्गिणी हरजटाभ्रष्टान्तरा लम्बते
यावद्विश्वविशालविस्तृतकरः सूर्य्योऽयमुज्जृम्भते।
यावन्मण्डलमैन्दवं वितनुते शम्भोः शिरोमण्डलं
तावत् कल्पलतेयमस्तु सफला देव्याः सतां श्रेयसि॥
कियन्निबन्धमालोक्य श्रीविद्यापतिसूरिणा।
गङ्गावाक्यावली देव्याः प्रमाणैर्विमलीकृता

Colophon. इति श्रीविद्यापतिविरचिता गङ्गावाक्यावली समाप्ता।

विषयः। गङ्गानामस्मरणप्रकरणं। तत्र भक्तिश्रद्धादिलक्षणं। स्मरणप्रयोगः। (एवं परत्रापि प्रयोगो बोद्धव्यः)। नामसङ्कीर्त्तनादिमाहात्म्यकथनं। यात्राप्रकरणं। गङ्गावासमाहात्म्यं। यात्रापूर्व्वदिने केशवपनादिकर्त्तव्यता। श्राद्धविधानं। श्रवणमाहात्म्यादिकथनं। गमनप्रकरणं। वीक्षणप्रकरणं। नमस्कारप्रकरणं। स्पर्शनकरणं। सामान्यतः सर्व्वतीर्थप्राप्तिश्राद्धप्रकरणं। मुण्डनादिकथनं।

श्राद्धोत्तरकर्म्मकथनं । गङ्गाभक्त्यादिमाहात्म्यकथनं । अभयप्रकरणं । क्षेत्रप्रकरणं। अवगाहनादिप्रकरणं । स्नानप्रकरणं । सामान्यकालस्नानादिविधानं । आचमनादिकथनं । गङ्गावाहनध्यानादिमन्त्रकथनं । पुण्यकालस्नानप्रकरणं । तत्र तिथिस्नानं । विशेषेण माघसप्तमीस्नानकीर्त्तनं । नन्दास्नानं । युगाद्यास्नानं । दिनत्रयस्नानं । नक्षत्रस्नानं । एवं योग-दशहरा-सङ्क्रान्तिस्नानकथनं । सङ्क्रान्तिनिरूपणं । माम-ग्रहण-मध्याह्न-वारुण्यादि-महाज्यैष्ठी-शिवसन्निहित-पश्चिमवाहिन्यादिगङ्गास्नानकथनं । तर्पणप्रकरणं । नीलीरक्तादिवस्त्रपरिधानेन तर्पणाद्यनुष्ठाननिषेधः । मृत्तिकाप्रकरणं । जपप्रकरणं । पूजाप्रकरणं । मृत्तिकानिर्म्मितशिवलिङ्गपूजनादिविधानं । पितृलोकानुद्दिश्य देवस्नानादिविधानं । दानप्रकरणं । तत्र दानादिस्वरूपकथनं । द्रव्यदैवतनिरूपणं । प्रतिषिद्धदानं । सामान्यदानं । घृतधेनु-सुवर्णधेनु-भूमिप्रभृतिदानविधानं । तत्र भूमिदाने परिमाणादिकथनं । व्रतफलादिकथनं । गङ्गास्तोत्रकीर्त्तनं । दशहरागङ्गापूजाविधिः । श्राद्धे विहिताविहितद्रव्याणि । जलप्रकरणं । तत्यानप्रकरणं । आश्रयप्रकरणं । मृत्युप्रकरण । प्रायश्चित्तप्रकरणं । अस्थिस्थितिप्रकरणं । गङ्गासागरसङ्गमादिप्रकरणं । प्रयागमाहात्म्यादिप्रकरणं । तत्र मुण्डनमरणादिप्रकरणं । विघ्नप्रकरणं । प्रतिषिद्धप्रकरणं । गङ्गामाहात्म्यकीर्त्तनं । इति ।

No. 1252. ब्रह्मवैवर्त्तीयब्रह्मखण्डः ।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 94. Lines, 22 on a page. Extent 2,068 s'lokas. Character, Bengali. Date ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Generally correct.

Brahma-khaṇḍa. The first part of the Brahma-vaivarta Purána, being the tenth of the eighteen great Puráṇas attributed to Vyása (Vide ante p. 227). It is thoroughly sectarial in character, and treats of the preeminence of Kṛishṇa as the supreme Deity. Náráyaṇa is assumed to be a part manifestation of Kṛishṇa, and legends are over and over introduced to illustrate the subordinate character of S'iva, Durgá, and the other gods and goddesses. The seat elect of Kṛishṇa is described to be Goloka, the highest heaven of the Vaishṇavas. The MS. comprises thirty chapters, and professes to be complete.

Beginning. गणेशब्रह्मेशसुरेशशेषाः सुराश्च सर्व्वे मुनयो मुनीन्द्राः ।
सरस्वती श्रीगिरिजादिकाश्च (यं) नमन्ति देवाः प्रणमामि तं विभुं ॥
स्थूलात् स्थूलतमां तनूं विदधतं विराजं विश्वानि लोमविवरेषु महान्तमाद्यं ।
सृष्ट्युन्मुखः स्वकलयापि ससर्ज्ज सूक्ष्मां नित्यां समेत्य हृदये तमजं भजामि ॥
ध्यायन्ते ध्याननिष्ठाः सुरनरमनवो योगिनो योगरूढाः
सन्तः स्वप्नेऽपि सन्तं कतिकतिजनिभिर्यं नमस्यन्ति नम्रा ।
ध्याये स्वेच्छामयं तं त्रिगुणपरमहो निर्व्विकारं निरीहं
भक्तध्यानैकहेतोर्निरुपममचिरं श्यामरूपं दधानं ॥
वन्दे कृष्णं गुणातीतं परं ब्रह्माच्युतं यतः ।
आविर्बभूवुः प्रकृतिब्रह्मविष्णुशिवादयः ॥
ॐ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ॐ नमः सर्व्वविघ्नविनाशकाय ।
अमृतपरमपूर्व्वं भारतीकामधेन्वाः श्रुतिगणकृतवत्सो व्यासदेवो दुदोह ।
अतिरुचिरपुराणं ब्रह्मवैवर्त्तमेतत् पिवत पिवत मुग्धा दुग्धमक्षय्यमिष्टं ॥
भारते नैमिषारण्ये ऋषयः शौनकादयः ।
नित्यां नैमित्तिकीं कृत्वा क्रियामूषुः कुशासने ॥
एतस्मिन्नन्तरे सौतिमागच्छन्तं यदृच्छया ।
प्रणतं सुविनीतं तं विलोक्य ददुरासनं ॥
तं सम्पूज्यातिथिं भक्त्या शौनको मुनिपुङ्गवः ।
संपृच्छत् कुशलं शान्तः शान्तं पौराणिकं मुदा ॥
वर्त्मायामविनिर्मुक्तं वसन्तं सुस्थिरासने ।
सस्मितं सर्व्वतत्त्वज्ञं पुराणानां पुराणवित् ॥
परं कृष्णकथोपेतं पुराणं श्रुतिसुन्दरं ।
मङ्गलं मङ्गलार्हञ्च मङ्गल्यं मङ्गलालयं ॥
सर्व्वमङ्गलवीजञ्च सर्व्वदा मङ्गलप्रदं ।
सर्व्वामङ्गलविघ्नघ्नं सर्व्वसम्पत्करं परं ॥
हरिभक्तिप्रदं शश्वत् सुखदं मोक्षदं भवेत् ।
तत्त्वज्ञानप्रदं दारापुत्रपौत्रविवर्द्धनं ॥
पप्रच्छ सुविनीतञ्च विनीतो मुनिसंसदि ।
यथाकाशे तारकाणां द्विजराजो विराजते ॥

शौनक उवाच ।

प्रस्थानं भवतः कुत्र कुत आयासि ते शुभं ।
किमस्माकं पुण्यदिनमद्य त्वद्दर्शनेन च ॥
वयमेव कलौ भीता विशिष्टज्ञानवर्ज्जिताः । इत्यादिः ।——

End. दिव्या स्त्रीपूजिता येन पतिपुत्रवती सती ।
प्रकृतिः पूजिता तेन सर्व्वमङ्गलदायिनी ॥
मूलप्रकृतिरेका सा पूर्णब्रह्मस्वरूपिणी ।
सृष्टौ पञ्चविधा सा च विष्णुमाया सनातनी ॥
प्राणाधिष्ठात्री देवी या श्रीकृष्णस्य परात्मनः ।
सर्व्वासां प्रेयसी कान्ता सा राधा परिकीर्त्तिता ॥
नारायणप्रिया लक्ष्मी सर्व्वसम्पत्स्वरूपिणी ।
रागाधिष्ठात्री देवी या सा च पूज्या सरस्वती ॥
सावित्री वेदमाता च पद्मरूपा विधेः प्रिया ।
शङ्करस्य प्रिया दुर्गा तस्याः पुत्रो गणेश्वरः ॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे ब्रह्मखण्डे नारायणनारदसंवादे त्रिंशत्तमोऽध्यायः ।
समाप्तश्चायं ब्रह्मखण्डः ।

विषयः । १, २, ३ अध्याये ।—सूतेन सह ऋषीणां संवादः । गोलोकादिवर्णनं । परब्रह्मनिरूपणं । महदादिसृष्टिकथनं । नारायणाविर्भावकथनं । नारायणकृतश्रीकृष्णस्तोत्रं । शम्भोराविर्भावकथनं । तत्कृतश्रीकृष्णस्तोत्रं । विधातुराविर्भावकथनं । तत्कृतश्रीकृष्णस्तवनं । धर्मस्य प्रादुर्भावः । तत्कृतश्रीकृष्णस्तुतिः । भारत्या आविर्भावः । तत्कृतश्रीकृष्णस्तोत्रं । महालक्ष्म्या आविर्भावः । तत्कृतश्रीकृष्णस्तोत्रं । एवं दुर्गादीनामाविर्भावादिकथनं ।

४, ५, अ० ।—सावित्र्या आविर्भावादिकथनं । रतिमदनादीनामाविर्भावादिकथनं । सङ्क्षेपेण ब्राह्म वाराह-पाद्मकल्पविवरणकीर्त्तनं । अत्रान्तरे भगवतो रासमण्डलवर्णनं । राधिकाया आविर्भावकथनादिकं । तस्या लोमकूपेभ्यः गोपाङ्गनानामुद्भवकथनं । श्रीकृष्णस्य लोमविवरेभ्यः गोपानामाविर्भावकथनं । कामधेनूनामाविर्भावादिकथनं ।

६ अ० ।—श्रीकृष्णस्य अङ्गविशेषेण सृष्टिप्रक्रियाकथनं । तस्य नारायणादिभ्यो लक्ष्म्यादिदानवृत्तान्तकथनं । तत्समीपे शिवस्य दास्यप्रार्थना । सालोक्यादिषड्विधमुक्तिकथनं । श्रीकृष्णार्चनमहिमा । शिवनामोच्चारणमाहात्म्य । शिवेन

प्रत्याख्यातायाः सिंहवाहिन्या गोलोके अवस्थानादिकथनं। शिवस्तन्त्रशास्त्रं रचयिष्यतीति कथनं।

७, ८, ९ अ०।—ब्रह्माकृतसृष्टिविवरणं। शिवस्य तामसत्वं नास्तीतिकथनं। रुद्रनामकथनादिकं। नारदं प्रति ब्रह्मणः शापदानकथनं। असुरआदीनामुत्पत्तिकथनं। भूमिगर्भे मङ्गलस्य जन्मवृत्तान्तकीर्त्तनं। कद्रुवंशादिकथनं। दनुवंशादिकथनं। अश्विन्यादीनां चन्द्रपत्नीत्वकथनं। चन्द्रस्य क्षयरोगोत्पत्तिविवरणं। हरिहरयोः संवादः।

१०, ११ अ०।—कुवेरादीनां जन्मादिकथनं। सच्छूद्रकथनं। वर्णसंङ्करकथनं। घृताचीविश्वकर्म्मणोः संवादः। मातृपित्रादीनां गुरुतरागुरुतरत्वादिकथनं। मातृसम्बोधनेनैव मातृतुल्यता भवतीति कथनं। कामार्त्तस्य लघुः शापेन घृताच्याः शूद्रगृहे जन्मादिकथनं। तस्याः शापेन विश्वकर्म्मणोऽपि कारुरूपेण जन्मग्रहणकथनं। प्रयागक्षेत्रे मिलितयोः जातिस्मरयोस्तयोः संलापादिकथनं। तद्गर्भे कुण्डकारादीनामुत्पत्तिकथनादिकं। सङ्कराणामुत्पत्तिकथनं। गोदावर्य्या उत्पत्तिकथनं। गणकदैवज्ञादीनामुत्पत्तिकथनं। सम्बन्धनिरूपणं। कल्याणमित्रस्य मुनेरुत्पत्तिः। तन्नामस्मरणेन वज्रभीतिर्नास्तीति कथनं। सूर्य्यकृतविप्रस्तोत्रं। विप्रपादोदकमाहात्म्यं। वैष्णवब्राह्मणप्रशंसा।

१२, १३, १४ अ०।—नारदशापेन ब्रह्मणोऽपूज्यताकथनं। गन्धर्व्वराजस्य शिवाराधनावृत्तान्तः। तत्पुत्रत्वेन नारदस्य जन्मादिकथनं। षट्चक्रकथनं। इड़ापिङ्गलादिषोड़शनाड़ीकथनं। नारदस्य पुनः शूद्रगृहे जन्मादिकथनं। उपवर्हणनामकेन नारदेन विना कृताया मालावत्या विलापादिवर्णनं। तत्समीपे ब्राह्मणरूपेण श्रीकृष्णस्य आगमनं। कृष्णभक्तिमाहात्म्यं।

१५, १६, १७, १८ अ०।—मालावतीसमीपे स्वामिना सह मृत्युकन्याया आगमनादिविवरणं। कालादीनां रूपवर्णनं। मालावतीकालपुरुषसंवादः। आयुर्वेदागमविवरणं। धन्वन्तरि-दिवोदासादीनां ग्रन्थकथनं। ज्वरादिलक्षणचिकित्सादिकथनं। विष्णुना सह असुराणां संवादः। मालावतीकृतश्रीकृष्णस्तोत्रं। उपवर्हणस्य शरीरे श्रीकृष्णस्य अधिष्ठानकथनं।

१९, २०, २१ अ०।—महापुरुषब्रह्माण्डपावननामककवचकथनं। शङ्करकवचकथनं। शङ्करस्तवराजकथनं। कान्यकुब्जदेशे नारदस्य जन्मवृत्तान्तकथनं। द्रुमिणस्य उपाख्यानं। मातुर्मरणे अप्राप्तप्रागल्भ्यस्य नारदस्य श्रीकृष्णमन्त्रप्राप्तिविवरणं। नारदशापमोचनवृत्तान्तकीर्त्तनं।

२२, २३, २४, २५ अ०।—नारदनामनिरुक्तिः। एवं प्रचेतोदक्ष-कर्द्दम-मरीचि-

प्रभृतीनां नामनिर्व्वचनं । ब्रह्मनारदसंवादेन वेदसारकथनं । कृष्णभक्तिमाहात्म्यं । गार्हस्थ्याश्रमप्रवेशे नियमादिकीर्त्तनं । दारपरिग्रहप्रकारः । संसारस्य अनित्यताकथनादिकं । नारदस्य शिवसान्निध्यगमनविवरणं ।

२६, २७ अ०।—शिवस्य नारदाय कृष्णमन्त्रादिदानपूर्व्वकं द्विजानामाह्निकाचारकथनं । गुरुमाहात्म्यकथनं तिलकावश्यकता । शालग्रामादौ हरेरर्चनविधानं । शिलाचक्रमाहात्म्यं । श्रीकृष्णार्चनप्रकारकथनं । गृहि-द्विज-यति-वैष्णवादीनां भक्ष्याभक्ष्यकथनं । विष्णोरनिवेदितान्नजलादीनां विष्ठामूत्रसादृश्यादिकथनं । मांसादिभोजननियमकथनं ।

२८, २९, ३० अ०।—तत्त्वज्ञानकथनं । जीवस्य ब्रह्मप्रतिबिम्बत्वकथनं । ब्रह्मणो निर्गुणत्वादिकथनं । प्रकृतिलक्षणादिकथनं । वैष्णवमते ब्रह्मस्वरूपकथनं । तत्र गोलोकधामवर्णनं । गोपीकदम्बवेष्टितस्य श्रीकृष्णस्य राधया आलिङ्गितस्य परब्रह्मत्वकथनं । कृष्णनामनिर्व्वचनं । नारायणर्षेराश्रमवर्णनं । नारायणनारदसंवादः । भगवत्तत्त्वकथनं । राधायाः पूजने श्रीकृष्णस्य प्रीत्याधिक्यकथनं । इति ।

No. 1253. ब्रह्मवैवर्त्तीयगणपतिखण्डः ।

Substance, country-made yellow paper, 12 × 7 inches. Folia 134. Lines, 20 on a page. Extent, 2,680 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Generally correct.

Gaṇapati Khaṇḍa alias *Gaṇes'a Khaṇḍa*. The third part of the Brahma-vaivarta Puráṇa. According to the Nárada Puráṇa it should comprise s'lokas; the MS. under notice contains 2680 s'lokas, divided into forty-six chapters, and professes to be complete. The work is devoted to the birth, attibutes, and worship of Gaṇes'a, and forms the scriptures of the followers of that god. It is to be noted, however, that, though the praise of the elephocephalic divinity is its main object, the Vaishṇavite character of the Puráṇa is nowhere lost sight of, and ever and anon the preeminence of Kṛishṇa is prominently brought forward.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

श्रुतं प्रकृतिखण्डं तदमृतार्णवमुत्तमं।
सर्व्वोत्कृष्टमीप्सितञ्च मूढ़ानां ज्ञानवर्द्धनं ॥
अधुना श्रोतुमिच्छामि गणेशखण्डमीश्वर।
तज्जन्मचरितं नृणां सर्व्वमङ्गलमङ्गलं ॥
कथं जज्ञे सुरश्रेष्ठः पार्व्वत्या उदरे शुभे।
देवी केन प्रकारेण लेभे तादृशं सुतं ॥
स चांशः कस्य देवस्य कथं जन्म ललाभ सः।
अयोनिसम्भवः किंवा किंवाऽसौ योनिसम्भवः ॥
किंवा तद्ब्रह्मतेजो वा कियानेव पराक्रमः।
का तपस्या च किं ज्ञानं किमु+विमलं यशः ॥
अथ तस्य पुरः पूजा विश्वेषु निखिलेषु च।
स्थिते नारायणे शम्भौ जगदीशे च ब्रह्मणि ॥ इत्यादि।

End. कार्त्स्न्यञ्च ब्रह्मवैवर्त्तं श्रुत्वा यल्लभते फलं।
तत्फलं लभते मर्त्यः श्रुत्वेदं खण्डमुत्तमं ॥
वाञ्छां कृत्वा तु मनसि शृणोति परमास्तिकः।
तस्मै ददाति सर्व्वेष्टं सुरश्रेष्ठो गणेश्वरः ॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे नारायणनारदसंवादे गणपतिखण्डे षट्चत्वारिंशत्तमोऽध्यायः। इति गणपतिखण्डः समाप्तः ॥

विषयः। १ प्रथमाध्याये।—पार्व्वत्या सह स्मरहरस्य विलासमविरामं निर्व्वर्ण्य ब्रह्मादीनां नारायणसमीपगमनादिविवरणं। त्रिभुवनप्रवृत्तस्य पुरारेः पुरद्वारस्थितानामिन्द्रचन्द्रप्रभृतिदेवानां शिवस्तवनं। भूमौ शिववीर्य्यपातकथनं। नारायणनारदसंवादः।

२, ३ अ०।—पलायितान् देवान् उद्दिश्य पार्व्वत्याः शापदानकथनं। शिवकृतपार्व्वतीस्तोत्रं। कामिनीनां दुःखवर्णनं। साध्वीलक्षणादिकथनं। पुण्यकाभिधानव्रतप्रशंसा।

४, ५, ६, ७ अ०।—पुण्यकविधानं। पुण्यकव्रतकथा। पार्व्वत्या व्रतानुष्ठानमहोत्सववर्णनं। हरकृतहरिस्तुतिः। गणेश-लम्बोदर-गजाननप्रभृतिनामधेयानां कारणकथनं। सर्व्वाग्रे गणेशादिपञ्चदेवतापूजाविधानं। दक्षिणादानावश्यकता। तत्र पार्व्वत्या सह ब्रह्मादीनां वादानुवादकीर्त्तनं। पार्व्वतीकृतश्रीकृष्णस्तोत्रं।

८, ९ अ०।—गिरिजागिरिशयोः पुरतः वृद्धरूपेण श्रीकृष्णस्य गमनवृत्तान्तकथनं। पञ्चविधपितृकथनं। नानाविधमातृकथनं। पञ्चविधपुत्रकथनं। हरिभक्तप्रशंसा।

गणेशजन्मकथनं। शिवयोः समीपे आकाशवाणीविवरणं। तयोः पुत्रमुखदर्शन-वृत्तान्तकीर्त्तनञ्च।

१०, ११, १२ अ०।—गणेशाय ब्रह्मविष्णुकुवेरादीनां यौतुकदानादिकथनं। मङ्गलमहोत्सववर्णनं। मुद्रितनयनेन शनैश्चरेण सह पार्व्वत्याः संवादः। शनैश्चरस्य स्ववृत्तान्तवर्णनं। तद्दृष्टिपातेन गणेशस्य शिरोरहितत्वकथनं। गजशिरश्छेदनविवरणं। गणेशस्य मस्तकहीनदेहे गजशिरःसंयोजनं। दुर्गायाः शनैश्चराय वरदानं।

१३, १४, १५, १६ अ०।—गणेशनामाष्टककथनं। गणेशपूजास्तवकवचादिकथनं। भूपतितशैववीर्य्यनिक्षवविवरणं। कार्त्तिकप्रवृत्तिप्राप्तिकथनं। कार्त्तिकानयनार्थं वीरभद्रादिप्रेरणकथनं। तैः सार्द्धं कार्त्तिकस्य संवादः। स्तनदाद्यादिषोडशमातृकथनं। पार्व्वतीप्रेरितरथेन कार्त्तिकस्य कैलासागमनकथनं। पुरीप्रवेशकाले तस्य पूर्णकुम्भवेश्यादिरूपमङ्गलचिह्नसन्दर्शनं। आनन्दोत्सववर्णनञ्च।

१७, १८, १९, २० अ०।—कुमाराभिषेकमहोत्सववर्णनं। विघ्नेशस्य शिरोनाशरूपविघ्नकारणकथनं। शङ्करप्रभाकरयोर्विरोधकीर्त्तनं। शङ्करं प्रति कश्यपस्य शापदानकथनं। मालि-सुमालिनोः कथा। व्याधिनाशनसूर्य्यकवचादिकथनं। गणेशस्य गजास्ययोजने विशेषकारणकथनं। पुष्पभद्रानदीतीरे रम्भया सह कामिनः शक्रस्य संवादकथनं। तयोर्जलक्रीड़ादिवर्णनं। तत्र दुर्व्वाससः आगमनादिविवरणं।

२१, २२, २३, २४, २५ अ०।—इन्द्रस्य पुनः लक्ष्मीप्राप्तिविवरणं। लक्ष्मीस्तवकवचपूजादिविधानं। शक्र-सनक-सनन्द-सनातनप्रभृतीनां क्षीरसागरगमनपूर्व्वकं महालक्ष्मीसन्दर्शनवृत्तान्तकथनं। लक्ष्मीचरित्रकीर्त्तनं। गजाननस्य एकदन्तधारणकारणकथनं। जमदग्निसमीपे कार्त्तवीर्य्यार्ज्जुनस्य आतिथ्यग्रहणवृत्तान्तकीर्त्तनं। कामधेनुशरीरात् सैन्योत्पत्तिकथनं। जमदग्निकार्त्तवीर्य्यार्ज्जुनयोर्युद्धवर्णनं।

२६, २७, २८, २९, ३० अ०।—तयोर्विधातृकृतसन्धिसंस्थापनकथनं। पुनस्तयोर्युद्धवर्णनं। जमदग्निनिधनकथनादिकं। अग्निदगरदादिकादशविधवधार्हकथनं। रेणुकाभृगुसंवादः। सहमरणकथनं। ब्रह्मोपदेशात् भृगोः शिवलोकगमनादिवृत्तान्तकथनं। तत्कृतशिवस्तोत्रं। तस्य महादेवात् दिव्यास्त्रादिलाभकथनं।

३१, ३२, ३३, ३४ अ०।—त्रैलोक्यविजयश्रीकृष्णकवचकथनं। श्रीकृष्णपूजादिविधानं। श्रीकृष्णस्तोत्रकीर्त्तनं। परशुरामस्य प्रयाणकाले मङ्गललक्षणसन्दर्शनविवरणं। तस्य स्वप्नदर्शनविवरणं। कार्त्तवीर्य्यार्ज्जुन-रामदूतयोः संवादः। मनोरमासमीपे कार्त्तवीर्य्यार्ज्जुनस्य निजदुःस्वप्नवृत्तान्तकथनं।

३५, ३६, ३७, ३८, ३९ अ०।—कार्त्तवीर्य्यस्य दैववाणीश्रवणविवरणं। यात्राकाले अनिष्टसूचकचिह्नकथनं। ब्राह्मणलक्षणं। मुनिलक्षणं। योगिलक्षणं। हरिभक्तलक्षणं। रामार्ज्जुनयोः सङ्ग्रामवर्णनं। शिवकवचकथनं। रामकृतकालीस्तोत्रं। दशाक्षरमहाविद्याकवचकथनं। रामस्य क्षत्रियकुलनाशनप्रतिज्ञादिकथनं। तस्य वृद्धब्राह्मणेन सह संवादः। महालक्ष्मीकवचादिकीर्त्तनं।

४०, ४१, ४२ अ०।—रामकृत-पद्माक्ष-पुष्कराक्षनाशनकथनं। परशुरामस्य मूर्च्छादिकथनं। अर्ज्जुननिपातनं। राधा-लक्ष्मी-सावित्रीप्रभृतीनां श्रीकृष्णशक्तिविशेषत्वकथनं। परशुरामं प्रति ब्रह्मणो जनकादिषु पूज्यतरपूज्यतमादिनिर्द्देशेन वन्दनाकरणोपदेशः। रामस्य शिवसमीपगमनादिविवरणं। कैलासवर्णनं। गणेशरामयोः संवादः। ज्ञानस्वरूपनिरूपणं।

४३, ४४, ४५, ४६ अ०।—गणेशदन्तभङ्गादिविवरणं। दुर्गायाः खेदवर्णनं। रामं प्रति तस्याः कोपादिकथनं। गणेशस्य परमरूपवर्णनं। पुत्रनामाष्टकस्तुतिः। विष्णूपदेशेन रामकृतदुर्गास्तोत्रं। गणेशस्य कृष्णरूपत्वेऽपि तुलस्या पूजननिषेधः। तुलसीगणेशयोः संवादकीर्त्तनं। एतत्पाठादिफलश्रुतिः॥ इति।

No. 1254. अमृतसागरी, वा लीलावतीविवृतिः।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 68. Lines, 23 on a page. Extent, 1,607 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Prose. Incorrect.

Amṛita-ságarí alias *Líláratí-virṛiti.* A commentary on the *Líláratí* section of the *Siddhánta S'iromaṇi.* By Gaṅgádhara, son of Govardhana, and grandson of Divákara, of the Vastu race, an inhabitant of the town of Jambusara, which had been established by the renowned sage Yájṇavalkya. The *Siddhánta S'iromaṇi* was written by Bháskara A'chárya, son of Mahes'vara.

Beginning. ॐ नमो गणेशाय। श्रीसूर्य्याय नमः।

आदित्यं जगदुद्भवस्थितिविभुं+ + + + + +
ध्येयं ब्रह्म षडूर्म्मिदोषरहितं पश्यन्ति ये हृद्गतं।
भक्तानाञ्च मनोरथार्थफलदं क्लेशान्वयच्छेदकं
गीतं सश्रुतिभिः सदोदयमहं वन्दे जगद्भास्करं॥

गुरोरङ्घ्रिपद्मद्वयञ्च प्रणम्य प्रसीदन्मुखं सिन्धुरास्यं गणेशं ।
जगद्बोधरूपां मतिं विश्वमायां गिरां चेश्वरीं ब्रह्मपुत्रीं प्रसन्नां ॥
महेश्वरोऽभूच्च महेश्वरस्य प्रसादलब्धोदयबुद्धिवृद्धिः ।
तस्यात्मजो भास्करलब्धबोधः श्रीभास्कराचार्य्य इति प्रसिद्धः ॥
वेदोपवेदवेदाङ्गवेत्ता विश्वैककोविदः ।
गणितज्ञो गुणाग्रीयो गणनायां द्विजोत्तमः ॥
ब्रह्मादिर्जगदादिकालकलना पञ्चप्रकारागणिः
खेटानाञ्च सवासनाञ्च दिवि यद् गोलप्रपञ्चस्थितिः ।
यन्त्राणि द्विविधञ्च यन्त्रगणितं तेन क्रमाद्विस्तृतं
तत्सिद्धान्तशिरोमणौ तु कविना श्रीभास्करेण स्फुटं ॥
विष्णुस्वरूपं गणितं रहस्यं व्यक्तमिति द्विधा यतः + + + ।
गुरुप्रसादाभ्यसनैर्विदित्वा + + + श्रीमान् महतोऽपि मोहात् ॥
अव्यक्तवीजभूतत्वाद् गणितं वीजसञ्ज्ञितं ।
व्यक्तञ्च पाटीगणितं प्राहुर्गणितवित्तमाः ॥
तत्र लीलावती नाम गणकोत्तमपाटिका ।
रचिता भास्करेणान्यपाटिकोक्तस्वरूपिणी ॥
श्रीयाज्ञवल्क्यमुनिवर्य्यकृतप्रतिष्ठं जम्बूसरो नगरमस्ति सुतीर्थरम्यं ।
धीमांस्तु वस्तुकुलजोऽत्र दिवाकर + ज्ञानादिवाकर इति प्रथितो द्विजोऽभूत् ॥
श्रीगोवर्द्धनपादपद्मशरणेनान्तःपवित्रात्मवान्
सद्वृत्तः सुयशाः परोपकृतिकृद्दीने दयालुः कृती ।
श्रीगोवर्द्धनसञ्ज्ञितो द्विजवरः ख्यातोऽस्ति भूमण्डले-
+ + + + + + + + + + ॥
तत् सूनोरनुजो + + धीमान् लक्ष्मीधरोऽद्भुतात् ।
गङ्गाधरकृपालब्धो दयागङ्गाधराह्वयः ॥
तेन ख्यातदिवाकरात्मसुधिया विद्वत्सुखप्रीतिदा
सन्देहार्त्तिविनाशिनी गणकधीवृद्धिप्रदारभ्यते ।
श्रीगोवर्द्धननन्दनेन विमला लीलावतीपाटिका-
टीका चामृतसागरीति सरला गङ्गाधरेण स्फुटं ॥
श्रीभास्कराचार्य्य इष्टदेवताप्रणामपूर्व्वकमित्यादिः ।

End. लब्धं दीपोच्चमुभयतोऽपि तुल्यमेव १५६ हस्ताः १२, एवं पञ्चसप्तराशिकाद्यखिलं
वैराशिकेन सिद्धं, सूत्रार्थं स्वयमेव निगदितं तथा तन्नोक्तमिति ।

Colophon. श्रीगणकगङ्गाधरकृता लीलावतीविवृतिः समाप्ता ।

विषयः । भास्कराचार्य्यकृतसिद्धान्तशिरोमण्यन्तर्गत-लीलावत्या व्याख्यानं ।

No. 1255. नाममाला ।

Substance, country-made yellow paper, 12 × 7 inches. Folia, 32. Lines, 25 on a page. Extent, 900 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose and verse. Generally correct.

Námamálá. A dissertation on the merits of repeating the names of Hari, Hara, &c. as a means of salvation. Author's name not known.

Beginning. यन्नामकीर्त्तनादेव सद्यः पापक्षयो भवेत् ।
तमहं संस्मरामीशं शिवं कृष्णं विमुक्तये ॥
ननु नामकीर्त्तनात् सद्यः पापक्षयप्रतिपादकमन्त्रार्थवादेतिहासपुराणोपपुराण-संहितागमादीनां कर्म्मानुष्ठानादिपराणां स्वार्थेऽपि प्रामाण्यं नास्तीति चेत् । इत्यादिः ।

End. तत्र अतिशयाधानं पूर्णत्वेनैव निराकृतं । माला-करणं वारयति निरञ्जन इति निर्म्मलः ।

Colophon. इति नाममाला ।

विषयः । हरिहरादिनामकीर्त्तनात् पापक्षयप्रतिपादकवाक्यानामपि मानान्तरसंवादवि-संवादयोरभावात् स्वार्थेऽपि प्रामाण्यमस्तीति मतसंस्थापनादिकं । अर्थवादवि-चारः । नामकीर्त्तनमाहात्म्यकथनं । हरिहरनाम्नां मोक्षसाधनज्ञानसाधनत्व-प्रदर्शनं । तेषां चतुर्व्वर्णसाधनत्वकथनञ्च । नामविशेषकीर्त्तने फलविशेष-कथनं । नाममाहात्म्यस्तोत्रकथनादिकं ।

No. 1256. मन्त्रमहोदधिः ।

Substance, country-made yellow paper, 12 × 7 inches. Folia, 122. Lines, 26 on a page. Extent 3,766 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Some parts have been destroyed by worms. Prose and verse. Generally correct.

Mantra-mahodadhi. A compendium of the various mystic formulas and mantras used in worshipping Hindu divinities, and the routine of worship. By Mahidhara, the commentator of the White Yajur Veda. The mantras are all taken from the Tantras, the ritual is throughout Tántric, and the writer evinces a leaning for the S'ákta cult, but the mantras of Vishṇu, Gaṇes'a, Gopála, &c. are all included in the work.

Beginning. प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुं ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिं ॥
प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजं ।
आवश्यकं विनिर्व्वर्त्य स्नातुं यायात् सरित्तटे ॥
श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत् ।
स्मार्त्तसन्ध्यां मन्त्रसन्ध्यां कृत्वा देवं विचिन्तयेत् ।
गृहद्वारमथागत्य द्वारपूजां समारभेत् ।
द्वारमस्त्राम्बुना प्रोक्ष्य गणेशं चोर्द्ध्वतो यजेत् ॥
महालक्ष्मीं दक्षभागे वामभागे सरस्वतीं ।
पुनर्दक्षे यजेद्विघ्नं गङ्गाञ्च यमुनामपि ॥
पुनर्वामे क्षेत्रपालं ससिन्धुयमुने अपि ।
पुनर्दक्षे तु धातारं विधातारन्तु वामतः ॥ इत्यादिः ॥

End. प्रयोगानपि तच्चोक्तान् प्रकुर्य्यादिष्टसिद्धये ।
एवं यो भजते नित्यं श्रीमङ्गोपालसुन्दरीं ।
सर्व्वान् कामानवाप्यान्ते सायुज्यं ब्रह्मणो व्रजेत् ॥

Colophon. इति श्रीमहीधरविरचिते मन्त्रमहोदधौ द्वाविंशस्तरङ्गः ॥ २२ ॥ हरये नमः ।

विषयः । प्रथमतरङ्गे ।—प्रातःकृत्यादिकथनपूर्व्वकं सामान्यतो भूतशुद्ध्यादिनिरूपणं । २ तरङ्गे ।—गणेशमन्त्रनिरूपणादिकं । ३ तरङ्गे ।—कालीसुमुखीमन्त्रादिकथनं । ४ तरङ्गे ।—तारामन्त्रादिनिरूपणं । ५ तरङ्गे ।—तारामन्त्रभेदकथनं । ६ तरङ्गे ।—छिन्नमस्तामन्त्रादिकथनं । ७ तरङ्गे ।—यक्षिण्यादिमन्त्रप्रजादिनिरूपणं । ८ तरङ्गे ।—बालालघुश्यामामन्त्रादिनिरूपणं । ९ तरङ्गे ।—अन्नपूर्णामन्त्रादिकथनं । १० तरङ्गे ।—बगलामुखीमन्त्रादिनिरूपणं । शकटाभिधमहाविद्याकथनं । फलादिनिरूपणञ्च । ११ तरङ्गे ।—श्रीविद्यादिनिरूपणं । १२ तरङ्गे ।—श्रीविद्यायाः परिवारपूजनादिप्रकारकथनं । १३ तरङ्गे ।—हनूमन्मन्त्रादिकथनं । १४ तरङ्गे ।—विष्णुमन्त्रादिनिरूपणं । १५ तरङ्गे ।—सूर्य्यादिमन्त्रादिनिरूपणं । १६ तरङ्गे ।—शिवादिमन्त्रनिरूपणादिकं । १७

तरङ्गे।—कार्त्तवीर्य्यमन्त्रादिकथनं। १८ तरङ्गे।—कालरात्रि-चण्डिकादि-मन्त्रकथनं। १९ तरङ्गे।—ताम्रचूड़ादिमन्त्रकथनं। २० तरङ्गे।—यन्त्रनिरूपणं। २१ तरङ्गे।—नित्यपूजाप्रकारादिकथनं। २२ तरङ्गे।—गोपालसुन्दर्य्यादिपूजादिनिरूपणं। (अत्र तरङ्गसङ्ख्यावैषम्यं दृश्यते)।

No. 1257. पद्मपुराणीयसृष्टिखण्डः।

Substance, country-made yellow paper, 13 × 7 inches. Folia, 295. Lines, 20 on a page. Extent 7,006 s'lokas. Character, Bengali. Date, Sk. 1725. Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Very incorrect.

Padma Purána, Srishṭi Khanḍa. The Padma is the second of the eighteen great Puráṇas; it comprises 55,000 s'lokas, divided, according to its own statement, into five khanḍas or parts, each of which may be looked upon as a separate work. A sixth part, the *Kriyáyogasára* is usually added, and it is, perhaps, the most popular of all, being met with more frequently than the others (*ante* p. 113), but as it is not included in the abstracts of the different Puráṇas given in the Nárada Puráṇa, it is obvious that it originally formed no part of the Padma Puráṇa, and can only be looked upon as an apocryphal work; in fact according to native opinion this and the Brahma-vaivarta are the least trustworthy of Puráṇas. Professor Wilson has published a detailed account of the whole of the Padma Puráṇa (*Journal R. A. S.*, V. pp. 280 *et seq. Miscellaneous Essays*, I, pp. 21 *et seq.* Preface to the Vishṇu Puráṇa, pp. xxix *et seq*); and the following is his remark on the character of the part (the first) under notice:—

"The Paushkara, or *Sr'ish'ti Khanḍa* consists of forty-six chapters and about 8500 stanzas. Lomaharshaṇa, the disciple of Vyása, sends his son Ugras'ravas the Súta to Naimisháran'ya, to relate the Puráṇas to S'aunaka and other R'ishis assembled at that place. At S'aunaka's request he communicates to them that Puráṇa, which, from its containing an account of the lotus (Padma), whence Brahmá appeared in order to create the world, is termed the Pádma Puráṇa. Súta, in replying, proclaims also his right by birth and profession to narrate the Puráṇas, which were in the present Kalpa imparted by Vishṇu in

the Matsya avatára to Brahmá, and by him to the gods in the first instance, and in the second to Lomaharshaṇa, by Vyása, who was a form of Brahmá. We have here also the assertion that the Puráṇas consisted originally of 100 kot'ís, a thousand million of stanzas, of which 400,000 were thought sufficient for the instruction of man—the rest being preserved by the gods. Súta then recapitulates all that he purposes to narrate to the R'ishis, the whole of which he says was formerly imparted by Brahmá to his will-begotten son, the patriarch Pulastya, by whom it was related at Gaṅgádwára to Prince Bhíshma; in fact, therefore, Pulastya is the person to whom this portion of the Pádma Puráṇa is properly to be ascribed."

It may be noted here that, for reasons already referred to in different parts of these "Notices," I do not subscribe to the date assigned to the different Puráṇas by the learned Professor. The fact of the extent of the whole work, 55,000 verses, being noticed by Chand in the 12th century, is of itself enough to show that the work existed long before that poet. Quotations from the work are frequently met with in works of the 9th, 10th and 11th centuries. I should add, however, that the work has been very carelessly preserved, and there are unmistakable interpolations in different parts of it.

Beginning. स्वस्थं चन्द्रावदातं करिकरमकरक्षोभसञ्जातफेनं
ब्रह्मोद्भूतं प्रसक्तैर्व्रतनियमपरैः सेवितं विप्रमुख्यैः ।
ॐकारालङ्कृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टिपूतं
सम्भोगाभोगरम्यं जलमशुभहरं पौष्करं वः पुनातु ॥

सूतमेकान्तमासीनं व्यासशिष्यं महामतिं ।
लोमहर्षणनामा वै उग्रश्रवसभाषत ॥
ऋषीणामाश्रमांस्तात गत्वा धर्म्मान् समासतः ।
पृच्छतां विस्तराद् ब्रूहि यन्मत्तः श्रुतवानसि ॥ इत्यादिः ।

End. ततस्तु दानवा भीष्मा ऊचुः सर्व्वगुरुं वचः ।
दीक्षास्तु च महाभाग भूतः कालाग्रतःस्थितान् ॥
तथात्कलोश्मना + ह समता+ पुरोहितः ।
प्रमाणं वान्यदेवेषु कर्त्तव्यं न कदाचन ॥
एकस्य चैव + भक्तं भोक्तव्यं कर + पुटैः ।

Colophon. इत्यादिमहापुराणे पाद्मे सृष्टिखण्डः समाप्तः ।

विषयः। शरयुग्मागेन्दुशाके वृषराशौ मघीतुते।
सम्पूर्णं स्यात् पूर्व्वभाद्रपदे कृष्णतृतीयके॥

१ प्रथमाध्याये,—सूतेन सह ऋषीणां संवादः। सूतस्य जन्मादिविवरणं। पुराणावतारविवरणञ्च।

२ अ०,—प्रतिसञ्चारादिकथनप्रश्नः। अष्टाङ्गार्घ्यकथनं। ब्रह्मपुलस्त्यसंवादः। पुलस्त्यभीष्मयोः संवादः। महत्तत्त्वादिसृष्टिप्रकारकीर्त्तनं।

३ अ०,—कालपरिमाणादिकथनं। पृथ्वीकृतवराहस्तुतिः। चतुर्व्विधसृष्टिकीर्त्तनं। विशेषेण ब्राह्मणक्षत्रियादीनामुत्पत्तिकथनं। तेषामाचारादिकथनं। ब्रह्मणो भृगुपुलस्त्यप्रभृतिनवमहर्षिमानसपुत्रसर्ज्जनादिकथनं। पुष्टितुष्टिमेधादीनां पुत्रादिकथनं। शिवस्य अष्टमूर्त्तिस्थानादिकथनं।

४, ५ अ०,—ख्यातिगर्भजाताया लक्ष्म्याः समुद्रकन्यात्वप्राप्तिविवरणं। दुर्व्वासस इन्द्रं प्रति शापदानादिवृत्तान्तः। समुद्रमन्थनविवरणं। नारदकृतविष्णुस्तोत्रं। सतीकृतदक्षयज्ञवर्णनं। सतीपुरतो दक्षस्य शिवनिन्दादिकरणं। सतीदेहत्यागः। दक्षकृतशिवस्तुतिः।

६, ७ अ०,—दक्षप्रजापतेर्वंशकथनं। वस्वादीनामुत्पत्तिकथनं। काश्यपानामुत्पत्तिकीर्त्तनादिकं। ज्येष्ठपूर्णिमाव्रतविधानादिकथनं। गर्भिण्या नियमादिकथनं। ऊनपञ्चाशन्मारुतानामुत्पत्तिः। मन्वन्तरवर्णनं।

८, ९ अ०,—पृथिवीनामनिर्व्वचनं। पृथोरुपाख्यानं। सावर्णिकमनोरुत्पत्तिकथनादिकं। यमयमुनयोरुत्पत्तिकथनं। यमस्य तपस्यादिवर्णनं। मनुवंशकीर्त्तनं। इलोपाख्यानं। सूर्य्यवंशकथनं। पितृवंशकथनं। नर्म्मदाया उत्पत्तिकथनं। श्राद्धे वर्ज्यावर्ज्यकथनं। श्राद्धविधानं। मन्वन्तरकथनं। साधारणादिश्राद्धभेदकथनं।

१०, ११ अ०,—एकोद्दिष्टश्राद्धविधिः। मृताहे पार्व्वणनिषेधः। विश्वामित्रपुत्राणामुपाख्यानं। योगिनां चक्रवाकत्वप्राप्तिकथनादिकं। पिपीलिकोपाख्यानं। विधिघर्म्मविन्दुजातपुरुषभयात् शिवस्य विष्णुभवनपलायनादिविवरणं। अर्ज्जुनस्य त्रिपुरुषजातत्वविवरणकीर्त्तनं। नरनारायणसम्भवकथनादिकं। बालिसुग्रीवप्रभृतीनां जन्मकारणादिकीर्त्तनं। गार्हपत्यादिवह्निविवरणं। ब्रह्ममुखाद् वेदप्रवृत्तिकथनं। ब्रह्मशिरश्छेदनादिकथनं।

१२ अ०,—ब्रह्मणो यज्ञानुष्ठानविवरणं। तेन सह तरूणां संवादः। पुष्करतीर्थोत्पत्तिविवरणं। ब्राह्मी दीक्षा। म्लेच्छादीनामपि पुष्करतीर्थे मरणे ब्रह्मलोकावाप्त्यादिकथनं। आश्रमधर्म्मकथनं। गोपकुमारीवेशधारिण्या कयाचित् कामिन्या सह इन्द्रस्य संवादः। गायत्रीतिसमाख्यया तया सह ब्रह्मणो विवाहकथनं।

विषयः। १३ अ०,—ब्रह्मयज्ञानुष्ठानकाले (युष्माकं कुले अवतरिष्याम्यहं) इति गोपान् प्रति विष्णोर्वरदानविवरणं। तत्र कपर्दिना सह ब्राह्मणानां संलापः। सावित्री-गृहे लक्ष्मीसतीप्रभृतीनामागमनविवरणकथनं। इन्द्रोपेन्द्रादीन् प्रति सावित्र्याः शापदानकथनं। लक्ष्मीसत्यादिकमुद्दिश्य तथा तस्याः शापदानञ्च। विष्णुकृत-दुर्गाशतनामस्तोत्रकीर्त्तनं। कार्त्तिकपौर्णमास्यां ब्रह्मपूजनादिफलकथनं।

१४, १५, १६, १७ अ०,—सरस्वतीमाहात्म्यं। उत्तर-पश्चिमवाहिन्योर्गङ्गासर-स्वत्योर्विशेषेण माहात्म्यकीर्त्तनं। ज्येष्ठकुण्डमाहात्म्यादिकथनं। सरस्वत्या नन्देति-नामकारणकथनं। राज्ञा सह हरिण्याः संवादः। तत्प्रति तस्याः शापदानं। व्याघ्ररूपेण तेन सह नन्दायाः सवत्सायाः संवादः।

१८ अ०,—पुष्करतीर्थस्य परिमाणादिकथनं। कालेयेतिनामधेयदानवहन्द-विप्रकृतानां देवादीनां चेष्टादिवर्णनं। अगस्त्यविन्ध्ययोरुपाख्यानं। अगस्त्यस्य समुद्रपानविवरणं। तत्र स्थितैः कालेयसञ्ज्ञकैः दानवैः सार्द्धं देवानां युद्धवर्णनं। अगस्त्यकुण्डमाहात्म्यकथनं। सप्तर्षीणामाश्रमकथनं। दानदमादिप्रशंसा। अन्तत-क्रोधादिनिन्दनं। कात्यायनजमदग्निप्रभृतीनां विषसोल्यकथनं।

१९, २० अ०,—लावण्यवतीपुण्यप्रवाहयोरुपाख्यानं। तालव्रत-प्रीतिव्रत-गौरीव्रत-सरस्वतीव्रतप्रभृतिनानाविधव्रतविधानं। धर्म्मनित्यमहिष्या भानुमत्याः पुरतः वशिष्ठस्य लक्ष्मीलाभोपायकथनादिकं। लीलावतीतिनामधेयाया वेश्याया उपा-ख्यानं। विशोकद्वादशीव्रतविधानं। गुड़धेनुक्षीरधेनुसुवर्णधेनुदानप्रभृतिव्रत-कथनं। लवणाचल-धान्याचलादिदानविधानं। सौरव्रतविधानं। सकलसप्तमी-संसारसप्तमीप्रभृतिव्रतविधानञ्च।

२१, २२ अ०,—अगस्त्यस्य जन्मादिविवरणं। अनन्तफलदतृतीयाव्रतविधानं। गौरीव्रतादिविधानं। द्वारकायाः कुशस्थलीतिपूर्व्वनामकथनं। भगवता द्वैपायन-रौहिणेय-कृष्णेति त्रिविधावतारप्रयोजनादिकीर्त्तनं। भीमद्वादशीविवरणं। ना-रायणमेव पतित्वेन लब्धुं नारीणां तपस्यादिवर्णनं। मन्मथव्रतविधानं। भार्गव-विरोचनसंवादकीर्त्तनं। अङ्गारकचतुर्थीव्रतविधिः।

२३, २४, २५ अ०,—आदित्यशयनकथनं। तड़ागारामकूपादिप्रतिष्ठादौ वेद्या-दिनिर्म्माणविधिः। रोहिणीचन्द्रशयनव्रतविधानं। तड़ागादिप्रतिष्ठाविधिः। अश्वत्थादिवृक्षरोपणादिविधिः। सौभाग्यशयनव्रतविधिः। वसन्तशुक्लतृतीयायां शिवाशिवयोर्विवाहोत्सवविधिकीर्त्तनं।

२६, २७ अ०,—भगवतो वामनलीलादिवर्णनं। विष्णुपदोत्पत्तिविवरणं। नाग-तीर्थकथनं। ब्रह्मनागगणसंवादः। सर्पभयनिराकरणोपायकथनं। हृदनासक-

दैत्येन सह देवानां युद्धवर्णनं। शिवदूत्या आविर्भावादिविवरणं। केन कर्म्मणा प्रेतत्वमुपजायते तत्कथनादिकं।

२८ अ०,—मार्कण्डेयोत्पत्तिविवरणं। अत्रिणा सह राघवस्य समागमवृत्तान्तादिकथनं। रामचन्द्रस्य स्वप्नविवरणं। स्वप्ने दृष्टस्य मृतस्य श्राद्धकर्त्तव्यता। ब्राह्मणभोजनकाले सीताया अपमानवृत्तान्तकीर्त्तनं। रामचन्द्रादीनां पुष्करतीर्थगमनकथनं। श्रीरामकृतशङ्करस्तोत्रं। मार्कण्डेयाश्रमवर्णनं।

२९, ३० अ०,—यज्ञानुष्ठानकाले ब्रह्मणा प्रेरितस्य विष्णोः सावित्रीसमीपगमनवृत्तान्तकथनं। सावित्र्या सह गौर्य्यादीनां कथोपकथनं। विष्णुकृतब्रह्मस्तुतिः। लेमङ्कर्य्या उत्पत्तिकथनादिकं। पञ्चपातकनाशनादिकथनं। वशिष्ठश्वेतराजसंवादः। विनीताश्वराजोपाख्यानं। ब्रह्माण्डदानविधानं। दैत्यसैन्यवर्णनं।

३१, ३२, ३३ अ०,—दानवैः सह देवानां युद्धवर्णनं। और्व्वस्य जननादिविवरणं। वज्राङ्गकृतशचुदन्धनकथनं। तारकासुरजन्मकीर्त्तनं। सुरतारकयोः सङ्ग्रामवर्णनं। देववृन्दकृतब्रह्मस्तोत्रं। विभावरीब्रह्मसंवादः। पार्व्वत्या उत्पत्तिकथनादिकं। नारदहिमालयसंवादः। पिनाकपाणेः समाधिभङ्गाय कुसुमशरस्य प्रयाणादिवर्णनं। रतिकृताशुतोषस्तवनादिकं। पार्व्वत्यास्तपस्यादिवर्णनं। गौरीविवाहकथनं। पार्व्वतीगात्रमलात् गणानामुत्पत्तिकथनं।

३४, ३५, ३६ अ०,—कुमारसम्भवकथनं। पितृमाहात्म्यकथनं। केदार-गङ्गासागर-ब्रह्मसरः कुरुक्षेत्र-रामेश्वरप्रभृतितीर्थकथनं। श्राद्धकालनिरूपणादिकं। सोमोत्पत्तिकथनं। ताराहरणविवरणं। राजपुत्रापराभिधेयस्य बुधस्य जन्मादिकथनं। यदुवंशकथनं।

३७ अ०,—क्रोष्टुवंशवर्णनं। मायामोहकर्तृकदैत्यमोहनवृत्तान्तकीर्त्तनं। मणिहरणोपाख्यानं। चार्व्वाकमतस्त्रपातः। कृष्णादीनां जन्मकथनादिकं। सङ्क्षेपेण दशावतारप्रयोजनकीर्त्तनं। शुक्रस्य तपस्यादिकथनं। इति समाप्तिः।

No. 1228. कथासरित्सागरसारः।

Substance, country-made paper, 14 × 6 inches. Folia, 914. Lines 30 on a page. Extent, 27,420 s'lokas. Character, Bengali. Date, Samvat 1682. Place of deposit, S'rírámpur College. Appearance, new. Verse. Incorrect.

Kathásaritságara alias *Vrihatkathá-ságara*, or *Vrihatkathá*. "The Watery Ocean of Stories," a large collection of entertaining stories.

By Bhaṭṭa Somadeva. The character of this work is already well known to European scholars through the notices published by Wilson and others; and the whole of the text has been brought out, partly in Sanskrit and partly in Roman type, by the learned Professor Weber (*Abhandlungen* II to IV.); it is not necessary therefore to enter at length into its history. The headings of the stories are given below in Sanskṛit. The MS. is dated Samvat 1682, and is nearly two hundred and fifty years old.

Beginning. श्रियं दिशतु वः शम्भोः श्यामः कण्ठो मनोभुवा ।
अङ्कस्थपार्व्वतीदृष्टिपाशेनेव विचेष्टितः ॥
सन्ध्यान्टत्योत्सवे धारा + + + डूय विघ्नजित् ।
शीत्कारशीकरै रत्याः सत्यपन्निव पातु वः ॥
प्रणम्य वाचं निःशेषपदार्थद्योतदीपिकां ।
बृहत्कथासागरस्य सङ्ग्रहं रचयाम्यहं ॥
आद्यमत्र कथापीठं कथामुखमतः परं ।
ततो लावणको नाम तृतीयो लम्बको भवेत् ॥
नरवाहनदत्तस्य जननञ्च ततः परं ।
स्याच्चतुर्द्दारिका चाथ ततो मदनमञ्जुका ॥
ततो रत्नप्रभा नाम लम्बकः सप्तमो भवेत् ।
सूर्य्यप्रभाभिधानश्च लम्बकश्चाष्टमो भवेत् ॥
अलङ्कारवती नाम ततः शक्तियशा भवे ।
वेलालम्बकसञ्ज्ञश्च भवेदेकादशस्ततः ॥
शशाङ्कवत्यपि ततस्ततश्च मदिरावती ।
महाभिषकनामा च ततः स्यात् पञ्चलम्बकः ॥
ततः सुरतमञ्जर्य्यप्यथ पद्मावती भवेत् ।
ततो विषमशीलाख्यो लम्बकोऽष्टादशो भवेत् ॥
यथा मूलं तथैवैतन्न मनागप्यतिक्रमः ।
ग्रन्थविस्तरसङ्क्षेपमात्रं भाषा च विद्यते ॥
औचित्यान्वयरक्षा च यथाशक्त्या विधीयते ।
यथा रसाभिघातेन काव्यांशस्य च योजना ॥
वैदग्ध्यख्यातिलोभाय मम नैवायमुद्यमः ।
किन्तु नानाकथाजालस्मृतिसौकार्य्यसिद्धये ॥ इत्यादिः ।

End. एवं मद्वचनोद्गतां पठति यो यो वा शृणोत्यादराद्
यश्चैतां + कथां बिभर्त्ति न चिरात् सोऽध्वस्तपापः कृतः।
सद्विद्याधरतामवाप्य नियतं लोकं मम प्राप्नुयाद्-
इत्यस्याश्च वरं तदा गिरिसुता कान्तः कथा + ददौ ॥

Colophon. इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे विषमशीललम्बके पञ्चमस्तरङ्गः ॥
आदितश्चतुर्विंश + रशतं, समाप्तश्चायं वृहत्कथासागरसङ्ग्रहः ॥
इदं गुरुगिरीन्द्रजाप्रणयमन्दरान्दोलनात्
पुरा किल कथामृतं हरमुखाम्बुधेरुद्गतं।
प्रसह्य रमयन्ति ये विगतविघ्नबन्ध+यो
धुरन्दधति वैबुधीं भुवि भवप्रसादेन ते ॥०॥
श्रीसातवाहनकुलाम्बुधिपारिजातः सङ्ग्रामराज इति भूमिपतिर्बभूव।
येनावतीर्य्य विविधैर्विबुधैः श्रितेन काश्मीरमण्डलमनीयत नन्दनत्वं ॥०॥
तस्यात्मजो + + शेषमहीशमौलिमाणिक्यरत्ननिकषीकृतपादपीठः।
श्रीमाननन्त इति तत् + + + + + + शौर्य्यैकराशिरुदपद्यत चक्रवर्त्ती ॥०॥
द्वाराग्रसीमनि च यस्य विकृत्तकण्ठः छिन्नोदरं नरपतर्लुठति स्म मूर्द्धा।
सेवागतो जितमहाहरिचक्रचार—कीर्त्तिः शरेण परितोषमिवेत्य राज्ञः ॥
सोऽथ त्रिगर्त्ताधिपतेस्तनूजां राजेन्दु + + वहति स्म देवीं।
तमोपहां सूर्य्यवं+ प्रजानां विभातसन्ध्यामिव विश्ववन्द्यां ॥
(आम्नायैरिव नानादेशसमुद्भूतविप्रशतसेव्यैः,
अ + भिरिव रत्नभृ + + + ति भृतां भूभृतामपि शरण्यैः।
कल्पद्रु + रिवान्वाहमाश्रयगतार्त्तिहारिभिरुदारैः,
देव्या यथा विरचितैः काश्मीरमण्डितमठप्रवरैः।)
यत्रि + र्मितान्यमलतोयटहद्वितस्ता विस्तीर्णतीरभुवि सौधसुधासितानि।
व्योमापगा परिगतान्तहिमाद्रिशृङ्ग + + + + + + सुतरां सुरमन्दिराणि ॥०॥
द + रसङ्ख्यमणिहेममहार्घ्यहार—कृष्णाजिनद्रविणपर्व्वतगोसहस्रः।
विश्वम्भरा रचना + पिट + + + विश्वं सदा भगवती किल या बिभर्त्ति ॥
क्ष्मामण्डलैकतिलकोऽप्यनली + + श—यस्याननास्तसमपो गुणि + + + + ।
+ + शिवोऽपि शिवावतारः श्रीमान् सुतः कलसदेव इति क्षितीशः ॥
उर्व्वीभृतो नमयितुं निखिलानुदग्रान् यो+हमश्वजलधीनपि सप्त धीरः।
हृष्टः सुरैरभिनवः कलसोद्भवो यः श्रीहर्षदेव इति नप्तृवरः स यस्याः ॥
तस्याः सदैव गिरिशार्चनहोमकर्म्म—यानप्रधानविधिबद्धसमुद्यमायाः।

शास्त्रेषु नित्यविहितश्रवणश्रमाया देव्याः क्षणं कमपि चित्तविनोदहेतोः ॥
नानाकथामृतमयस्य बृहत्कथायाः सारस्य सज्जनमनोऽम्बुधिपूर्णचन्द्रः ।
सोमेन विप्रवरभूरिगुणाभिरामरामात्मजेन विहितः खलु सङ्ग्रहोऽयं ॥
(प्रविततनरभङ्गिकथासरित्सारा + × + विरचितोऽयं ।)
सोमेनामलरुचिना हृदयानन्दाय भवतु सताम् ॥

संवत् ॥ १६८२ ॥ भाद्र २४ ॥

विषयः । १ पीठलम्बकस्य प्रथमतरङ्गे,—अनुक्रमणिका । कैलासगिरिवर्णनादिप्रस्तावः । २ त०,—वररुचिभूतपुष्पदन्तस्य काणभूतिप्राप्तिविवरणं । वर्षाचार्य्यकथा च । ३ त०,—काणभूतिं प्रति वररुचिवाक्यं । ४ त०,—वररुचेरात्मपत्नीप्राप्त्यादि-विवरणं । ५ त०,—योगानन्दशकटारयोरुपाख्यानादिकं । ६ त०,—गुणाढ्यस्य विन्ध्यवासिनीस्थानगमनादिवृत्तान्तः । ७ त०,—सर्व्ववर्म्मणं प्रति कार्त्तिकेय-प्रसादकथनं । व्याकरणोत्पत्त्यादिप्रश्नः । ८ त०,—गुणाढ्यस्य काणभूतिप्रमुखात् कथाश्रवणपुरःसरं पैशाचभाषया ग्रन्थशतरचनादिप्रस्तावः । इति पीठलम्बकः समाप्तः ॥ १ ॥

२ कथामुखलम्बकस्य प्रथमतरङ्गे,—ग्रन्थप्रशंसानन्तरं विद्याधरकथाप्रकाशानुक्रम-णिकादिवर्णनं । २ त०,—सहस्रानीकस्य मृगावत्यन्वेषणार्थं गमनादिप्रस्ता-वना । ३ त०,—तस्य पुनः उदयनाभिधेयपुत्रराज्याभिषेकविवरणं । ४ त०,—वासवदत्ताविवाहार्थं वत्सराजानयनाय महागजप्रेरणादिविवरणं । ५ त०,—वत्सराजस्य बन्धनं । तं प्रति वासवदत्ताया अनुरागादिवर्णनञ्च । ६ त०,—तया सह वत्सेशस्य विवाहादिवर्णनादिकं । इति कथामुखलम्बकः समाप्तः ॥ २ ॥

३ लावणकलम्बकस्य प्रथमतरङ्गे,—मगधेशदुहित्रा पद्मावत्या सह वत्सराजस्य विवाहार्थं यौगन्धरायणरुमण्वतोर्वासवदत्ताक्षेत्रसहायमन्त्रणादिकीर्त्तनं । २ त०,—पद्मावतीं भर्त्तुर्बहुमतां निर्व्वर्ण्य वासवदत्तायाः प्रकृताग्निप्रवेशकरणनिश्चयादि-विवरणं । ३ त०,—ऊर्व्वश्या सह पुरूरवसः सङ्गमनविवरणं । विहितसेनस्य राज्ञ उपाख्यानं । पाटलिपुत्रस्यधर्म्मगुप्तादीनामुपाख्यानं । ४ त०,—वत्सराजस्य कौशाम्बीप्रवेशविवरणं । गोपालकसंवादः । आदित्यसेनादीनामुपाख्यानं । विदू-षकस्य विवाहः । ५ त०,—देवदासादीनामुपाख्यानं । वत्सराजदिग्विजयवर्णनं । ६ त०,—अग्निदत्तपुत्रादीनामुपाख्यानं । कार्त्तिकेयजन्मविवरणं । सुन्दरको-पाख्यानं । इति लावणकलम्बकः समाप्तः ॥ ३ ॥

४ नरवाहनदत्तजननलम्बकस्य प्रथमतरङ्गे,—वत्सराजस्य चक्रवर्त्तित्वेन पृथिव्युप-भोगवर्णनादिकं । तेन सह नारदस्य संवादः । २ त०,—जीमूतवाहनस्य उपा-

विषयः। ख्यानं। वासवदत्ताया गर्भवृत्तान्तः। ३ त०,—वासवदत्तायाः स्वप्नवृत्तान्तः। विक्रमचण्डाख्यकाशीराजस्य उपाख्यानं। नरवाहनस्य जन्मादिविवरणं।

इति नरवाहनदत्तजननलम्बकः समाप्तः।

५ चतुर्दारिकालम्बकस्य प्रथमतरङ्गे,—कनकरेखाया उपाख्यानं। बालकभक्षकस्य उपाख्यानं। २ त०,—राजकन्यालाभार्थं वर्द्धमानपुरात् कनकपुरीं प्रति प्रस्थितस्य सत्यव्रतस्य उपाख्यानं। गोविन्दस्वामिन उपाख्यानं। नूपुरानयनार्थमशोकदत्तस्य श्मशानगमनादिविवरणं। ३ त०,—अर्णवमार्गेण गच्छतोः सत्यव्रतशक्तिदेवयोरावर्त्तमध्ये प्रवहणनिमज्जनात् वृत्तमेकमत्स्यामाद्य लब्धजीवितयोः पक्षिसाहाय्येन अभीष्टस्थानगमनादिवृत्तान्तकथनं। इति चतुर्दारिकालम्बकः समाप्तः।

६ मदनकञ्चुकालम्बकस्य प्रथमतरङ्गे,—नरवाहनदत्तस्य विद्याभ्यासादिकथनं। तक्षशिलाधिपस्य कलिङ्गदत्तस्य उपाख्यानं। २ त०,—चित्रकूटाधिपतेः सुषेणस्य उपाख्यानं। कलिङ्गसेनाया उपाख्यानं। ३ त०,—कलिङ्गसेनासमीपे सोमप्रभाया निजपूर्व्वजन्मवृत्तान्तकीर्त्तनं। ४ त०,—कलिङ्गसेनां पश्यतो मदनवेगाख्यविद्याधरकिशोरस्य चेष्टावर्णनादिकं। स्वभर्त्तुः प्रवयस्तया दुःखितायाः सोमप्रभायाः प्रमुखात् वत्सराजगुणान् आकर्ण्य कलिङ्गसेनायास्तं प्रति अनुरागादिकीर्त्तनं। विक्रमादित्योपाख्यानं। ५ त०,—पित्रा अन्यस्मै प्रदेयात्मानं निश्चित्य तस्याः सोमप्रभया सह कौशाम्बीगमनोपायादिचिन्तनं। उषानिरुद्धयोरुपाख्यानं। ६ त०,—यौगन्धरायणोद्योगेन तया सह वत्सराजस्य विवाहप्रस्तावादिकथनं। ७ त०,—वासवदत्तापद्मावत्यादीनां वत्सराजेन समं संलापः। गोकर्णाधिपस्य श्रुतसेनस्य उपाख्यानं। ८ त०,—निशीथसमये कलिङ्गसेनासमीपे उपस्थितस्य वत्सेशस्य तया सार्द्धं कथोपकथनादिकं। इन्द्रदत्तस्य उपाख्यानं। नरवाहनदत्तस्य यौवराज्याभिषेकः। मदनकञ्चुकाया रूपं निरीक्ष्य तस्य चेष्टादिवर्णनं। तया सह तस्य परिणयवर्णनञ्च। इति मदनकञ्चुकालम्बकः समाप्तः॥

७ रत्नप्रभालम्बकस्य प्रथमतरङ्गे,—एकदा उपवनं गतस्य नरवाहनस्य समीपे अशोकपादपमूलस्थिताया अदृष्टचरायाः कामिन्या निजपरिचयदानविवरणं। हेमप्रभनामकविद्याधरस्य उपाख्यानं। विक्रमतुङ्गराजस्य उपाख्यानं। रत्नप्रभया सह नरवाहनस्य विवाहः। २ त०,—रत्नकूटद्वीपाधिपतेरुपाख्यानं। ३ त०,—उज्जयिनीस्थवणिक्कुमारस्य उपाख्यानं। ४ त०,—पाटलिपुत्रस्थविक्रमादित्यस्य उपाख्यानादिकं। ५ त०,—वर्द्धमानपुरस्थवीरभुजन्टपस्य उपाख्यानादिकथनं। ६ त०,—यौगन्धरायणपुत्रेण मरुभूतिना सह गोमुखनामधेयस्य वत्सराजमन्त्रिणो वाक्कलहवर्णनं। प्रतिष्ठानपुरस्थस्य तपोदत्तनामकद्विजस्य उपाख्यानादिकथनं।

विषयः। ७ त०,—चिरायुरिति नामकस्य राज्ञ उपाख्यानादिकीर्त्तनं। ८ त०,—मृगयार्थं वनप्रविष्टेन नरवाहनदत्तेन सह तापस्याः संवादः। कर्पूरिकाया उपाख्यानं। ९ त०,—गोमुखसमीपे नरवाहनदत्तस्य स्वप्नवृत्तान्तकथनं। स्वप्नदृष्टदेशमुद्दिश्य चलितस्य गोमुखमात्रसहायस्य तस्य पुरतः पथिककर्तृकं काञ्चीपुरस्थबाहुबलनामकभूपालस्य उपाख्यानादिकीर्त्तनं। कर्पूरिकापरिणयानन्तरं पुनस्तस्य स्वदेशागमनविवरणं। इति रत्नप्रभालम्बकः समाप्तः॥

८ सूर्य्यप्रभालम्बकस्य प्रथमतरङ्गे,—वज्रप्रभनामकविद्याधरस्य उपाख्यानादिकथनं। चीनदेशाधिपतिपौरवनामकनृपतेः कन्याया वीरभटादिराजकुमारीणाञ्च उपाख्यानं। २ त०,—चन्द्रप्रभस्य राज्ञः पुरतो भूमिं विदार्य्य मयासुरस्य उद्गमनविवरणं। सूर्य्यप्रभ-सुनीथप्रभृतीनामुपाख्यानं। ३ त०,—सूर्य्यप्रभाय प्रह्लादस्य यामिनीनामिकाकन्यादानविवरणं। ४ त०,—श्रुतशर्म्माणमभियोधयितुं मयेन सह सूर्य्यप्रभस्य प्रयाणवर्णनं। ५ त०,—तयोर्युद्धविवरणं। ६ त०,—उज्जयनीस्थमहासेनस्य राज्ञ उपाख्यानादिकीर्त्तनं। ७ त०,—महादेवाज्ञया तयोः सन्धिकरणपुरःसरं सूर्य्यप्रभश्रुतशर्म्मणोः स्वस्थानगमनादिविवरणं। सूर्य्यप्रभस्य कामचूड़ामणितनयापाणिग्रहणादिवृत्तान्तकथनं। इति सूर्य्यप्रभालम्बकः समाप्तः॥

९ अलङ्कारवतीलम्बकस्य प्रथमतरङ्गे,—महारण्यमध्ये नरवाहनदत्तस्य दिव्यवीणारवोन्मिश्रसङ्गीतश्रवणविवरणं। श्रीसुन्दरपुरवासिनोऽलङ्कारशीलनामकविद्याधरस्य उपाख्यानं। अलङ्कारवत्या सह नरवाहनस्य विवाहः। २ त०,—पितुरनुज्ञया वसन्तकेन समञ्चालङ्कारवत्या तस्य श्वशुरालयगमनादिविवरणं। ३ त०,—लक्षपुरस्थस्य लक्षदत्तनामकस्य नृपस्य उपाख्यानं। विक्रमपुरस्थविक्रमतुङ्गनरपतेरुपाख्यानादिकथनं। ४ त०,—नारिकेलद्वीपवासिनां रूपसिद्धिप्रमाणसिद्धिप्रभृतीनामुपाख्यानं। ५ त०,—कनकपुराधिपतेरुपाख्यानादिकं। ६ त०,—कमलपुराधिवासिचन्द्रस्वामिद्विजस्य उपाख्यानं। सुरपुराधिनाथस्य सूरसेनस्य उपाख्यानादिकथनं। इति अलङ्कारवतीलम्बकः समाप्तः॥

१० शक्तियशोलम्बकस्य प्रथमतरङ्गे,—उदयनराजनामाङ्कितरत्नकटकापहारवृत्तान्तकथनं। पाटलिपुत्रस्थशुभदत्तनामकवाहकस्य उपाख्यानं। चित्रकूटनगरस्थरत्नवर्म्मनामकधनपतेरुपाख्यानं। २ त०,—प्रतिष्ठाननगराधिपतेः विक्रमसिंहस्य उपाख्यानं। बलवर्म्मण उपाख्यानादिकीर्त्तनं। ३ त०,—नरवाहनस्य अकस्माद् विद्याधरीगणदर्शनविवरणं। काञ्चनपुरीमहेन्द्रस्य सुमनस उपाख्यानादिकथनं। ४ त०,—शूरवर्म्मण उपाख्यानं। पिङ्गलनामकसिंहस्य उपाख्यानादिकथनं। ५ त०,—वाणिजकपुत्रस्य मुग्धबुद्धेरुपाख्यानं। लघुपातीतिनामककाकस्य उपा-

विषयः। ख्यानं। अजागरस्य उपाख्यानादिकथनञ्च। ६ त०,—काकराजस्य मन्त्रिणाम् उड्डि-व्याड्डिप्रभृतीनामुपाख्यानं। ७ त०,—यशोधरलक्ष्मीधरनामकयोः यम-जयोः सहोदरयोरुपाख्यानं। ८ त०,—देवशर्म्मण उपाख्यानं। घट-कर्पटनाम-कयोश्चौरयोरुपाख्यानादिकं। ९ त०,—पित्रा निराकृतस्य सभार्य्यस्य कस्यचिद्वणिज उपाख्यानं। वज्रवेगाभिधानविद्याधरस्य उपाख्यानादिकथनं। १० त०,—काश्मीरीयविजयक्षेत्रस्थस्य परिव्राजकस्य उपाख्यानं। दक्षिणापथस्थस्य पृथ्वीपते-रुपाख्यानं। क्षेमप्रभाप्रव्राजिकयोरुपाख्यानं। इति शक्तियशोलम्बकः समाप्तः॥

११ वेलालम्बकस्य प्रथमतरङ्गे,—रुचिरदेव-पोतकयोरुपाख्यानं। चन्द्रसारस्य उपाख्यानं। इति वेलालम्बकः समाप्तः॥

१२ शशाङ्कवतीलम्बकस्य प्रथमतरङ्गे,—नरवाहनदत्तस्य अद्भुतस्वप्नदर्शनवृत्तान्तकथनं। कान्यकुब्जस्थशूरदत्तनामकद्विजतनयस्य उपाख्यान। ललितलोचनया सह नरवाहनस्य विवाहः। २ त०,—अयोध्याधिपस्य मृगाङ्कदत्तस्य उपाख्यानं। ३ त०,—विसूचिकारोगाक्रान्तस्य अमरदत्तस्य पुत्रकृतोऽयमभिचार इति मन्यमानस्य निजतनयमृगाङ्कदत्तनिर्व्वासनादिविवरणं। निर्व्वासितस्य मृगाङ्कदत्तस्य शशाङ्कवतीं प्रति अनुरागादिवर्णनञ्च। ४ त०,—शशाङ्कदत्तस्य जलमानुषहृत-शावरभूपालोद्धरणं। तत्समीपे मयूरूपस्य भीमपराक्रमाभिधानस्य मन्त्रिणो निजवृत्तान्तकीर्त्तनं। कनकमञ्जर्य्या उपाख्यानादिकथनं। ५ त०,—तत्पुरतो गुणाकरस्य निजवृत्तान्तकथनं। विन्ध्यपर्व्वतस्थवराहस्य उपाख्यानादिकं। पाञ्चालदेशस्थितस्य देवभूतिद्विजस्य उपाख्यानं। केदारगिरिस्थस्य शुभनयमुनेरुपाख्यानादिकञ्च। ६ त०,—त्रिगर्त्तनगरीस्थस्य द्विजकिशोरस्य उपाख्यानं। भूनन्दस्य भूपतेरुपाख्यानं। पद्मिष्ठाया उपाख्यानं। वेतालसाधकस्य उपाख्यानं। श्रीदर्शनस्य चानङ्गमञ्जरीपरिणयादिविवरणं। ७ त०,—मृगाङ्कदत्तस्य स्वभृत्येन गजरूपधारिणा शक्तिना सह साक्षात्कारादिविवरणं। अयोध्यापतेः श्रुतधरस्य उपाख्यानं। भीमभटेन सह मृगाङ्कस्य मित्रतादिकथनं। ८ त०,—तत्समीपे विक्रमकेशरिणो निजवृत्तान्तवर्णनं। गोदावरीतीरस्थदेशाधिपतेः विक्रमसेनस्य शान्तशीलाख्यभिक्षूपदेशेन वेतालानयनादिविवरणं। अत्र, १ प्रथमवेताले,—वाराणसीराजतनयस्य वज्रमुकुटस्य उपाख्यानं। ९ त०, २ वेताले,—मन्दारवत्या उपाख्यानं। १० त०, ३ वेताले,—पाटलिपुत्रस्थविक्रमकेशरिण उपाख्यानं। ११ त०, ४ वेताले,—शूद्रकन्पतेरुपाख्यानं। १२ त०, ५ वेताले,—सोमप्रभाया उपाख्यानं। १३ त०, ६ वेताले,—मदनसुन्दर्य्या उपाख्यानं। १४ त०, ७ वेताले,—सत्त्वशीलस्य उपाख्यानं। १५ त०, ८ वेताले,—विष्णुस्वामिपुत्राणामुपाख्यानं। १६

विषयः। त०, ९ वेताले,—वीरदेवनृपतेरुपाख्यानं। १७ त०, १० वेताले,—मदनसेनाया उपाख्यानं। १८ त०, ११ वेताले,—धर्म्मध्वजभूपालस्य उपाख्यानं। १९ त०, १२ वेताले,—अङ्गदेशाधिपस्य यशःकेतोरुपाख्यानं। २० त०, १३ वेताले,—विद्याधरकर्तृकहरिस्वामिकामिनीहरणोपाख्यानं। २१ त०, १४ वेताले,—रत्नदत्तसुताया रत्नावल्या उपाख्यानं। २२ त०, १५ वेताले,—यशःकेतुतनयायाः शशिप्रभाया उपाख्यानं। २३ त०, १६ वेताले,—जीमूतवाहनस्य उपाख्यानं। २४ त०, १७ वेताले,—उन्मादिन्या उपाख्यानं। २५ त०, १८ वेताले,—चन्द्रस्वामिन उपाख्यानं। २६ त०, १९ वेताले,—धनवत्या उपाख्यानं। २७ त०, २० वेताले,—चित्रकूटाधिपस्य चन्द्रलोकस्य उपाख्यानं। २८ त०, २१ वेताले,—अनङ्गमञ्जर्य्या उपाख्यानं। २९ त०, २२ वेताले,—कुसुमपुरस्थविष्णुस्वामिकुमाराणामुपाख्यानं। ३० त०, २३ वेताले,—शोभावतीनगरीस्थयज्ञसोमकुमारस्य वेदसोमस्य उपाख्यानं। ३१ त०, २४ वेताले,—चन्द्रवतीलावण्यवत्योरुपाख्यानं। ३२ त०, २५ वेताले,—विक्रमसेनस्य सन्न्यासिशिरश्छेदनादिविवरणं। ३३ त०,—मृगदत्तेन सह श्रुतशीलद्विजस्य कथोपकथनादिकं। गणाधिपप्रसादेन निद्रासमये मृगाङ्कस्य शशाङ्कवतीलाभोपायादिपरिज्ञानविवरणं। ३४ त०,—तत्समीपे व्याघ्रसेनस्य निजवृत्तान्तकथनादिकं। ३५ त०,—मृगाङ्कस्य उज्जयिनीप्रवेशविवरणं। उज्जयिनीपतेः कर्म्मसेनस्य समीपे तत्कृतदूतप्रेरणादिकञ्च। ३६ त०,—शशाङ्कवतीपरिणयादिविवरणं। इति शशाङ्कवतीलम्बकः समाप्तः॥

१३ मदिरावतीलम्बकस्य प्रथमतरङ्गे,—मदनमञ्चुकाभिलाषव्याकुलस्य नरवाहनदत्तस्य मलयाचलपरिभ्रमणादिविवरणं। तत्र ब्राह्मणकुमारयोरुपाख्यानं।
इति मदिरावतीलम्बकः समाप्तः॥

१४ पञ्चलम्बकस्य प्रथमतरङ्गे,—अङ्गिरस उपाख्यानादिकं। नरवाहनस्य गन्धर्व्वनगरप्रयाणादिकथनं। २ त०,—वीणादत्ताभिधानगन्धर्व्वकर्तृकं कूपपतितनरवाहनदत्तोद्धरणं। गन्धर्व्वदत्ताया उपाख्यानं। तया सह नरवाहनस्य विवाहादिवर्णनं। ३ त०,—ऋष्यमूकगिरिस्थितस्य नरवाहनस्य समीपे प्रभावत्या आगमनादिविवरणं। तत्र विद्याधरसुन्दर्य्योरागमनवृत्तान्तकथनं। नरवाहनस्य विद्याप्राप्तिः। सुलोचनापरिणयानन्तरं तस्य पुनः चक्रवर्त्तित्वलाभविवरणं। ४ त०,—नागस्वामिन उपाख्यानादिकथनं। इति पञ्चलम्बकः समाप्तः॥

१५ महाभिषेकलम्बकस्य प्रथमतरङ्गे,—विद्याधरमात्रसहायस्य नरवाहनस्य वामदेवमुनेराश्रमगमनादिविवरणं। २ त०,—नरवाहनस्य कनकवत्यादिपाणिग्रहणविवरणं। ऋषभपर्व्वते तस्य महाभिषेकविवरणं। वासवदत्ता-वत्सेश-यौगन्धरायणप्रभृ-

विषयः। तेनोस्तत्र गमनादिवृत्तान्तकथनं। इति महाभिषेकलम्बकः समाप्तः॥

१६ सुरतमञ्जरीलम्बकस्य प्रथमतरङ्गे,—वसन्तकाले नरवाहनस्य मन्दाकिनीतीर-परिभ्रमणविवरणं। शूरसेनराजपत्न्याः सुषेणाया उपाख्यानं। २ त०.—सुरत-मञ्जर्य्या उपाख्यानादिकथनं। ३ त०,—नरवाहनं प्रति कश्यपमुनेरुपदेशदानं। चन्द्रालोकनामकस्य शिवराजस्य उपाख्यानं। इति सुरतमञ्जरीलम्बकः समाप्तः॥

१७ पद्मावतीलम्बकस्य प्रथमतरङ्गे,—सार्द्धं स्त्रीभिः कश्यपाश्रममधिवसतो नरवाहनस्य मदनमञ्चुकाविरहखिन्नस्य पुरतो मुनीनां विविधोपन्यासकथनादिकं। बुधदत्तस्य वाराणसीपतेरुपाख्यानं। २ त०,—विद्युत्प्रभनामकस्य दैत्येन्द्रस्य उपाख्यानादि-कथनं। ३ त०,—विद्युद्ध्वजेन सह देवानां युद्धवृत्तान्तकथनं। गन्धर्व्वराजकुमार्य्याः पद्मावत्या उपाख्यानकथनादिकं। ४ त०,—पद्मावत्या विरहवर्णनादिकं। सख्या सह तस्याश्चन्द्रपुरगमनादिविवरणं। पद्मावत्याः स्वप्नदर्शनादिवृत्तान्तकथनं। ५ त०,—शिवमर्चयन्त्यास्तस्या दैववाणीश्रवणादिविवरणं। मेरुध्वजपुत्रयोः मुक्ता-फलध्वजमलयध्वजयोरुपाख्यानं। ६ त०,—तयोः पद्मावतीस्वयम्प्रभाभ्यां सह विवाहवर्णनं। इति पद्मावतीलम्बकः समाप्तः॥

१८ विषमशीललम्बकस्य प्रथमतरङ्गे,—अवन्तिदेशाधिपस्य महेन्द्रादित्यस्य उपाख्याना-दिकथनं। २ त०,—दुन्दुभिनामकयक्षराजदुहितुर्मदनमञ्जर्य्या उपाख्यानं। टि-ण्टाकरालोपाख्यानादिकं। ३ त०,—उज्जयिनीनाथस्य विक्रमादित्यस्य सिंहले-श्वरकन्यापरिणयादिविवरणं। तस्य पुनः मलयवती-चन्द्रावत्यादिपाणिग्रहणवर्ण-नञ्च। ४ त०,—विक्रमादित्यसमीपे राज्ञ्या अनङ्गवत्याः कार्पटिकोपाख्यानकथ-नं। कटाहद्वीपाधिपतेरश्वत्थनामकस्य नृपस्य उपाख्यानादिकथनं। विषमशीलो-पाख्यानं। ५ त०,—विक्रमादित्यसमीपे कस्यचित् मृतभार्य्याजीवनप्राप्तिविवरण-कथनं। कलिङ्गाधिपतेरुपाख्यानं। नरवाहनेन सह मदनमञ्चुकासमागमविव-रणञ्च। कविपरिचयः। समाप्तिः॥

No. 1259. आदिकाण्डमनोहरा।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 25. Lines, 9 on a page. Extent, 900 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Ádikáṇḍa-manohará. A commentary on the first book of Válmíki's Rámáyaṇa. By Lokanátha Chakravartí. The most approved commen-

tary is that by Nílakantha, and an edition of it is now in course of publication by Hemachandra Bandyapádhyáya.

Beginning. नत्वा रघूत्तममयं परमं महस्तत्क्लेशवन्धुनिचयान्धतमोनुनोदं ।
श्रीलोकनाथबुध एष मनोहराख्यां रामायणस्य विदुषां प्रमुदे तनोति ॥
आस्ते यदा विमलबोधसुबोधटीका स्...ज्ञतज्ञरचिता च मनोज्ञरूपा ।
अत्रापि सारपरमस्य विमत्सरस्य श्रीलोकनाथरचितैव मनो विधत्ते ॥
प्रतिकल्पं श्रीरामायणपुराणेतिहास+ + +मनोनैर्मल्यद्वारा श्रवणद्वारा मननादिद्वारा वा तत्त्वज्ञानोपपादकाः सन्त्येव यद्यपि, तथापि तास्तपोविद्याविमर्षशीलिनो भगवतः कस्यापि स्वकर्तृत्वेन यशोऽर्पयन्त्यः प्रतिकल्पं विलसन्तीति अस्मिन् कल्पे अखिलभुवनभवनानेकचित्रनिर्म्माणचतुरेण ब्रह्मणा तदर्थं+पितामिस्ताभिश्च भगवान् वाल्मीकिरेव यशोभागीकृतः, तत्र काण्डसप्तकश्रीरामायणकर्त्ता वाल्मीकिस्तत्र प्रवृत्तावधिकवालचरितवर्णन एव आदिकाण्डस्य प्रवृत्तिः, तत्र सर्गाश्चतुःषष्टिरेव वृत्तान्ताः, छ्यशीतिरिति अस्मदकृतोऽपि वृत्तान्तानुक्रमेणैव, तत्र भगवतो वाल्मीकस्य करतलायितभुवनतदाश्रयवृत्तान्तस्य यद्युपदेशापेक्षापि नापेक्षिता, तथापि विनोपदेशं तत्पुनर्युगस्य अवैदिकत्वेन श्रीमद्भगवन्नारदोपदेशस्यापि वृत्तत्वेन प्रथमं भगवता नारदेन सप्तकाण्डार्थं उपदिष्ट इति । प्रथमसर्गे स एव प्रस्तूयते भगवता वाल्मीकेन । तत्र,—

"नमस्तस्मै मुनीन्द्राय श्रीयुताय तपस्विने ।
शान्ताय वीतरागाय वाल्मीकाय नमो नमः ॥"

इति प्रथमतो विमलबोधाः सम्प्रदायविरुद्धमपि पठन्ति. व्याचक्षते च इत्यादिः ।

End. श्रिततरो विनीततरः ॥ १४ ॥ देवान् यौवराज्ये अभिषेचनं याचन्त प्रार्थयन्ते।

Colophon. इति लोकनाथचक्रवर्त्तिकृतायामादिकाण्डमनोहरायां रामाभिषेकव्यवसायः ।

विषयः । वाल्मीकिकृतरामायणादिकाण्डस्य व्याख्यानं ।

No. 1260. अयोध्याकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 48. Lines, 10 on a page. Extent, 1,909 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Ayodhyákánda-manohará. The second book of the work noticed in the preceding No. 1259.

Beginning. श्रीरामो जयति । अञ्जलिमालाः अञ्जलिश्रेणीः । प्रतिगृह्य दर्शनेन स्वीकृत्य ॥ १ ॥

End. व्यतिक्रमादिति अड़ागमाभाव आर्षः । व्यत्यक्रामदिति वा पाठः ॥ ६ ॥

Colophon. इति श्रीलोकनाथचक्रवर्त्तिकृतायाम् अयोध्याकाण्डमनोहरायां नन्दिग्राम-निवासः । अयोध्याकाण्डं समाप्तं ॥

विषयः । वाल्मीकिकृतरामायणायोध्याकाण्डस्य व्याख्यानं ।

No. 1261. आरण्यकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 43. Lines, 9 on a page. Extent, 1,644 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Áranyakánḍa-manohará. The third book of the work noticed under No. 1259.

Beginning. ॐ नमो रामाय । तपोवनं तपोवने वा पाठः ॥ १ ॥ तापसो वानप्रस्थ आश्रमो येषां ते, राममाश्रित्य अवलम्ब्य दृष्ट्वा इत्यर्थः । इत्यादिः ।

End. आसनानां स्वस्तिकपद्मादीनां, नियमः नियमासनं तत्रैव पूजाकाले अर्पितं प्राप्तं सुखमारम्भो यैः, न पुनरनियतासनैरित्यर्थः ।

Colophon. इत्यारण्यकाण्डस्य श्रीलोकनाथचक्रवर्त्तिकृता मनोहरा समाप्ता ।

विषयः । वाल्मीकिकृतरामायणारण्यकाण्डस्य व्याख्यानं ।

No. 1262. किष्किन्ध्याकाण्डमनोहरा ।

Substance, country-made yellow paper, 16 × 4½ inches. Folia, 48. Lines, 10 on a page. Extent, 1,665 s'lokas. Character, Bengal. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. .Prose. Incorrect.

Kishkindhyákánḍa-manohará. The fourth book of the work noticed under No. 1259.

Beginning. नत्वा रघूत्तममयं परमं महस्तत्कृष्णबन्धुनिचयान्धतमोनुनोदं । श्रीलोकनाथबुध एष मनोहराख्यां रामायणस्य विदुषां प्रमुदे तनोति ॥

किष्किन्ध्याकाण्डपदानां व्याख्यानमघुनादरात् ।
कलयन्तु बुधाः काममुत्साय्र्य परमत्सरं ॥
तत्र किष्किन्ध्याशब्दो निर्यकारः सयकारश्च, मूर्द्धन्यमध्यमः । इत्यादिः ।

End. प्रवद्न्तमङ्गदं, तथेत्यब्रुवन् सचान्वितः सत्वरं जगाम इत्यन्वयः ॥ १४ ॥ पितृराजः, धर्म्मराजः ॥ १५ ॥

Colophon. इति श्रीलोकनाथचक्रवर्त्तिकृता किष्किन्ध्याकाण्डमनोहरा समाप्ता ।

विषयः । वाल्मीकिकृतरामायणकिष्किन्ध्याकाण्डस्य व्याख्यानं ।

No. 1263. पद्मपुराणीयपातालखण्डः ।

Substance, country-made yellow paper, 7 × 5 inches. Folia, 165. Lines, 31 on a page. Extent, 5,115 s'lokas Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Verse. Generally correct.

Pátála khanda of the Padma Purána. This is the fourth part of the second great Purána by Vyása. It comprises nine thousand slokas, divided into one hundred and two chapters. (*Ante*, p. 247). Its principal subject is a new and very diffuse version of the Rámáyana. Professor Wilson has given a full analysis of this work, (*Essays* I, pp. 45ff.) and to it I must refer the reader for information on the subject. The contents of the different chapters have been detailed below in Sanskrit.

Beginning. कदाचिन् नैमिषारण्ये सूतं परमकोविदं ।
कोविदाः सर्व्वधर्म्मेषु सर्व्वयज्ञेषु कोविदाः ॥
श्रुतिस्मृतिपुराणज्ञाः सदाचारपरायणाः ।
अनूचानाः सदस्याश्च सर्व्वदा धर्म्मवादिनः ॥
केचित् स्वाध्यायनिरताः केचिद्वेदार्थतत्पराः ।
केचिदध्यात्मतत्त्वज्ञाः केचिद् योगविशारदाः ॥
तर्केषु निपुणाः केचिन् मीमांसायां विचक्षणाः ।
वेदान्तज्ञानसिद्धान्ताः सोऽहमस्मि जपे रताः ॥
वेदाभ्यासेऽतिनिपुणास्तपसा सूर्य्यवर्च्चसः ।
त्रिकालज्ञा महात्मानः स्वधर्म्मनिरताः सदा ॥

चतुःषष्टिकलाभिज्ञास्तेजसा सूर्य्यवर्चसा ।
त्रिकालध्याननिरताः सर्व्वशास्त्रविशारदाः ॥
हिमवन्निलयाः केचिन्महेन्द्रनिलयाः परे ।
विन्ध्याद्रिनिलयाश्चान्ये सह्याद्रिनिलयास्तथा ॥
श्रीशैलनिलया ये च कुरुक्षेत्रस्थिताश्च ये ।
पम्पानिवासिनो ये च कुमाराचलवासिनः ॥
मलयाचलगाः केचिन्निषिध्याचलवासिनः ।
माल्यवन्निलयाः केचित् त्रिकूटाचलवासिनः ॥
दण्डकारण्यनिलया नञ्जषारण्यवासिनः ।
चम्पकारण्यगा केचिद्दीवारण्यनिवासिनः ॥
धर्म्मारण्यरताः केचिद् गुहारण्यरतास्तथा ।
ब्रह्मारण्यरताश्चान्येऽर्बुदारण्यनिवासिनः ॥
एते चान्ये च मुनयः सशिष्या बहवो मताः ।
सन्तः ++ धना दक्षा जितमाया जितेन्द्रियाः ॥
अहङ्कारविहीनाश्च निर्म्ममाः कामवर्ज्जिताः ।
भगवद्ध्याननिरता लोकानुग्रहतत्पराः ॥
निर्म्मोहाः क्रोधनिर्मुक्ताः शान्ता निर्लोभमत्सराः ।
शमादिगुणसम्पन्ना दृढभक्ता दयालवः ॥
नारायणं जगन्नाथं सर्व्वाध्यक्षमनामयं ।
यजन्तः परया भक्त्या तत्पदाविष्टमानसाः ॥
कृष्णाजिनप्रावरणा जटिला ब्रह्मचारिणः ।
गृणन्तः परमं ब्रह्म जगच्चतुरनामयं ॥
जितनिद्रा जिताहारा द्वन्द्वदुःखसहिष्णवः ।
पश्यन्तो विष्णुरूपेण चराचरमिदं जगत् ॥
अब्भक्ष्या वायुभक्ष्याश्च शीर्णा पर्णाशनाः सदा ।
निराहारास्तथा चान्ये कन्दमूलफलाशनाः ॥
कृच्छ्रातिकृच्छ्रपाराकैस्तप्तकृच्छ्रैस्तथैन्दवैः ।
नित्यं संशोधितात्मानस्तथा सान्तपनादिभिः ॥
धर्म्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ।
एकदा मिलिताः सर्व्वे पप्रच्छुरिदमादरात् ॥
ऋषय ऊचुः । सूत सूतविदां श्रेष्ठ व्यासहार्द्दविचक्षण ॥ इत्यादिः ।

End. गङ्गायै यमुनायै च सरस्वत्यै वटाय च ।
सोमेश्वराय शेषाय माधवाय नमो नमः ॥

Colophon. इति श्रीपद्मपुराणे पातालखण्डे सूतशौनकसंवादान्तर्गतशेषसनकसंवादे शततमोऽध्यायः ।

विषयः । पद्मपुराणीयपातालखण्डीयप्रयागमाहात्म्यप्रकरणमिदं । अत्र १ प्रथमाध्याये,—सुतेन सह ऋषीणां संवादः ।

२ अ०,—देवदानवयक्षगिरिनदीवेदवृक्षशास्त्रप्रभृतीनां राजनिरूपणादिकं । शौचदयादिधर्म्मपादकीर्त्तनादिकं । स्तेयमदाद्यधर्म्मपादकथनं । कलौ नराणां प्रकृत्यादिनिरूपणं ।

३, ४ अ०,—प्रयागमाहात्म्यकथनं । भगवत्तत्त्वजिज्ञासूनां सनकादीनां पातालगमनपूर्व्वकं शेषस्तवनं । कामद-मोक्षदभेदेन तीर्थद्वैविध्यकथनं । प्रयागस्य तीर्थराजत्वनिर्व्वचनं ।

५, ६. ७, ८ अ०,—देवगणसनाथस्य नारदस्य ब्रह्मस्तवनादिविवरणं । ब्रह्मादिकृतप्रयागतुलाकरणवृत्तान्तः । प्रयागपरिमाणादिकथनं । तत्र ब्रह्मकृताश्वमेधयज्ञानुष्ठानविवरणं । तत्कृतमाधवस्तोत्रं ।

९, १० अ०,—अटतो नीलकण्ठस्य पुरतो माधवस्याविर्भाववृत्तान्तः । तत्कृतमाधवस्तोत्रं । माधवाज्ञया वटमूले शिवस्य नित्यावस्थानविवरणं । प्रयागक्षेत्रे शक्रकृतोद्यानशोभावर्णनं । इन्द्रकृतमाधवस्तोत्रादिकं

११, १२ अ०,—कामनाभेदे पुष्पविशेषेण पूजाविधानं । लक्षपुष्पपूजाविधिः । लक्षप्रदक्षिण-लक्षनमस्कार-लक्षदीपदानानां विधानं । मासविशेषे एतेषां फलविशेषकथनं ।

१३, १४ अ०,—माधवसमीपे अलौकिकरूपलावण्यशालिनीमविदितपूर्व्वां कामिनीं निरीक्ष्य लक्ष्म्यादीनां विस्मयः । अस्या जन्मादिविवरणं । विकटोपाख्यानकीर्त्तनञ्च ।

१५, १६, १७, १८ अ०,—अग्नितीर्थोत्पत्तिविवरणं । लक्षहोमविधिः । तत्र कुण्डादिनिर्म्माणप्रक्रिया । यमसमीपे वृद्धब्राह्मणरूपस्य भगवतो यत्किञ्चिद्दानेनापि महत्फलं भवतीति कथनं ।

१९ अ०,—निर्ऋतिक्षेत्रवर्णनं । विकिरनामधेयक्षेत्रवर्णनं । क्षुधार्त्तस्य भिक्षुकस्य निर्ऋतिसमीपे अन्नादिप्रार्थनावृत्तान्तः ।

२०, २१, २२, २३ अ०,—श्राद्धविधिः । श्राद्धपार्व्वणादीनां लक्षणं । तेषां नित्यत्वादिभेदकथनं । श्राद्धे पाचकभणार्थं पञ्चाधिकब्राह्मणनिमन्त्रणे दोषकथनं । श्राद्ध-

विषयः। कर्त्तुर्नियमाः। तत्र दानार्हद्रव्याणि। वर्ज्जनीयानि च। पाकविधिः। तत्र गर्भिणीमृतवत्सादिकृतपाकवर्ज्जनकथनं।

२४, २५, २६, २७ अ०,—वरुणकृतब्रह्मखातविवरणं। तत्र चक्रवाकीसमीपे पथिकस्य स्वीयवृत्तान्तकथनं। चन्द्रवतीपुरीविवरणं। मदालसोपाख्यानं। पान्थं प्रति संसारस्य अनित्यत्वं कथयन्त्याश्चक्रवाक्या निजपूर्व्वजन्मकथाकीर्त्तनं। तस्मै पुनस्तस्याः सञ्जीवनीविद्यादानं।

२८, २९, ३० अ०,—वायवीयतीर्थवर्णनं। कौवेरतीर्थकथनं। पुलस्त्योपाख्यानं। कुवेरस्य लङ्कायां निवासविवरणञ्च। हिरण्याक्ष-हिरण्यकशिपु-रावणादीनां जन्मादिविवरणं। रावणविप्रकृतस्य कुवेरस्य तपस्यावर्णनादिकं।

३१, ३२, ३३, ३४, ३५ अ०,—ईशानतीर्थवर्णनं। ईशानकृतमाधवस्तुतिः। तपश्चरता तेन सह माधवस्य संवादः। तीर्थराजश्रवणस्मरणादीनां माहात्म्यकथनं। त्रिवेणीवर्णनं। तत्र तत्परिमाणादिकथनं। प्रणवस्य त्रिवेणीत्वनिरुक्तिः। गङ्गायमुनयोः संवादः। शेषकृतवेणीस्तोत्रं।

३६, ३७, ३८, ३९ अ०,—त्रिवेण्यां चौरमाहात्म्यं। तत्र वासमरणयोः फलश्रुतिः। किञ्च जलप्रवेशेनापि अन्यथा वा तत्र मरणे नात्मघातदोष इति कथनं। तीर्थयात्राविधिः। तत्र अधिकारिनिरूपणं। नियमादिकथनञ्च। तीर्थप्राप्तप्रथमदिनकृत्यनिरूपणं।

४०, ४१, ४२, ४३. ४४ अ०,—तीर्थराजस्नानादौ सङ्कल्पकरणे पापमोचनकामनया तदुल्लेखे पापनिरूपणसङ्ख्यादिकीर्त्तनं। तत्र तर्पणविशेषनिरूपणं। स्त्रीणां रजोयोगेऽपि प्रयागस्नानादौ दोषाभावकथनं। तीर्थश्राद्धविधिः। वेणीमाधवस्य ध्यानं, षोड़शोपचारपूजामन्त्रादिकथनञ्च। वेणीमाधवयोर्युगलस्तोत्रं।

४५, ४६, ४७ अ०,—द्वात्रिंशद्विधापराधकीर्त्तनं। शिलाचक्रपरीक्षणं। पञ्चायतनपूजाविधानं। तीर्थराजे ब्राह्मणदम्पतिपूजनफलकथनं। पुराणश्रवणविधिः। तत्र वक्तृस्तात्लक्षणनियमादिकथनं।

४८, ४९, ५०, ५१, ५२ अ०,—माघस्नानफलकथनं। माघमासकर्त्तव्यसामान्यधर्म्मनिरूपणं। तत्र विशेषधर्म्मनिर्णयश्च। माघशुक्लचतुर्थ्याः कुन्दचतुर्थीतिनामकथनं। तत्र कुन्दपुष्पेण शिवार्चने फलकथनं। वसन्तपञ्चमी, तत्र वासन्तिकोत्सवविधिः। माघसप्तमीस्नानविधिः। तत्र शिरसि दीपं निधाय मौनस्नानकर्त्तव्यता। माघाष्टम्यां भीष्मतर्पणविधानं। भीमद्वादशी। महामाघीलक्षणं। माघस्नानव्रतोद्यापनविधानञ्च।

५३ अ०,—दानलक्षणं। तत्कर्त्तृकप्रशंसा। धर्म्मदानलक्षणं। अर्थदानलक्षणं। काम-

विषयः। दानलक्षणं। व्रीड़ादानलक्षणं। हर्षदानलक्षणं। भयदानलक्षणं। दानयोग्यपात्र-लक्षणं। वृत्तस्वरूपकथनं। ध्रुवाजस्रिक-काम्य-नैमित्तिकादिदानलक्षणं। नैमित्तिकदानस्यापि त्रैविध्यं। इष्टापूर्त्तादिलक्षणं।

५४, ५५, ५६, ५७ अ०,—दानकालकथनं। दानार्हद्रव्यादिनिरूपणं। प्रथम-कल्पसमर्थस्य अनुकल्पानुष्ठाने दोषकीर्त्तनं। दानभेदे दक्षिणाभेदनिरूपणं। षोड़शमहादानकथनं। गोदानविधिः। अन्नादिदानविधिकीर्त्तनञ्च।

५८, ५९, ६०, ६१, ६२ अ०,—गुप्तदानप्रशंसा। तत्र मध्यदेशस्थगुप्तधनाभिध-वैश्यस्य उपाख्यानं। कृष्णशर्म्मोपाख्यानं। गुप्तदानमाहात्म्यवर्णनं। सर्व्वस्वदान-प्रशंसा। तद्विधानकथनं। अत्र नापितकुलजातयोः कयोश्चित् सर्व्वस्वदानवृत्तान्त-कीर्त्तनं। श्रीपतिजयाभिधेययोरुपाख्यानं।

६३, ६४ अ०,—ताम्बूलदानविधिः। नागवल्लीसमुत्पत्तिविवरणं। ताम्बूलस्य पारिभाषिकलक्षणकीर्त्तनं। ब्रह्मचारिविधवादीनां ताम्बूलभक्षणप्रतिषेधः।

६५, ६६, ६७, ६८, ६९, ७० अ०,—नानायज्ञमाहात्म्यवर्णनं। एकादशीव्रतनि-र्णयः। तत्र अधिकार्य्यनुकल्पादीनां व्यवस्था। खण्डा-सम्पूर्णादीनां लक्षणकथनं वैष्णवलक्षणं। स्मार्त्तलक्षणं। एकादशीनिशाजागरणमाहात्म्यं। चण्डालब्रह्मराक्ष-सयोरुपाख्यानं। अनृतवचनं कुत्र कुत्र दोषाय न भवतीति भगवदुपदेशकीर्त्तनं।

७१, ७२, ७३, ७४, ७५ अ०,—एकादश्युत्पत्तिविवरणं। विष्णुकृतासुरदानवनाशन-वृत्तान्तकीर्त्तनं। शक्तिं प्रति विष्णोर्वरदानं। अक्षयवटमाहात्म्यं। मूलमाधव-वटमाधव-शङ्खमाधव-पद्ममाधवादीनां विवरणं।

७६, ७७, ७८, ७९ अ०,—मूलटङ्केश्वर-सूर्य्यकुण्डप्रभृतीनां विवरणं। सूर्य्यस्य तपस्यादिकीर्त्तनं। आदिवेणी आरभ्य ऋणमोचनान्तं यावत्तीर्थवर्णनं। आनन्द-काननस्थस्य वामननामकब्राह्मणस्य उपाख्यानं। पापमोचनतीर्थवर्णनं। चन्द्रपुर-निवासिनो महामतिनामकस्य विप्रस्य उपाख्यानं।

८०, ८१ अ०,—रामतीर्थविवरणं। रेणुकावधानन्तरं परशुरामकृतैतत्तीर्थनिर्म्मा-णादिवृत्तान्तकथनं। पञ्चाग्न्यादिसाधनविधिः। अत्र विशेषेण धूमपानादीनां प्रकारनिरूपणं। सरस्वतीकुण्ड-गोघट्टनतीर्थादिमाहात्म्यकथनं।

८२, ८३ अ०,—पिशाचमोचनतीर्थ-कामतीर्थ-कापिलतीर्थ-तक्षकतीर्थविवरणं। इन्द्राज्ञया अश्विनीकुमारयो रसराजापहारकतक्षकान्वेषणवृत्तान्तकथनं। कालिय-तीर्थवर्णनं। गरुड़ेन सह विष्णोर्युद्धविवरणं। कालियनाग-गरुड़योरायोधनवर्णनं।

८४, ८५ अ०,—चक्रतीर्थवर्णनं। सिन्धुसागरतीर्थकथनं। पाण्डवकुण्ड-वरुणकुण्ड-योः कथनं। भरद्वाजेश्वरविवरणं। सीतारामाश्रमकथनं। विश्वामित्र-गौतम-

वशिष्ठादीनामाश्रमकथनं। प्रयागक्षेत्रे अश्वदानोद्यतं शक्रं निरूप्य ब्रह्मसुराचार्य्ययोः संवादकथनं। भोगवतीतीर्थकथनं। गङ्गाया भोगवतीतिनामकारणकथनं। दिवोदासस्य तपस्यावर्णनं।

८६, ८७, ८८ अ०,—ब्रह्मकुण्डदशाश्वमेधिकप्रभृत्यन्तर्वेदिस्थतीर्थवर्णनं। सङ्क्षेपेण रामावतारप्रयोजनकीर्त्तनं। ऊर्व्वशीकुण्डकथनं। ऊर्व्वशीपुरूरवसोः संवादः। सुधारसतीर्थ-कोटितीर्थ-मानसतीर्थप्रभृतीनां माहात्म्यादिकथनं।

८९, ९०, ९१, ९२ अ०,—यमयमुनयोरुत्पत्तिविवरणं। तयो रूपवर्णनञ्च। यमुनामाहात्म्यकीर्त्तनं। कालिन्दीतिनामकारणकथनं। यमुनाकलिन्दपर्व्वतयोः संवादः। यमुनाया नदीभावप्राप्तिविवरणं। शान्तिपुरविवरणं। कलिन्दगिरेरारभ्य गङ्गासङ्गमपर्य्यन्तं यमुनापार्श्वस्थितानां तीर्थभूमीनां विवरणादिकं।

९३, ९४, ९५, ९६ अ०,—गङ्गामाहात्म्यं। गङ्गोत्पत्तिविवरणं। अत्र सगरस्य अश्वमेधयज्ञानुष्ठानादिकथनं। सरस्वत्या उत्पत्तिविवरणं। तस्या गर्भे वाड़वस्य जन्म, पुनस्तस्य समुद्रगर्भप्रवेशवृत्तान्तकथनञ्च। त्रिवेण्या उत्पत्तिः। वेणीदानमाहात्म्यं। त्रिवेण्यां क्षौराद्यनुष्ठाने तिथिवारादिदोषाभावकथनं।

९७, ९८, ९९, १००, हठयोगानुष्ठानप्रकारकीर्त्तनं। प्रयागमाहात्म्यश्रवणपठनादिमाहात्म्यकथनञ्च।

No. 1264. वामनपुराणं।

Substance, country-made yellow paper, 13 × 4½ inches. Folia, 198. Lines, 8 on a page. Extent, 6,336 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Verse. Very incorrect.

Vámana Puráṇa. The fourteenth of the eighteen great Puráṇas attributed to Vyása. According to the Matsya Puráṇa, "that in which the four-faced Brahmá taught the three objects of existence, as subservient to the account of the greatness of Trivikrama, which treats also of the S'iva Kalpa, and which consists of ten thousand stanzas, is called the Vámana Puráṇa." Its principal subject is the dwarf incarnation of Vishṇu, in which he overcame the giant Bali by a trick, he not being assailable by force. It is related by Pulastya in compliance with a request of Nárada. The MS. under notice is not near so extensive as what the Matsya refers to, but it corresponds closely with the extent of the codices examined by Col. Vans Kennedy and Professor

H. H. Wilson. (Wilson's *Vishṇu Purana*, pp. LXXV ff.) Wilson supposes that "the compilation of the work may have amused the leisure hours of some Brahman of Benares three or four centuries ago," but its name and quotations from it occur in compilations of the 9th, 10th and 11th centuries, and Chand, at the close of the 12th century, gives its extent in verses. The work opens with an account of the rainy season, followed by a request of Deví to S'iva to build a dwelling for their joint use. Then follows the feast of Daksha and its consequences. S'iva, having decapitated Daksha, is required to expiate his crime of Bráhmanicide by dwelling at Kapálamochana in Benares. Then comes the marriage of S'iva with the daughter of the Himálaya mountain, with the usual preludes as described in the *Kumára-sambhava.* Descriptions follow of the birth of Kartikeya and the domestic delights of S'iva, and the whole interspersed with a variety of tales and episodes. The story of the dwarf incarnation, though avowedly the main subject, is given at the end, and takes up but a small portion of the work. Wilson justly observes that the work "divides its homage between S'iva and Vishṇu with tolerable impartiality."

Beginning. ॐ नमो भगवते वासुदेवाय ।

पुलस्त्यमृषिमासीनमाश्रमे वाग्विदां वरं ।
नारदः पर्य्यपृच्छत्तं पुराणं वामनाश्रय ॥
कथं भगवता ब्रह्मन् विष्णुना प्रभविष्णुना ।
वामनत्वं धृतं पूर्व्वं तन्ममाचक्ष्व पृच्छतः ॥
कथं वा वैष्णवो भूत्वा प्रह्लादो दैत्यसत्तमः ।
त्रिदशै + + + सार्द्धमत्र मे विस्मयो महान् ॥
श्रूयते हि द्विजश्रेष्ठ दक्षस्य दुहिता सती ।
शङ्करस्य प्रिया भार्य्या बभूव वरवर्णिनी ॥
किमर्थं संपरित्यज्य स्वशरीरं वरानना ।
पुनश्च देवदेवस्य पत्नीत्वमगमच्छुभा ॥
जाता हिमवतो गेहे गिरीन्द्रस्य महात्मनः ।
त्रैलोक्यराज्यमाच्छिद्य बलेरिन्द्रस्य सोऽददत् ॥
नमस्तस्मै श्रीधराय कद्मवामनरूपिणे ।
एतन्मे संशयं छिन्धि सर्व्ववित् त्वमतो हि मे ॥ इत्यादिः ।

End. एतत्पवित्रमारोग्यं धन्यं दुःस्वप्ननाशनं ।

पुत्रदं सर्व्वकामाद्यं सर्व्वग्रहनिवारणं ॥
नीचासनगतैः सर्व्वैः श्रोतव्यमिदमुत्तमं ।
पठितव्यं न सन्ध्यायां न देयं यस्य कस्यचित् ॥

Colophon. इति वामनपुराणे त्रिविक्रमचरितं समाप्तं । समाप्तञ्चेदं वामनाख्यपुराणमिति ।

विषयः । १ प्रथमे अध्याये,—वर्षावर्णनं । वर्षणोद्वेजिताया गिरिजाया गिरिसमीपे गृह-निर्म्माणार्थप्रार्थना । जीमूतजालाकलनेन शिवस्य जीमूतकेतुनामकथनञ्च ।

२ अ०,—शरद्वर्णनं । समशङ्करां शङ्करीं विहाय दक्षस्य यज्ञानुष्ठानं । कथं भगवान् कपालीतिविवरणं । दुर्व्वामस उत्पत्तिः । ब्राह्मपुरुषशैवपुरुषयोरारोधनं ।

३ अ०,—वदरिकाश्रमे ब्रह्महत्यया आलिङ्गितं कपालिनं दृष्ट्वा नरनारायण-कालिन्दीपुष्करारण्यप्रभृतीनामन्तर्द्धानं । निर्व्विण्णस्य तस्य पुण्डरीकाक्षस्तवनं । हरे-रुपदेशेन हरस्य काशीपुरीगमनादिविवरणं । कपालमोचनतीर्थवर्णनञ्च ।

४, ५ अ०,—गौतमनन्दिन्याः प्रमुखाद् दक्षयज्ञवृत्तान्तं निशम्य दाक्षायण्या देह-त्यागः । वीरभद्रादीनामुत्पत्तिः । यज्ञभूमौ तैः सार्द्धं सङ्ग्रामे ततो देवानामप-यानं । विनष्टे च दक्षे यज्ञस्य मृगरूपेण अपसरणं । शिवस्य कालरूपत्वकीर्त्तनं । मेषादिद्वादशराशीनां लक्षणादिकञ्च ।

६, ७, ८ अ०,—नरनारायणजन्मादिकथनं । वसन्तवर्णनं । सतीविरह-विधुरस्य विहभूषणस्य अङ्गस्पर्शेन दग्धायाः कालिन्द्याः कज्जलनिभत्वप्राप्तिः शिवविलापः । पाञ्चालीकेशविवरणं । मुनिकामिनीनामौत्सुक्यवर्णनं । शिवलिङ्गपतनवृत्तान्तः । हरिब्रह्मकृतहरस्तुतिः । शैवशिष्यप्रणाली । मदनदाहनं । कामधनुषो मुष्टिबन्ध-कोटिप्रभृतिपञ्चविधस्थानविशेषेण चम्पकवकुलादीनामुत्पत्तिः । ऊर्व्वश्या जन्म, रूपवर्णनञ्च । नरनारायणाभ्यां समं प्रह्लादस्य युद्धवर्णनं । पीताम्बरप्रह्लादसंवाद-कीर्त्तनञ्च ।

९, १० अ०,—अन्धकोपाख्यानं । तेन सह इन्द्रादीनां समरसंरम्भः । देवानां प्रत्येकं वाहनलक्षणादिकथनं । शक्रस्य जम्भ-वृत्र-वलाद्यभिधदैत्यनाशनं ।

११, १२, १३ अ०,—सुकेशिसमीपे मुनीनां धर्म्मस्वरूपकीर्त्तनादि । जम्बूप्लक्षा-दीनां परिमाणादिकथनं । पापविशेषे नरकविशेषकीर्त्तनं । जम्बूद्वीपस्थवर्ष-जनपद-नदीप्रभृतिकथनञ्च ।

१४, १५ अ०,—दशाङ्गधर्म्मकथनं । ब्रह्मचर्य्यलक्षणादिः । सदाचारलक्षणं । प्रातःकृत्यादिनिरूपणं । स्वधर्म्मपरित्यागनिष्ठुरसत्यहीनवचनादिप्रयोगनिषेधः । शौचादिनियमः । शशकमत्स्यकच्छपादीनां भोज्यताकथनं । मणिमुक्तावस-नादिद्रव्यशुद्धिः । षण्ढमार्ज्जारप्रभृतीनां लक्षणं निरूप्य तद्गृहे भोजनादि-

विषयः। प्रतिषेधः। अशौचादिनिरूपणं। वानप्रस्थादिधर्मकथनं। शूद्रस्य केवलं गार्हस्थ्यधर्माधिकारकथनं।

१६, १७ अ०,—निशायां शून्यमार्गे निशाचरनगरीं निभाल्य सूर्य्यभ्रमेण लोकानां चेष्टादिवर्णनं। तत्पुरीपातनापराधात् पुरारिणा निपातितस्य दिनपतेरसीवरुणयोः सलिलमध्ये भ्रमणादिविवरणं। उत्तरायणसङ्क्रान्त्यादिनिरूपणं। प्रतिपदादिक्रमेण देवानां शयनादिकालकथनं। चातुर्मास्यविधिः। सर्व्वाक्षयकरव्रतविधानञ्च।

१८, १९, २०, २१ अ०,—गिरिशगणेशादीनां प्रियपुष्पकथनं। शरदागमे विष्णुपूजा विधानं। वैष्णवपञ्जरस्तोत्रं। रम्भ-करम्भयोरुपाख्यानं। रम्भात् महिषीगर्भे महिषासुरजन्मविवरणं। रक्तवीजोत्पत्तिः। कात्यायन्या जन्म। अगस्त्य-विन्ध्यगिरिवृत्तान्तवर्णनं। देव्या सह चण्डमुण्डप्रभृतीनां संवादः। महिषासुरवधकथनञ्च।

२२, २३ अ०,—सोमवंशीयर्क्षराजोपाख्यानं। तपनतनयाया ऋक्षकुमारेण संवरणेन समं विवाहः। तस्या गर्भे कुरोर्जन्म। कुरुक्षेत्रोत्पत्तिश्च।

२४, २५, २६ अ०,—मेनकागर्भे कन्यात्रयजन्मविवरणं। तत्र ब्रह्मणः शापेन ज्येष्ठा जलरूपतां प्राप्य सुरनदी संवृत्ता, मध्यमा तु सन्ध्यारागवती बभूवेति कथनं। कनिष्ठाया महादेवप्राप्त्यर्थं तपस्या। तया सह भिक्षोः संलापः। सप्तर्षीणां हिमालयसमीपे उमाप्रार्थनादिवृत्तान्तः। शिवविवाहवर्णनं।

२७, २८, २९, ३०, ३१ अ०,—पितामहप्रसादात् काल्याः काञ्चनवर्णत्वप्राप्तिः। देवान् प्रति देव्याः शापदानं। गजाननजननं। इन्द्रस्य नमुचिनिसूदनं। देव्याश्चण्डमुण्डनिशुम्भहननं। कुमारस्य जन्म। सैनापत्ये अभिषेचनं। तारकासुरनाशनं। महिषक्रौञ्चगिरिभेदनञ्च।

३२, ३३ अ०,—मदालसोपाख्यानं। अन्धकासुरभयेन पार्व्वत्याः शतरूपग्रहणं। केदारतीर्थोत्पत्तिः। सुरदानवोपाख्यानं। तेन सह वशिष्ठयमादीनां संवादः। सनत्कुमार-सनक-सनातन-सनन्दप्रभृतिधर्म्मपुत्रकथनं।

३४ अ०,—पुन्नाम्नो नरकस्य प्रपञ्चं प्रदर्श्य तत्स्वरूपकथनं। शेषाख्यपापनिरूपणं। क्रमेण पुत्रशिष्ययोः पुन्नाननरकशेषपापहन्तृत्वकीर्त्तनं। औरसक्षेत्रजादिपुत्रलक्षणं। अहिंसाधर्म्मयोः ब्रह्मणे पुत्रत्वेन सनत्कुमारस्य सम्प्रदानं। द्वादशारचक्रलक्षणादिकथनं। विष्णोः सुरनाशनं।

३५ अ०,—शिवदर्शनवञ्चितानां देवानां पुरतः केशवस्य तप्तकृच्छ्रलक्षणादिकथनं। तेषां तदनुष्ठानञ्च। जलमध्ये शिवस्य स्थाणुनामकरणं। तस्य शुक्राय सञ्जीवनीविद्यादानं। प्रह्लादान्धकसंवादः।

विषयः। ३६, ३७, ३८ अ०,—पाणिग्रहं याचमानस्य दण्डस्य पुरतः शुक्रसुताया विरजायाः चित्राङ्गदोपाख्यानकीर्त्तनं। अञ्जनसुताया उपाख्यानं। गन्धर्व्वकन्यकाभ्यां सार्द्धं अवगाहमानस्य गालवमुनेर्मत्स्येन सह संवादः। वेदवत्या उपाख्यानं। गद्येन हाटकेश्वरशिवस्तोत्रं। ऋतध्वजवानरयोः संवादः। वेदवतीचित्राङ्गदाप्रभृतिभिः सह इन्द्रद्युम्नसुरथप्रभृतीनां विवाहवर्णनं।

३९, ४०, ४१ अ०,—तव शिष्येण दण्डेन बलाद् वचनीयतां नीतास्मीति खदुहितुर्वचनमाकर्ण्य शुक्रस्य दण्डं प्रति शापदानवृत्तान्तकीर्त्तनं। दण्डकारण्यविवरणं। देवसैन्यानामन्धकसेनाभिः सह युद्धवर्णनं।

४२ अ०,—दैत्यगुरुकृतपशुपतिस्तुतिः। कवलितस्य तस्य शिवशरीरात् शुक्ररूपेण निर्गमनात् शुक्रेतिसञ्ज्ञाकीर्त्तनं। महादेवस्य अष्टादशभुजधारणं। शिवरूपपरिग्रहेण अन्धकस्य पार्व्वतीगृहप्रवेशविवरणं। तद्भयेन पार्व्वत्याः श्वेतार्ककुसुमप्रवेशकथनं। इन्द्रस्य जम्भबलप्रभृतिदानवनाशनं।

४३, ४४ अ०,—पुरारिणा सममन्धकस्य युद्धवर्णनादिः। सोमधार-सोमराजकामराजप्रभृतिभैरवोत्पत्तिः। अन्धककृतशिवस्तोत्रं। अन्धकस्य गणेश्वरत्वं प्राप्य भृङ्गी बभूवेतिकथनञ्च। इन्द्रस्य मलयपर्व्वते दानवैः सह युद्धवर्णनं। पाकशासनपुरन्दरेतिनाम्नोर्निरुक्तिः। एकोनपञ्चाशन्मारुतजन्मविवरणं। इन्द्रस्य गोत्रभिन्नामनिरुक्तिः।

४५ अ०,—स्वायम्भुवमन्वन्तरीयसवनराजोपाख्यानं। तत्र सप्तर्षिपत्नीनां पीयूषबुद्ध्या पुष्करस्थशुक्रपानेन गर्भसञ्चारविवरणं। तासां पुत्रीणां सप्तमारुतत्वकथनञ्च। एवं स्वारोचिषादिमन्वन्तरेषु सप्तसप्तमारुतसम्भवकीर्त्तनं।

४६, ४७, ४८ अ०,—बलिकालनेमिप्रभृतिभिः सह इन्द्रादीनां युद्धवर्णनं। विष्णोः कालनेमिनिपातनं। दैत्यजितानां देवानां पलायनादिवर्णनं। त्रिलोकाधिपतिं बलिं प्रति शुक्रस्य उपदेशदानं। विष्णोः सरस्वतीचतुष्टयसृष्टिविवरणं।

४९, ५०, ५१, ५२ अ०,—वामनप्रादुर्भावकथनं। प्रह्लादस्य तीर्थयात्राविवरणं। धुन्धुदैत्यस्य अश्वमेधयज्ञानुष्ठानं। बलिनिग्रहात् पूर्व्वमपि त्रिविक्रमरूपपरिग्रहेण भगवतो वालुकार्णवे धुन्धुनिक्षेपणं। दस्युना हृतसर्व्वस्वस्य सुधर्म्माख्यस्य वणिज उपाख्यानं। सोमशर्म्मोपाख्यानं। श्रवणद्वादशीकथनं।

५३, ५४, ५५ अ०,—नक्षत्रपुरुषव्रतविधानं। शिवस्य सुदर्शनचक्रधारणं। विष्णोरपि त्रिशूलाकलनमित्यादिवृत्तान्तकथनं। जलोद्भवासुरनाशकीर्त्तनं। वीतमन्युद्विजोपाख्यानं। श्रीदामनरपतेरुपाख्यानं। चक्रिचिह्नेन सुदर्शनेन त्रिधाभिन्नस्य शिवस्य अंशत्रयेण हिरण्याक्षसुवर्णाक्ष-विरूपाक्षाख्यरुद्राविर्भावविवरणं।

५६, ५७, ५८, ५९, ६० अ०,—शिवस्य रुद्रकोटीतिनामनिर्व्वचनं। गजेन्द्रमोक्ष-विवरणं। विष्णुपञ्जरकीर्त्तनं। राक्षसम्प्रति ब्रह्मचारिणः सारस्वतस्तोत्रोपदेशः। पापप्रशमनाभिधस्तोत्रं। अन्यविधपापप्रशमनस्तुतिः।

६१, ६२, ६३, ६४, ६५ अ०,—विधात्वकृतवामनस्तोत्रं। वामनस्य रूपविशेषेण स्वकीयस्थानकथनं। शुक्रसमीपे बलेः कोषकारपुत्रोपाख्यानकथनं। त्रिविक्रम-रूपवर्णनं। बलिबन्धनपातालगमनादिवृत्तान्तकथनं। त्रिविक्रमस्य ब्रह्मणे लघु-रूपप्रदर्शनं। गद्येन ब्रह्मणा वामनस्तुतिकीर्त्तनं।

६६, ६७ अ०,—बलिकृतसुदर्शनस्तोत्रकथनं। बलिं प्रति प्रह्लादस्य भगवत्स्तोप-देशदानं। एतत्पुराणपठनादिफलश्रुतिकीर्त्तनञ्च।

No. 1265. पदार्थतत्त्वावलोकः।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 50. Lines, 32 on a page. Extent, 1,800 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, new. Prose. Generally correct.

Padártha-tattváraloka. A commentary on the *Padártha-khándana* of Raghunátha S'iromaṇi. By Siddhántapanchánana.

The full name of the commentator cannot be ascertained. The work of S'iromaṇi is commonly called *Padártha-tattra* and also *Padártha-tattra-virechana ;* it is a criticism of the Vaiseshika categories.

Beginning. इन्द्रादिवृन्दारकवृन्दवन्द्यं प्रणम्य पादाम्बुरुहं मुरारेः।
शिरोमणिस्वीकृत + × + + + + + + + + ॥
अथ द्रव्यादयस्तावत् प्राचीनपरिगृहीताः पदार्थाः सप्त, तत्र विचारपुरःसरं केषाञ्चिदाधिक्यं निराकरिष्यन् आधिक्यमपि केषाञ्चिद् व्यवस्थापयिष्यन् व + व्यवस्थापकं सिद्धान्तप्रवादमात्रमनभिकृत्य प्रतिजानीते। अथेति। ईश्वरा-दिति। इत्यादिः।

End. परे तु दशरथपदवाच्यत्वादिनैव तत्र बाधः। न तु दशरथत्वादिना—इति कृतं परिभावनेन। श्रीरस्तु।
निर्म्मासे कठिनेऽस्मिन्, अकौटिल्येनापि सूक्ष्मतरबुद्ध्या।
दत्तो दोषोऽपि मुदे, स्तन इव रचितोदरा+तः॥
विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।
विदुषामतिसूक्ष्मधियामसत्पुराणां मुदे भविता॥



तच्चिन्ताहरितेन तावकमहामायाविमूढात्मना
संसारार्णवदुर्निवारलहरीजालेषु मोमुह्यता ।
विद्योज्झितसदसद्विवेकरहितेनेदं मया वर्णितं
तेनानेन मदर्पितेन भगवन् प्रीणातु नारायणः ॥

Colophon. इति सिद्धान्तपञ्चाननकृतः पदार्थतत्त्वावलोकः समाप्तः ।

विषयः । शिरोमणिकृतपदार्थखण्डनस्य व्याख्या ।

No. 1266. कूर्म्मपुराणपूर्व्वभागः ।

Substance, country-made yellow paper, 14 × 10 inches. Folia, 135. Lines, 23 on a page. Extent, 3,121 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Kúrma Puráṇa, Púrva-bhága. The Kúrma is the fifteenth of the eighteen great Puráṇas attributed to Vyása and the MS. under notice comprises only the first half of that work. The following is Professor Wilson's account of this Puráṇa :

"That in which Janárdana, in the form of a tortoise, in the regions under the earth, explained the objects of life—duty, wealth, pleasure, and liberation—in communication with Indradyumna and the R'ishis in the proximity of S'akra, which refers to the Lakshmí Kalpa, and contains seventeen thousand stanzas, is the Kúrma Puráṇa."

In the first chapter of the Kúrma Puráṇa, it gives an account of itself, which does not exactly agree with this description. Súta, who is repeating the narration, is made to say to the R'ishis: "This most excellent Kaurma Puráṇa is the fifteenth. Samhitás are fourfold, from the variety of the collections. The Bráhmí, Bhágavatí, Saurí, and Vaishnaví are well known as the four Samhitás which confer virtue, wealth, pleasure, and liberation. This is the Bráhmí Samhitá conformable to the four Vedas; in which there are six thousand s'lokas; and, by it, the importance of the four objects of life, O great sages, holy knowledge and Parames'wara is known." There is an irreconcilable difference in this specification of the number of stanzas and that given above. It is not very clear what is meant by a Samhitá, as here used. A Samhitá, so observed above (p. XIX.), is something different from a Puráṇa. It may be an assemblage of prayers and legends, extracted, professedly, from a Puráṇa, but is not, usually, applicable to the origi-

nal. The four Samhitás here specified refer rather to their religious character than to their connexion with any specific work; and, in fact, the same terms are applied to what are called Samhitás of the Skanda. In this sense, a Puráṇa might be also a Samhitá; that is, it might be anassemblage of formulæ and legends belonging to a division of the Hindu system; and the work in question, like the Vishṇu Puráṇa, does adopt both titles. It says: "This is the excellent Kaurma Puráṇa, the fifteenth (of the series)." And again: "This is the Bráhmí Samhitá." At any rate, no other work has been met with pretending to be the Kúrma Puráṇa.

"With regard to the other particulars specified by the Matsya, traces of them are to be found. Although, in two accounts of the traditional communication of the Puráṇa no mention is made of Vishṇu as one of the teachers, yet Súta repeats, at the outset, a dialogue between Vishṇu, as the Kúrma, and Indradyumna, at the time of the churning of the ocean; and much of the subsequent narrative is put into the mouth of the former.

"The name, being that of an Avatára of Vishnu, might lead us to expect a Vaishṇava work: but it is always, and correctly, classed with the S'aiva Puráṇas; the greater portion of it inculcating the worship of S'iva and Durgá. It is divided into two parts, of nearly equal length. In the first part, accounts of the creation, of the Avatáras of Vishṇu, of the solar and lunar dynasties of the kings to the time of Krishṇa, of the universe, and of the Manwantaras, are given, in general in a summary manner, but, not unfrequently, in the words employed in the Vishṇu Puráṇa. With these are blended hymns addressed to Mahes'wara by Brahmá and others; the defeat of Andhakásura by Bhairava; the origin of four S'aktis, Mahes'warí, S'ivá, Satí, and Haimavatí, from S'iva; and other S'aiva legends. One chapter gives a more distinct and connected account of the incarnations of S'iva, in the present age, than the Linga; and it wears, still more, the appearance of an attempt to identify the teachers of the Yoga school with personations of their preferential deity. Several chapters from a Kás'í Máhátmya, a legend of Benares. In the second part there are no legends. It is divided into two parts, the I's'wara Gítá and Vyása Gitá. In the former, the knowledge of god, that is, of S'iva, through contemplative devotion, is taught. In the latter, the same object is enjoined through works, or observance of the ceremonies and precepts of the Vedas.

Beginning. नमस्कृत्याप्रमेयाय विष्णवे कूर्म्मरूपिणे ।
पुराणं सम्प्रवक्ष्यामि यदुक्तं विश्वयोनिना ॥
सत्रान्ते सूतमनघं नैमिषे च महर्षयः ।
पुराणसंहितां पुण्यां पप्रच्छ रोमहर्षणं ॥
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
तस्य ते सर्व्वरोमाणि वचसा हर्षितानि यत् ।
द्वैपायनस्तु भगवान् ततो वै रोमहर्षणः ।
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ॥
मुनीनां संहितां वक्तुं व्यासेन पुरुषोत्तमः ।
त्वं हि स्वायम्भुवे यज्ञे सत्याहे वितते सति ॥
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ।
तस्माद् भवन्तं पृच्छामः पुराणं कौर्म्ममुत्तमं ॥ इत्यादिः ।

End. द्वादशे रुद्रसावर्णी रोचमानस्त्रयोदशः ।
भौत्यश्चतुर्दशः प्रोक्तो भविष्या मनवः क्रमात् ॥
अयं वः कथितो ह्यंशः पूर्व्वो नारायणेरितः ।
भूतैर्भव्यैर्वर्त्तमानैराख्यानैरुपबृंहितः ॥
पाठयेच्छृणुयाद्वापि श्रावयेद्वा द्विजोत्तमान् ।
नमो देवाधिदेवाय देवानां परमात्मने ।
पुरुषाय पुराणाय विष्णवे प्रभविष्णवे ॥

Colophon. इति कूर्म्मपुराणे पूर्व्वभागः समाप्तः । त्रिपञ्चाशत्तमोऽध्यायः ॥

विषयः । १ अध्याये,—सूतेन सह ऋषीणां संवादः । रोमहर्षणनामनिरुक्तिः । महापुराणोपपुराणनामसङ्ख्यादिः । पुराणलक्षणं । समुद्रमन्थनकाले भगवतः कूर्म्मरूपधारणं । नारदादिभ्यो भगवतो लक्ष्मीपरिचयदानं । इन्द्रद्युम्नचरित्रकीर्त्तनं । लक्ष्मीसकाशात् तस्य तत्त्वज्ञानलाभः । तत्कृतविष्णुस्तुतिः । तस्मै कूर्म्मरूपस्य विष्णोः सदाश्रया, अव्यक्ताश्रया, ब्राह्मी चेति त्रिविधभावनाद्युपदेशदानं ।

२, ३ अ०,—महामायामाहात्म्यं । मरीच्यादीनां ब्राह्मणादीनाञ्च सृष्टिः । ब्राह्मणस्य यजन-याजन-दानप्रभृतिषट्कर्म्माणि । दानाध्ययनादिरूपक्षत्रियकर्म्माणि । दानाध्ययनकृष्यादिरूपवैश्यकर्म्माणि । द्विजशुश्रूषारूपशूद्रकर्म्म । गृहस्थ-वनस्थ-भिक्षुक-ब्रह्मचारिणां धर्म्मकथनादिः । गार्हस्थ्याश्रमकर्म्मयोगप्रशंसा । क्षमादया-दानादिचातुर्वर्ण्यधर्म्मः । गृहस्थसन्न्यासिप्रभृतीनामवान्तरभेदः । ब्रह्मविष्णुशि-

विषयः। वानां वस्तुतोऽभेदः। वैष्णव-ब्राह्म-शैवाश्रमकथनं। त्रिपुण्ड्रधारणावश्यकता। आश्रमग्रहणक्रमकथनञ्च।

४, ५ अ०,—आदिसृष्टिविवरणं। तत्र चतुर्व्यूहकथनं। ब्रह्मस्वरूपं। प्रकृतिक्षोभेण महदादिसृष्टिः। ब्रह्मविष्णुशिवानां रजःसत्त्वादिगुणाश्रयत्वेन स्रष्टृत्वादिः। अजप्रजापतिमहादेवप्रभृतिनामनिरुक्तिः। कालसङ्ख्या। युगसन्धिपरिमाणादिः। भगवतः कालात्मकत्वकथनञ्च।

६, ७, ८ अ०,—नारायणाख्यब्रह्मस्वरूपं। ततस्तुतिः। तमोमोह-महामोहादिपञ्चविधाविद्याकीर्त्तनं। महद्-भूतवैकारिकैन्द्रियक-मुख्य-तिर्य्यक्स्रोतःप्रभृतिनवविधसृष्टिः। सनक-सनातन-सनन्दनादयः पञ्चयोगिनः। महादेवोत्पत्तिः। जगत्सृष्टिः। ब्रह्मणो देहार्द्धभागाभ्यां स्त्रीपुरुषोत्पत्तिः। मन्वादीनां सन्ततिः। दक्षकन्यकाः। पितरः। धर्म्मादीनां यशःकीर्त्तिप्रभृतिपुत्रकथनञ्च।

९ अ०,—पद्मनाभनाभिपद्मे हिरण्यगर्भस्य जन्मवृत्तान्तः। अन्योन्यं संलपतोः कमलेशकमलजयोः समीपे महादेवस्याविर्भावः रूपवर्णनञ्च। प्रीतस्य तस्य ब्रह्महरिभ्यां वरदानं। ब्रह्मपुत्रत्वकथनञ्च।

१० अ०,—मधुकैटभौ निहत्य प्रवेश्य च स्रष्टारं निजशरीरे नारायणाख्यब्रह्मणो योगनिद्रा। कोपाविष्टस्य ब्रह्मणः अश्रुविन्दुभ्यः प्रेतोत्पत्तिः। प्राणमयरुद्रोत्पत्तिश्च। रुद्रनामनिरुक्तिः। अष्टमूर्त्तयः। तत्पत्नीपुत्रादिकथनं। ब्रह्मकृतरुद्रस्तवनं। हरस्यान्तर्द्धानं। मरीच्यादीनां सृष्टिः।

११, १२ अ०,—तपस्यतो पितामहस्य समीपे अर्द्धनारीश्वररूपस्य रुद्रस्य प्रादुर्भावः। एकादशरुद्रोत्पत्तिः। दाक्षायण्या जन्मादिः। शिवशक्तिमाहात्म्यं। शक्तिशक्तिमतोरभेदः। मेनकागर्भे शिवशक्तेजन्म। चतुर्मुखाष्टभुजचन्द्ररेखादिलक्षणां तां विलोक्य भीतस्य हिमालयस्य अष्टोत्तरसहस्रनामभिस्तत्स्तुतिः। पुनर्नीलोत्पलदलश्यामां द्विभुजां सौम्यरूपाञ्च तां निरूप्य गिरिराजस्य तन्माहात्म्यवर्णनं। तस्मै देव्या उपदेशदानं। तत्र श्रुतिस्मृतिविरुद्धशास्त्राणां तामसत्वं। कापालभैरवयामलादीनां मोहनत्वं। चतुर्द्दशविद्याः। उपासनाफलं। देव्युपासनावश्यकत्वं। ज्ञानमाहात्म्यं। ब्रह्मस्वरूपं। कर्म्मज्ञान-भक्तियोगान्यतमेन ब्रह्मशरणावश्यकता। देवीमाहात्म्यफलश्रुतिः।

१३, १४, १५ अ०,—भृगु-मरीचि-वसिष्ठादीनां प्रियव्रतोत्तानपादादीनाञ्च सन्ततिकीर्त्तनं। पुराणवक्तुः सूतस्योत्पत्तिः। शिखण्डितनयस्य कुशलिनो महादेवार्च्चनवेदाध्ययनादिवृत्तान्तः। सप्तप्राचेतसानामुत्पत्तिः। दक्षोदितां शिवनिन्दामाकर्ण्य अपर्णाया देहत्यागः, हिमालयालये जननञ्च। दक्षाय शिवस्य शापदानं।

विषयः। जन्मान्तरेऽपि पूर्व्ववैरमनुस्मृत्य दक्षस्य विरूपाक्षभागरहितयज्ञानुष्ठानं। दक्ष-दधीचिसंवादः। वृत्तान्तमिममुपश्रुत्य देवीमुखाद् देवदेवस्य वीरभद्रसर्ज्जनं गणाधिपं पुरस्कृत्य वीरभद्रादीनां यज्ञनाशनं। भर्गनेत्रवह्निजिह्वादिनाशः। तैः सह विष्णोर्युद्धं। महादेवागमनं। दक्षमुपदिश्य सपरिवारस्य तस्य प्रस्थानं। ब्रह्मणः शिवमाहात्म्यकथनञ्च।

१६ अ०,—दक्षकन्यानां विवाहः। अष्टौ वसवः। धर्म्म-ध्रुव-पवन-चन्द्र-विश्व-कर्म्मादीनां पुत्रकथनं। दितिसन्तानकथनं। पितामहं पुरस्कृत्य हिरण्यकशिपु-विप्रकृतानामिन्द्रादीनामुपेन्द्रसमीपे स्वावस्थाकथनं। समरसमये हिरण्यकशिपु-पादताड़ितस्य मगरुड़स्य वैष्णवपुरुषस्य अन्तर्द्धानं। हिरण्याक्षाचिप्तपाशुपतास्त्रे-णापि अक्षतदेहं नृसिंहरूपं भगवन्तं निभाल्य नूनं वासुदेवोऽयमिति विस्मस्य विसृज्य च शस्त्राणि प्रह्लादस्य तच्चरणावनमनं। हिरण्यकशिपुबधः। हिरण्याक्षस्य पाताले पलायनं। भगवतो वराहरूपेण तन्निधनं। प्रह्लादं प्रति ब्राह्मणशापः। तेन सार्द्धं भगवतो युद्धं। पुनः पूर्व्वसंस्काराद् भगवज्ज्ञानेन तन्मुक्तिः। गोबध-वृत्तान्तकथनपूर्व्वकं गोतमनामनिरुक्तिः। ऋषीन् प्रति गोतमस्य शापदानं। लो-कानां मोहनाय कापाल-पाञ्चरात्र-पाशुपतादिशास्त्ररचना। अन्धकासुरस्य गिरिजाहरणोद्योगः। अन्धकसमीपाद्देवानां पराजयः। शूलिना शूलेन ताड़ित-हृदयस्य अन्धकस्य तत्स्तवनादिः। तस्य नन्दीश्वरानुचरत्वकथनञ्च।

१७, १८ अ०,—सनत्कुमार-विरोचनसंवादः। बलेर्द्देवानां पराजयः। अदिते-स्तपस्या, विष्णुस्तवनञ्च। प्रह्लादबलिसंवादः। अदितिगर्भे भगवतो जन्मग्रहणादिः। वामनरूपेण बलिसमीपे त्रिपादभूमिप्रार्थनादिः। गङ्गोत्पत्तिः। बलेः पातालप्रवेशः। बाणोपद्रुतेन वृन्दारकवृन्देन संस्तुतस्य आशुतोषस्य बाणपुरदाहनादिः। कद्रुविन-तादीनां सन्ततिकीर्त्तनं।

१९, २०, २१ अ०,—नैध्रुव-रैभ्य-शाण्डिल्य-पुलस्त्य-मरीचिप्रभृतीनामृषीणां वंश-कीर्त्तनं। सञ्ज्ञा-राज्ञिप्रभादिसूर्य्यपत्नीकथनं। तासां गर्भे मनु-यम-यमुनादीनां जन्म। इक्ष्वाकुवंशकथनं। सावस्तेः गौड़देशे सावस्तिनामपुरनिर्म्माणं। धुन्धु-मारादीनां वंशः। तत्र विशेषेण त्रिधन्वराजोपाख्यानं। सङ्क्षेपेण रामपरिणयन-वनगमन-सीताहरण-सेतुबन्धन-रामेश्वरलिङ्गस्थापन-रावणनिधनादिकथनं।

२२, २३ अ०,—चन्द्रवंशकीर्त्तनं। तत्र विशेषेण शूर-शूरसेन-जयध्वजादीनां वृत्तान्तः। तेषां समीपे सप्तर्षीणां सुरनरकिन्नरप्रभृतीनामाराध्यदेवताकथनं। सार्द्धञ्च तैः समरसमये सुदर्शनेन भगवतो विदेहनामदानवघातनादिः। ततो जय-ध्वजवंशजस्य दुर्ज्जयस्य उर्व्वशीगमनरागादिकथनं। तस्य पुनः स्वपत्न्याः पतिव्रताया

विषयः। उपदेशेन कण्वाश्रमगमनं। ततो गन्धर्व्वहननपूर्व्वकविचित्रमालाग्रहण-सुरसुन्दरी-परित्याग-वाराणसीगमनादिवृत्तान्तकथनञ्च।

२४, २५ अ०,—क्रोष्टुवंशकथनं। तत्र मृगयागतस्य नवरथस्य राज्ञो राचसदर्शनादिवृत्तान्तः। यदुवंशकीर्त्तनं। तत्र पुत्रलाभार्थं श्रीकृष्णस्य तपश्चरणादिः। तस्य पुनः मुनीश्वरसमीपे शिवाराधनादिस्थानजिज्ञासा। ततस्तदुपदेशेन सङ्कीर्णा कृत्तिवासोगुणगानं। तद्दर्शनसञ्जातानन्दस्य नन्दनन्दनस्य नन्दीशवन्दनञ्च।

२६, २७ अ०,—गिरिशेन सह गिरिधरस्य कैलासगमनपूर्व्वकं विविधविलासकीर्त्तनं। पुनस्तस्य विशेषेण द्वारवतीप्रवेशवृत्तान्तादिवर्णनं। मार्कण्डेयसमीपे हरिहरयोरैक्यकथनं। लिङ्गोत्पत्तिविवरणकीर्त्तनञ्च। कलियुगे भगवद्भजनावश्यकता।

२८, २९ अ०,—गतवति कीर्त्तिशेषं शेषशयने द्वैपायनेन सममर्ज्जुनस्य संवादः। काशीवासप्रशंसा। युगधर्म्मकथनं। तत्र वेदभेदकारणकीर्त्तनञ्च।

३०, ३१, ३२, ३३, ३४, ३५ अ०,—अत्र षडध्यायाः पतिताः।

३६, ३७, ३८, ३९ अ०,—मार्कण्डेययुधिष्ठिरसंवादः। प्रयागमाहात्म्यं। तत्र यात्राविधिः। बलिवर्द्दारोहणेन तत्र गमने दोषः। कन्यादानफलं। प्राणत्यागफलं। माघमासे तत्र स्नानफलं। वटेश्वरमाहात्म्यादिकीर्त्तनञ्च।

४०, ४१, ४२ अ०,—प्रियव्रतपुत्राणां अग्नीध्रमेधातिथिप्रभृतीनां जम्बूप्रभृतिसप्तद्वीपाधिपत्यकीर्त्तनं। तेषां पुत्रादिनाम्ना तत्र तत्र वर्षसञ्ज्ञाकथनञ्च। चन्द्र-बुध-वृहस्पतिप्रभृतीनामुच्चनीचत्वादिकथनं। छन्दोनामानि। यमलोकादिकथनं। अहोरात्रकारणनिरूपणं। द्वादशादित्याः। ब्रह्मवादिनो मुनयः। भूर्लोकादिसंस्थानकथनं। सप्तसङ्ख्यकवायुनेमिकीर्त्तनं। भूर्लोकात् सूर्य्यादीनां दूरत्वपरिमाणं। तेषां विष्कम्भविस्तारादिकीर्त्तनञ्च।

४३, ४४, ४५ अ०,—सूर्य्यस्य सप्तविधरश्मिनिरूपणादिः। तत्सहस्रसङ्ख्यककिरणानां विभागशो वर्षणादिकारणत्वकीर्त्तनं। वसन्तादौ सूर्य्यवर्णकथनं। बुधादिग्रहाणां सूर्य्यमभितो भ्रमणकथनं। चन्द्रादीनां त्रिचक्ररथादिकथनं। महर्लोक-सत्यलोकविष्णुलोकादिकथनं। सप्तपातालकथनं। जम्बूद्वीपसुमेरुप्रभृतीनां संस्थानपरिमाणादिकथनं। तत्र वर्षपर्व्वतादिकीर्त्तनञ्च।

४६. ४७, ४८ अ०,—महादेव-देवेन्द्र-यमादीनां पुरीकथनं। केतुमाल-भद्राश्वादिषु स्थितानां स्त्रीपुरुषादीनां वर्णादिकथनं। कुलपर्व्वताः। नागद्वीपादिविवरणं। नदीनामानि। पौण्ड्र-कलिङ्ग-मागधादिदेशाः। हेमकूटशिखरे महादेवपुरी। जैगीषव्याश्रमः। लक्ष्म्यादीनां वासस्थानं। अञ्जन-सुगन्धादिगिरिषु अप्सरआदीनां निवासकीर्त्तनञ्च।

४९, ५०, ५१ अ०,—प्लक्षद्वीपवर्णनं। तत्र कुलपर्व्वतनदीवर्षादयः। कुशद्वीपवर्णनं। क्रौञ्चद्वीपादिकथनं। विशेषेण श्वेतद्वीपवर्णनं। पुष्करद्वीपस्थवटवृक्षे ब्रह्मावस्थानवृत्तान्तकथनं। गतागतमन्वन्तरवृत्तान्तकीर्त्तनञ्च।

५२, ५३ अ०,—अष्टोत्तरविंशतिव्यासाः। विभागपूर्व्वकं द्वैपायनव्यासस्य वैशम्पायनादिभ्यो वेदसम्प्रदानविवरणं। वेदानां शाखासङ्ख्याः। कलियुगे शिवावतारकथनं। योगिनः। एतत्पाठनादिफलश्रुतिः॥ इति पूर्व्वभागः।

No. 1267. कूर्म्मपुराणोत्तरभागः।

Substance, country-made yellow paper, 14 × 10 inches. Folia 122. Lines, 25 on a page. Extent, 3,050 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Kúrma Purána, uttarabhága. The second part of the work described in the last preceding number. It comprises the I'svara Gítá and the Vyása Gítá.

Beginning. ऋषय ऊचुः। भवता कथितः सम्यक् सर्गः स्वायम्भुवः शुभः।
ब्रह्माण्डस्यास्य विस्तारो मन्वन्तरविनिश्चयः॥
भद्रेश्वरेश्वरो देवो वर्णिभिर्धर्म्मतत्परैः।
ज्ञानयोगरतैर्नित्यमाराध्यः कथितश्च यत्॥
तद्वदाशेषसंसारदुःखनाशनमुत्तमं।
ज्ञानं ब्रह्मैकविषयं येन पश्येम तत्परं॥
त्वं हि नारायणः साक्षात् कृष्णद्वैपायनात् प्रभोः।
अवाप्ताखिलविज्ञानस्तत् त्वां पृच्छामहे पुनः। इत्यादिः।

End. अवाप्तवान् पञ्चशिखो देवलादिदमुत्तमं।
सनत्कुमाराद् भगवान् मुनिः सत्यवतीसुतः॥
एतत्पुराणं परमं व्यासः सर्व्वार्थसञ्चयं।
तस्माद् व्यासादहं श्रुत्वा शृण्वतां पापनाशनं॥
ऊचिवान् वै भवद्भिश्च दातव्यं धार्म्मिके जने।
तस्मै व्यासाय मुनये सर्व्वज्ञाय महर्षये॥
पाराशर्य्याय शान्ताय नमो नारायणात्मने।
यस्मात् सञ्जायते कृत्स्नं यत्र चैव प्रलीयते॥
नमस्तस्मै परेशाय विष्णवे कूर्म्मरूपिणे॥

Colophon. इति श्रीकूर्म्मपुराणे उपरिभागे षट्साहस्र्यां संहितायां व्यासगीतासु सप्तचत्वारिंशोऽध्यायः ॥०॥ ४७॥ समाप्तञ्चेदं कूर्म्मपुराणं ॥

अतः परं पुराणस्यास्यैका अनुक्रमणिका वर्त्तते। सा तु पृष्ठैकमितेति शं।

विषयः। १, २ अ०,—सत्यवतीतनयेन सह ऋषीणां संवादः। सनत्कुमार-सनन्दन-सनकप्रभृतीनां नरनारायणस्वरूपदर्शनक्षणे चण्डेशभूषणस्य प्रादुर्भावं प्रेक्ष्य तत्स्तवनं। तेषां निर्व्वन्धातिशयेन अन्धकरिपोरात्मतत्त्वज्ञानकथनं। तत्र ब्रह्मणो निर्व्विशेषत्वं। संसारस्याज्ञानमूलत्वं। आत्मस्वरूपं। साङ्ख्ययोगमाहात्म्यञ्च।

३, ४, ५ अ०,—प्रधानपुरुषकालानामनादित्वं। सर्व्वेभ्यः शर्व्वस्य परमत्वं। तस्य परममाहात्म्यादिकीर्त्तनञ्च। ब्रह्मविष्णुरुद्राणां तदात्मकत्वं। व्यासकृतशशिशेखर-परमरूपवर्णनं। तद्गुणगानं। तस्य जगदात्मकत्वकीर्त्तनञ्च।

६, ७, ८, ९ अ०,—ईश्वरगीता। तत्र महादेवमाहात्म्यं। विभूतियोगः। चतुर्व्विंशतितत्त्वानि। पाशनिरूपणं। अविद्यादिपञ्चविधक्लेशकथनं। मूलप्रकृतिस्वरूपं। पुनरीश्वरमाहात्म्यं। नित्य-निरञ्जन-निष्कामस्य कामरिपोः कथं विश्वरूपत्वमिति प्रपञ्चः। तद्दर्शनोपायः। कैवल्यस्वरूपकीर्त्तनञ्च।

१०, ११ अ०,—ईश्वरयोगप्रशंसा। अपरयोग-महायोगयोर्लक्षणं। अन्यविधयोगनिन्दा। प्राणायामादियोगाङ्गानि। चित्तशुद्ध्युपायः। अहिंसालक्षणं। वैधहिंसाया अहिंसात्वं। सत्यलक्षणं। स्तेयास्तेयब्रह्मचर्य्य-परिग्रहाणां लक्षणं। योगसिद्ध्युपायः। तपस्या-स्वाध्याययोर्लक्षणं। वाचिकोपांशुमानसानां स्वाध्यायभेदानां लक्षणं। सन्तोष-शौच-शौचभेदानां लक्षणं। उत्तमादिभेदेन प्राणायामत्रैविध्यं। पुनस्तस्य सगर्भ-गर्भभेदात् द्वैविध्यलक्षणादिः। तत्पञ्चानिरुक्तिः। रेचक-पूरकादीनां लक्षणं। आसनादीनां विभागकथनं लक्षणञ्च। योगसाधनप्रकारः। एतत्फलश्रुतिकीर्त्तनञ्च। ईश्वरगीता समाप्तिः।

१२, १३ अ०,—ब्रह्मयोगकथनं। तत्र उपनयनकालः। उपवीतलक्षणभेदाः। तद्धारणप्रकारादिः। मेखला। प्रातःकृत्यादिकथनं। गुर्व्वादीनामभिवादनप्रकारः। ब्राह्मणक्षत्रियादिषु कुशलादिजिज्ञासानियमः। गुरवः। तेषां पत्न्यः। एतैः सार्द्धमुपवेशनादिनियमः। सर्व्वत्र मातुः श्रेष्ठत्वं। अग्रजस्यावमाननायां दोषः। पितृव्य-मातुलादीनां पुरतः प्रत्युत्थाय 'असावहमिति' कथनौचित्यं। भिक्षादीनां नियमकथनञ्च। उच्छिष्टादिविवेचनं। विण्मूत्रादित्यागस्थाननियमादिकथनं।

१४ अ०,—गुरुशुश्रूषणप्रकारः। ब्रह्मचारिणो नृत्यगीतद्यूतादिवर्ज्जनावश्यकता। उत्पथादिप्रतिपन्नगुरुपरित्यागकर्त्तव्यता। गुरुपत्नीकृत्यं। तरुण्या गुरुपत्न्याः पाद-

विषयः। स्पर्शपूर्व्वकं प्रणामादिनिषेधः। पितृस्वस्रादिषु मातृवत्सम्मानादिकर्त्तव्यता। वेदाध्ययननियमः। गायत्रीजपप्रकारः। अनध्यायकालादिनिरूपणञ्च।

१५, १६ अ०,—दारपरिग्रहनियमादिः। गार्हस्थ्यधर्म्माः। ब्राह्मणलक्षणं। शमदमादीनां लक्षणं। हिंसामिथ्याऽप्रियवचनादिपरित्याज्यता। प्रतिग्रहनियमः। ब्रह्मस्वापहरणादिनिषेधः। पाषण्डि-वामाचार-पाञ्चरात्राणां वाङ्मात्रेणापि अर्चनप्रतिषेधः। निवासयोग्यदेशनिरूपणादिः। पङ्क्तिभोजनादिनियमः। आत्मप्रशंसापरनिन्दादिवर्ज्जनं। नग्नस्त्रीदर्शन-सस्त्रीकभोजन-स्नान-मोहादिपरिवर्ज्जनीयता। पादप्रक्षालनशयनस्पर्शनादिनियमः।

१७ अ,—अनापदि शूद्रनटगणिकाद्यन्नभोजने दोषः। मूल्यदानेन शूद्रगृहजातपायसस्नेहपक्वादिद्रव्याणां भोज्यता। पलाण्डु-लसुनादिभक्षणनिषेधः। भावदुष्टान्नादिनिन्दा। आविकादिक्षीरपाननिषेधः। बक-हंसदात्यूहादिमांसाभोज्यता। सशल्कमत्स्यभोजनादिविधिः।

१८ अ०,—ब्राह्मणानां प्रातःकृत्यविधिः। सन्ध्योपासनादीनां कर्त्तव्यता। सूर्य्यहृदयस्तोत्रं। दर्भसूत्राभ्यां विना कर्म्मानुष्ठाने दोषः। मध्याह्नकृत्यं। जपनियमाः। तर्पणविधिः। हरिहरादीनां पूजनविधानं। देवयज्ञपितृयज्ञप्रभृतिपञ्चयज्ञकथनं। हन्तकारलक्षणं। अतिथिपूजावश्यकता।

१९ अ०,—भोजने दिगादिनियमः। सूर्य्यग्रहणादिकाले भोजनकालादिनिरूपणं। भोजनादीनामात्मार्थ्यर्थे निष्फलत्वं। अन्धकारादौ तन्निषेधः। सायाह्नकृत्यं। शयननियमः।

२०, २१, २२ अ०,—नित्यनैमित्तिककाम्यभेदात् त्रिविधश्राद्धकथनं। नक्षत्रवारतिथिविशेषे श्राद्धकरणे फलविशेषकथनं। गयागङ्गाप्रयागादौ तदनुष्ठानफलं। श्राद्धे दानयोग्यफलमूलमत्स्यमांसादिनिरूपणं। पिण्डान्वाहार्य्यकश्राद्धविधानं। पङ्क्तिपावनलक्षणं। पात्रयोग्यब्राह्मणनिर्व्वचनं। पङ्क्तिदूषकलक्षणं। वर्ज्जनीयब्राह्मणनिरूपणं। निमन्त्रणादिविधिः। श्राद्धयोग्यदेशः। तदनुष्ठानप्रकारः। श्राद्धदिने स्त्रीसंसर्गादौ दोषः। आमान्नश्राद्धविधिः। एकोद्दिष्टनान्दीमुखश्राद्धादिकालकथनञ्च।

२३, अ०,—ब्राह्मणादीनां जननमरणशवानुगमनाद्यशौचकथनं। सापिण्ड्यादिनिरूपणं। नैष्ठिक-वनस्थादीनामशौचप्रतिषेधः। अशौचिगृहादानयोग्यद्रव्याणि। पर्णदाहविधिः। आद्यश्राद्धमासिकसपिण्डदानादिविधानञ्च।

२४, २५ अ०,—अग्निहोत्रादिविधानं। श्रुतिस्मृत्योरभावे शिष्टाचारस्य प्रामाण्यं। शिष्टलक्षणं। साधकाऽसाधकभेदेन द्विविधगृहस्थकथनं। आपत्काले ब्राह्मणस्य क्षत्रियवृत्तिराश्रय एवं क्षत्रियस्य वैश्यवृत्त्यावलम्बनमित्यादिकथनं।

विषयः। २६, २७ अ०,—दानधर्म्मकीर्त्तनं। दानलक्षणं। नित्यनैमित्तिकादिभेदेन तत्त्रैविध्यं। तत्र तिथ्यादिविशेषे अन्नजलभूमिदानादिफलश्रुतिः। पात्रविवेचनं। दानादाननियमाः। वानप्रस्थाश्रमकर्म्मनिरूपणं। तपश्चरणप्रकारः।

२८, २९ अ०,—सन्न्यासग्रहणसमयः। ज्ञानसन्न्यासि-वेदसन्न्यासिप्रभृतिकथनं। सन्न्यासधर्म्मनिरूपणं। तत्र भोजनादिनियमः। अलाबुपात्रादिपरिग्रहः। ध्यानप्रकारः। स्त्रीसंसर्गादिनिषेधश्च।

३०, ३१, ३२, ३३, ३४ अ०,—महापातकादिप्रायश्चित्तकीर्त्तनं। ब्रह्महत्याप्रायश्चित्तं। शिवकृतब्रह्मशिरश्छेदनवृत्तान्तकथनपूर्व्वकं कपालमोचनतीर्थमाहात्म्यकीर्त्तनं। सुरापान-सुवर्णापहरणमातृस्वस्रादिगमनप्रभृतीनां प्रायश्चित्तकथनं। जीवहिंसावृक्षादिच्छेदनाभक्ष्यभक्षणादीनां प्रायश्चित्तकथनं। पतिव्रताप्रशंसा। अत्र सीताया वह्निशुद्धिवृत्तान्तकीर्त्तनञ्च।

३५, ३६ अ०,—गया-प्रयाग-त्रियम्बक-सोमेश्वर-विजय-पुरुषोत्तम-गोकर्ण-कुब्जाम्र-कोकामुख-शालग्राम-हयतीर्थ-पुष्कर-सप्तसारस्वतप्रभृतिनानाविधतीर्थविवरणं। तत्र महादेवेन सह कङ्कणकमुनेः संवादकथनं। पुना रुद्रकोटि-मधुवन-कालञ्जर-प्रभृतितीर्थवृत्तान्तः। तत्र कालञ्जरतीर्थकथनप्रसङ्गेन कालेन समं श्वेतराजसंवादकीर्त्तनञ्च।

३७ अ०,—केदार-ब्रह्मावतरण-मगधारण्य-महातीर्थ-श्रीपर्व्वत-गोदावरी-कावेरी-प्रभृतितीर्थकथनं। पुनश्चन्द्र-पुण्डरीक-ब्रह्म-प्लक्षप्रस्रवण-व्यास-यमुनाप्रभ-कुवेरतुङ्गोत्तमाङ्ग-कालसर्पिर्दर्शाण-कनकनन्दा-वदरिकाश्रमप्रभृतितीर्थानि।

३८, ३९, ४० अ०,—स्त्रीरूपधारिणं गिरिधरं पार्श्वतो निधाय आकलित-जातरूप-रूपस्य विरूपाक्षस्य देवदारुवनप्रवेशपूर्व्वकं मोहितमुनिकुमारीकुमारकवृन्दस्य च वशिष्ठाश्रमप्रवेशः। अरुन्धत्या कृतातिथ्यस्य च तस्य ततो विनिष्क्रम्य लिङ्गोत्पाटनादिपुरःसरं मुनिसमाजादपसरणं। ब्रह्मोपदेशेन मुनीनां शिवलिङ्गोपासना। गिरिजया सह गिरिशस्य तत्र आविर्भावः। स्तवनेन प्रीतस्य तस्य मरीच्यादिसमीपे तत्त्वज्ञानकीर्त्तनञ्च।

४१, ४२, ४३, ४४, ४५ अ०,—नर्म्मदामाहात्म्यं। माहेश्वर-पुष्करिणी-शक्र-ऋषिस्तरण-दीप्तेश्वर-व्यास-मातृ-सोम-काम-शुक्ल-गणेश्वर-भृगु-गौतमेश्वर-हंसप्रभृतिनर्म्मदास्थतीर्थमाहात्म्यं। नैमिषारण्यमाहात्म्यं। नैमिषेतिसञ्ज्ञाविवरणं। जप्येश्वरमाहात्म्यकथनावसरे शिवानुग्रहेण शिलान्दस्य भूमिकर्षणकाले पुत्रलाभवृत्तान्तकीर्त्तनं। स तु कुमारः शिवाराधनेन नन्दीशत्वं प्रापेति कथनञ्च। जप्येश्वरसमीपस्थ-पञ्चनदमहाकालप्रभृतितीर्थमाहात्म्यकथनं।

४६, ४७ अ०,—नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्व्विधप्रलयस्वरूपकीर्त्तनं। प्रलयकालवर्णनं। वराहकल्पादिकथनं। प्रतिसर्गप्रक्रियाकीर्त्तनं। ब्रह्मादिसर्व्वदेवान् परित्यज्य शिवाराधनकर्त्तव्यता। जगतो ब्रह्ममयत्वं। ऋषीणां कूर्म्मरूपभगवत्स्तुतिः। एतत्पुराणसङ्क्षिप्तकथा। एतत्पठनपाठनश्रवणादिफलकीर्त्तनञ्च।

No. 1268. रामायणतत्त्वदीपिका।

Substance, country-made paper, 14 × 7 inches. Folia, 163. Lines, 6 on a page. Extent, 4,063 s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Correct.

Rámáyaṇá-tattva-dípiká. A commentary on the Rámáyaṇa of Válmíki. By Mahes'vara Tírtha, disciple of Náráyaṇa Tírtha. The MS. comprises only the Yuddha Káṇḍa of the text.

Beginning. अथ श्रीमद्युद्धकाण्डे व्याख्येयानि व्याक्रियन्ते। एवमपारं पारावारं गोवत्सपदवत्समुत्तीर्य्य निरातङ्कं लङ्कां प्रविष्टेन सीतान्वेषणपूर्व्वकमशोकवनभङ्गादिकमतिमानुषं पौरुषं कृत्वा प्रतिनिवृत्तेन हनूमता प्रत्यभिज्ञानप्रदानपूर्व्वकमभिभाषितं सीतावृत्तान्तं श्रुत्वा रामस्तदाकर्णनमुदितमनाः, "कृतकार्य्ये भृत्यजने स्वामिना एवं भवितव्यम्" इति सदाचारमुपदेष्टुं सुग्रीवादिहरिवीराणामुत्साहमुत्पादयितुञ्च समाहृतप्रेयसीवृत्तान्तं हनूमन्तमस्तौषीदित्याह,—श्रुत्वेति। इत्यादिः।

End. शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥ इति वचनात्।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीनारायणतीर्थस्वामिशिष्य-श्रीमहेश्वरतीर्थविरचिते श्रीमद्रामायणतत्त्वदीपिकायां युद्धकाण्डे एकत्रिंशोत्तरशततमः सर्गः॥ ॥ १३१ ॥
महेशतीर्थरचिता रामपादसमर्पिता।
टीका श्रीयुद्धकाण्डस्य समाप्ता तत्त्वदीपिका॥

विषयः। वाल्मीकिरामायणयुद्धकाण्डव्याख्यानं।

No. 1269. रामायणतत्त्वदीपिका।

Substance, country-made paper, 14 × 7 inches. Folia, 138. Lines, 5 on a page. Extent, 3,050 s'lokas. Character, Nágara. Date, S. M. 1852. Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Correct.

Rámáyaṇa-tattva-dípiká. The last volume of the work described in the last preceding No. It comprises the Uttarakáṇḍa of the text.

Beginning. श्रीरुद्रोत्तरकाण्ड + + बहवः प्रक्षिप्तसर्गा इति
व्याख्याकर्तृभिरेव निपुणैस्तेषां न टीका कृता।
तेषां भावमशेषमत्र महतां ज्ञाते मया + + +
सर्गाणां न कृता सदीक्षणवशात् टीकेति विज्ञायतां॥
एवं श्रीरामचन्द्रस्थितावतारोद्योगप्रभृतिश्रीरामाभिषेकपर्य्यन्तां कथां षड्भिः काण्डैरुपवर्ण्य अतः परं सीतारामयोर्यथार्थं प्रका + + + रावणेन्द्रजिद्बालिप्रभावकथनेन रामलक्ष्मणयोः प्रशंसाञ्च कर्त्तुं प्रथमं मुनीनामागमनमाह,— प्राप्तेति। इत्यादिः।

End. तद्रामायणकाव्यं ब्रह्मा अन्वमन्यत सकलपुरुषार्थसाधकत्वेन अङ्गीकरोतिस्म इत्यर्थः।

Colophon. इति परमहंसपरिव्राजकाचार्य्यश्रीनारायणतीर्थशिष्यमहेश्वरतीर्थविरचितश्रीरामायणतत्त्वदीपिकायां दशोत्तरशततमः (सर्गः)॥ ११०॥
महेशतीर्थरचिता रामपादसमर्पिता।
टीका तूत्तरकाण्डस्य समाप्ता तत्त्वदीपिका॥
श्रीरामायणसिन्धुमध्यमसकृत्संविश्य तत्रोद्भवा-
न्युत्कृष्टानि पदार्थरत्ननिकराण्युद्धृत्य सद्भिः पुरा।
टीकासम्पुटसञ्चितानि निपुणैस्तान्येव लब्ध्वा मया
श्रीनारायणतीर्थरामगुरुसत्पादार्पितान्यादरात्॥
श्रीरामायणटीकेयं महेशयतिना कृता।
शिवरामेण यतिना + + + + + कारिता॥
यादृशी पुस्तिका दृष्टा तादृशी लिखिता मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
शुभमस्तु सं(वत्) १८५२।

विषयः। वाल्मीकिरामायणोत्तरकाण्डव्याख्यानं।

No. 1270. वराहपुराणं ।

Substance, country-made yellow paper, 12¼ × 9¼ inches. Folia, 277. Lines, 31 on a page. Extent, 9,123 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Verse. Incorrect.

Varáha Puráṇa. The twelfth of the eighteen great Puráṇas attributed to Vyása. The following is Professor Wilson's account of this work:

"It is narrated by Vishṇu as Varáha, or in the boar incarnation, to the personified Earth. Its extent, however, is not half that specified; little exceeding ten thousand stanzas. It furnishes, also, itself, evidence of the prior currency of some other work, similarly denominated; as, in the description of Mathurá contained in it, Sumantu, a Muni, is made to observe: "The divine Varáha in former times expounded a Puráṇa, for the purpose of solving the perplexity of Earth."

"Nor can the Varáha Puráṇa be regarded as a Puráṇa agreeably to the common definition; as it contains but a few scattered and brief allusions to the creation of the world and the reign of kings: it has no detailed genealogies, either of the patriarchal or regal families, and no account of the reigns of the Manus. Like the Linga Puráṇa, it is a religious manual, almost wholly occupied with forms of prayer and rules for devotional observances, addressed to Vishṇu; interspersed with legendary illustrations, most of which are peculiar to itself, though some are taken from the common and ancient stock. Many of them, rather incompatibly with the general scope of the compilation, relate to the history of S'iva and Durgá. A considerable portion of the work is devoted to descriptions of various Tírthas, places of Vaishṇava pilgrimage; and one of Mathurá enters into a variety of particulars relating to the shrines of that city, constituting the Mathurá Máhátmya.

"In the sectarianism of the Varáha Puráṇa there is no leaning to the particular adoration of Kṛishṇa; nor are the Rathayátrá and Janmáshṭamí included amongst the observances enjoined. There are other indications of its belonging to an earlier stage of Vaishṇava worship; and it may, perhaps, be referred to the age of Rámáṇuja, the early part of the twelfth century." *Vishṇu Puráṇa*, p. LXX.

The guess about the date, as already elsewhere noticed, is wide of the mark. The MS. comprises 165 chapters numbered irregularly, and sometimes incorrectly. The subjects of these chapters have been detailed below in Sanskrit.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
नमस्तस्मै वराहाय लीलयोद्धरते महीं ।
खुरमध्यगतो यस्य मेरुः खणखणायते ॥
दंष्ट्राग्रेणोल्लिता गौरुदधिपरिहृता पर्व्वतैर्निम्नगाभिः
साकं मृत्पिण्डवत् प्राग्बृहदुरुवपुषानन्तरूपेण येन ।
सोऽयं कंसासुरारिर्मधुनरकदशास्यान्तकृत्सर्व्वसंस्थः
कृष्णो विष्णुः सुरेशोनुदतु मम रिपूनादिदेवो वराहः ॥
यः संसारार्णवे नौरिव मरणजराव्याधिनक्रोर्म्मिभीमे
भक्तानां व्याधिहर्त्तासुरनरकदशास्यान्तकृत्कोलरूपी । .
विष्णुः सर्व्वेश्वरोऽयं यमिह कृतधियो लीलया प्र भुवन्ति
मुक्तात्मानोऽनपायं भवति प्रणदितारातिपक्षः क्षितीशः ॥
यस्मिन् काले क्षितिः पूर्व्वं कल्पे वराहरूपिणा ।
उद्धृतार्थंरुयो भक्त्या पप्रच्छ परमेश्वरं॥
धरण्युवाच । कल्पे कल्पे भवानेवं मां समुद्धरति प्रभो । इत्यादिः ।

End. एषा चेयं वराहाख्या वराहस्य सदा प्रिया ।
य एतां द्विजमुख्याय वाचकाय ददाति च ॥
स राज्यमतुलं भुक्त्वा कुलैः सार्द्धं व्रजेच्च मां ।
लिखितं तिष्ठते गेहे यस्य तस्य स्वयं हरिः ।
तिष्ठति स भवान् रुद्रो ब्रह्मा चैवात्र तिष्ठति ॥

Colophon. इति (श्रीवराहपुराणे) भगवच्छास्त्रे वराहपुराणं समाप्तं ॥

विषयः। १ प्रथमे अध्याये,—धरणीवराहसंवादः । धरणीकर्त्तृकवराहस्तुतिः ।
२ अ०,—पुराणलक्षणकथनं । आदिसृष्टिकथनं । तत्र प्रकृतिपरिणामेन बुद्ध्यादिसृष्टिकथनं । रुद्रादीनामुत्पत्तिकथनादिः । दक्षादीनामुत्पत्तिकथनं । नारायणनामनिरुक्तिः । विस्तरेण सृष्टिप्रक्रियाकथनं । नवविधसृष्टिकथनं । ब्रह्मणो रुद्रादिसृष्टिः । स्वायम्भुवमनुवंशकीर्त्तनं । प्रियव्रतसमीपे नारदस्य सरसि सावित्रीदर्शनादिवृत्तान्तवर्णनं । सावित्र्यङ्गे वेददर्शनादिविवरणकथनञ्च ।
३ अ०,—नारदस्य नामव्युत्पत्तिः पूर्व्वजन्मवृत्तान्तस्य च वर्णनं ।
४ अ०,—दशावतारकथनं । ईश्वरः पञ्चभूतमय इत्यादिकीर्त्तनं । अश्वशिरसो राज्ञ उपाख्यानं । तत्र ब्राह्मणवेशेन उपस्थितयोः केशवकेशववाहनयोः स्वरूपप्रदर्शनपूर्व्वकं ब्रह्मादीनां सर्व्वेषां विष्ण्वात्मकत्वप्रकाशः ।

विषयः। ५ अ०,—किं कर्म्मशीलो मोक्षभागी उत ज्ञानी इत्यादिनिरूपणं। रैभ्यबृहस्पति-संवादः। लुब्धकसंयमनवृत्तान्तः। योगकथनं। योगेन अश्वशिरसः कृष्णप्राप्तिः।
६ अ०,—काश्मीराधिपतिर्वसुरेव लुब्धक इत्यादिवृत्तान्तवर्णनं। पुण्डरीकाक्षपार-स्तोत्रकथनं। व्याधवाक्यात् वसोः पूर्व्वजन्मवृत्तान्तस्मरणं।
७ अ०,—वसोः स्वर्गारोहणं श्रुत्वा रैभ्यस्य तपस्याचरणं। तत्र तेन सह सनत्कुमार-संवादः। विशालाधिपतेर्विशालनृपतेरुपाख्यानं। विष्णुप्रसादाद् विशालस्य मोक्षप्राप्तिः।
८ अ०,—रैभ्ये विमुक्ते तद्देहस्थः पापपुरुषः धर्म्मव्याधो बभूवेत्यादिवृत्तान्तकथनं। पशुहिंसादोषकथनं। धर्म्मव्याधो विष्णुस्तवनेन तन्मयोऽभूदित्यादिकीर्त्तनं।
९ अ०,—प्रणवमाहात्म्यं। ॐकाररूपो हरिरितिकथनं। ततो लोकस्य सृष्टिः। वेदाविर्भावः। मत्स्यरूपेण भगवता वेदोद्धारः। तस्य स्तवनकीर्त्तनञ्च।
१० अ०,—आदिवराहसमीपे देवानां वरग्रहणं। सुप्रतीकोपाख्यानं। दुर्ज्जयकर्त्तृक-स्वर्गपराजयः। तेन सह विद्युत्सुविद्युन्नामकासुरयोः संवादः। हेतिप्रहेतिभ्यां दुर्ज्जय-समीपे पराजितानां देवानां विष्णुसमीपगमनादिवृत्तान्तकथनं। दुर्ज्जयाय हेतिप्रहे-तिभ्यां कन्यायुगलसम्प्रदानं। सुकेशीमिश्रकेश्योर्गर्भे तस्य पुत्रयुगजननादिकथनं।
११ अ०,—दुर्ज्जयस्य गौरमुखमुनेराश्रमप्रवेशः। भोजनं सर्व्वेषां कारयिष्यामीति मुनिवचनं श्रुत्वा तस्य कोपः। गौरमुखः विष्णुस्तवनेन चिन्तामणिं प्राप्य तत्प्रभा-वाद् दिव्यपुरीं निर्म्माय सबलस्य राज्ञः परमातिथ्यं कृतवान्। ततो बलात्कारेण मणिग्रहणोद्यते तस्मिन् गौरमुखस्य मन्यूद्भूतेन सैन्येन राजसेना हतेति वर्णनं। नारायणस्तु गौरमुखकृतस्तवेन तत्रागत्य निमिषेण सुदर्शनेन दुर्ज्जयं जघान, तेन च तत्स्थानं नैमिषेतिसञ्ज्ञया विख्यातमित्यादिकथनञ्च।
१२ अ०,—दुर्ज्जयनिधनं निशम्य सुप्रतीकस्य श्रीरामस्तवनं। तस्य श्रीरामदर्शना-दिविवरणं।
१३ अ०,—गौरमुखस्य भगवदाराधनार्थं प्रभासतीर्थगमनं। तेन सह मार्कण्डेयस्य संवादः। पितृलोकसृष्टिकथनं। तेषां नाम कथनं। तिलोदकादिदानं। पितृ-गीतादिकथनञ्च।
१४ अ०,—श्राद्धे ब्राह्मणनिरूपणं। श्राद्धे पात्रकरणायोग्यनिरूपणञ्च। तत्र निम-न्त्रणप्रकारकथनादिः। श्राद्धकथनं। तत्र मांसनिरूपणादिः। विहिताविहित-द्रव्यकथनं। श्राद्धकालकथनादिकञ्च।
१५ अ०,—गौरमुखः श्राद्धैः पितृलोकान् सन्तर्प्य भगवन्तं स्तुत्वा च परमां गतिं प्रापेत्यादिकथनं।

विषयः । १६ अ०,—वित्रुत्सुविद्युतोर्बधार्थं देवानां यज्ञकरणोद्योगः । गवां रक्षार्थं सरमानियोगः । गवामसुरसान्निध्यगमनादिकथनं । सरमाश्वासनं । देवानां यागकरणं । असुराणां पराजयकथनं ।

१७ अ०,—प्रजापालोपाख्यानं । आश्रमागतेन तेन सार्द्धं महातपसो मुनेः संवादः । अहं प्रधानोऽहं प्रधान इति विवदमानानां देवानां वृत्तान्तकीर्त्तनं । विष्णोः प्राधान्यकथनादिः ।

१८ अ०,—अग्न्यादीनामुत्पत्तिकथनादिः । अग्नेर्गार्हपत्यादिनामनिरुक्तिः ।

१९ अ०,—ब्रह्मणः कोपात् प्रतिपदि तिथावग्नेरुत्पत्तिकथनं । तत्र हवने सर्व्वेषां देवानां प्रीतिरिति कथनादिः ।

२० अ०,—अश्विनीकुमारयोर्जन्मविवरणं । तयोः पितामहस्तुतिः ।

२१ अ०,—रुद्रोत्पत्तिकथनं । रुद्रनामनिर्व्वचनं । ब्रह्मणा रुद्राय गौरीसम्प्रदानं । रुद्रे जलप्रविष्टे गौरीमन्तःशरीरगां कृत्वा ब्रह्मणः पुनर्दक्षादिसृष्टिकरणकथनं । दाक्षायणीजन्मविवरणं । दक्षयज्ञवर्णनं । रुद्रपार्षदैः सह सुराणां युद्धकथनं । हरिहरयोर्युद्धवर्णनं । शिवभागदानपूर्व्वकं देवानां तत्स्तुतिः । दक्षस्य रुद्राय गौरीसम्प्रदानं ।

२२ अ०,—दक्षस्य वैरमनुस्मृत्य गौर्य्या हिमालये जन्मग्रहणं । गौर्य्यास्तपश्चरणं । महादेवेन सह तस्या विवाहवर्णनं । तृतीयायां तिथौ गौर्य्या जन्मकथनं । तत्तिथिमाहात्म्यकथनादिः ।

२३ अ०,—गणेशोत्पत्तिविवरणं । तस्य गजवक्त्रत्वादिकारणकथनं । विनायकानामुत्पत्तिकथनं । तेषामाधिपत्ये गणेशस्याभिषेकविवरणं । देवगणकृतगणपतिस्तोत्रं ।

२४ अ०,—नागोत्पत्तिविवरणं । ब्रह्मकर्तृकं तेषां निवासस्थानादिकथनं ।

२५ अ०,—कार्त्तिकेयोत्पत्तिविवरणकथनादिः । देवगणकृतमहेशस्तुतिः । स्कन्दोत्पत्तिः । एतत्फलश्रुतिः ।

२६ अ०,—सूर्य्योत्पत्तिविवरणकथनादिः । देववृन्दकृतसूर्य्यस्तुतिः ।

२७ अ०,—अन्धकविप्रकृतानां देवानां दैन्यवर्णनं । गिरिशं निहत्य गिरिजां हरिष्यामीति अन्धकस्य तम्प्रति युद्धयाच्ञा । विष्ण्वादीनामन्धकेन सार्द्धमायोधनं । शूलेन विद्धस्यान्धकस्य भूमिस्पृष्टशोणिताद् बहूनामन्धकानामुत्पत्तिः । मातृगणकर्तृकं तेषां शोणितपानं । कामादिगुणानामुत्पत्तिकथनादिः ।

२८ अ०,—सिन्धुद्वीपराजविवरणं । तस्य पूर्व्वजन्मनि वृत्तत्वकथनं । तपस्यतः सिन्धुद्वीपस्य वेत्रवतीनद्या मनुष्यरूपायाः पाणिग्रहणं । तस्यां वृत्रासुरस्य जन्म ।

विषयः। तेन सह देवानां युद्धकीर्त्तनं। कात्यायन्या उत्पत्तिकथनं। महादेवकृतदेवीस्तवनादिकथनं।

२९ अ०,—दिशामुत्पत्तिकथनं। तासां लोकपालैः सह विवाहकथनादिः।

३० अ०,—धनदोत्पत्तिविवरणं। तन्नामनिर्व्वचनं। तत्सेवार्थं तिथिनिरूपणं।

३१ अ०,—ईश्वरस्य विष्णुरूपेण प्रादुर्भावकथनं। तस्य नाभिदेशात् कमलरूपायाः पृथिव्या उत्पत्तिकथनादिः। कर्णिकारूपसुमेरुमध्ये ब्रह्मणो जन्मकथनादिः। तत्कृतविष्णुस्तुतिः।

३२ अ०,—धर्म्मोत्पत्तिविवरणकथनादिः। युगविशेषे तस्य पादनिरूपणं। चन्द्रेण कृते ताराहरणे धर्म्मस्य वनप्रवेशः। तत्र देवानां स्तुतिकथनादिः।

३३ अ०,—रुद्राणामुत्पत्तिकथनादिः। पशुपतिरूपशिवस्तोत्रं।

३४ अ०,—पितृसर्गकथनादिः। तत्र तर्पणादितिथिकथनं।

३५ अ०,—चन्द्रम्प्रति दक्षशापविवरणं। समुद्रमन्थने तस्योत्पत्तिकथनादिः।

३६ अ०,—सुप्रभादिनृपाणां चरितकथनादिः। गोविन्दनामकहरिस्तुतिः।

३७ अ०,—भगवतो भावसाध्यताकथनादिः। ब्रह्मपुत्रस्य अवनेर्व्याधेन सह संवादः।

३८ अ०,—व्याधस्य तपस्यावर्णनादिः। तस्य दिव्यदेहप्राप्तिकथनादिः।

३९ अ०,—भगवत्साधनोपायवर्णनं।

४० अ०,—धरणीव्रतकथनादिः। तस्य फलश्रुतिकथनादिः। अत्र मार्गशीर्षे मासि महामीनरूपस्य भगवतः पूजाविधानं।

४१ अ०,—पौषशुक्लद्वादश्यां कूर्म्मरूपस्य तस्य पूजनं।

४२ अ०,—माघशुक्लद्वादश्यां वराहरूपस्य तस्य पूजनकथनादिः।

४३ अ०,—फाल्गुनशुक्लद्वादश्यां नृसिंहरूपस्य तस्य पूजाकथनादिः। अत्र पारसव्यराजोपाख्यानं।

४४ अ०,—एवं चैत्रमासे वामनरूपस्य तस्य पूजनकथनं। अत्र हयाश्वराजोपाख्यानं।

४५ अ०,—वैशाखमासे परशुरामरूपस्य तस्य पूजनं। अत्र वीरसेनराजोपाख्यानं।

४६ अ०,—ज्यैष्ठमासे रामलक्ष्मणपूजा। अत्र दशरथोपाख्यानं।

४७ अ०,—आषाढमासे श्रीकृष्णपूजनं। अत्र वसुदेवोपाख्यानं।

४८ अ०,—श्रावणमासे बुद्धपूजनं। अत्र नृगराजोपाख्यानं।

४९ अ०,—भाद्रमासे कल्किपूजनं। अत्र विशालराजोपाख्यानं।

५० अ०,—आश्विनमासे पद्मनाभपूजा। अत्र भद्राश्वराजोपाख्यानं।

५१ अ०,—कार्त्तिकमासे द्वादशीव्रतमाहात्म्यकथनं। इति धरणीव्रतं।

५२ अ०,—भद्राश्वागस्त्यसंवादः। दशादशविभागकथनं। योगकथनं। अगस्त्यगीता।

विषयः। ९४ अ०,—गोमेदशाकद्वीपवर्णनं।

९५ अ०,—ब्रह्मरुद्रादिदेवानां मध्ये विष्णोः परत्वकथनादिः। प्रमथैः परिवृतस्य पिनाकपाणेः समीपे ब्रह्मणो महिषासुरचेष्टितकीर्त्तनं। त्रिकलादेव्या उत्पत्तिवर्णनं। त्रितनुधारणकथनादिः। सृष्ट्यादिदेवीनां तपस्यादिकथनं।

९६ अ०,—सृष्ट्यादिदेवीनां माहात्म्यादिकथनं। तासां ब्रह्मकृतस्तुतिः।

९७ अ०,—तपस्यन्त्या वैष्णव्याः कोपात् कुमारीणामुत्पत्तिकथनादिः। कुमारीभिः सेव्यमानां तां विलोक्य महिषासुरसमीपे नारदस्य तद्वृत्तान्तकथनादिः।

९८ अ०,—देव्याः समीपे महिषासुरस्य दूतप्रेरणादिः। महिषासुरस्य युद्धयात्रावर्णनादिः।

९९ अ०,—महिषासुरस्य सुरलोकाक्रमणवर्णनं।

१०० अ०,—देवीसमीपे दूतस्य महिषासुरजन्मवृत्तान्तकथनं। तेन सह देव्याः परिणयप्रस्तावना। कुपितया देव्या सार्द्धमसुराणां युद्धवर्णनं। महिषासुरबधकथनं। देव्याः स्तुतिः।

१०१ अ०,—समुद्रजलवासिनो रुरुनामकासुरस्य शक्रादिभिः सह युद्धवर्णनं। देवीहास्योद्भवानां योगिनीनां समीपे असुराणां पराजयः। देवीकर्त्तृकरुरुबधः। रुद्रस्य देवीस्तोत्रकथनादिः। योगिनीनां तत्प्रार्थं स्थाननिरूपणादिः। प्रयोजनवशादेकायाः शक्तेस्त्रैविध्यं। त्रिशक्तिमाहात्म्यकथनं।

१०२ अ०,—रुद्रसृष्टिकथनं। तृतीये जन्मनि रुद्रस्य पिङ्गाचलादिकथनं। रुद्रस्य ब्रह्मस्कन्धारोहणं। रुद्रस्य ब्रह्मशिरश्छेदनं। ब्रह्मशापेन कपाललग्नहस्तस्य कपालमालिनो महेन्द्रपर्व्वतं गत्वा कापालिकव्रताचरणं। द्विधाभिन्नस्य शिरसः खण्डमेकं गृहीत्वा रुद्रस्य विविधतीर्थपर्य्यटनं। कपालमोचनतीर्थकथनादिः। महाव्रतभग्नकापालादिव्रतकथनं। रुद्रमाहात्म्यकथनं।

१०३ अ०,—सत्यतपोनामकलुब्धकोपाख्यानं। तत्र कदाचित् छिन्नायां तर्ज्जन्यां तस्य भस्मदर्शनादिवृत्तान्तकथनं। वृत्तान्तमिमं निशम्य इन्द्रोपेन्द्रयोः किरातवराहरूपाभ्यां तत्र प्रवेशादिकथनं। तयोः सत्यतपसे वरदानं। स्वगुरोरारुणेस्तत्त्वज्ञानमुपलभ्य सत्यतपसो मोक्षप्राप्तिकथनादिः।

१०४ अ०,—वैष्णव्याः शक्तेर्माहात्म्यकथनं। विष्णुपूजाविधिकथनं। दीक्षाकीर्त्तनं।

१०५ अ०,—येन येन द्रव्येण नवग्रहपूजनं कृत्वा यद् यत् फलं भवति तत्प्रकारकथनादिः।

१०६ अ०,—द्वादशीव्रतमाहात्म्यकथनं। अत्र श्वेतराजोपाख्यानं। श्वेतराजसमीपे वसिष्ठस्य विनीताश्वराजविवरणकीर्त्तनं। दानमाहात्म्यकथनादिः।

विषयः। १०७ अ०,—नष्टचन्द्रसूर्य्यतारकादिसमये पृथिव्या विष्णुस्तुतिः।
१०८ अ०,—स्तवेन वशीभूतस्य विष्णोर्वराहरूपेण तदुद्धारकथनादिः। विष्णुसन्निधौ पृथिव्या नानाविषयकप्रश्नकीर्त्तनादिः।
१०९ अ०,—नाहं यज्ञादिना तुष्यामि किन्तु केवलया भक्त्येति विष्णोः कथनादिः। विष्णुभक्तिमाहात्म्यकथनं। विष्णुपूजाविधानादिकथनं। कर्म्माध्यायकथनं।
११० अ०,—कर्म्मानुष्ठानविधिकथनादिः। कथं कर्म्म कर्त्तव्यं तत्कथनादिः। दुःखजनककर्म्मप्रदर्शनं।
१११ अ०,—द्वात्रिंशद्विधापराधकथनादिः। यथा यथा विष्णुः प्रपद्यते तत्कथनञ्च।
११२ अ०,—येन प्रकारेण विष्णवे उपचारादिकं दातव्यं, मन्त्रकथनपूर्व्वकं तत्प्रकारथनं।
११३ अ०,—विष्णवे दानयोग्यानां फलमूलमांसादीनां नामादिकथनं।
११४ अ०,—स्नात्वा जलाञ्जलिदानेन विष्णुतर्पणकर्त्तव्यता, तन्मन्त्रकथनञ्च।
११५, अ०,—विष्णुभक्तानां प्रकृतिकथनादिः। येन येन कर्म्मणा गर्भवासो न भवति तत्कथनं।
११६ अ०,—येन कर्म्मणा जनः तिर्य्यग्योनित्वं नाधिगच्छति तत्कथनं। कोकामुखतीर्थमाहात्म्यादिकथनं। अत्र श्येनमत्स्ययोर्वृत्तान्तकथनं। आमिषलोलुपायाश्चिल्ल्या राजकन्यारूपेण जन्मग्रहणादिविवरणकथनं।
११७ अ०,—येन कर्म्मणा लोकः परं पदं पश्यति, तत्कथनादिः। माधवादिमासविशेषे केशवार्च्चनफलकथनं। तत्र द्रव्यविशेषदानफलकथनञ्च।
११८ अ०,—षट्सु ऋतुषु विष्णोराराधनार्थे कर्म्मविशेषविधानं।
११९ अ०,—मायावैचित्र्यकीर्त्तनादिः। अत्र सोमशर्म्मोपाख्यानं। विष्णुभक्तदर्शनवन्दनादिकर्त्तव्यता। मायाचक्रमाहात्म्यादिकथनं।
१२० अ०,—कुब्जाम्रकतीर्थवर्णनं। एतत्तीर्थोत्पत्तिविवरणं। तत्र मानसतीर्थकथनं। मायातीर्थकथनं। सर्व्वात्मकतीर्थकथनं। पूर्णमुखतीर्थकथनं। अशोकतीर्थकथनं। पुण्डरीकतीर्थकथनं। अग्नितीर्थकथनं। वायव्यतीर्थकथनं। शक्रादितीर्थकथनञ्च। एषां माहात्म्यकथनादिः। व्यालीनकुलसंवादकथनं। तयो राजापत्यरूपेण जन्मग्रहणवृत्तान्तादिकथनं। कुमारीकुमारयोः तयोः परस्परं विवाहादिकथनं। एतत्फलश्रुतिकीर्त्तनं।
१२१ अ०,—गुर्व्वभिगमनप्रकारः। तत्र नियमकथनादिः। दीक्षाविधिः।
१२२ अ०,—क्षत्रियादीनां दीक्षायां विशेषकथनं। दीक्षितस्य कर्त्तव्यकथनादिः। गलन्तिकाग्रहणकथनं। कङ्कणादिदानमन्त्रकथनं।

विषयः। १२३ अ०,—यज्ञसूत्रलक्षणतद्दानमन्त्रादिकथनं। सन्ध्याविधानं। दीपदानविधिः। ताम्रभाजनेन विष्णवे इत्यादिदानप्रशंसा। ताम्राश्रमे ताम्रोत्पत्तिकथनं। विष्णुभक्तस्य गुडाकेशस्य विष्णुसन्निधौ तच्चक्रोत्कृत्तानां स्वमांसानां ताम्रजननप्रार्थना। तन्मांसानां ताम्रत्वकथनं। रक्तानाञ्च पद्मरागत्वकीर्त्तनं। एवञ्च तस्य अस्थीनि रूप्याणि, मलञ्च कांस्यमभूदिति कथनं।

१२४ अ०,—विष्णुभक्तस्य राजान्नभक्षणे दोषकथनं। तत्र प्रायश्चित्तकथनञ्च।

१२५ अ०,—दन्तकाष्ठाग्रहणे प्रायश्चित्तकथनं।

१२६ अ०,—निधुवनं कृत्वा अकृतस्नानस्य विष्णुपूजने दोषकथनपूर्व्वकं प्रायश्चित्तकथनं।

१२७, १२८ अ०,—शवं स्पृष्ट्वा विष्णुपूजने प्रायश्चित्तकथनं। एवं रजस्वलास्पर्शनप्रायश्चित्तकथनं। मेहनापराधप्रायश्चित्तं। पुरीषोत्सर्गप्रायश्चित्तं। अन्यभाषणप्रायश्चित्तं। नीलवस्त्रपरिधानप्रायश्चित्तं। उपस्पर्शनापराधप्रायश्चित्तं।

१२९ अ०,—क्रोधापराधप्रायश्चित्तकथनं। अकर्म्मण्यपुष्पापराधप्रायश्चित्तं। रक्तवस्त्रपरिधानापराधप्रायश्चित्तं। अन्धकारे भगवत्स्पर्शनापराधप्रायश्चित्तं। कृष्णवस्त्रपरिधानापराधप्रायश्चित्तं। कुक्कुरोच्छिष्टापराधप्रायश्चित्तं। एवं वराहमांसभक्षणप्रायश्चित्तं। जालपादभक्षणप्रायश्चित्तं। प्रदीपस्पर्शनापराधप्रायश्चित्तं। श्मशानगमनापराधप्रायश्चित्तं। पिण्याकभक्षणापराधप्रायश्चित्तं। वराहमांसेन विष्णुतर्पणापराधप्रायश्चित्तं। सुरापानप्रायश्चित्तं। कुसुम्भशाकदानापराधप्रायश्चित्तं। परकीयवस्त्रप्रावरणप्रायश्चित्तं। नवान्नादानापराधप्रायश्चित्तं। गन्धादिकमदत्त्वा धूपदानप्रायश्चित्तं। उपानहापराधप्रायश्चित्तं। भेरीताडनापराधप्रायश्चित्तं। इति द्वात्रिंशद्विधापराधकथनपूर्व्वकं तत्प्रायश्चित्तकथनं।

१३० अ०,—शौकरतीर्थमाहात्म्यादिकथनं। तत्र चक्रतीर्थ-रूपतीर्थ-योगतीर्थप्रभृतीनां माहात्म्यकथनादिः। ब्रह्मदत्तराजोपाख्यानं। तत्पुत्रस्य सोमदत्तस्य मृगयाकथनादिः। शृगालीगृध्रयोर्मानुषजन्मवृत्तान्तादिकीर्त्तनं।

१३१ अ०,—शौकरके तीर्थे खञ्जरीटस्य मृतशरीरं सङ्गृह्य बालानां कलहकथनादिः। खञ्जरीटस्य मानुषजन्मग्रहणादिवृत्तान्तकथनं। एतद्वृत्तान्तफलश्रुतिः।

१३२ अ०,—विष्णुगृहे गोमयलेपनफलश्रुतिः। तत्र गीतकरणफलश्रुतिः। अत्र चण्डालब्रह्मराक्षसयोः संवादकथनं। ब्रह्मराक्षसस्य यज्ञकर्म्मसु मन्त्रपरिभ्रष्टतया स्वावस्थाकथनं। एतत्फलश्रुतिः।

१३३ अ०,—कोकामुख-वदरिकाश्रम-लोहार्गल-शालग्रामाश्रित-लोहाकुलतीर्थेषु विष्णोः सर्व्वदा सान्निध्यकीर्त्तनं। तत्र कोकामुखस्य प्राधान्यकथनं। तत्र जलविन्दुनामक-

विषयः। तीर्थकथनादिः। विष्णुधारातीर्थकथनं। विन्दुसरस्तीर्थकथनं। सोमतीर्थकथनं तुङ्गकोटतीर्थकथनं। आदिस्कन्दाश्रमतीर्थकथनं। पञ्चशिखतीर्थकथनं। गुह्यप्रभ-तीर्थकथनं। सप्तसामुद्रिकतीर्थकथनं। को+बलतीर्थकथनं। धर्म्मपुरतीर्थ-कथनं। गङ्गाधारातीर्थकथनं। पञ्चसरतीर्थकथनं। शक्रकुण्डतीर्थकथनं। दंष्ट्रा-कुण्डतीर्थकथनं। विष्णुतीर्थकथनं। सर्व्वकामिकतीर्थकथनं। मत्स्यशिलातीर्थ-कथनं। कोकामुखतीर्थे वराहरूपस्य विष्णोरवस्थितिकीर्त्तनं।

१३४ अ०,—वदरिकाश्रमवर्णनं। तत्र ब्रह्मकुण्डाग्निकुण्ड-ब्रह्मपदेन्द्रलोक-पञ्चसर-चतुःस्रोत्र-देवाधार-द्वादशादित्यकुण्ड-लोकपाल-वरुण-मानसोद्भेदप्रभृतितीर्थवर्णनं। उर्व्वशीकुण्डतीर्थप्रस्तावे उर्व्वशीवृत्तान्तकथनं।

१३५ अ०,—सान्तःकरणशारीरविज्ञानकथनादिः। अध्यात्मयोगकथनं।

१३६ अ०,—नामसङ्कीर्त्तनादिमाहात्म्यं। चित्तन्यासकथनपूर्व्वकं तत्फलश्रुतिः। योगप्रशंसा। स्त्रीपुंधर्म्मकथनं। ऋतुमत्यभिगमननियममन्त्रादियथनं। ज्ञानयोग-माहात्म्यं। सन्न्यासप्रशंसा।

१३७ अ०,—गुह्यमण्डलवृत्तान्तकथनादिः। वटमूलतीर्थविवरणं। कुम्भीरकनाम-महाह्रदविवरणं। कापिलकाननकथनं। महास्रोतादिमहाह्रदकथनं। मन्दार-कुण्डादितीर्थकीर्त्तनं।

१३८ अ०,—विस्तरेण मन्दारकुण्डतीर्थवर्णनं। तत्र मन्दारद्रुमवृत्तान्तकथनं। कोटरतीर्थकथनं।

१३९ अ०,—शालग्रामतीर्थवर्णनं। तत्र ब्रह्मर्षेः शालङ्कायनस्य वृत्तान्तकथनादिः। भगवतः शालग्रामेतिनामवृत्तान्तकथनं। तत्र विल्वप्रिय-गुह्यप्रभ-कालह्रदप्रभृति-पञ्चदशतीर्थकथनं। तत्र तत्र फलकीर्त्तनञ्च।

१४० अ०,—महादेवस्य और्व्वाश्रमभस्मीकरणवृत्तान्तवर्नेनं। और्व्वाभिशापेन शि-वस्य अन्तर्दाहकथनं। विष्णुवचनप्रीतस्य और्व्वस्य उपदेशेन गोनिष्क्रमतीर्थमा-साद्य शिवस्य सुरभिदुग्धादिना तापशान्तिवृत्तान्तकथनं। तत्तीर्थमाहात्म्यं। रूप-कुण्डतीर्थकथनं। पञ्चवटतीर्थकथनं। पञ्चाननतीर्थकथनं। रुद्रपदब्रह्मशिरः-प्रभृतितीर्थकथनं। वराहस्य वासुदेवसञ्ज्ञो भविष्यामीति भाविवृत्तान्तकथनं। मात्सर्य्यस्य दोषाकरत्वकथनादिः। कोटवनतीर्थकथनं। विष्णुसरोनामतीर्थकथ-नं। एतेषां क्षेत्राणां माहात्म्यकथनं।

१४१ अ०,—गोनिष्क्रमक्षेत्रे अयोमयी भगवत्प्रतिमा वर्त्तते इत्यादिवृत्तान्तकथनं। तत्र पञ्चकुण्डतीर्थमाहात्म्यकथनं। मणिकुण्डध्रुवकुण्डप्रभृतितीर्थवर्णनं। पञ्चाश्रक-तीर्थकथनं।

विषयः। १४२ अ०,—द्वापरयुगे यादवोऽहं भविष्यामीति वराहवचनं। दुर्व्वाससः शापेन यदुकुलक्षयो भविष्यतीतिवृत्तान्तकथनञ्च। जाम्बवतीनन्दनस्य शाम्बस्य वृत्तान्तकथनादिः। द्वारकायां पञ्चसरो नामतीर्थमस्तीति तद्विवरणकथनादिः। प्रभासतीर्थविवरणं। पञ्चकुण्डतीर्थकथनं। हंसकुण्डतीर्थविवरणं। ब्रह्मसङ्गमनतीर्थविवरणं। कदम्बकुण्डक्षेत्रविवरणं। प्रद्युम्नभेदनक्षेत्रविवरणं। नारायणसङ्गमक्षेत्रविवरणं। रैवतक्षेत्रकथनं। तत्र ऊर्द्धविल्वादिवृक्षविवरणं। विष्णुचङ्क्रमणक्षेत्रकथनं। तत्र अश्वत्थवृक्षविवरणं। द्वारकामाहात्म्यं। ब्रह्मसरोनामकतीर्थकथनं। सङ्गमनक्षेत्रवर्णनं। रामसरोनामकतीर्थकीर्त्तनं।

१४३ अ०,—समुद्रमलययोर्मध्ये दूरं नाम स्थानं मे प्रियमस्ति। तत्र सूर्पारकं नाम क्षेत्रं परशुरामस्य आश्रमो भविष्यतीति वराहवचनं। जयकुण्डतीर्थकथनं। तत्र तत्र फलश्रुत्यादिकथनं।

१४४ अ०,—म्लेच्छमध्ये लोहाकुलतीर्थवर्णनं। तत्र भगवन्मूर्त्तिकथनं। तत्र च भगवदस्त्रादिकथनं। नारदकुण्डकथनं। पर्व्वतकुण्डकथनं। पञ्चशूलक्षेत्रकथनं। सप्तर्षिकुण्डकथनं। शरभङ्गकुण्डकथनं। आङ्गिरसकुण्डकथनं। बृहस्पतिकुण्डकथनं। वैश्वानरकुण्डकथनं। उमाकुण्डकथनं। माहेश्वरकुण्डकथनं। ब्राह्मणकुण्डकथनं। तत्र ऋग्वेदादिधाराकथनं। एतेषां माहात्म्यकथनं।

१४५ अ०,—मथुराक्षेत्रकथनं। यमुनायां कुण्डावर्त्ततीर्थकथनं। वृन्दावनकथनं। तत्र शिलोच्चयतीर्थवर्णनं। अमितप्रभाशोकवृक्षकथनं। भाण्डीरवनकथनं। तत्रस्थवटवृक्षकथनं। रक्तशिलापट्टविवरणं। यमलार्ज्जुनकुण्डकथनं। अर्कस्थलकथनं। वीरस्थलकथनं। कनकक्षेत्रकथनं। क्रीड़नकक्षेत्रकथनं। सोमकुण्डकथनं। तालकुण्डकथनं। पिण्डारकक्षेत्रकथनं। जम्बीरवटुकक्षेत्रकथनं। कुन्दारोहणकक्षेत्रकथनं। बल्लकनक्षेत्रकथनं। नागजालोम्भककुण्डकथनं। परकुण्डकथनं। विन्दुप्रभकुण्डकथनं। शान्तरसतीर्थकथनं। ताम्रवनककनं। शक्रक्रीड़नकतीर्थकथनं। वारुण-कौवेरप्रभृतितीर्थकथनं। कालीयह्रदकथनं। तत्र कदम्बवृक्षकथनं। स्नावनकक्षेत्रकथनं। सप्तसामुद्रकतीर्थकथनं। मथुरामाहात्म्यकथनादिः।

१४६ अ०—मधुकाष्ठमयभगवत्प्रतिमानिर्म्माणविधिकथनादिः। तत्र नक्षत्रविशेषे वृक्षच्छेदनादिकथनं। तत्र अधिवासप्रतिष्ठादिविधानं।

१४७ अ०,—शिलामयप्रतिमानिर्म्माणविधिः। तत्र मन्त्रकथनपूर्व्वकमभिषेकद्रव्यप्रदानादिकथनं। पूजाविशेषविधानादिकञ्च।

१४८ अ०,—मृण्मयप्रतिमानिर्म्माणविधिः। तत्र प्रतिष्ठाविधानादिकथनं।

१४९ अ०,—ताम्रप्रतिमानिर्म्माणविधिः। तत्र प्रतिष्ठादिविधानकथनं। शान्तिकथनं।

विषयः । १५० अ०,—कांस्यप्रतिमास्थापनविधिः । तत्र प्रतिष्ठाविधानादिकथनं ।
१५१ अ०,—राजतप्रतिमास्थापनादिविधिः । एवं सुवर्णप्रतिमाया इति कथनं ।
१५२ अ०,—सर्व्वतोजलमये मायया बालरूपस्य भगवतो वटवृक्षाश्रयकथनादिः । ब्रह्मणो मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिकथनादिः । नेमिनामकतपोधनस्य उपाख्यानं । श्राद्धस्य उत्पत्तिकथनं । दाहमन्त्रादिकथनं ।
१५३ अ०,—अशौचकाले विहिताविहितनिरूपणं । त्रिषु वर्णेषु कर्त्तव्यं पाकभोजनमेव चेत्यादिकथनं । अस्थिसञ्चयनं । एकोद्दिष्टादिकथनं । प्रेतभूमिनिर्द्देशः । प्रेतकार्य्ये कुक्कुरादिध्वनिश्रवणनिषेधः । प्रेतोद्दिष्टभोजनप्रायश्चित्तकथनं । प्रेतश्राद्धविधानं । तत्र छत्रादिदाने फलश्रुतिकथनं । वृषपुच्छगलितोदकेन तर्पणविधानं । पितृयज्ञनामनिरुक्तिः । पितृयज्ञविधिः ।
१५४ अ०,—प्रेतभोज्यभोजने पुनः प्रायश्चित्तकथनं । गोहस्त्यश्वादिदानग्रहणे प्रायश्चित्तं ।
१५५ अ०,—पञ्चयज्ञविधानकथनादिः । पितृयज्ञे पात्रयोग्यभोक्तृनिरूपणादिः । नीलकण्ठपुच्छतर्पणं । सर्व्वेषां गार्हस्थ्याश्रममूलत्वकथनं । पितॄणामजीर्णनिवारणं । श्राद्धे निषिद्धदर्शनादौ प्रायश्चित्तकथनं ।
१५६ अ०—मधुपर्कोत्पत्तिकथनादिः ।
१५७ अ०,—शान्तिकथनं । मधुपर्कदानकथनञ्च ।
१५८ अ०,—जनमेजयसमीपे वैशम्पायनस्य यमालयवर्णनं । तत्र उद्दालकोपाख्यानं । सत्यप्रशंसाकथनं ।
१५९, १६० अ०,—यमालयात् प्रत्यागतस्य नचिकेतसः समीपे ऋषीणां तद्वृत्तान्तशुश्रूषावर्णनं ।
१६१ अ०,—यमालयवर्णनं ।
१६२, १६३ अ०,—यातनास्वरूपवर्णनं ।
१६४ अ०,—राक्षसैः सह यमकिङ्करीणां युद्धवर्णनं ।
१६५ अ०,—पापविशेषे नरकविशेषकथनं । फलश्रुतिः अत्र अध्यायसङ्ख्याविषम्यमस्ति ।

No. 1271. गे[illegible]ानं ।

Substance, country-made yello[illegible] paper, 10 × 6 inches. Folia, 124. Lines, 24 on a page. Extent, 2,0[illegible] s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur C[illegible]lege. Appearance, fresh. Prose. Incorrect.

Geyagána. One of the Sañhitás of the Sáma Veda. It is now in course of publication in the Asiatic Society's edition of the Sáma Veda Sañhitá.

Beginning. जन् ज व स्वः । तत्सवितुः वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः
प्रचोदयात् । तत्सवितुं नुरणियोत् । भोर्गो देवस्य धीमाहि २ । धियो यो नः
प्रचो ५१५२१५२ । हेम् । ओ २ । हायो ओ २४५ ॥ १ ॥
उगायि आयाही२ वीयितायार यि । तैव्या२ यि । इत्यादिः ।

End. अपामिवा अ२हो वा । हो५इ । डा । ढ२४ । राषस्य धाय रयास्तुता ।
अव्यो वारायि । भिः पवतो२३ यि । मदितमाः क्रीड़न्नूर्मिरपो वा २३२४ वा ।
आ ५ यिवो ६ हायि । फे२५ । सप्तदशः प्रपाठकः ।

Colophon. इति गेयगानं समाप्तं ।

विषयः । सामवेदीयसंहिताविशेषः ।

No. 1272. आर्षेयब्राह्मणं ।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 11. Lines, 26 on a page. Extent, 295 s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Ársheya Bráhmaṇa. One of the eight Bráhmaṇas of the Sáma Veda. It contains notices of the Ṛishis or original "seers," *i. e.* the author's of the Sáma Veda hymns. It has been lately printed in the *Pratna-kamra-nandiní*, a Sanskrit periodical of Calcutta. Dr. Burnell of Madras has an edition of it now in the press.

Beginning. अथ खल्वयमार्षेयप्रभवत् इषाणां नामधेयगोत्रोपधारणात् स्वर्ग्यं यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्चस्यं स्मार्त्तमायुष्यं प्रा+तराश्रिकमित्याचक्षते, तदप्येवमाङ्गर्ये इदं उपधारत एकैकस्य ऋषि+व्यं वर्षसहस्रमतिथिर्भवत्यनन्दितं प्रतिनन्दितो मानितः पूजितस्तपः स्वाध्यायफलमुपजीवतीत्यथापि ब्राह्मणं भवति । यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति । इत्यादिः ।

Facsimiles of the last two pages of a MS. of the Śiśupála-badha, three hundred and sixty-four years old, dated Śaka, 1434,=1511.

Facsimiles of the last two pages of a MS. of Sakuntalá, three hundred and four years old, dated Saka, 1494,=AD. 1571.

T. Black & Co., Cal.

End. आदित्यस्तोत्रयं महादित्यात्मेत्याचक्षते ++ महानाम्न्यः प्रजापते +++वा विश्वामित्रस्य वा सिमा वा मह्या वा शक्वर्यो वा शक्वर्यो वा ।

Colophon. इत्यार्षेयब्राह्मणे तृतीयप्रपाठकः समाप्तः ।

विषयः । फलकथनपूर्व्वकं साम्नां ऋषिनिरूपणं ।

No. 1273. शिशुपालवधः ।

Substance, palm-leaf, 14¼ × 1¾ inches. Folia, 153. Lines, 4 on a page. Extent, 2,294 s'lokas. Character Bengali. Date, Sk. 1436. Place of deposit, Calcutta, Government of India. Appearance, very old. Prose. Correct.

S'isupála-badha. An epic poem by Mágha, on an episode of the Mahábhárata, the subject being the destruction of Sis'upála, a sovereign inimical to the Pándu brothers. The work has been printed several times and is well known, but the MS. under notice is a very old one, being dated S'aka 1436 = A. C. 1512, and contains many readings not to be met with in the printed editions. Its style of writing is shown on plate V.

Beginning. श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥

End. सर्वेण सर्वाश्रय इत्यनिन्द्यमानन्दभाजा जनितं जनेन ।
यश्च द्वितीयं + + + + तीयो मुख्यः सतां गौणमवाप नाम ॥
श्रीशब्दनस्य कृतशब्दसमाप्तिलक्ष्म लक्ष्मीपतेश्चरितकीर्त्तनमात्र + + ।
तस्यात्मजः सुकविकीर्त्तिपुराशयेऽदः काव्यं व्यधत्त शिशुपालवधाभिधानं ॥

Colophon. इति श्रीदत्तसूनोः श्रीमाघकवेः कृतौ श्रीलक्ष्मणि शिशुपालवधे महाकाव्ये + + + +++: सर्गः समाप्तः ॥

विषयः । शिशुपालवधविवरणं ।

No. 1274. अभिज्ञानशकुन्तला ।

Substance, palm-leaf, 13¾ × 1½ inches. Folia, 82. Lines, 4 on a page. Extent, 1,271 s'lokas. Character, Bengali. Date, Sk. 1494. Place of deposit, Calcutta, Government of India. Appearance, very old. Correct.

Abhijñána S'akuntalá. This is the oldest codex of the Bengali recension of the S'akuntalá that has yet been met with; it is dated S'aka 1494 = A. C. 1570. It corresponds with the North-West recension much more closely than the printed texts. It has been obtained from the library of a Paṇḍit of S'ántipur, whose ancestors have been Paṇḍits for many generations: the MS. was a heirloom. As it is written on palm-leaf and is in a very decayed condition, the Paṇḍit thought he made a good bargain by selling it for several printed books. It is remarkably correct, and written in a clear but crabbed old hand. See plate IV.

Beginning. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वं।
या माहुः सर्व्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः॥

End. वत्स एवमस्तु इति निष्क्रान्ताः सर्वे। सप्तमोऽङ्कः। समाप्ता चेयमभिज्ञान-शकुन्तला॥

विषयः। शकुन्तलावृत्तान्तवर्णनं।

No. 1275. दैवतब्राह्मणं।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 2. Lines, 24 on a page. Extent, 45 s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Incorrect.

Daivata Bráhmaṇa, alias *Devatá-adhyáya-Bráhmaṇa.* One of the Bráhmaṇas of the Sáma Veda. Max Müller's Sanskrit Literature, p. 348.

Beginning. अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी इड़ा-निधनानि धनानि——इत्यादिः।

End. देवर्षिभ्यश्च ब्रह्मा सत्यञ्च ++ मामिति ब्रह्म सत्यञ्च पातु मामिति।

Colophon. इति दैवतब्राह्मणं। इति देवताध्यायः समाप्तः।

विषयः। साम्नां देवताच्छन्दआदिनिरूपणं। गायत्रीनिर्व्वचनं। गायत्र्यङ्गानि च।

No. 1276. वंशब्राह्मणं ।

Substance, country-made yellow paper, 12 × 7 inches. Folia, 12. Lines, 24 on a page. Extent 39 s'lokas. Character, Nágara. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Vañs'a Bráhmaṇa. One of the Bráhmaṇas of the Sáma Veda; it contains a genealogy of the Ṛishis of the Sáma Veda and of some of their descendants. A carefully edited text of this work with an interesting introduction has lately been published by the learned Dr. Burnell of Madras.

Beginning. नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्य्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाया चोपजयाय च । शर्व्वदत्ताद् गार्ग्याच्छार्व्वदत्तो गार्ग्यो रुद्रभूतिर्द्राह्यायणिरित्यादिः ।

End. वृहद्वसुर्गोभिलो गोभिलादेव गोभिलो राध्याच्च गौतमात् समानं परऽँ समानं परं ।

Colophon. इति वंशब्राह्मणं समाप्तं ।

विषयः । गार्ग्यादारभ्य गोभिलपर्य्यन्तमृषीणां वंशविस्तारकथनं ।

No. 1277. साङ्ख्यचन्द्रिका ।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 48. Lines, 18 on a page. Extent, 1,404 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Sáñkhya-chandriká. A commentary on the Sáñkhya Káriká of Ís'varakṛishṇa. By Náráyana Tírtha, a disciple of Rámagovinda Tírtha. Hall's *Contributions*, p. 7.

Beginning. श्रीरामगोविन्दसुतीर्थपादकृपाविशेषादुपलभ्य बोधं ।
श्रीवासुदेवादधिगम्य सर्व्वशास्त्राणि वक्तुं किमपि स्पृहा नः ॥
प्रकृतिं पुरुषञ्चैव नत्वाचार्य्यान् गुरूंस्तथा ।
नारायणः साङ्ख्यमूले तनुते साङ्ख्यचन्द्रिकां ॥

तदिदं शास्त्रं चतुर्व्यूहं। हेयं हेयसाधनं हानं हानसाधनञ्चेति मुमुक्षुजिज्ञासितत्वात्। इत्यादिः।

End. इति षष्टिपदार्थानामष्टभिः सह सिद्धिभिः। इति।

तथा च अत्रैतत् षष्टिपदार्थविवेचनान्नेदं प्रकरणं, किन्तु तन्त्रमेवेति सिद्धं।

Colophon. इति रामगोविन्दतीर्थशिष्यनारायणतीर्थकृता साङ्ख्यचन्द्रिका समाप्ता।

समाप्ता चेयं साङ्ख्यचन्द्रिका।

विषयः। ईश्वरकृष्णकृतसाङ्ख्यकारिकाया व्याख्यानं।

No. 1278. साङ्ख्यभाष्यं वा आर्य्यभाष्यं।

Substance, country-made yellow paper, 10 × 6 inches. Folia, 27. Lines, 34 on a page. Extent, 1,916 s'lokas. Character, Bengali. Date, ? Place of deposit, S'rírámpur College. Appearance, fresh. Prose. Generally correct.

Sáṅkhya-bháshya alias *A'ryabháshya.* A commentary on the Sáṅkhya-káriká of I's'varakṛishṇa. By Vijñána Bhikshu. The text of I's'varakṛishṇa and the commentary of Gaurapáda, together with an English translation of the text by Colebrooke, and of the comment by H. H. Wilson, were printed some time ago by the Oriental Translation Fund, London. The commentary which forms the subject of this notice, as also that noticed under the last preceding No. have never been printed.

Beginning. कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने।

कारुण्यात् साङ्ख्यमयी नौरिव विहिता प्रतारणाय॥

अल्पग्रन्थं स्पष्टं प्रमाणसिद्धान्तहेतुभिर्युक्तं।

शास्त्रं शिष्यहिताय समासतोऽहं प्रवक्ष्यामि॥

दुःखत्रयाभिघातादित्यादिः।

End. साङ्ख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि।

यत्रैताः सप्ततिरार्य्या भाष्यञ्चात्र गौड़पादकृतं॥

Colophon. इति विज्ञानभिक्षुविरचितं साङ्ख्यभाष्यं सम्पूर्णं।

विषयः। ईश्वरकृतसाङ्ख्यकारिकाया व्याख्यानं।

No. 1279. वराहपुराणान्तर्गतव्यङ्कटगिरिमाहात्म्यम् ।

Substance, country-made yellow paper, 11 × 4¾ inches. Folia, 46. Lines, 11 on a page. Extent, 828 slokas. Character, Nágara. Date, SK. 1544. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Correct.

Vyañkatagiri Máhátmya. An episode of the Varáha Puráṇa; it treats of the religious merits of a famous place of pilgrimage called Vyañkaṭagiri in the Madras Presidency.

Beginning. ऋषय ऊचुः। रोमहर्षणसर्व्वज्ञ पुराणार्थविशारद।
माहात्म्यं श्रोतुमिच्छामो गिरीन्द्राणां महीतले॥

End. यः पठन् प्रयतो भक्त्या शृणुयाद्वा लिखेदपि।
सर्व्वान् कामानवाप्नोति सम्प्राप्नोति च मङ्गलं॥

Colophon. इति श्रीचतुर्व्विंशतिसाहस्रिकायां संहितायां श्रीवराहपुराणे श्रीव्यङ्कटगिरिमाहात्म्ये द्विषष्टितमोऽध्यायः।

विषयः। व्यङ्कटगिरिमाहात्म्यवर्णनं।

No. 1280. मृगारेष्टिहोत्रप्रयोगः।

Substance, country-made yellow paper, 9¼ × 4¼ inches. Folia, 2. Lines, 23. Extent, 48 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Mrigáreshṭihotra-prayoga. A manual for the performance of the Vedic rite called *Mrigáreshṭi.*

Beginning. नमः प्रवक्ता इत्यादिसप्तदशसामिधेन्यः।

End. देवा आज्यपा इत्यादिः। शेषं प्रकृतिवत्॥

Colophon. इति मृगारेष्टिहोत्रं समाप्तं।

विषयः। मृगारेष्टिहोत्रकथनं।

No. 1281. बोधायनसूत्रं ।

Substance, country-made yellow paper, 9¾ × 4¼ inches. Folia, 3. Lines, 14—15 on a page. Extent, 189 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Bodháyana Sútra. This is a mere fragment of the aphorisms of Bodháyana, on the Sautra rites of the Black Yajur Veda. It treats of the new and the full moon sacrifices.

Beginning. अथोपघ्याचरणं विज्ञायते क्रत्वादौ क्रतुकामं कामयीत ।

End. स्योनमाविशन्तु न इति सिकताः सम्भृत्य । (खण्डितं) ।

विषयः । दर्शपौर्णमासादियज्ञविधिकथनं ।

No. 1282. उक्थप्रयोगः ।

Substance, country-made yellow paper, 9½ × 4¼ inches. Folia, 101. Lines, 9 on a page. Extent, 2,137 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Ukthaprayoga. A manual for the performance of the Vedic rite called *Uktha.* It is described in full in Haug's Aitareya Bráhmaṇa, p. 251.

Beginning. तस्यैन्द्राग्नः पशुः । आवाहनकाले । आज्यभागानन्तरमिन्द्राग्नी आवह । वनस्पतिमावह इन्द्रं न सुमन्तमित्यादिः ।

End. एवमेतदहः क्षत्वा एतां रात्रिं वसन्ति । सन्तिष्ठते दशममहः ।

Colophon. इति दशरात्रः समाप्तः ।

विषयः । उक्थप्रयोगकथनं । उक्थशब्देन सामवेदीयकर्मविशेष उच्यते ।

No. 1283. वायवीयसंहिता ।

Substance, country-made yellow paper, 14 × 5½ inches. Folia, 116. Lines, 10 on a page. Extent, 2,310 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Váyavíya Sañhitá. A treatise on the worship of S'iva. It professes to be a portion of the Váyu Purána, but it is not included in the Index of that work given in the Náradíya Purána.

Beginning. नमः शिवाय सोमाय सगणाय ससूनवे ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तहेतवे ॥

End. ददृशे तत्क्षणे तस्मिन् विमानं भानुसन्निभं ।
गणेश्वरैरसङ्ख्येयैः संवृतञ्च समन्ततः ॥ खण्डितं ।

विषयः । अत्र पाशुपतज्ञानस्य मोक्षदातृत्वं पाशुपतविभूतयश्च । यत्सातत्यं प्रति उपमन्युना पुरा उक्तं, तस्य ऋषीन् प्रति वायोः पुनः कथनं ।

No. 1284. अपरोक्षानुभूतिः । अपरोक्षानुभूतिदीपिकासहिता ।

Substance, country-made yellow paper, $12\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 16. Lines, 10—15—16 on a page. Extent, 704 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse; Commentary, prose. Correct.

Aparokshánubhuti with a commentary called *Aparokshánubhuti-dípiká.* A treatise on the Vedánta doctrine. By S'añkara A'chárya. The commentary is anonymous. *Hall's Contributions*, p. 104.

Beginning. मू०। श्रीहरिं परमानन्दमुपदेष्टारमीश्वरं ।
व्यापकं सर्व्वलोकानां कारणं तं नमाम्यहं ॥ १ ॥
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥
टी०। स्वप्रकाशत्वहेतुर्यः परमात्मा चिदात्मकः ।
अपरोक्षानुभूत्याख्यः सोऽहमस्मि परं सुखं ॥ १ ॥
श्रीशगुर्व्वात्मभेदाद्यः सकलव्यवहारभूः ।
औपाधिकः स चिन्मात्रः सोऽपरोक्षानुभूतिकः ॥ २ ॥
तदेवमनुसन्धाय निर्व्विघ्नां स्वेष्टदेवतां ।
अपरोक्षानुभूत्याख्यामाचार्य्योक्तिं प्रकाशये ॥ ३ ॥

End. मू०। परिपक्वं मनो येषां केवलोऽयञ्च सिद्धिदः ।
गुरुदैवतभक्तानां सर्व्वेषां सुलभो भवेत् ॥

Colophon. इति श्रीशङ्कराचार्य्यविरचिता अपरोक्षानुभूतिः समाप्ता ।

टी०। परिपक्वमनस्त्वाद् यतिदुःसाध्यान्यपि साधनानि सुसाध्यानि भवन्तीति हेतो-र्गुरुदैवतभजनमेव स्वधर्म्माविरोधेन सर्व्वैः कार्य्यमिति परममङ्गलं । इति अपरोक्षानुभूतिप्रदीपिका समाप्ता ॥

विषयः । अत्र प्रथमं विवेककथनं । ततः शमदम उपरतिसमाधानमुमुक्षुत्वादिकथनं । तत आत्मज्ञानविचारकथनं । तत आत्मपदार्थनिरूपणं । ततः जीवब्रह्मैक्य-प्रतिपादनं । ततो ब्रह्मसाक्षात्कारोपायनानाविधयोगकथनं ।

No. 1285. विन्ध्यमाहात्म्यं, टीकासहितं ।

Substance, country-made yellow paper, $13\frac{3}{4} \times 7\frac{1}{4}$ inches. Folia, 157. Lines, 9—10 on a page. Extent, 3,927 s'lokas. Character, Nágara. Date, Sm. 1924. Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse; Commentary, prose. Incorrect.

Vindhya-máhátmya. Topography of certain sacred places on the Vindhya Hills, and the religious merit to be acquired by pilgrimage to them. The work professes to be an extract from the Vrihadus'anas Upapurána and has a commentary attached to it. Contents 1—2. S'aunaka's enquiry about the Vindhya Hills. 3—4. The Puráṇas and the Upapuráṇas described. 5. The praise of a form of Deví dwelling on the Vindhya Hills. 6. Do. of Tárakes'vara. 7—8. Story of Táraka Asura. 9. Enumeration of the sacred places on the Hills, 10. Story of Hari's blessing the sacred places. 11—12. The pool of Lakshmí. 13—14. Story of the two giants, Tuhuṇḍa and Huṇḍa. 15, 16. The pool of Brahmá. 17. The pools of Saunaka and others. 18. Do. of Maríchi, &c. 19. Praise of the River Ganges. 20. The pool of Dharma. 21. Do. of Gokarṇa. 22. Do. of Navayogís'vara. 23. Expiation meet at these sacred pools. 24. Praise of the confluence of the Ganges and the Yomuná at Allahabad. 25. Pool called Nága-kúpa. 26. The majesty of Vindhyavásiní, the Deví dwelling on the Vindhya Hills. 27. Mystic emblems for her worship explained. 28. Purification of the elements before worshipping her. 29. Mode of worshipping her. 30. Adoration to her through a triangular diagram. 31. Her wars with Nisumbha and Sumbha. 32—33. Description of Rámagayá. 34.

Wanting in the MS. 35. Praise of Karnávatí. 36. Do. of S'iva. 37. The different abodes of Víndhyavásiní. 38. Merit of circum-ambulating the sacred pools. 39. Do. of a circuit of five kros'as round those pools. 40. Praise of the Purána. 41. The mode of circum-ambulating the pools.

Beginning. मू०। यो विघ्नभित्तिर्जगताञ्च गुप्तये स्वःसद्मभिर्वा मनुजैश्च पूजितः।
यो विघ्नतूलैकक्षशानुरूपकस्तं ढुण्ढिराजं शरणं गतोऽस्मि ॥ १ ॥
यच्चिन्तनं विघ्नजनीनमुच्यते छित्वान्तरायं विनयेत् सतीं मतिं।
यो विघ्नताभिश्रविवस्वरूपको द्वैमातुरं तं सततं नमाम्यहं ॥ २ ॥

टी०। श्रीमद्विष्णुप्रजाभिवन्द्यचरणं गोपादिकाराधितं
वन्दे पूर्णं विकुसुमैःस्मवदनं संसारतापापहं।
सत्यं ज्ञानमनन्तमाद्यविधुरं गोभारसंहारकं
सर्व्वात्मानमपास्तसर्व्वममलं विघ्नेश्वरं शर्म्मदं ॥ १ ॥
व्याख्यानरहितस्यास्य व्याख्यानं सज्जनप्रियं।
क्रियते स्वीयबोधाय प्रमादः क्षम्यतां बुधैः ॥ २ ॥

End. मू०। विन्ध्यक्षेत्रस्य माहात्म्यं यः शृणोति सुचेतसा।
सर्व्वान् पापान् विधूयाथ लभते सद्गतिं परां ॥

Colophon. इति श्रीहरहरेशमसोपपुराणे विन्ध्यमाहात्म्यवर्णनं नामैकचत्वारिंशोऽध्यायः।

टी०। एतच्छ्रवणमाहात्म्यमाह, विन्ध्यक्षेत्रस्येति।
इति विन्ध्यमाहात्म्यव्याख्यानं समाप्तं।

विषयः। अत्र एकचत्वारिंशाध्यायाः सन्ति। तत्र १ प्रथमे, २ ये, च—शौनकप्रश्नकथनं। ३ ये,—पुराणनामसङ्ख्याकथनं। ४ र्थे,—उपपुराणकथनं। ५ मे,—विन्ध्यक्षेत्र-निवासिन्या भगवत्या माहात्म्यवर्णनं। ६ ष्ठे,—तारकेश्वरमाहात्म्यवर्णनं। ७ मे,—शिवं प्रति तारकासुरस्तुतिकथनं। ८ मे,—तारकेशस्योत्पत्तिकथनं। ९ मे,—नानाविधपुण्यक्षेत्रकथनं। १० मे,—हरिवरप्रदानकथनं। ११ शे,—लक्ष्मी-कुण्डोत्पत्तिवर्णनं। १२ शे,—लक्ष्मीकुण्डमाहात्म्यवर्णनं। १३,१४ शे,—तुङ्गण्ड-ऊण्डाख्यासुरद्वयवर्णनं। १५ शे,—ब्रह्मकुण्डोत्पत्तिकथनं। १६ शे,—ब्रह्मकुण्ड-वर्णनं। १७ शे,—सनकादिकुण्डनिरूपणं। १८ शे,—मरीच्यादिकुण्डवर्णनं। १९ शे,—गङ्गामाहात्म्यवर्णनं। २० शे,—धर्म्मकुण्डवर्णनं। २१ शे,—गोकर्णकुण्ड-वर्णनं। २२ शे,—नवयोगीश्वरकुण्डवर्णनं। २३ शे,—प्रायश्चित्तवर्णनं। २४ शे,—गङ्गासङ्गममाहात्म्यवर्णनं। २५ शे,—पुण्यजलाशयनागकूपाख्यानवर्णनं। २६ शे,—

विन्ध्यवासिनीप्रादुर्भाववर्णनं। २७शे,—यन्त्रोद्धारादिवर्णनं। २८शे,—भूत-शुद्ध्यादिवर्णनं। २९शे,—विन्ध्यवासिनीपूजाप्रकरणं। ३०शे,—त्रिकोणयन्त्र-पूजावर्णनं। ३१शे,—निशुम्भशुम्भवधवर्णनं। ३२शे,—रामगयोत्पत्तिवर्णनं। ३३शे,—रामगयावर्णनं। चतुस्त्रिंशोऽध्यायो नास्ति। ३५शे,—कर्णावतीमा-हात्म्यवर्णनं। ३६शे,—शिवमाहात्म्यवर्णनं। ३७शे,—विन्ध्यवासिनीस्थान-प्रदर्शनवर्णनं। ३८शे,—विन्ध्यक्षेत्रप्रदक्षिणकथनं। ३९शे,—पञ्चक्रोशयात्रा-निरूपणं। ४०शे,—पुराणमाहात्म्यवर्णनं। ४१शे,—पञ्चक्रोशादियात्रावर्णनं।

No. 1286. रामलिङ्गवर्णनं, वा तत्त्वरामायणं।

Substance, country-made yellow paper, 9½ × 4½ inches. Folia, 57. Lines, 10 on a page. Extent, 1,120 s'lokas. Character, Nágara. Date, Sm. 1877. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Ráma-lingavarnana. An epitome of the Rámáyana of Válmíki. Author unknown.

Beginning. हरिहरविधिरूपः सच्चिदानन्दरूपो हयगजनकुलास्यो विघ्ननाशो गणेशः।
सुरससुगमकाव्ये रामलिङ्गाभिधाने मम हृदयसरोजं सद्विकाशं करोतु॥

End. अनेन प्रीयतां देवो हयग्रीवः श्रियः पतिः।
तद्व्याख्याननिरतो मद्वंशप्रतिपालकः॥

Colophon. इति श्रीरामलिङ्गवर्णनं सम्पूर्णं।

विषयः। अत्र नव सर्गाः सन्ति। तत्र १ प्रथमे,—रामलिङ्गवर्णनं। २ये,—रामकृतहर-धनुर्भङ्गविवरणं। ३ये,—जानकीविवाहवर्णनं। ४र्थे,—श्रीरामस्य वनगमन-वर्णनं। ५मे,—लक्ष्मणेन शूर्पणखानासिकाच्छेदनं। रावणेन सीताहरणं। सीतान्वेषणार्थं हनूमता लङ्कागमनं। रावणेन सह हनूमतः कथोपकथनञ्च। ६ष्ठे,—रामरावणयुद्धविवरणं। ७मे,—श्रीरामस्य राज्याभिषेकवर्णनं। ८मे,—स्वपुत्राभ्यां सह युद्धे रामस्य पराजयहेतुकथनं। ९मे,—राममाहात्म्यकथनं।

No. 1287. आथर्व्वणतापनीयोपनिषद्भाष्यं ।

Substance, country-made paper, 7¾ × 3½ inches. Folia, 74. Lines, 9—10 on a page. Extent, 1,157 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Atharvana-tápaniyopanishad-bháshya. Fragment of a commentary on the Rámatápaní Upanishad. Author unknown. The Upanishad with a commentary by S'ankaránanda has been published in the Bibliotheca Indica.

Beginning. यन्नाम्नोपनिषत् ख्याता तपनं तं विधिं गुरुं ।
प्रणम्योपासनागर्भां तद्व्याख्यां श्रद्धयारभे ॥

End. य एतं मन्त्रराजन्नरसिंहमानुष्टुभं नित्यमधीते इत्युक्तार्थं तथा। (खण्डितं)।

विषयः । आथर्व्वणतापनीयोपनिषद्व्याख्यानं ।

No. 1288. वेदान्तपरिभाषार्थदीपिका । मूलसहिता ।

Substance, country-made paper, 14 × 7 inches. Folia, 88. Lines, 8—9 on a page. Extent, 3,476 s'lokas. Character, Nágara. Date, Sᴍ. 1916. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Vedánta-paribháshá-dípiká. A commentary on the Vedánta-paribháshá of Dharmarájá Dikshita. By Sívadatta, son of Dhanapati Suri. Colebrooke's *Misc. Essays,* I, pp. 335-6. Hall's *Contributions,* 100.

Beginning. प्रथमतश्चत्वारि पद्यानि न सन्ति ।

End. मू०। तदेवं ब्रह्मज्ञानान्मोक्षस्तानर्थनिवृत्तिनिरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनं ।

Colophon. इति श्रीधर्म्मराजदीक्षितविरचितायां वेदान्तपरिभाषायामष्टमपरिच्छेदः समाप्तः ।

टी०। यस्मादेवं तस्माद्व्यवस्था बद्धमुक्तव्यवस्थापरिच्छेदार्थं निगमयति ।
इति श्रीमत्परमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसराजकुमारसूनुधनपतिसूरिसूनुशिवदत्तकृतायां वेदान्तपरिभाषार्थदीपिकायामष्टमः परिच्छेदः समाप्तः ।

विषयः । वेदान्तपरिभाषाव्याख्यानं । वेदान्तपरिभाषायान्तु मोक्षोपायतत्त्वज्ञानजनक-तत्त्वमसीति महावाक्यघटकस्य तत्पदस्य त्वम्पदस्य च अर्थकथनं ।

No. 1289. दशकुमारचरितं ।

Substance, country-made paper, 9¾ × 4¼ inches. Folia, 26. Lines. 7—10 on a page. Extent, 609 s'lokas. Character, Nágara. Date, Sm. 1691. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Das'akumára-charita. The adventures of Ten princes, a romance. By Dandí. An excellent edition of this work was published some time ago by the late Professor H. H. Wilson. The MS. is incomplete, but old, being dated Samvat 1691 = A. C. 1635. See plate X.

Beginning. ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षौणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥

End. चित्रहारिणं चतुर्दशभुवनवृत्तान्तं श्रावयामास । इतः परं खण्डितं ।

विषयः । मगधराजकुमाराणां चरित्रकथनं ।

No. 1290. दासबोधः ।

Substance, country-made yellow paper, 6½ × 4 inches. Folia, 71. Lines, 9 on a page. Extent, 945 s'lokas. Character, Nágara. Date, Sm. 1858. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Correct.

Dásabodha. Moral maxims founded partly on the Vedánta and partly on the Yoga doctrines. By S'rídása.

Beginning. जयें जाणिवेचि कथा । सर्व्वथा न चके । जेयें भावाचा तर्का । जेयें यां गुरुका विवेक ॥

End. गन्धपुष्पधूकधूमचन्दन । पीताम्बररत्नदीपु ।

Colophon. इति श्रीदासबोधः समाप्तः ।

विषयः । ज्ञानोपदेशकथनं ।

Plate X.

Facsimile of the last page of a MS of the Daśa-kumára-charita, dated Samvat 1691=A C. 1635

T. Black & Co. Lithrs., Cal

No. 1291. रसतरङ्गिणी ।

Substance, country-made paper, 9¾ × 4¼ inches. Folia, 37. Lines, 8—9 on a page. Extent, 749 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Rasa-tarañginí. A treatise on rhetoric. By Bhánudatta.

Beginning. लक्ष्मीमालोक्य लुभ्यन् निगममुपहसन् मोचयन् यज्ञजन्तून्
चत्रं शोणाक्षिपश्यन् समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चन् ।
हृत्वा हैयङ्गवीनं चकितमपसरन् स्वेच्छरक्तैर्दिगन्तान्
सिञ्चन् दन्तेन भूमिं तिलमिव तुलयन् पातु वः पीतवासाः ॥

End. • यावद्भानोः सुता कापि कालिन्दी भुवि वर्त्तते ।
तावत्तिष्ठतु मे भानोरेषा रसतरङ्गिणी ॥

Colophon. इति श्रीभानुदत्तमिश्रविरचितायां रसतरङ्गिण्यां रसाभासनिरूपणं नामाष्टमस्तरङ्गः ।

विषयः । अत्र अष्टतरङ्गाः सन्ति । तत्र १ प्रथमे,—काव्यात्मभूतरसव्यवहारविषयस्थायिभावनिरूपणं । २ये,—काव्यात्मभूतरसप्रकाशकविभावनिरूपणं । ३ये,—काव्यात्मभूतरसप्रकाशकानुभावनिरूपणं । ४र्थे,—सात्त्विकभावनिरूपणं । ५मे,—व्यभिचारिभावनिरूपणं । ६ष्ठे, ७मे,—च काव्यात्मभूतरसनिरूपणं । ८मे,—रसाभासनिरूपणं ।

No. 1292. जीवन्मुक्तिप्रकरणं ।

Substance, country-made paper, 8¾ × 3½ inches. Folia, 21. Lines 7—8 on a page. Extent, 320 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Jivanmukti-prakaraṇa. The means of emancipating one's self from the trammels of existence during terrestrial existence, being moral maxims founded on the Vedánta doctrine. By Ashṭávakra. An edition of this work with a Bengali translation was published some time ago in Calcutta. Mr. Hall notices a work of this name with the alternative title of Jivanmukti Viveka, but it extends to 2600 slokas. *Contributions*, 133.

Beginning. मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज ।

क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥ १ ॥
न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥ २ ॥

End. क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयं ।
बहुनात्र किमुक्तेन किञ्चिन्नोत्तिष्ठते मम ॥ १४ ॥

Colophon. इति शिष्यप्रोक्तं जीवन्मुक्तिचतुर्दशकम् ।

विषयः । चतुर्दशजीवन्मुक्तिसाधनीभूतज्ञाननिरूपणं ।

No. 1293. लघुशब्दरत्नं ।

Substance, country-made paper, 13 × 5 inches. Folia, 178. Lines, 8—9—10 on a page. Extent, 5,310 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Laghus'abda-ratna. A commentary on the Praudha-manoramá. By Hari Díkshita, son of Vis'vesvara Díkshita, and grandson of Bhaṭṭojí Díkshita. The MS. is imperfect.

Beginning. शेषविभूषणमीडे शेषाशेषार्थलाभाय ।
दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥ १ ॥
ध्यायमिति । ध्यात्वा ध्यात्वेत्यर्थः । फमुल्लन्तमेतत् ।

End. षाऽस्मै नैवेति । अत्र केचिदित्यादिना मंदुक्तमूलस्वरीत्येति भाव इति शुभम् ।

Colophon. इति श्रीमद्दीक्षितभट्टोजिपौत्रदीक्षितहरिविरचिते प्रौढमनोरमाव्याख्याने लघुशब्दरत्ने सुबन्तं समाप्तिमगमत् ॥

विषयः । सुबन्तपर्यन्तायाः प्रौढमनोरमाया व्याख्यानं ।

No. 1294. पिण्डपितृयज्ञप्रयोगः, प्रयोगरत्नीयः ।

Substance, country-made paper, $8\frac{3}{4}$ × $3\frac{3}{4}$ inches Folia, 7. Lines 8—9 on a page. Extent, 95 s'lokas. Character, Nágara. Date, Sm. 1838. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Piṇḍapitri-yajna-prayoga. A manual for the offering of funeral cakes to the manes. The work is a fragment of the Prayogaratna of Harihara.

Beginning. अथ पिण्डपितृयज्ञप्रयोगः । स चानाहिताग्निनापि कार्यः । एवमामनाहिताग्निर्नित्ये अपयित्वाग्निप्रणीय जुहुयादिति सूत्रात् ।

End. पार्वणवच्छ्राद्धं पृथगेव कुर्यात् । तत्प्रकारन्तु श्राद्धप्रयोगे वक्ष्यामः ।

Colophon. इति प्रयोगरत्ने पिण्डपितृयज्ञप्रयोगः ।

विषयः । पिण्डपितृयज्ञविधिः ।

No. 1295. एकाकारटीका ।

Substance, country-made paper, 10½ × 6 inches. Folia, 283. Lines, 12—13—14 on a page. Extent, 6.898 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Ekákára-ṭíká. A commentary, in Marhaṭṭi, on some verses of the eleventh book of the Bhágavata Purána. Anonymous.

Beginning. नाही भाव अभावभावना । न देखो निमी तूपाना । नमन श्रीचरणा सद्गुरुराया ॥ १ ॥

श्लोक ॥ भक्त्या भागवतं भावमभावं काव्यपाठतः ।

पठनात्पद्युत्पत्तिज्ञानप्राप्नन्तु भक्तितः ॥ १ ॥

End. श्रीकृष्ण उद्धवाचे ज्ञान । तत्काल निरसी अज्ञान । एका विनवी जनार्दन । सावधान परियेसा ॥

Colophon. इति श्रीभागवते महापुराणे एकादशस्कन्धे एकाकारटीकायां नवमोऽध्यायः ।

विषयः । श्रीभागवतैकादशस्कन्धस्य नवाध्यायगतभूरिश्लोकानां महाराष्ट्रभाषया व्याख्यानं ।

No. 1296. मुहूर्त्तगणपतिः ।

Substance, country-made paper, 9¾ × 4½ inches. Folia, 147. Lines, 8—9—10—11 on a page. Extent, 3,102 s'lokas. Character, Nágara. Date, Sm. 1892. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Muhúrta-gaṇapati. An astrological calendar for determining auspicious days for the performance of domestic rites, as also for coronations, and other civil and religious ceremonies. By Rával Gaṇapati, son of Rával Harisaṅkara Súri. The work is of some repute, but scarce.

Beginning. श्रीमत्या कल्पवल्लेव हैमवत्या निरत्ययः ।
जयत्यालिङ्गितः कल्पद्रुमः सत्फलदः शिवः ॥ १ ॥
प्रवर्त्तयति सालोकं लोकं यज्ञादिकर्म्मसु ।
यन्मुहूर्त्तोकरोद्यास्ति वन्देऽर्कं कालमीश्वरं ॥ २ ॥
श्रीविश्वेशं गणेशं गुरुचरणमथो यज्ञकीर्त्तिं सुकीर्त्तिं
नत्वा पित्रोः पदाब्जं निखिलमुनिवरान् संहितासम्प्रणेतॄन् ।
गर्गात्रिश्रीवशिष्ठाङ्गिरसविरचिताः संहिता मूलभूता
ज्ञात्वा ज्योतिर्निबन्धानतिललितपदान् रत्नमालां विचिन्त्य ॥ ३ ॥
सङ्केतान् संविहाय व्यवहृतिसुखदं कालबोधाय शीघ्रं
ज्योतिर्ग्रन्थोदिताथैः सुगमलघुपदैः सिद्धकार्य्यैर्मुहूर्त्तैः ।
ज्योतिःसिद्धान्तवेत्तुः श्रुतिविविधकलाशास्त्रपारीणबुद्धे-
र्गौडाधीशेन मानक्षितिपतितिलकेनार्च्चमानस्य भूयः ॥ ४ ॥
श्रीरामदासजनुषो हरिशङ्करस्य श्रीरावलस्य तनयो विनयोपपन्नः ।
ग्रन्थं मुहूर्त्तगणपत्यभिधं विधत्ते विद्यानिधिर्गणपतिर्गणिनागमज्ञः (?) ॥ ५ ॥

End. आयुः प्रज्ञा यशः सौख्यं सौभाग्यं फलमक्षयं ।
ह्यभिप्रेष्ठां पशून् पुत्रान् लभतां ग्रन्थतत्त्ववित् ॥ २१ ॥

Colophon. इति श्रीमदग्निहोत्रिचातुर्मास्ययज्ञसमासादितसकलपुरुषार्थदेवयज्ञवर्य-रावल-हरिशङ्करस्वरिसूनुरावलगणपतिकृते मुहूर्त्तगणपतौ ग्रन्थालङ्कारप्रकरणं द्वाविंश समाप्तम् ॥

विषयः । अस्य द्वादशप्रकरणेषु क्रमेण संवत्सर-तिथि-वार-नक्षत्र-योग-करण-चन्द्रतारा-बल-शुभाशुभ-त्याज्यनक्षत्रादि-लग्न-नानाविधशुभकर्म्ममुहूर्त्त-सङ्क्रान्ति-विवाह-राजाभिषेक-यात्रावास्तु-गृहप्रवेश-जलाशयप्रतिष्ठादीनां शुभाशुभादिनिर्णयः ।

No. 1297. हरिमीडेस्तोत्रं, सटीकम् ।

Substance, country-made paper, $11\frac{1}{4} \times 3$ inches. Folia, 6. Lines, 18—22 on a page. Extent, 278 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Corrected.

Harimíde-stotra, with a gloss. A hymn in praise of Hari, by S'aṅkara Áchárya, with a commentary by Ánandagiri. The hymn begins with the words *Harim íde*, "I adore Hari," whence the name of the work.

Beginning. (टी०) यद्विशुद्धं परं ब्रह्म सच्चिदानन्दमव्ययं।
तद्देवाहं परं तत्त्वं स शिवः स परो हरिः।

(मू०) स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थं।
यस्मिन्नष्टे नश्यति तत्संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे ॥ १ ॥

End. (मू०) इत्थं स्तोत्रं भक्तजनेड्यं भवतीदं ध्वान्तार्काभं भगवत्पादीयमिदं यः।
विष्णोर्लोकं पठति शृणोति व्रजतीत्थं ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः॥

(टी०) तदेव ध्वान्तस्वविनाशकतया अर्कवद्भवतीति तथोक्तं। भक्तानामिहाधिकार
इत्याह। भक्तजनेड्यमिति ॥ ४४ ॥

Colophon. इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य्यश्रीशङ्करभगव-
त्कृतिहरिमीडेस्तुतिरानन्दगिर्य्याचार्य्यकृतभाष्येण सहिता समाप्ता ॥

विषयः। हरिमीडेस्तोत्रव्याख्यानं।

No. 1298. कालनिर्णयः, सटीकः।

Vidvad-bhushaṇa. Miscellaneous poems in praise of Hari. By Bálakrishṇa Sudhi. With a commentary by an unknown author.

Beginning. (मू॰) । कलयाम्यदन्तं द्विदन्तं स्फटिकदन्तमपि द्विभुजं ।
चतुर्भुजं यं जगन्ति गायन्ति मोदकैकभुजं ॥
अत्रिगोत्रसमुत्पन्नो बालकृष्णाभिधेयवान् ।
विद्वद्भूषणनामानं कुर्व्वेहं पद्यसङ्ग्रहं ॥
(टी॰) । तं विघ्नराजं अहं ध्यायामि यं जगन्ति गायन्ति ।

End. (मू॰) । काव्यं करोति सुकविः सहृदय एव वेत्ति तत्तत्त्वं ।

रत्नं कविः प्रसूते स्फुटयति शिल्पी तु तत् सुषमं ॥

(टी०)। लक्ष्मि मानसमम निविड़तरं त्वं हरिस्त्वा विधत्तां ॥

Colophon. इति श्रीमद्रघुमस्तुत्यबालकृष्णसुधीकृतः ।

विद्वद्भूषणसञ्ज्ञोऽयं सम्पूर्णः पद्यसङ्ग्रहः ॥

विषयः। हरिगुणवर्णनात्मकविविधपद्यसङ्ग्रहणं ।

No. 1431. स्फोटतत्त्वं ।

Substance, country-made yellow paper, $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 14. Lines, 8—10 on a page. Extent, 292 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Sphoṭa-tattva. A treatise on the *Sphoṭa-váda*, or the theory of inherent relation between sound and sense, and on logotheism. By Krishṇa S'esha.

Beginning. शब्दब्रह्म चिदानन्दमधिष्ठानमुपास्महे ।

यस्य वर्णाः पदं वाक्यं विवर्त्तः सम्प्रकाशते ॥ १ ॥

महाभाष्यमतं भर्तृहरिणापि प्रकाशितं ।

आलोच्य सर्व्वतन्त्राणि स्फोटतत्त्वं निरूप्यते ॥ २ ॥

End. शब्दब्रह्माभिधानं श्रीमद्भाष्यकारसम्मतं ।

श्रीकृष्णशेषविदुषा स्फोटतत्त्वं निरूपितं ॥

विद्वद्भिः सदसद्व्यक्तिकारिभिः सारहारिभिः ।

रागविद्वेषरहितैर्दूषितं वस्तु भूषितं ॥

Colophon. इति श्रीकृष्णशेषविरचितं स्फोटतत्त्वं सम्पूर्णं ।

विषयः। अत्र स्फोटतत्त्वनिरूपणं। पदार्थज्ञाने पदं अपेक्षणीयं पदञ्च वर्णसमूहः, तथा च पूर्व्ववर्णोच्चारणानन्तरं परवर्णोच्चारणे पूर्व्ववर्णनाशात् एकदा वर्णसमूहात्मकपदस्य सत्त्वासम्भवात् पदार्थबोधानुपपत्तिः। एवं वाक्यार्थबोधे वाक्यं अपेक्षणीयं वाक्यञ्च पदसमूहात्मकं, तथा च पूर्व्वपदोच्चारणानन्तरं परपदोच्चारणकाले पूर्व्वपदविनाशात् वाक्यार्थबोधानुपपत्तिः। अतः वर्णाभिव्यङ्ग्यपदस्फोटः पदाभिव्यङ्ग्यवाक्यस्फोटश्च अवश्यं स्वीकरणीयः। स्फोटशब्देन पूर्व्वपूर्व्ववर्णानुभवसहितचरमवर्णाभिव्यङ्ग्यनित्यशब्दविशेष उच्यते इत्येतद्विवरणं ।

No. 1432. सारबोधिनी ।

Substance, country-made paper, 12¼ × 5 inches. Folia, 35. Lines, 11 on a page. Extent, 1,162 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Sárabodhiní. A commentary on the Kávya prakás'a—a treatise on Rhetoric. By S'rívatsa S'armá.

Beginning. रामं नत्वा चिदानन्दं सङ्क्षिप्तां सारबोधिनीं ।
श्रीवत्सशर्म्मा कुरुते व्याख्यां काव्यप्रकाशजां ॥

End.. तदाभास इति तत्पदेन रसभावयोरनुकर्षणं न तु सन्निकृष्टत्वेन भावस्यैव इत्याहु । खण्डितं ।

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1433. विवरणोपन्यासः ।

Substance, country-made paper, 10¾ × 4½ inches. Folia, 272. Lines, 9 on a page. Extent, 5,792 s'lokas. Character, Nágara. Date, Sм. 1923. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Vivarañopanyása. A gloss on Sañkara's commentary on the Vedánta aphorisms. By Govindánanda Sarasvatí. The MS. is incomplete. Hall's Contributions, p. 202.

Beginning. समाश्रयानन्दयदत्र जन्तून् सर्व्वात्मभावेन तथा परत्र ।
यच्छङ्करानन्दपदं हृदब्जे विभ्राजते तत् यतयो विशन्ति ॥
भाष्यटीकाविवरणतन्निबन्धनसङ्ग्रहः
व्याख्यानव्याख्येयभावः क्लेशहानाय रच्यते ।

End. यथा नेत्रेतोयं ? तमादित्यमित्यत्रेक्षणविरोध्यनीक्षणसङ्कल्पक्रिया विधीयते तथात्रापि । खण्डितं ।

विषयः । शङ्कराचार्य्यविरचितस्य वेदान्तसूत्रभाष्यस्य विवरणं ।

No. 1434. नादकारिकावृत्तिः, श्रीरामकण्ठरचितनादकारिकासहिता ।

Substance, country-made paper, 12½ × 4½ inches. Folia, 7. Lines, 4—8 on a page. Extent, 123 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Náda-káriká-vritti. Memorial verses on the eternity of sound. By Rámakaṇṭha. With a commentary by Aghoras'iva Achárya.

Beginning. नादातीतं शिवं नत्वा नादज्ञानप्रसिद्धये ।
श्रीरामकण्ठरचितां व्याख्यास्ये नादकारिकां ॥

End. श्रीमदघोरशिवाचार्य्येजन्यथा परमञ्जुषा ।
व्याख्याता नादसिद्धिश्च प्रार्थितेन गुरूत्तमैः ॥

Colophon. इत्यघोरशिवाचार्य्यविरचिता नादकारिकावृत्तिः समाप्ता ।

विषयः । नादकारिकाव्याख्यानं । नादकारिकायां नादपदार्थनिरूपणं ।

No. 1435. निबन्धतत्त्वदीपः, सटीकः ।

Substance, country-made paper, 9¼ × 5½ inches. Folia, 10. Lines, 8—9—10—12 on a page. Extent, 180 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, Verse. Commentary, Prose. Correct.

Nibandha-tattva-dípa. An exposition of the doctrine of faith, with a commentary.

Beginning. (मू॰) । धर्म्ममार्गं परित्यज्य कलेनाधर्म्मवर्त्तिनः ।
पतन्ति नरके घोर पाषण्डमतवर्त्तनात् ॥
(टी॰) । धर्म्ममार्गं परित्यज्येति । तत्र हेतुः पाषण्डमतवर्त्तनात् ।

End. (मू॰) । यत्र पूजाप्रवाहः स्यात् तत्र तिष्ठेत तत्परः ।
एतन्मार्गद्वयं प्रोक्तं गतिसाधनसंयुतं ॥ (खण्डितं ।)
(टी॰) । सर्व्वत्रैव जगति फलं वर्त्तत इति सर्व्वत्र फलं चाह ।

Colophon. इति श्रीनिबन्धतत्त्वदीपे भक्तिप्रकरणं समाप्तम् ।

विषयः । भक्तिमार्गकथनं ।

No. 1436. पञ्चतत्त्वप्रकाशः अभिधानं ।

Substance, country-made paper, $9\frac{3}{4} \times 4\frac{3}{4}$ inches. Folia, 17. Lines, 9 on a page. Extent, 335 s'lokas. Character, Nágara. Date, Sk. 1701. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Pancha-tattva-prakás'a. A metrical dictionary of the Sanskrit language: the vocables are arranged in classes. By Venidatta, son of Jagajjivana, grandson of Nílakantha. The MS. is incomplete. No mention of this work is met with in Professor H. H. Wilson's list of Sanskrit Dictionaries.

Beginning. प्रथमावधि षष्ठपत्रं नास्ति ।

End. पञ्चतत्त्वप्रकाशोऽयं वेनीदत्तेन धीमता ।
प्रकाशितः प्रकाशार्थो मीरमीरासुताज्ञया ॥

Colophon. इति श्रीयाज्ञिकवंशावतंशनीलकण्ठात्मजजगज्जीवनसूनुवेनीदत्तविरचिते पञ्चतत्त्वप्रकाशनाम्नि कोशे आकाशभानुः समाप्तः ।

विषयः । अत्र षट्सर्गाः सन्ति । प्रथमे द्वितीये च पृथिवीतत्त्वनिरूपणं। ३ये, जलतत्त्वनिरूपणं । ४र्थे, तेजस्तत्त्वनिरूपणं। ५मे, वायुतत्त्वनिरूपणं । ६ष्ठे, आकाशतत्त्वनिरूपणं ।

No. 1437. अमृतवर्षिणी ब्रह्मसूत्रवृत्तिः ।

Substance, country-made paper, 10×5 inches. Folia, 30. Lines, 14—15—16 on a page. Extent, 1,192 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Amrita-varshini. A short commentary on Vyása's Aphorisms of the Vedánta Doctrine. By Rámakinkara, a disciple of Mukundagovinda. The MS. is incomplete, containing only the first book.

Beginning. द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ पूर्व्वं त्रैलोक्यात्मा वैश्वानरः परमात्मेत्युक्तम् ।

End. ज्ञेयगं पद्मात्रञ्च चिन्त्यं पादेष्वनुक्रमादिति ॥ २८ ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमन्मुकुन्दगोविन्दश्रीचरणशिक्षितश्रीरामकिङ्करवर्यकृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्य अध्यायस्य चतुर्थः पादः। समाप्तोऽयं प्रथमोऽध्यायः ।

विषयः । ब्रह्मसूत्रव्याख्यानं ।

No. 1438. मनचरित्रम् ।

Substance, country-made paper, $10\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 65. Lines, 9—10 on a page. Extent, 967 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mana-charitra. An allegory on the relation of knowledge to ignorance. In Marhaṭṭi.

Beginning. श्रीवरदतूम्बरदमूर्त्ति एकदन्ता चिन्तिले पुरविसीसमर्था चणे निजज्ञे चरणी माथाटे विलभावे ।

End. ते प्रीतिपावो गोपीनाथ । श्रीपतीदासचणे ।

Colophon. इति श्रीमनचरित्रे प्रवृत्तिनिवृत्तग्राख्याने सपरीवारबोधराज्यदृढीकरणं नाम अष्टमोऽध्यायः ।

विषयः । अत्र महाराष्ट्रीयभाषया अष्ट अध्यायाः सन्ति । तत्र प्रथमे, मङ्गलाचरणं । २ये, मोहराज्यवर्णनं । ३ये, बोधस्य राज्याभिषेकः । ४र्थे, विवेकादिवर्णनं । ५मे, विवेकनीतिनिरूपणं । ६ष्ठे, विवेककृतकामक्रोधजयवर्णनं । ७मे, विवेककृतसपरीवारप्रवृत्तिजयवर्णनं । ८मे, सपरीवारबोधराज्यदृढीकरणं ॥

No. 1439. परोक्षज्ञानं ।

Substance, country-made paper, $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 62. Lines, 10—11 on a page. Extent, 1,448 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Paroksha-jñána. A logical disquisition on inference, the object of the author being the refutation of the theory described in the *Ratnakosha.* Author's name not known.

Beginning. परोक्षज्ञानं निश्चयात्मकमेव सिद्धान्तः ।

End. इति न कथञ्चिदस्या अनुमितेः संशयत्वोपपत्तिरिति कृतं पल्लवितेन ।

विषयः । अत्र सत्प्रतिपक्षस्खलनदशायां संशयाकारानुमितिमङ्गीकर्त्तुः रत्नकोषकारस्य मतनिरासपूर्व्वकं अनुमित्युपमितिशाब्दात्मकपरोक्षज्ञानस्य निश्चयात्मकत्वरूपसिद्धान्तकथनं ।

No. 1440. पवमानः ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 34. Lines, 9 on a page. Extent, 594 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pavamána. The uses of the mantras of the Pavamána homa—a Vedic rite.

Beginning. उपास्मै गायता नरः पवमानायेन्दवे । अभिद्वाटं इ यच्छते ।

End. ब्रह्माण आगच्छतागच्छतागच्छत एवं त्रिराह्रय षड्विंशब्राह्मणोक्तं यजमानवाचनं साचि ? सुब्रह्मण्ये तस्यास्ते पृथिवीपाद् इति । खण्डितं ।

विषयः । वैदिकमन्त्रविशेषाणामभिधानं ।

No. 1441. वृत्तमुक्तावली ।

Substance, country-made paper, 9¼ × 4¼ inches. Folia, 15. Lines, 8—9—10—11 on a page. Extent, 300 s'lokas. Character, Nágara. Date, Sk. 1725. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vṛitta-muktávalí. A treatise on versification. By Vanájimas'vaniranjana (?) In Marhaṭṭi.

Beginning. श्रीमद्दन्तिमुखासिवन्दनकरं ? सप्रेमचित्ते सदा
ब्रह्मेशानसुरेन्द्रमुख्यजपती सर्व्वार्थसिद्धिप्रदा ।
या भक्ताभयदानशौण्डविलसद् विघ्नाद्रिभङ्गी पवी
विद्या पद्यविकाशपूर्णकविता ध्याती कवीति इवी ? ॥

End. साला ग्रन्थसमाप्तसङ्गुरुकृपापाङ्गे वनाजीमुखे
बालालागिसुबोधपद्यरचना लोकीघड़ाया मुखे ।

Colophon. इति श्रीमत्कविकुलतिलकवनाजीमश्वनिरञ्जन(?)विरचिता वृत्तमुक्तावली समाप्ता ।

विषयः । महाराष्ट्रीयभाषया श्लोकानां छन्दोनिरूपणं ।

No. 1442. तर्कप्रसङ्गः ।

Substance, country-made paper, 12½ × 5 inches. Folia, 56. Lines, 7—8 on a page. Extent, 1,624 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Tarka-prasañga. An essay on inference. Author's name not known.

Beginning. प्रथमपचं नास्ति । ननु सङ्गतिप्रदर्शनस्यापि व्यर्थत्वादिति चेन्न ।

End. न च बाधाभावस्य तद्भावव्याप्यवत्ताज्ञानाभावस्य वा हेतुत्वं ।

विषयः । अनुमाननिरूपणं ।

No. 1443. आकाशोपन्यासः ।

Substance, country-made paper, 10½ × 4¾ inches. Folia, 14. Lines, 9—10 on a page. Extent, 398 s'lokas. Character, Nágara. Date, Sm. 1773. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

A'kás'opanyása. A Vedánta treatise on the nature of *A'kás'a* or space, and its relation to Brahma. By Chit-sabhesánanda Tírtha, disciple of Sachchidánanda Tírtha. Hall's Contributions, p. 135. The MS. is complete, and the work is rare.

Beginning. आकाशस्तल्लिङ्गादत्र तावदन्तरं तद्धर्मोपदेशादिति पूर्व्वाधिकरणेन प्रत्युदाहरणसङ्गतिः ।

End. तानि सर्व्वाण्युक्तभङ्ग्या परापरब्रह्मपरतया योजयितुं शक्यानि विदुषां तस्मात् सर्व्वथाप्याकाशपदेन ब्रह्माभिधीयते ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्सच्चिदानन्दतीर्थपूज्यपादशिष्यश्रीमच्चित्सभेशानन्दतीर्थविरचित आकाशोपन्यासः समाप्तः ।

विषयः । अत्र वेदान्तमतसिद्धाकाशपदार्थनिरूपणं ।

No. 1444. अद्वैतसिद्धान्तविद्योतनं ।

Substance, country-made paper, 9¾ × 4½ inches. Folia, 30. Lines, 11—12 on a page. Extent, 973 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Advaita-siddhánta-vidyotana. A treatise on the theory of non-duality. By Brahmánanda Sarasvatí.

Beginning. सद्रूपं तच्चिदानन्दे जगती यत्र जायते ।
रजतादिवत् शुक्त्यादौ तदेवाहं परागतिः ॥

End. अग्रे तदसत्तायां तत्त्वप्रमासामग्र्या एव नियामकत्वात् तत्त्वप्रमायास्तत्त्वाज्ञान-तत्कार्य्यपूर्व्वावस्थाननियतत्वादिति दिक् ।

Colophon. इत्यद्वैतसिद्धान्तविद्योतने परमहंसपरिव्राजकब्रह्मानन्दसरस्वतीविरचिते प्रथम-परिच्छेदः ।

विषयः । अत्र अन्यथाख्यातिसाधनपूर्व्वकमद्वैतसंस्थापनं ।

No. 1445. वाक्यसुधा, विवरणसहिता ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 34. Lines, 10 on a page. Extent, 783 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse; Commentary, prose. Generally correct.

Vákya-sudhá-vivarana. A commentary on the *Vákya-sudhá* of S'añkara Ácharya, on the nature of the Supreme Spirit. Mr. Hall notices several commentaries on S'añkara's work, but not the one under notice here. *Contributions*, pp. 129, 130.

Beginning. (मू॰) । सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्त्तिं ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥
(टी॰) । ब्रह्माहं तन्मयि भाति सर्व्वं श्रीमाधवप्राज्ञगुरोः प्रसादात् ।
अन्वर्थविश्वेश्वरपण्डिताख्यः अस्याङ्घ्रिपद्मप्रणतौ रतोऽस्मि ॥

End. (मू॰) । प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तत्क्षये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि ॥
(टी॰) । यत्तु वाक्यसुधामेतां विवृत्य विषदैः पदैः ।
पुण्यं मयार्जितं किञ्चित् तद् ब्रह्मणि समर्पितं ॥

Colophon. इति श्रीशङ्कराचार्य्यविरचिताया वाक्यसुधाया विवरणं सम्पूर्णं ।

विषयः । शङ्कराचार्य्यविरचिताया वाक्यसुधाया व्याख्यानं । वाक्यसुधायान्तु मोक्षोपाया-त्मज्ञानस्य सहजोपायकथनं ।

No. 1446. विद्याप्रकाशचिकित्सा ।

Substance, country-made paper, 9½ × 5¼ inches. Folia, 20. Lines, 8 on a page. Extent, 282 s'lokas. Character, Nágara. Date, Sm. 1887. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Vidyá-prakás'a-chikitsá. A treatise on the treatment of diseases. Attributed to Dhanvantari, but it is apparently a modern work.

Beginning. यस्योद्यास्तसमये पुरमुकुटनिष्ठचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्रः स जयतु धाम्नां निधिः सूर्य्यः ॥

End. अस्तं त्रिफलाक्वाथः पिप्पलीचूर्णसंयुतः ।
+सैाद्रशीतलो नित्यं सद्यो नेत्रव्यथां जयेत् ॥ इति नेत्ररोग इति ।

Colophon. इति श्रीधन्वन्तरिविरचिता विद्याप्रकाशचिकित्सा समाप्ता ।

विषयः । नानाविधरोगचिकित्साकथनं ।

No. 1447. एकषष्ट्यलङ्कारप्रकाशः ।

Substance, country-made paper, 11 × 4 inches. Folia, 15. Lines, 9 on a page. Extent, 407 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Ekashashtyalaṅkára-prakás'a. A treatise on Rhetoric, describing sixty-one kinds of rhetorical ornaments. It professes to be a summary, compiled principally from the works of Devanátha Tarkapañchánana and Jayaráma Nyáyapañchánana.

Beginning. जाग्रत् त्रैलोक्यराज्योद्भवविभवपरीरम्भसम्भाविताङ्गं
क्षीराब्धेर्जातकन्याललितकरतलोन्मृष्टपादारविन्दं ।
काञ्चीकोटीरहाराङ्गदमुकुटलसत् कौस्तुभोद्भासिताङ्गं
लक्ष्मीकान्तं प्रसन्नं सुकृतिविहतिविच्छित्तये संस्मरामि ॥

End. तथा च सूत्रसिद्धाः परमप्रतिष्ठितालङ्कारिकालङ्कारश्रीकाव्यप्रकाशकारव्यव-स्थापिताः ॥

Colophon. इति श्रीदेवनाथतर्कपञ्चाननश्रीमहामहोपाध्यायगोविन्दश्रीजयरामन्यायपञ्चा-ननाद्यनेकव्याख्याता एकषष्ट्यर्थालङ्कारा एवोपकुर्व्वन्तीत्यनवद्यं ।

विषयः । काव्यस्य एकषष्टिविधार्थालङ्कारविवरणं ।

No. 1448. हेत्वाभासदीधितिटिप्पनी ।

Substance, country-made paper, 11 × 5 inches. Folia, 83. Lines, 12 on a page. Extent, 2,676 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Hetvábhásha-dídhiti-ṭippaní. A gloss on the Hetvábhásha-dídhiti of Raghunátha S'iromaṇí. By Jayaráma Nyáyapañchánana.

Beginning. सङ्गतित्रयपरतां मूले स्पष्टयति एतावतेति परिकरो व्याप्तिपक्षधर्म्मते निरूप्येत्यन्तं अथपदार्थः तावताऽवसरसङ्गतिर्लभ्यते हेत्वाभासपदलभ्यं सङ्गत्यन्तरमाह, तत्प्रसङ्गादिति ।

End. मन्युत्पत्तिकाले दाहापत्तेरिति चेन्न कार्य्यसहभूतस्य हेतुत्वमित्यस्य । खण्डितं ।

विषयः । हेत्वाभासदीधितिव्याख्यानं ।

No. 1449. सामान्यलक्षणादीधितिटिप्पनी ।

Substance, country-made paper, 11 × 5 inches. Folia, 23. Lines, 10—12 on a page. Extent, 751 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Sámánya-lakshaṇá-dídhiti ṭippaní. A gloss on the Sámánya-lakshaṇá-dídhiti of Raghunátha S'iromaṇí. By Jayaráma Nyáyapanchánana.

Beginning. प्रथमावधि एकादशपत्राणि न सन्ति ।

End. त्तृप्तहेतुताकविशेषणतावच्छेदकप्रकारकनिश्चयस्य विशिष्टवैशिष्टप्रत्यक्षहेतुत्वात् क्वचित् व्यवहितादिभाननियमेन सामान्यलक्षणेत्यन्ये इत्यन्यत्र विस्तरः ।

Colophon. इति श्रीजयरामोऽसौ न्यायपञ्चाननः कृती सामान्यलक्षणाग्रन्थदीधितिं समदीपयत् ।

विषयः । सामान्यलक्षणादीधितिव्याख्यानं ।

No. 1450. प्रातिशाख्यभाष्यं ।

Substance, country-made paper, 8 × 4¼ inches. Folia, 75. Lines, 12—13 on a page. Extent, 2,193 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Prátis'ákhya-bháshya. A commentary on the S'aunaka Prátis'ákhya of the Rig Veda. By Uvaṭa, son of Vajraṭa. The text has been published by Professor Max Muller. A French translation of it has also appeared in the Journal Asiatique.

Beginning. अष्टौ समानाचराण्यादितः । किमर्थमिदमारभ्यते ।
शिक्षाकल्पव्याकरणैः सामान्येनोक्तलक्षणं ।
तदेवमिह शाखायां इति शास्त्रप्रयोजनं ॥

End. योगविभागे ह्यसति उत्तरे त्रय इति ग्रहणमनर्थकं भवति+ +तान्यूष्मणो घोषे दूभावः खधितीवेति तथोक्तमेव ।

Colophon. इति श्रीपार्षद्व्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्रउवटकृतौ प्रातिशाख्यभाष्ये क्रमपटलं दशमं समाप्तं ।

विषयः । वैदिकस्य प्रातिशाख्यस्य व्याख्यानं ।

No. 1551. तर्कामृतं, तर्कामृतचषकाख्यटीकासहितं ।

Substance, country-made paper, 10 × $4\frac{1}{2}$ inches. Folia, 19. Lines, 15—16 on a page. Extent, 712 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tarkámríta. An elementary exposition of the Vais'eshika doctrine. By Jagadís'a Tarkálaṅkára Bhaṭṭáchárya. With a commentary entitled *Tarkámríta-chasaka.* By Gáṅgaráma Jáḍí, son of Náráyaṇa, and pupil of Nílakaṇṭha. Hall's Contributions, p. 76.

Beginning. प्रथमावधिषट्चत्वारिंशत्पत्राणि न सन्ति ।

End. मू० । सुन्दोपसुन्दनिष्ठप्राणिवियोगानुकूला तद्व्यधिकरणा च या क्रिया तदनुकूलकृतिमन्तौ ताविति सुन्दोपसुन्दावन्योन्यं जघ्नतुरिति वाक्याधीनो बोध इति एवं दिशा सर्व्वत्र बोध्यं ।

Colophon. इति श्रीजगदीशभट्टाचार्य्यविरचितं तर्कामृतं समाप्तम् ।
टी० । चषकसुवर्णस्पर्शं दिनकरकरकृतपरामर्शं
जगदीशमथनकल्पं पिबतु तर्कामृतं तदाकल्पं ॥
इति श्रीजडुपनामकगङ्गारामविरचिततर्कामृतचषकः समाप्तः ।

विषयः । अत्र प्रत्यक्षानुमानोपमानशब्दात्मकप्रमाणचतुष्टयनिरूपणं, प्रत्यक्षानुमित्युपमितिशाब्दात्मकप्रमितिचतुष्टयनिरूपणञ्च ।

No. 1452. न्यायसिद्धान्तमञ्जरीदीपिका ।

Substance, country-made paper, 10½ × 4¾ inches. Folia. 106. Lines, 10 on a page. Extent, 1,782 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Nyáya-siddhánta-mañjarí-dípiká. A commentary on the Nyáya-siddhánta-manjarí an elementary treatise on the Nyáya. By S'rí-kaṇṭha. Mr. Hall has noticed in some MSS. the name written Síti-kaṇṭha. *Contributions*, p. 25.

Beginning. प्रथमपत्रावधि पञ्चपञ्चाशत् पत्राणि न सन्ति ।

End. आद्याद्यानुमितेरनङ्गीकारेणेच्छाकालेऽपि तदुत्पत्त्यसम्भवादिति निगमः । खण्डितं ।

विषयः । न्यायसिद्धान्तमञ्जरीव्याख्यानं, न्यायसिद्धान्तमञ्जर्य्यान्तु प्रत्यक्षानुमानोपमान-शब्दात्मकप्रमाणचतुष्टयनिरूपणं, प्रत्यक्षानुमित्युपमितिशाब्दात्मकप्रमितिचतुष्टय-निरूपणञ्च ।

No. 1453. गुणसारमञ्जरी ।

Substance, country-made paper, 10 × 4¾ inches. Folia, 77. Lines, 14 on a page. Extent, 756 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Correct.

Guṇasára-mañjarí. A Nyáya treatise on quality. By Mádhava-deva of Kás'í, son of Lakshmídeva, grandson of Mádhavadeva.

Beginning. ये मूका बधिरा विमूढमतयः सच्छास्त्रविद्वेषिणो
मर्त्यास्ते गुरुवर्य्यधुर्यपदवीं नीता यदाराधनैः ।
तं ह्यानन्दवने वसन्तमनिशं विश्वेश्वरं सादरं
पार्व्वत्या सहितं स्मरामि सततं विघ्नौघविच्छित्तये ॥

End. एतेनेति शरीरक्रियाजन्यशरीरोत्तरदेशसंयोगं प्रति शरीरविभागस्य हेतुत्वा-दिति दिक् ।

Colophon. इतिश्रीगोदावरीतटविराजमानधारासुरनिवासिमाधवदेवात्मजलक्ष्मीदेवसूनु-काशीनिवासिमाधवदेवेन गुणरहस्यप्रकाशगुणसारमञ्जरी विश्वेश्वरप्रीतये कृता ।

विषयः । गुणरहस्यव्याख्यानं, गुणरहस्ये तु न्यायमतसिद्धषट्पदार्थान्तर्गतगुणपदार्थ-निरूपणं ॥

No. 1454. श्रीहर्षचरितं ।

Substance, country-made paper, 15 × 7 inches. Folia, 121. Lines, 12 on a page. Extent, 3,993 s'lokas. Character, Nágara. Date, Sᴍ. 1925. Place of deposit, Sukea's Street, Calcutta, Paṇḍit I's'varachandra Vidyáságara. Appearance, new. Prose. Very incorrect.

S'ríharsha-charita. History of S'ríharsha's wars with the king of Málava. By Báṇa Bhaṭṭa, entitled Mahákavi Chakrachúḍámaṇi, son of Chitrabhánu, grandson of Arthapati, and great-grandson of Kuvera. It is written in prose, in a highly verbose, bombastic style, similar to that of the well-known Vásavadattá, of which it is an imitation. Dr. Fitz-Edward Hall first brought it to the notice of European orientalists, in the Preface to his edition of the Vásavadattá, p. 12. When he did this, he had, however, only two imperfect MSS. of the work before him. Dr. Buhler has since discovered several codices. The MS. before me was copied at Káshmír under the superintendence of Bábu Nilámbara Mukarjí, Chief Justice of the High Court of Káshmír, and professes to be complete, the concluding words on the last page being : " This is the end of the great poem of the name of Harsha Kávya." समाप्तमिदं हर्षकाव्याख्यं महाकाव्यं. In the Introduction the author, however, expresses his resolution to describe the overthrow of the Rájá of Málava, but at the close of the 8th chapter, where the MS. terminates, the subject is brought up to the progress of Harsha to the Vindhya Hill in his way to Málava, and it is obvious that if the author ever completed his work, he must have written several chapters more. Dr. Buhler informs me that the codices of the work which he has seen, all break off at the end of the 8th chapter.

It is well known that Báṇa died before completing the Kádambari, and that his son brought it to a conclusion, and as it would be difficult to believe that he left the Harsha Charita also incomplete, I presume that further instalments of the work may still be met with. The author lived in the early part of the 7th century, when Hiouen Thsang visited India. A brief account of the author is given by Dr. Hall in his Preface to the Vásavadattá. Mr. Kás'ínátha Trimbak Telang notices a drama of the name 'Párvatí Pariṇaya' as a work of this author, in which he also starts the theory that the Ratnávalí is likewise a work of Báṇa, principally on the ground that a stanza from the Ratnávalí is found word for word in the Harsha Charita, and, as urged

by Dr. Hall, "downright plagiarism of one respectable author from another is unknown." Dr. Buhler subscribes to the force of Dr. Hall's argument. (Indian Antiquary, Vol. III. p. 219.) I am, however, compelled, in the interest of truth, to deny the accuracy of the major. No one, who has carefully studied mediæval Sanskṛit literature, can maintain that plagiarism was unknown in India. Nothing was, or is, more common, and, from the nature of the subjects treated of by the later authors, it could not well be otherwise. Even ancient authors were not altogether above this failing, and one half of the Sútras of Másaka appears to be word for word the same with the work of Láṭyáyana. The number of verses taken from the Mahábhárata by later authors without acknowledgement is immense.

Contents. I. Description of the family of Vátsáyana, in which the author was born. II. The author's interview with S'ríharsha. III. His retirement from the kingdom of S'ríharsha. IV. The birth of S'ríharsha *alias* Rájyavardhana in the family of Pushpabhúti. V. Death of Pushpabhúti. VI. Resolution of S'ríharsha to destroy the king of Málava. VII. The conquest of Prágjyotisha from the son of its king. VIII. The invasion of the Vindhya Hill by S'ríharsha in his progress towards Málava.

Beginning. इच्छादिशक्तिनिचयप्रचयक्रमेण विश्वावभासनविधौ प्रथितप्रभावा ।
या ध्यायिनां हृदयकोकनदप्रतिष्ठारूपं प्रकाशयति नौमि सरस्वतीं तां ॥ १ ॥
नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥ २ ॥
हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमां ।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥ ३ ॥
नमः सर्व्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतं ॥ ४ ॥
प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः ।
कोकिला इव जायन्ते वाचालाः कामकारिणः ॥ ५ ॥
सन्ति श्वान इवासङ्ख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः शरभा इव ॥ ६ ॥
अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ ७ ॥

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकं।
उत्प्रेक्षा दाक्षिणात्येषु गौड़ेष्वक्षरडम्बरः ॥ ८ ॥
नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करं ॥ ९ ॥
किं कवेस्तस्य काव्येन सर्व्ववृत्तान्तगामिनी।
कथेव भारती यस्य न प्राप्नोति दिगन्तरं ॥ १० ॥
उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ॥ ११ ॥
कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्तेव(?) पाण्डुपुत्राणां गतया कर्णगोचरं ॥ १२ ॥
पदबन्धोज्ज्वलो हारीकृतवर्णक्रमस्थितिः।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥ १३ ॥
अविनाशिनमग्राम्यमकरोत्सातवाहनः।
विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः ॥ १४ ॥
कीर्त्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला।
सागरस्य परं पारं कपिसेनेव सेतुना ॥ १५ ॥
सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सपताकैर्यशो लेभे भासोदो बकुलैरिव ॥ १६ ॥
निर्गतामलवाक्यस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥ १७ ॥
समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना।
हरलीलेव लोकस्य विस्मयाय बृहत्कथा ॥ १८ ॥
आढ्यराजकृतोत्साहैर्हृदयस्थैः स्मृतैरपि।
जिह्वान्तःकृष्यमाणेव न कवित्वे प्रवर्त्तते ॥ १९ ॥
तथापि नृपतेर्भक्त्या भीतो निर्व्वहनाकुलः।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलं ॥ २० ॥
सुखप्रबोधललिता सुवर्णघटनोज्ज्वलैः।
शब्दैराख्यायिका भाति शय्येव प्रतिपादकैः ॥ २१ ॥
जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः।
सकलप्रणयिमनोरथसिद्धिः श्रीपर्व्वतोपमो हर्षः ॥

End. अवसिते सन्ध्यासमये समनन्तरमपरिमितयशःपानतृषिताय मुक्ताशैलशिला-

चषक इव निजकुलकीर्त्त्या कृतयुगकरणोद्यतायादिराजराजितशासनमुद्रा-निवेश इव राज्यश्रिया सकलद्वीपजिगीषाचलिताय श्वेतद्वीपकृत इव चायत्या श्वेतभानुरुपानीयत निशया नरेन्द्राय इति ।

Colophon. इति श्रीचित्रभानुसुतमहाकविचक्रचूड़ामणिभट्टवाणकृतौ हर्षचरिते महाकाव्येऽष्टम उच्छ्वासः । समाप्तमिदं हर्षचरिताख्यं महाकाव्यं ।

एतत् पुस्तकं खण्डितं श्रीहर्षकर्तृकप्रतिज्ञातमालवराजोन्मूलनवर्णनरहितत्वात् । समाप्तमिदमित्यनेन यत् समाप्तिसूचकं वाक्यं तत् सम्पातायातं ॥

विषयः । अत्र अष्ट उच्छ्वासाः सन्ति । तत्र १ प्रथमे, वात्स्यायनवंशवर्णनं । २ये, वाणस्य श्रीहर्षराजदर्शनं । ३ये, वाणस्य हर्षराज्यात् प्रत्यागमनवृत्तान्तं । ४र्थे, पुष्पभूतिनाम्नो राज्ञो वंशे राज्यवर्द्धनस्य श्रीहर्षस्य च जन्मनो वृत्तान्तकथनं । ५मे, पुष्पभूतिराजस्य मरणवृत्तान्तकथनं । ६ष्ठे, मालवराजोन्मूलनाय श्रीहर्षस्य प्रतिज्ञा । ७मे, श्रीहर्षदेवस्य प्राग् ज्योतिषेश्वरकुमारसमीपात् छत्रलब्धिवर्णनं । ८मे, श्रीहर्षदेवस्य विन्ध्याटवीगमनवृत्तान्तवर्णनं ।

No. 1455. ज्योतिषं ।

Substance, English paper, 8¼ × 4¼ inches. Folia, 5. Lines, 8 on a page. Extent, 60 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Jyotasha. Fragment of an astrological treatise on the days most appropriate for the performance of particular religious rites. Contents. Praise of astrology; quinquennial eras; planets, lunar days, and hours of 24 minutes; presiding deities of lunar mansions; auspicious and inauspicious lunar mansions; days and their duration. The original name of the work and that of its author cannot be made out from the codex before me.

Beginning. पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिं ।
दिनर्त्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥
ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः ।
सम्मतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये ॥

End. (ख॰)

विषयः । ज्योतिषप्रशंसा । पञ्चवर्षात्मकयुगस्य कालज्ञानं । राशि-तिथि-नाड़ीनिरूपणादिः । नक्षत्राधिपकथनं । नक्षत्राणां क्रूरोग्रादिसञ्ज्ञा । दिवसप्रमाणादिकथनञ्च । (खण्डितत्वादेतत्परं विषयो न प्राप्तः) ।

No. 1456. श्रीभगवद्गीतातात्पर्य्यबोधिनी, मूलसहिता ।

Substance, country-made yellow paper, 13½ × 5 inches. Folia, 135. Lines, 14 on a page. Extent, 7,086 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Bhagavadgítá-tátparyabodhiní. A commentary on the Bhagavadgítá. By Sañkaránanda Sarasvatí. The author was a great Vedántist, and wrote glosses on almost all the Upanishads. His object in the work under notice is to reconcile the philosophy of the Gítá with that of the Vedánta. The MS. is incomplete, and breaks off at the end of the 9th chapter.

Beginning. (टी०) । सत्यं ज्ञानमनन्तं यन्निष्कलं + + + परं ।
अद्वितीयं निर्व्विशेषं ब्रह्म तत् समुपास्महे ॥ १ ॥]
अधस्तान्मानवं दिव्यमुपरिष्टाद्जाकृति ।
परस्तात्तमसस्तेजः पुरस्तादस्तु नः सदा ॥ २ ॥
पञ्चाशद्वर्णरूपेण यया व्याप्तमिदं जगत् ।
शब्दब्रह्ममयीं वाणीं भजे तां परदेवतां ॥ ३ ॥
असंसृष्टैव प्रकृतिं विकृतिञ्च गुणैः सह ।
यः सदा भाति मेऽन्तस्थस्तं सेवे कृष्णमीश्वरं ॥ ४ ॥
सनन्दनं श्रीसनकं सनातनं सनत्कुमारञ्च सनत्सुजातं ।
श्रीवामदेवञ्च शुकं महान्तं नमामि भक्त्या निजबोधसिद्ध्यै ॥ ५ ॥
भक्त्या श्रीशङ्कराचार्य्यं तच्छास्त्रं सद्गुरुं मुहुः ।
नमामि शिरसा नित्यं सम्यक् ज्ञानोपपत्तये ॥ ६ ॥
भक्त्या प्रणम्य स्वगुरुमानन्दात्मसरस्वतीं ।
क्रियते श्रीमद्भगवद्गीतातात्पर्य्यबोधिनी ॥ ७ ॥

(मू०)। धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाः सर्व्वे किमकुर्व्वत सञ्जयः॥
(खण्डितं)।

विषयः। नवमाध्यायपर्य्यन्तायाः भगवद्गीतायाः व्याख्यानं।

No. 1457. अध्यात्मभागवतं।

Substance, country-made yellow paper, 13½ × 5 inches. Folia, 12. Lines, 13 on a page. Extent, 604 s'lokas. Character, Bengali. Date, Sk. 1796. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Adhyátma-bhágavata. An eulogium on the career of Kṛishṇa,—a Vaishṇava treatise on devotion to Kṛishṇa.

Beginning. स्मृत्वा श्रीदक्षिणामूर्त्तिं श्रीकृष्णचरितामृतं।
अध्यात्मगोचरं कुर्व्वे सतां स्वस्य मनोमुदे॥ १॥

End. मनोम्हगाङ्कट्टत्तिलक्षणैः कलासहस्रकैः परिग्रहैः समन्वितः परमेश्वरो विराजते॥

Colophon. इति भगवच्चरितामृतस्याध्यात्मगोचरतानिरूपणं नाम श्रीमदध्यात्मभागवतं सम्पूर्णं।

विषयः। श्रीकृष्णचरितामृतस्याध्यात्मगोचरतानिरूपणं।

No. 1458. भक्तिरसायनं।

Substance, English paper, 11 × 4½ inches. Folia, 26. Lines, 12 on a page. Extent, 975 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Bhaktírasáyana. An essay on devotion to Kṛishṇa, or the philosophy of faith. By Madhusúdana Sarasvatí. The MS. contains only the first chapter of the work.

Beginning. पदनखनिविष्टमूर्त्तिभिरेकादशरूपतामिवावहन्निशं।
यं समुपास्ते गिरीशस्तं वन्दे नन्दमन्दिरे कञ्चित्॥ १॥

नवरसमिलितं वा केवलं वा पुमर्थं परममिह मुकुन्दे भक्तियोगं वदन्ति ।
निरुपमसुखसम्वित्‌रूपमस्पृष्टदुःखं तमहमखिलतुष्ट्यै शास्त्रदृष्ट्या व्यनज्मि ॥ २ ॥
कर्म्मयोगोऽष्टाङ्गयोगो ज्ञानयोगो भक्तियोग इति चत्वारः पुमर्थत्वेन प्रसिद्धा योगाः ।

End. तमेव परमात्मानं जारबुद्ध्यापि सङ्गताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥
इत्यादिदिङ्मात्रमेवोदाहृतं । अनन्तरोल्लासे तु सप्रपञ्चमुदाहरिष्यते । प्रेमत्युपरम्यते ।
लक्षणं भगवद्भक्तेः साधनं सोपपत्तिकं ।
सभूमिकं स्वरूपञ्च यथा बुद्धीह वर्णितम् ।

Colophon. इति श्रीमधुसूदनसरस्वतीविरचितभक्तिरसायने भक्तिसामान्यनिरूपणं नाम प्रथमोल्लासः समाप्तः । (अस्य ग्रन्थस्येतः परमन्योऽप्युल्लासोऽस्तीत्यत्रैव सूचितम) ।

विषयः । भगवद्भक्तेर्लक्षणस्य सहेतुकसाधनस्य साश्रयस्वरूपस्य च वर्णनं ।

No. 1459. शुल्वप्रदीपविवरणं ।

Substance, country-made paper, $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia 31. Lines, 11—12—15—16 on a page. Extent, 1,453 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ulva-pradípa-vivarana. A concise gloss on the S'ulva-pradípa, which in itself is a commentary on the S'ulva Sútra of A'pastamba. By Sundararája, son of Mádhava A'chárya of the Kunika sept.

Beginning. आपस्तम्बेन योऽयं व्यरचि भगवता शुल्वसञ्ज्ञो गभीरः
प्रश्नार्थं तस्य भाष्यप्रभृतिषु कथितं विस्तृतं वीक्ष्य कल्पं ।
सङ्क्षिप्तोद्बोधनार्थं कुशिककुलनिधेर्माधवार्य्यस्य यहुः
पुत्रः शुल्वप्रदीपविवरणमधुना सुन्दरो निर्मिमीते ॥

End. अश्वमेधः प्राप्तसेदाहार ऊर्द्धाविर्षाम पश्येत् नेतरदाङ्गियेतादितसेदाहरेदाहृत्य छतान्ता ह्यत्यादद्दीतेति ॥

Colophon. इति सुन्दरराजीये शुल्वप्रदीपविवरणे षष्ठः पटलः ॥ (मध्यखण्डितं ।)

विषयः । शुल्वप्रदीपव्याख्यानं ।

No. 1460. सुपर्णचितिपद्धतिः ।

Substance, country made-paper, 10½ × 5 inches. Folia, 50. Lines, 14—17 on a page. Extent, 2,762 s'lokas. Character, Nágara. Date, SM. 1753. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Suparṇa-chiti-paddhati. A guide to the performance of the Vedic rite called Suparṇa-chiti or Agni-chiti. By Rámachandra, son of Súryadása. Both the father and the son had performed the rite, and for their eminence acquired the title of *Samráṭ Sthapatyagnichit*, or "the Kaisar of household-fire-collectors."

Beginning. सावित्र्युपसत्त्वे क्रतौ प्रथमोपसद्दिने एव प्रथमचितिपुरीषनिवापोपस्थानान्तं क्रियते ।

End. चितिकर्म्मसमुद्देशं सेतुं रामोऽतनोद्गुरौ ॥
प्रचरन्तोऽमुना पारयातकर्म्मक्रतोऽखिलाः ॥

Colophon. इति सम्राट् स्थपत्यग्निचित्सूर्य्यदासात्मजनैमिषीयसम्राट् स्थपत्यग्निचित् रामचन्द्रकृता सुपर्णचितिपद्धतिः सम्पूर्णा ॥ (मध्ये खण्डितं ।)

विषयः । अग्निचितिकर्म्मविवरणं ।

No. 1461. एकाहप्रश्नः ।

Substance, country made-paper, 8½ × 3½ inches. Folia, 18. Lines, 9 on a page. Extent, 324 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Ekáha-pras'na. Rules regarding the performance of the rite called Ekáha. This is a fragment of a Kalpa Sútra, but I cannot ascertain the name of its author.

Beginning. एकाहे प्राचीनेष्विति प्राकृतीर्दक्षिणा ददाति । यथा समाम्नातं क्रतूनां प्रकृतिरग्निष्टोमो निकायिनाम् प्रथमः सर्व्वेत्र यथादिष्टं वा ॥

End. ननु वीवते सन्तिष्ठते राजाभिषेको व्याख्यातो विद्या सन्तिष्ठते सवाः सवाः ।

Colophon. (समाप्तिसूचकवाक्यं नास्ति ।)

विषयः । एकाहप्रकरणकथनं ।

No. 1462. विबुधोपदेशः ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 16. Lines, 11 on a page. Extent, 362 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vibudhopades'a. A meagre vocabulary of Sañskrit words arranged in classes. Anonymous.

Beginning. माङ्गल्यो मङ्गलाय भवतां भवतां नराः ।
पराभूता भवन्त्याशु यतः प्रत्यूहराशयः ॥

End. बालक्रीड़नकानि हस्तलाघवं भूषायोजनं जयरत्नपरीक्षेति चतुःषष्टिकला ॥

Colophon. इति श्रीविबुधोपदेशः समाप्तः ॥

विषयः । कतिपयशब्दमाला । प्रथमं स्वर्गवर्गः । ततो भूमिवर्गः । ततः पातालवर्गः ॥

No. 1463. सोमप्रयोगः ।

Substance, country-made paper, 9½ × 4 inches. Folia, 85. Lines, 12 on a page. Extent, 2,486 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Soma-prayoga. A guide to the performance of certain rites in which the brewing of the Soma beer is a component.

Beginning. अथ ज्योतिष्टोमस्याग्निष्टोमस्य प्रयोग उच्यते । तत्र व्रात्यतादो ब्राह्मणपरिहारार्थमासन्ने पर्व्वणि ऐन्द्राग्नाग्निनो पशु कृत्वा निमित्ताभावे तु तावत्कृत्वा सोमारम्भः।

End. सोष्टियावद्रात्रे कियद्रात्रे वा सन्तिष्ठते तदैव सायमग्निहोत्रं जुहुयाद्यथोदिते काल एव प्रातर्होमः ॥

विषयः । सोमयागप्रयोगकथनं ॥

No. 1464. शब्दकौस्तुभः ।

Substance, country-made paper, 9½ × 4¼ inches. Folia, 367. Lines, 10—11—12—13—14 on a page. Extent, 9,490 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'abda-kaustubha. A commentary on the grammatical aphorisms of Paṇini. By Bhaṭṭojí Díkshita. The MS. is incomplete, wanting both the beginning and the end. The portion included refers to chapters II to IV of the text.

Beginning. समर्थः पद्विधिः । पद्सम्बन्धी यो विधिः स समर्थः आश्रितः, बोध्यः । परिभाषेयं । समर्थपद्स्य तदाश्रिते लक्षणा सामर्थ्यं चेह एकार्थीभावः प्रक्रियाद्शायां पृथगर्थत्वेन प्रथमगृहीतस्य विशिष्टैकार्थत्वमिति ॥

End. खण्डितं ।

विषयः । द्वितीयाध्यायावधिचतुर्थाध्यायपर्य्यन्तपाणिनिसूत्रव्याख्यानं ॥

No. 1465. प्रयोगरत्नं ।

Substance, country-made paper, 11 × 4½ inches. Folia, 188. Lines. 9 on a page. Extent, 4,049 s'lokas. Character, Nágara. Date, Sk. 1747, Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Prayoga-ratna. A comprehensive treatise on all the domestic rites, ceremonies and sacraments of the Hindus, including some Vedic rites. By Bhaṭṭa Náráyaṇa, son of Bhaṭṭa Rámes'vara Surí. The work was completed at Benares. A fragment of this work relating to funeral cakes has been noticed under No. 1294, and another on Charaka Sautrámani under No. 774. The work under No. 1294, has been erroneously described as composed by Harihara. The real author is Bhaṭṭa Náráyaṇa.

Beginning. श्रीरामं सपरीवारं गणेशञ्च सरस्वतीं ।
आश्वलायनतच्छिष्यान् प्रणम्य पितरं गुरुं ॥ १ ॥
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
प्रयोगरत्नं कुरुते काश्यां शिष्टेष्टतुष्टये ॥

Colophon. इति श्रीभट्टरामेश्वरसूरिसूनुभट्टनारायणविरचितायामौर्द्धदेहिकपद्धतौ पञ्चकादिमरणविधानानि । समाप्ता चेयं पद्धतिः ।

विषयः । अत्र प्रथमं अष्टचत्वारिंशत्संस्कारकथनं पुण्याहवाचनप्रयोगश्च । ततः अङ्कुरार्पणप्रयोगः । ततः वृद्धिश्राद्धप्रयोगनिर्णयः । ततः कौतुकबन्धप्रयोगः । ततः ग्रहयज्ञप्रयोगः । ततः विवाहोत्तरकालकर्त्तव्यस्थालीपाकः । ततः पर्व्वनिर्णयः

स्थण्डिलकरणादिनिर्णयश्च । ततः पार्व्वणस्थालीपाकनिर्णयः । तत इष्टिप्रायश्चित्तानि । तत इष्टिमध्ये ग्रहणनिर्णयः । ततो नैमित्तिकप्रायश्चित्तानि । ततः सकलकर्म्मसाधारणी परिभाषा । ततः दुष्टरजोदर्शनशान्तिः । ततो गर्भाधानं । ततः पुंसवनं । ततः सीमन्तोन्नयनप्रयोगः । ततो विष्णुबलिः । ततो जातकर्म्मप्रयोगः । ततो नामकरणप्रयोगः । ततः निष्क्रमणप्रयोगः । ततः अन्नप्राशनप्रयोगः । ततः अब्दपूर्त्तिविधिः । ततः चूडाकर्म्मप्रयोगः । तत उपनयनप्रयोगः । ततः महाव्रतप्रयोगः । ततः ब्रह्मचारिव्रतलोपप्रायश्चित्तं । ततः समावर्त्तनप्रयोगः । ततो विवाहादिनववधूगृहप्रवेशादिप्रयोगः । ततः अग्निद्वयसंसर्गविधिः । तत उपासनाख्यः सायंप्रातर्होमविधिः । तत अशौचहोमविधिः । तत अकालकर्त्तव्यहोमविधिः । तत आपत्कालकर्त्तव्यहोमविधिः । ततः अग्निद्वयसंसर्गदोषप्रायश्चित्तं । ततो गृह्याग्निपुनःसन्धानप्रयोगः । ततो वधूसहितवरस्य गृहप्रवेशविधिः । तत आश्वयुजीकर्म्मप्रयोगः । ततः स्मार्त्ताग्रयणप्रयोगः । ततः प्रत्यवरोहणप्रयोगः । ततः पिण्डपितृयज्ञप्रयोगः । ततः अष्टकाश्राद्धप्रयोगः । तत उत्सर्जनविधिः । तत उपाकर्म्मविधिः । ततो दाहादिसपिण्डीकरणान्तऔर्द्ध्वदेहिककर्म्मप्रयोगः ॥

No. 1466. कैवल्यदीपिका, मुक्ताफलटीका ।

Substance, country-made paper, $10\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 164. Lines, 8—10—12—14 on a page. Extent, 7,876 s'lokas. Character, Nágara. Date, Sm. 1963. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Kaivalya-dípiká. A commentary on the *Muktáphala* of Vopadeva, on the philosophy of the Bhágavata Puráṇa. By Hemádri Deva, Minister of Mahárája Rámarája. The king's name occurs as Kámarája in the last line of the text, but that may be only an epithet; in Mr. Elliot's essay in the Journal of the Royal Asiatic Society of Great Britain (IV, p. 28) it is written Mahádeva. He was a Jádava king of the Lunar race (*soma-vańs'a*), and ascended the throne of Deoghar (Devagirí) in S'aka 1182. = A. E. 1260. This is also the time which M. Burnouf assigned to Vopadeva in his Preface to the Bhágavata. Wilson says "Vopadeva is generally assigned to the twelfth century,"

(*Essays*, III. p. 184). Vopadeva was the Court Paṇḍit and Hemádri the minister of Maháideva. According to some Hemádri was himself a king, and Vopadeva was his minister; but seeing that Hemádri proclaims himself a Mantri of Mahádeva in whose house he completed the work under notice, the opinion may be safely rejected as unfounded. The same may be said of the opinion which assigns to Vopadeva the authorship of the works current in the name of Hemádrí. It is possible, however, from the currency of the epithet *Hemádri Vopadevena*, that some works are due to the joint authorship of the two Paṇḍits. The several works extant of Vopadeva on the philosophy and contents of the Bhágavata are proofs sufficient that that work is not due to his pen. The reference to the Bhágavata by Chand (12th century) is likewise a strong proof against the theory.

Beginning. यज्ज्योतिरुन्मिषति चेतसि धर्म्ममेघमातस्थुषामतिवशे ? परिकर्म्ममुख्यैः ।
तच्छुद्धसत्त्वमुकुरप्रतिबिम्बभावात् कृष्णाभिधामुपगतं भुवि भावयेम ॥ १ ॥
समलघातं प्रणिहत्य योऽन्धं मृणालिनीं चेतयते मनीषां ।
यत् पादसङ्गात् जगती कृतार्था गुरुं विवस्वन्तमिहानुवे तं ॥ २ ॥
श्रीवोपदेवस्य निधेर्गुणानां जयन्ति ते ते भुवि वाग्विलासाः ।
विकुण्ठ्य येषु स्वयमीश्वरोऽपि सर्व्वज्ञशब्दं समवैति रूढं ॥ ३ ॥
अस्मिन् समस्मिन्नपि वाङ्मयाब्धावपारपारीणमनीषयोच्चैः ।
विद्वत्स्वतत्स्वज्जडवस्तुभेदं गुणा गणेया भवि नास्य कैः कैः ॥ ४ ॥
अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो मुदं ददन्तोऽत्र न कस्य सूक्तयः ।
मुक्तास्पषाद्वेषिमनांस्यनारतं वियोगिहृन्दीव कलाः कलानिधेः ॥ ५ ॥
तेन मुक्ताफलन्नेने यत्नोकमनुगल्लता ।
तत्र टीकां यथाबुद्धि कुर्व्वे कैवल्यदीपिकां ॥ ६ ॥

End. टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकां ।
हेमाद्रिः कटके चक्रे कामराजस्य वेश्मनि ॥

Colophon. इति श्रीमत्प्रौढप्रतापचक्रवर्त्तिमहाराजाधिराजसोमवंशोद्भवरामराजमन्त्रि-
वर्य्यहेमाद्रिदेवविरचिता मुक्ताफलटीका समाप्ता ।

विषयः । वोपदेवकृतमुक्ताफलस्य व्याख्यानं ।

No. 1467. विद्याकल्पसूत्रं ।

Substance, country-made paper, 12¾ × 6½ inches. Folia, 41. Lines, 11 on a page. Extent, 1,126 s'lokas. Character, Nágara. Date, Sm. 1864. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vidyá-kalpa-sútra. A manual for the performance of daily religious rites and ceremonies for persons who worship a S'ákta goddess. By Paras'uráma Muni.

Beginning. श्रीमान् प्रोक्तगुणो लब्ध्वा दीक्षामुक्तगुणाङ्गुरोः ।
दृष्ट्वा महागणपतिमारभेत श्रियः क्रमम् ॥ १ ॥
ब्राह्मे मुहूर्ते ब्राह्मणो मुक्तस्वापः समुपविश्य पापविलापाय स्वब्रह्मरन्ध्रगाम्भोज-कर्णिकासमुपविष्टं—इत्यादिः ।

End. सर्वेषु यज्ञेषु यष्टा भवति यं क्रतुमधीतेन तेनास्येष्टं भवति इति हि श्रूयते इत्युपनिषदिति शिवं ॥ १० ॥

Colophon. इति श्रीमद्भगवत्परशुराममुनिनिगदितं श्रीविद्याकल्पसूत्रं सम्पूर्णम् ।

विषयः । श्रीविद्यादीक्षापूजनादिकथनं ।

No. 1468. भगवद्भक्तिचन्द्रिकोल्लासः, सटीकः ।

Substance, country-made paper, 12¾ × 5 inches. Folia, 45. Lines, 10—11 on a page. Extent, 1,452 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Bhagavad-bhaktí-chandrikollása. A treatise on faith and devotion to Krishṇa; in verse with a prose commentary. The MS. is incomplete, and the author's name cannot be made out.

Beginning, (टी०) । इह खलु मुक्तमुमुक्षुविषयिप्रभृतिजनान् सर्वानपूर्वरसास्वादेनानन्द-पूर्णान् विधातुं परं ब्रह्म सगुणरूपेणानन्दवेश्मनि प्रादुरभूत् तस्य सगुणस्य भक्तिरसालम्बनस्य प्रणामं प्रारिप्सितारविघ्नपरिसमाप्तये कुर्वन् शिष्यशिक्षायै निबध्नाति । गानैरिति ।

(मू०)। गानैर्नारदगोपिकादिषु निजप्रेमाणवर्द्धयन्
स्वे स्वे कर्मणि योजयन् सुरमुखान् शुद्धात्मबुद्धिप्रदान्।
नित्यं यः सनकादिकेभ्य उरुधा गीतः श्रुतौ राजते
सत्यज्ञानसुखात्मकं तमनिशं कृष्णाभिधानं नुमः ॥ १ ॥

End. (ख०)

विषयः। भगवद्भक्तिचन्द्रिकोल्लासव्याख्यानं।

No. 1469. सामान्यसूत्रभाष्यं।

Substance, country-made paper, 12 × 5 inches. Folia, 36. Lines, 9 on a page. Extent, 1,270 s'lokas. Character, Nágara. Date, Sм. 1866. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Kapardi-bháshya alias *Sámánya-sútra-bháshya.* A commentary on the Kalpa-sutra of A'pastambha. By Kapardi Swámí. The MS. comprises only the chapter on technical terms.

Beginning. यज्ञं व्याख्यास्यामः। व्याख्यानं नाम शब्दप्रतिपादितार्थस्य न्यायलब्धार्थस्य स्वरूपकथनं॥ अस्मादयमर्थो लभ्यत इति। इह यज्ञशब्देन साङ्गोपाङ्गो यागो ऽभिधीयते।

End. यस्य प्रयोजनं नास्ति न तस्य प्रपायनं। यथा दक्षिणाग्नेर्दर्शपूर्णमासार्थे होमे सारस्वतहोमे।

Colophon. इति श्रीकपर्द्दिस्वामिभाष्ये परिभाषापटलं समाप्तम्।

विषयः। सामान्यसूत्रव्याख्यानं।

No. 1470. गूढार्थदीपिका, मूलसहिता।

Substance, country-made paper, 13½ × 6 inches. Folia, 311. Lines, 12—13—16 on a page. Extent, 10,845 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Gudhártha-dípiká. A commentary on the Bhagavad Gítá. By Madhusúdana S'arasvatí, who dedicates it to his tutor Vis'ves'vara Sarasvatí. The MS. includes also the text.

Beginning. ॐ भगवत्पादस्यार्थमालोच्यातिप्रयत्नतः ।
प्रायः प्रतिपदं कुर्व्वे गीतागूढार्थदीपिकां ॥

End. श्रीरामविश्वेश्वरमाधवानां प्रसादमासाद्य मया तु नृणां ।
व्याख्यानमेतद् विहितं स्वबोधं समर्पितं तच्चरणाम्बुजेषु ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीविश्वेश्वरसरस्वतीपाद। इतः परमचरं लुप्तम् ।

विषयः । भगवद्गीताव्याख्यानं ।

No. 1471. पञ्चभूतविवेकदीपिका ।

Substance, country-made paper, 10¼ × 4½ inches. Folia, 35. Lines, 10—11 on a page. Extent, 244 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pañcha-bhúta-viveka-dípiká. A commentary on the *Pañcha-bhúta-viveka*, a treatise on the five elements, from a Vedánta standpoint. The text is by Bhárati Tírtha; the comment by Rámakṛishṇa.

Beginning. नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
पञ्चभूतविवेकस्य व्याख्यानं क्रियते मया ॥

End. तद्ब्रह्म स्वप्रकाशात्मरूपकमिति यदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मरूपं स्वरूपकं स एवेत्यर्थः ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीभारतीतीर्थविद्यारण्यमुनिवरकिङ्करेण श्रीरामकृष्णविदुषा विरचिता महावाक्यविवेकव्याख्या समाप्ता ॥ पञ्चमं प्रकरणं ॥

विषयः । पञ्चभूतविवेकव्याख्यानं ।

No. 1472. निगूढार्थदीपिका अर्थात् आथर्व्वणोपनिषत् टीका ।

Substance, country-made paper, 13 × 6 inches. Folia, 231. Lines, 13—14 on a page. Extent, 9,660 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nigudhártha-dípiká. A commentary on the Átharvána Upanishads. The codex is incomplete, and contains only that portion of the work which refers to the S'iras, the S'iva, and the first half of the Ganapati Upanishads. By Naranáráyana.

Beginning. नारायणपदद्वन्द्वपरायणपरायणः ।
नरं नारायणं नत्वा नरो नारायणाह्वयः ॥ १ ॥
अथर्व्वणरहस्येषु नानाशाखान्वितेषु च ।
तनुते तनुवाक्येन निगूढार्थप्रदीपिकां ॥

End. नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां पूर्व्वापरदीपिका ॥

Colophon. इत्यथर्व्वशिरसि वरदगणपतिपूर्व्वतापनीयोपनिषद्दीपिका समाप्ता ।

विषयः । अथर्व्ववेदोपनिषद्व्याख्यानं ।

No. 1473. हिरण्यकेशिसूत्रं ।

Substance, country-made yellow paper, 10¼ × 4¼ inches. Folia, 15 Lines, 8—9 on a page. Extent, 301 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Hiranyakes'i Sútra. A fragment of the Kalpa Sútra of Hiranyakes'í on the rituals of the Black Yájur Veda. The text is confined to the Rájasúya sacrifice.

Beginning. राजा अश्वमेधेन यजेत यः कामयेत सर्व्वा व्युष्टीर्व्युश्नुवीयेति पुण्यनामधेयं चित्रं देवयजनमध्यवस्यति ।

End. राजेह धृतिरभितोऽश्वे अश्मानि श्वो भूते पश्चाद्धः षट् । राजाश्वेऽष्टादश ।

Colophon. इति हिरण्यकेशिसूत्रे चतुर्दशप्रश्नः समाप्तः ।

विषयः । अश्वमेधयागप्रकरणं ।

No. 1474. सहस्रोपदेशी, वा उपदेशसहस्री टीकासहिता ।

Substance, country-made paper, 11½ × 5 inches. Folia, 91. Lines, 9 on a page. Extent, 1,638 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Sahasropades'í alias *Upades'a-sahasrí*. A treatise on the Vedántic doctrine, and the duties of Vedántists. By S'aṅkara A'chárya. The work is divided into two parts, the first comprising three chapters in prose, and the second nineteen in verse. The MS. comprises only the first part with a commentary named *Padayojaniká*, by Ráma Tírtha. Hall's *Contributions*, p. 99.

Beginning. (टी०) । प्रणम्य रामाभिधमात्मधीपदं जगत्प्रसूतिस्थितिसंयमायनं ।
तदात्मकांश्शङ्करपूर्वकान् गुरून्मयोपदेशार्थविभाग उच्यते ॥ १ ॥
इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसङ्ग्राहिकामुपदेश-साहस्रीं गद्यपद्यविभागग्रन्थरचनया प्रकटीकुर्वन्नादौ गद्यबन्धमारभमाणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तं मङ्गलमाचरति । अथेति ।
(मू०) । अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां ॥ २ ॥

End. (मू०) । सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानीति समीक्षितव्यानि ।

Colophon. इति सहस्रोपदेशी प्रबन्धः समाप्तः । तृतीयप्रकरणञ्च ।
(टी०) । सर्वाणि वेदान्तवाक्यानि विस्तरशो बहुशाखोपसंहारेण, पुनः पुनरालोचयितव्यानीत्यर्थः । द्विरुक्तिर्गद्यबन्धसमाप्तिद्योतनार्था ।
उपदेशसहस्र्याः सद्गद्यबन्धो यथामति ।
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥
इति श्रीमत्पदवाक्यमहावाक्यप्रमाणमर्यादाश्रीसहस्रोपदेशीव्याख्यायां गद्यबन्ध तृतीयं प्रकरणं ॥ ३ ॥ जीवन्मुक्तिनामकं तृतीयं प्रकरणं समाप्तम् ॥ ३ ॥

विषयः । सहस्रोपदेशिगद्यबन्धव्याख्यानम् ॥

No. 1475. उपदेशसहस्री, पदयोजनिकानामटीकासहिता ।

Substance, country-made paper, 11¾ × 5¼ inches. Folia, 99. Lines, 17—18 on a page. Extent, 5,346 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Upadis'a-sahasri. The metrical portion of the work named under the last preceding No. with a commentary named Padayojanká. By Ráma Tírtha, son of Krishna Tírtha. Hall's *Contributions*, p. 99.

Beginning. यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ।
भाति नो भाति यज्ज्ञानाद्स्मि तद्ब्रह्म चित्सुखम् ।
तदेवं सर्वोपनिषदर्थसारसङ्गृहं गद्यबन्धबन्धेन सङ्क्षेपतो युक्त्योपदिश्य पुनरप्युक्तमेवार्थजातं पद्यप्रबन्धेन सोपस्करं विस्तरेणोपदेष्टुकामो भगवान् भाष्यकारः पद्यग्रन्थारम्भे ग्रन्थप्रतिपाद्यपरदेवतानमस्काररूपं मङ्गलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति चैतन्यमिति ।
(मू॰) । चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं ।
यत सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

End. (मू॰) । तथास्तृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितश्च यैः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दभगवत्पादपूज्यशिष्यश्रीशङ्करभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसाहस्री समाप्ता ॥ १८ ॥
(टी॰) । युक्तमत्र गुरुप्रपूजनमित्यर्थः ॥ १८ ॥
उपदेशसहस्रीयं विकृता हि महात्मभिः ।
श्रद्धावेशान्मयाप्यस्याः पदयोजनिका कृता ॥ १ ॥
समस्तवेदार्थरहस्यगद्यपद्यप्रबन्धार्थतयावबोधः ।
कथन्नु माहङ्मतिविम्बितः स्यादथापि भक्त्याहमिहास्मि नुन्नः ॥ २ ॥
हृद्यन्तराविस्फुतरामसूर्त्तेस्तथा गुरूणां विपुलप्रसादात् ।
यथाकथञ्चिद्रचितेन विष्णुरनेन तुष्यत्वखिलान्तरात्मा ॥ ३ ॥
इति श्रीशङ्कराचार्य्यकृतोपदेशसहस्र्याः पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचिता समाप्ता ।

विषयः । उपदेशसाहस्र्या व्याख्यानं ।

No. 1476. सौभरिसंहिता ।

Substance, country-made paper, 12 × 4¼ inches. Folia, 159. Lines, 6—7—8 on a page. Extent, 2,084 s'lokas. Character, Nágara. Date, Sm. 1801. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Saubhari-Sañhitá. A collection of legends in praise of certain sacred places, related by Saubhari in reply to queries by Yudhishṭhira. The MS. is apparently incomplete. Contents: I. Details of the Indrayága. II. Translation of a Bhilla to Vaikunṭha. III. Story of S'iva S'armá. IV. and V. The legend of Dílipa's worship of the cow Nandiní for a son. VI. The emancipation of a Vais'ya through the merits of Indraprastha. VII. Birth of S'iva S'armá. VIII. Praise of Dvárká. IX. Story of a Bráhmaṇa named Vimaláksha. X. Story of a Bráhmaṇa named Upendra, and another tale. XI. Story of Chaṇḍakaná and of his father. XII. Praise of a sacred pool named Vis'ránti. XIII. Do. of Madhuvana. XIV. Do. of Vadarikás'rama. XV. Do. of Haridvára. XVI. Do. of Indraprastha. XVII. Do. of Prayága. XVIII. Do. of Indıaprastha.

Beginning. सूत उवाच । धर्मपुत्रो धर्मकथां शुश्रुषुः सौभरेः शुभाम ।
शौनकाश्रममभ्येत्य नत्वा तमिति पृष्टवान् ॥ १ ॥
युधिष्ठिर उवाच । ब्रह्मन् मार्त्तण्डतनयातीरतीर्थेषु यच्छुभम् ।
तीर्थं तदेव वैकुण्ठजन्मभूमिपुरःसरम् ॥ २ ॥
सौभरिरुवाच । एकदा तु मुनिश्रेष्ठौ दिवि नारदपर्वतौ ।
गच्छन्तौ खाण्डववनं पश्यतः स्म मनोहरं ॥ ३ ॥

End. अनन्तादित्यसङ्काशं वासुदेवं चतुर्भुजम् ।
शङ्खचक्रगदापद्ममुकुटं वनमालिनम् ।
द्वादशपचाम्बुजगतं स्मरेन्नारायणं विभुं ॥ ९५ ॥

Colophon. इति श्रीसौभरिसंहितायां शिवनारदसंवादे इन्द्रप्रस्थमाहात्म्ये अष्टादशाध्यायः सम्पूर्णः ।

वषयः । १ अध्याये, इन्द्रयागविधानं । २, भिल्लसिंहवैकुण्ठारोहणं । ३, शिवशर्मकथा । ४, ५, सुतार्थं दिलीपकृतनन्दिनीगोसेवावृत्तान्तकथनं । ६, इन्द्रप्रस्थतीर्थप्रभावेण वैश्यमुक्तिः । ७, शिवशर्मजन्मकारणं । ८, द्वारकामाहात्म्यं । ९,

विमलाख्यविप्रोपाख्यानादिः । १०, मुकुन्दद्विजोपाख्यानादिः । ११, चण्डकनापिताख्यानकथनादिः । १२, विश्रान्तितीर्थमाहात्म्यादिः । १३, मधुवनमाहात्म्यादिः । १४, बदरिकाश्रमवर्णनं । १५, हरिद्वारमहिमवर्णनं । १६, इन्द्रप्रस्थमाहात्म्यकथनं । १७, प्रयागमाहात्म्यकथनं । १८, पुनरिन्द्रप्रस्थमाहात्म्यं ।

No. 1477. दैवज्ञबान्धवः ।

Substance, country-made yellow paper, 11 × 4¼ inches. Folia, 18 Lines, 9—10—11 on a page. Extent, 492 s'lokas. Character, Nágara. Date, Sk. 1768. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Daivajña-bándhava. A manual for the calculation of auspicious days for the performance of rites and ceremonies. The MS. is incomplete, and the author's name does not appear in it.

Beginning. यस्यास्या वसनं गतिश्च वृषभः खट्वाङ्गशूलं करे
चन्द्रस्तार्क्ष्यविभूषणं वरतनौ यज्ञोपवीतं फणी ।
दुर्जयस्त्रिपुरो जितश्च मदनो दैत्यान्धको निर्जितो
गङ्गा मूर्द्धि धृता च पुण्यतटिनी तस्मै नमः शम्भवे ॥

End. (ख०)

विषयः । समयाशुद्धिः । उत्पातामृतयोगादिकथनं । पर्वदिनानि । तिथिप्रकरणं । सङ्क्रान्तिकथनं । संवत्सरगणनादिः । वर्षशाद्ध्ययनादिः ।

No. 1478. पञ्चस्वरः, वृत्तिसहितः ।

Substance, country-made yellow paper, 11 × 4¼ inches. Folia, 12. Lines, 5—8—9—10 on a page. Extent, 316 s'lokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Pañchasvara. A manual of divination with the first five vowels of the Sanskrit alphabet—partly Nomancy and partly Tephramancy. By Prajápati. Attached to the text is a commentary by Apya Díkshita.

Beginning. अरिष्टविचारणं पताकीचक्रे ।

ऊर्द्धरेखात्रयं लेख्यं तिर्य्यग्रेखात्रयं तथा ।

वेद्यास्तिर्यक् क्रमाद्देयाद् द्वाभ्यां द्वाभ्यां परस्परम् ॥ १ ॥

षड्रेखासु समालेख्याः पताकीवेधनिर्णये । अस्यार्थः ।

End. जन्मलग्नस्य पापविद्धलात् पापयामार्द्धे जन्मसर्वमरणयोगानामिदं सद्दकारीत्यत आह ।

ज्योतिर्विदः प्रपश्यन्तु ग्रहाणां सुविचारकाः ।

पञ्चस्वरादितो यद्वै सङ्कटे निधनं क्षतम् ॥

Colophon. इति श्रीप्रजापतिकृतोऽप्ययदीक्षितकृतविष्टतिसहितः पञ्चस्वराख्यो नाम ग्रन्थः समाप्तः ।

विषयः । पताकीचक्रस्य अकारादिपञ्चस्वरादीनाञ्च गणनया शुभाशुभकथनं ।

No. 1479. रमलसारः ।

Substance, country-made paper, $8\frac{1}{4} \times 5$ inches. Folia, 17. Lines, 11—12 on a page. Extent, 293 s'lokas. Character, Nágara. Date, Sm. 1873. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Rámalasára. A manual of Cloromancy or augury with a set of dice. By Srípati, son of Lakshmínṛisiñha Bhaṭṭa.

Beginning. मञ्जुलारुणविस्तीर्णकरपुष्करसंयुतं ।

शिवोद्भवन्तं भास्वन्तं कमलामोददं भजे ॥ १ ॥

यः प्रश्नशास्त्रनिष्णातो रम्लशास्त्रप्रवर्त्तकः ।

ज्योतिर्मतानुसारेण तमाचार्य्यं नतोऽस्म्यहम् ॥ २ ॥

गुणिगोविन्दरायस्य चातुवर्णशिरोमणेः ।

प्रसादात् क्रियते रम्लसारः श्रीपतिना मया ॥ ३ ॥

End. प्रश्नालयेषु चान्येषु विशेषेषूक्तिभिर्बुधं ।

तत्तच्छकलयो (?)यच(?) बुध्वान्यानपि चिन्तयेत् ॥ १९० ॥

Colophon. इति श्रीगोकुलवास्तव्यलक्ष्मीनृसिंहभट्टात्मजश्रीपतिविरचितो रमलसारः समाप्तो जातः ।

विषयः । पाशकनिक्षेपद्वारा जनकृतप्रश्नस्य शुभाशुभगणना ।

No. 1480. वैद्यरहस्यपद्धतिः ।

Substance, country-made paper, 10¾ × 3¾ inches. Folia, 47. Lines, 10—12 —13 on a page. Extent, 1,552 s'lokas. Character, Nágara. Date, Sm. 1754. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Correct.

Vaidyarahasya Paddhati. A treatise on practise of medicine. By Vidyápati, son of Vañs'ídhara. The diseases treated of are : dysentery, chronic diarrhœa, jaundice, phthisis, hiccup, asthma, influenza, thirst, fainting, epilepsy, paralysis, colic, tumours in the abdomen, stone in the bladder, abscesses on the neck, sexual diseases, leprosy, diseases of women and infants, &c., &c.

Beginning. अथ ज्वराधिकारः। आमलक्यभया कृष्णा चित्रकश्चेत्ययं गणः।
सर्वज्वरकफातङ्के भेदी दीपनपाचनः॥ इत्यामलक्यादिः।

End. विद्यापतिर्नियोगाद्धि ध्यानतिरायगौडवर्यस्य।
वैद्यरहस्यं व्यलिखत् परम्पराजातमुपकृत्यै॥ १॥
दीर्घदीर्घास्तु बहवो ग्रन्थाः सन्ति तथापि मे।
साम्प्रदायिकयोगानां सङ्ग्रहार्थमयं श्रमः॥ २॥
वसुत्र्यश्वैक १७३८ वर्षेभूद्वंशीधरतनूजनेः।
पौषशुक्लद्वितीयायां पूर्णा विद्यापतेः कृतिः॥ ३॥

Colophon. इति श्रीमद्बुधवरवंशीधरतनयविद्यापतिकृतिर्वैद्यरहस्यपद्धतिः समाप्तिमगात।

विषयः। ज्वरातीसार—ग्रहणी—कृमि—पाण्डुरोग—कास—हिक्का—श्वास—छर्दि—पिपासा—मूर्च्छा—दाहोन्मादापस्मार—वातव्याध्यूरुस्तम्भ—शूल—गुल्म—मूत्रकृच्छ्राश्मरी—प्रमेह—मेदःशोथ—गण्डमाला—श्लीपद—विद्रधि—व्रण—भगन्दर—उपदंश—कुष्ठ—विसर्प—स्नायु—फिरङ्ग—मसूरिका—क्षुद्ररोग—शिरोरोग—नेत्रकर्ण—नासौष्ठ—मुख—गलरोगादिचिकित्सा। स्त्रीबालरोगचिकित्सा च।

No. 1481. सञ्ज्ञासमुच्चय ।

Substance, country-made yellow paper, 7¼ × 2¾ inches. Folia, 21. Lines, 12 on a page. Extent, 480 s'lokas. Character, Nágara. Date, Sk. 1641. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Corrected.

Sañjñá-samuchchaya. A treatise on Nosology, Therapeutics, and Materia Medica. By S'ivadatta Mis'ra.

Beginning. दिव्याङ्गनाश्रुतिविभूषणहेमपात्रप्रोल्लासहेतुमस्ततद्रवसम्भृतं यः ।
कुम्भन्दधज्जलनिधेर्विभराविरासीद्धन्वन्तरिस्समहमन्वहमानतोऽस्मि ॥ १ ॥
चिकित्साशास्त्रसिद्धान्तजिज्ञासा वरिवर्त्ति चेत् ।
अभ्यासः क्रियतां तर्हि बुधाः सञ्ज्ञासमुच्चये ॥ २ ॥

End. सञ्ज्ञासमुच्चयममुं लघुवाग्भटादिग्रन्थप्रकाशनकरं विषमस्थलेषु ।
तातादधीतविधिवद्वरवैद्यविद्यश्चक्रे चतुर्भुजसुतः शिवदत्तमिश्रः ॥ २ ॥

Colophon. इति शिवदत्तमिश्रकृतः सञ्ज्ञासमुच्चयः सम्पूर्णः ।

विषयः । दोषधात्वादिमर्मसञ्ज्ञा । रोगनिदानं । परिमाणं । अहितकथनं । द्रवद्रव्यकथनं । द्रव्यगुणः । विशेषणलङ्घनादिकथनं । त्रिफलादिनाम । आहारविकृत्यादिकथनं । रसकल्कादिभेदाः । दाहक्लेदादिविवरणं ।

No. 1482. गौड़पादभाष्यटीका, वा माण्डूक्योपनिषद्भाष्यटीका भाष्यसहिता उपनिषत्सहिता च ।

Substance, country-made paper, 14 × 7 inches. Folia, 136. Lines, 10—12—13—15—18 on a page. Extent, 5,865 s'lokas. Character, Nágara. Date, Sm. 1912. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Gauḍapáda-bháshya-ṭíká. A gloss on a commentary on that portion of S'aṅkara's metrical digest of the Vedánta doctrine which bears on the Máṇḍukya Upanishad. By A'nandajñána, disciple of Suddhánanda.

Beginning. (टी॰) । परिपूर्णपरिज्ञानानन्दत्वप्रिमते सते ।
विष्णवे जिष्णवे तस्मै कृष्णनामभृते नमः ॥ १ ॥

शुद्धानन्दपदाम्भोजद्वन्द्वमद्वन्द्वजास्पदं ।
नमस्कुर्व्वे पुरस्कर्तुं तत्त्वज्ञानमहोदयं ॥ २ ॥
गौड़पादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ।
तदर्थतोऽतिगम्भीरं व्याकरिष्ये स्वशक्तितः ॥ ३ ॥
पूर्व्वं यद्यपि विद्वांसो व्याख्यानमिह चक्रिरे ।
तथापि मन्दबुद्धीनामुपकाराय यत्यते ॥ ४ ॥

(भा०) । प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्यलोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्व्वान् विशेषान् स्वपिति मधुरभुङ्मायया भोजयन्नो
मायासङ्ख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥

(मू०) । सर्व्वं ॐ ह्येतद्ब्रह्म ॥ अयमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥

End. (मू०) । दुर्द्दर्शमतिगम्भीरमजं साम्यं विशारदं ।
बुद्ध्वा पदमनानात्वं नमस्कुर्म्मो यथा बलं ॥ १०० ॥

Colophon. इति श्रीगौड़पादीयचतुर्थः ।

(भा०) । इति श्रीमच्छङ्करभगवतः कृतावागमशास्त्रविवरणे अलातशान्त्याख्यं चतुर्थप्रकरणं समाप्तं ॥

(टी०) । गौड़पादीयभाष्यस्य व्याख्या व्याख्यातृसम्मता ।
सम्मिता निर्म्मिता सेयमर्पिता पुरुषोत्तमे ॥

इति परमहंसपरिव्राजकाचार्य्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञान-कृतायां गौड़पादभाष्यटीकायां चतुर्थप्रकरणं समाप्तम् ॥

विषयः । माण्डूक्योपनिषद्भाष्यव्याख्यानं ।

No. 1483. सिद्धान्तविन्दुः, वा दशश्लोकीटीका, मूलसहिता ।

Substance country-made paper, $11\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 12. Lines, 6—16—17 on a page. Extent, 765 s'lokas. Character, Nágara. Date, Sm. 1741. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Siddhánta-vindu alias *Das'as'loki-ṭíká.* A commentary on the *Das'as'loki* or ten stanzas by S'aṅkara on the essence of the Vedánta doctrine. By Madhusúdana Sarasvatí, disciple of Vis'ves'vara Sarasvatí.

Beginning. (टी॰)। श्रीशङ्कराचार्य्यनवावतारं विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसानां बोधाय कुर्व्वे किमपि प्रयत्नं ॥
(मू॰)। न भूमिर्न्न तोयं न तेजो न वायुर्न्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात् सुषुप्त्यैकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहं ॥
End. (मू॰)। न चैकं तदन्यद्द्वितीयं कुतः स्यात् न चाकेवलत्वं न चाकेवलत्वं ।
न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्व्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥
(टी॰)। बहुयाचनया मयायमल्पो बलभद्रस्य कृते कृतो निबन्धः ।
यददुष्टमिहास्ति यच्च दुष्टं तदुदाराः सुधियो विवेचयन्तु ॥
Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीविश्वेश्वरसरस्वतीभगवत्पादशिष्यश्रीमधुसूदनसरस्वतीविरचितः सिद्धान्तविन्दुनामग्रन्थः समाप्तः ॥
विषयः। दशश्लोकीव्याख्यानं। दशश्लोक्यान्तु आत्मतत्त्वविवेचनं ॥

No. 1484. ब्रह्मामृतवर्षिणी, अर्थात् ब्रह्मसूत्रवृत्तिः ।

Substance, country-made paper, 14 × 7 inches. Folia, 160. Lines, 14—15—16 on a page. Extent, 3,080 s'lokes. Character, Nágara. Date, Sm. 1912. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Brahmámṛita-varshiṇí. An ancient exposition of the Vedánta aphorisms of Vyása. By Rámánanda Sarasvatí, disciple of Mukunda Govinda. The author takes exception to the opinion of S'aṅkara Ácharya in several places, and establishes separate theories of his own. The MS. is apparently complete, but it is not so large as a codex noticed by Dr. Hall (*Contributions*, p. 93) which is said to extend to 8000 s'lokas.

Beginning. श्रीरामचरणद्वन्द्वमद्वन्द्वानन्दसाधनं ।
नमामि यद्रजोयोगात् पाषाणोऽपि सुखं गतः ॥ १ ॥
सङ्गतिः संशयः पूर्व्वपरपक्षौ तयोः फलं ।
भाष्यस्थाः श्रुतयः सर्व्वाः सूत्राण्यनवशेषतः ॥ २ ॥
व्याख्यायन्ते स्फुटन्यायैर्मतभेदोऽपि कुत्रचित् ।
उच्यते सुखबोधार्थं श्रीरामो वीक्षतामिदं ॥ ३ ॥

End.

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमन्मुकुन्दगोविन्दश्रीचरणशिष्यश्रीरामानन्दसरस्वतीकृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थाध्यायस्य चतुर्थः पादः समाप्तोऽयं ग्रन्थः ।

विषयः । अथातो ब्रह्मजिज्ञासेत्यादिवेदान्तसूत्रव्याख्यानं ।

No. 1485. वेदान्तसञ्ज्ञानिरूपणं ।

Substance, country-made paper, 14 × 7 inches. Folia, 9. Lines, 11—17 on a page. Extent, 405 s'lokes. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vedánta-sañjñá-nirúpaṇa. Interpretations of one hundred and forty-three technical terms in common use in Vedántic works. The name of the author has not been ascertained. Dr. Hall describes (*Contributions*, p. 127) a work on Vedántic terminology under the title of *Vedánta-sañjñá-prakṛiyá*, but whether it is the same with the one under notice or different cannot be made out.

Beginning. श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः ।
वेदान्तसञ्ज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥ १ ॥

End. ब्रह्माहमस्मीति प्रत्यगभिन्नब्रह्मज्ञानान्मुक्तिरिति सिद्धं ।

Colophon. इति सञ्ज्ञाप्रकरणं समाप्तम् ॥

विषयः । त्रिचत्वारिंशदधिकशतसङ्ख्यकवेदान्तिकव्यवह्रियमाणसञ्ज्ञाकथनं सङ्क्षेपतस्तत्प्रत्येकतात्पर्य्यकथनञ्च ॥

No. 1486. जीवन्मुक्तिविवेकः ।

Substance, country-made paper, 14 × 7 inches. Folia, 52. Lines, 12—16 on a page. Extent, 2,126 s'lokas. Character, Nágara. Date, Sm. 1913. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Jívanmukti viveka alias *Jívanmukti-prakaraṇa.* Emancipation during terrestrial existence. By Vidyáraṇya Svámí *alias* Mádhava Achárya. Hall's *Contributions*, pp. 133—208. The means of emancipation recommended being Yoga meditation, some take the work to be a Yoga treatise, but its leaning is Vedántic.

Beginning. यस्य निश्वसितं वेदा मायया योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥

End. जीवन्मुक्तिप्रमाणप्रकरणं प्रथमं । वासनाक्षयः द्वितीयः । मनोनाशस्तृतीयः । स्वरूपसाधननिरूपणं चतुर्थं । विद्वत्सन्यासनिरूपणं पञ्चमं ।

Colophon. इति श्रीविद्यारण्यस्वामिकृतजीवन्मुक्तिविवेकः । इति श्रीजीवन्मुक्तिः सम्पूर्णा ।

विषयः । जीवन्मुक्तिविचारः ।

No. 1487. बह्वृचब्राह्मणोपनिषत्, वा ऐतरेयोपनिषद् भाष्यसहिता विवरणसहिता च ।

Substance, country-made paper, 13¾ × 7 inches, Folia 55. Lines, 10—11 —12—13 on a page. Extent, 2,185 sl'okas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aitareyopanishad-bháshya-ṭíká. A gloss on S'aṅkara's commentary on the Aitareya Upanishad of the Rig Veda. By Abhinava Náráyaṇendra Sarasvatí, disciple of Kaivalyendra Sarasvatí. The codex comprises also the text and the commentary.

Beginning. (वि॰) । आत्मा वा इदमित्यादिना केवलात्मविद्यारम्भस्य अवसरं वक्तुं कृतिं कीर्त्तयति परिसमाप्तमिति ।

(भा॰) । परिसमाप्तं कर्म्म सहा:(?) परब्रह्मविषयविज्ञानेनैव सैषा कर्म्मणो ज्ञानसहितस्य परा गतिरुक्थविज्ञानद्वारेणोपसंहृता ।

(मू॰) । आत्मा वा इदमेक एवाग्र आसीत् ।

End. (मू॰) । अमुष्मिन् वर्गे लोके सर्व्वान् कामानाप्त्वा मृतः समभवत् समभवत् ।

Colophon. (भा॰) । इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दभगवत्पादपूज्यशिष्य-श्रीशङ्कराचार्य्यभगवत्कृतौ बह्वृचब्राह्मणोपनिषद्भाष्यं समाप्तम् ॥

(वि॰) । इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्कैवल्येन्द्रसरस्वतीपूज्यपादशिष्यश्रीमद-भिनवनारायणेन्द्रसरस्वतीविरचितायां ऐतरेयोपनिषद्भाष्यटीकायां षष्ठोऽध्यायः समाप्तः ॥

विषयः । बह्वृचब्राह्मणोपनिषद्भाष्यव्याख्यानं ।

No. 1488. शिवगीता, मत्स्यपुराणोत्तरखण्डीया ।

Substance country-made paper, 14 × 7¼ inches. Folia, 17. Lines, 16—17 on a page. Extent, 885 s'lokas. Character, Nágara. Date, Sm. 1913. Place of deposit, Calcutta, Government of India. Appearance old. Verse. Incorrect.

S'iva Gítá. A work, in imitation of the well-known Bhagavad Gítá, in which S'iva imparts instruction to Rághava on emancipation, the stand-point being the Yoga, but so modified as to form a different system of philosophy. The work professes to be an episode of the Matsya Puráṇa. It is distinct from the work noticed under No. 454.

Beginning. सूत उवाच । अथातः सम्प्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदं ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजं ॥

End. इत्युक्ता प्रययुः सर्व्वे सायं सन्ध्यामुपासितुं ।
वसन्तः सूतपुत्रं ते सन्तुष्टा गोमतीतटं ॥

Colophon. इति श्रीमत्स्यमहापुराणोत्तरखण्डे श्रीमच्छिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीशिवराघवसंवादे अधिकारिनिरूपणं नाम षोड़शोऽध्यायः ॥

विषयः । अत्र षोड़शाध्यायाः सन्ति । तत्र १ मे, भक्तियोगकथनं । २ ये, वैराग्ययोगकथनं । ३ ये, पाशुपतविधिकथनं । ४ र्थे, शिवप्रादुर्भावकथनं । ५ मे, पाशुपताद्यस्त्रलाभकथनं । ६ ष्ठे, शिवविभूतियोगकथनं । ७ मे, पञ्चभूतानामुत्पत्तिस्थितिलयनिरूपणं । ८ मे, देहस्य पाञ्चभौतिकत्वकथनं । ९ मे, देहस्वरूपनिरूपणं । १० मे, जीवस्वरूपनिरूपणं । ११ शे, उपासनामाहात्म्यकथनं । १२ शे, उपासनाविधिकथनं । १३ शे, शिवमोक्षयोगकथनं । १४ शे, पञ्चकोशनिरूपणं । १५ शे, भक्तियोगकथनं । १६ शे, अधिकारिनिरूपणं ॥

No. 1489. हरितत्त्वमुक्तावली, वा हरिस्तुतिव्याख्या मूलसहिता ।

Substance, country-made paper, 14 × 7 inches. Folia, 32. Lines, 16 on a page. Extent, 1,302 s'lokas. Character, Nágara. Date, Sm. 1913. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Haritattva-muktávali. A commentary on a hymn by S'aṅkara in praise of the deity of the Vedántists. By Svayamprakás'a Yati, disciple of Kaivalyánanda Yogindra. Hall's *Contributions*, p. 136.

Beginning. (टी०)। नित्यं निजानन्दसद्द्वितीयं शुद्धं विभुं सत्यमतिं स्वतन्त्रं।
स्वच्छं निरस्ताखिलरूपमीशं प्रत्यक्षमात्मानमहं भजामि॥
शङ्करं शङ्कराचार्य्यं केशवं वादरायणं।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥
(मू०)। स्तोष्ये भक्त्या विष्णुमनादिं जगदिदं यस्मिन्नेतत् संसृतिचक्रं भ्रमतीत्थं।
यस्मिन् दृष्टे नश्यति तत् संसृतिचक्रं तं मेऽसारध्वान्तविनाशं हरिमीडे॥

End. (मू०)। इत्थं स्तोत्रं भक्तजनेशं भवभीतिध्वान्तार्काभं भगवत्पादीयमिदं यः।
विष्णोः स्तोकं पठति शृणोति व्रजति ज्ञानं ज्ञेयं स्वात्मनि चाप्नोति मनुष्यः॥

Colophon. (टी०)। इति श्रीमत्परमहंसपरिव्राजकाचार्य्यकैवल्यानन्दयोगीन्द्रपादकमल-भृङ्गायमानस्वयम्प्रकाशाख्ययतिविरचिता शङ्करभगवत्पादकृतहरिस्तुतिव्याख्या-तत्त्वमुक्तावली सम्पूर्णा॥

विषयः। हरिस्तुतिव्याख्यानं।

No. 1490. शब्दार्णवाभिधानं।

Substance, 1st Volume, English paper, the rest on country-made paper, 11 × 8 inches. Folia, ? Lines, on a page. Extent? s'lokas? Character, Bengali. Date, ? Place of deposit, Calcutta, Asiatic Society of Bengal. Appearance, old, all except 1st Volume, very much decayed. Prose. Correct.

S'abdárṇavábhidhána. A dictionary of the Sanskrit language. The work was compiled by the late Bábu Kás'ínátha Basák, who died about forty years ago. He was a distinguished Sanskrit and Persian scholar, and for his time a good English writer, having been in the habit of preparing briefs for barristers of the late Supreme Court of Calcutta. He was much respected by his countrymen for his learning, wealth, and social qualities. The dictionary is remarkable as the first of its kind prepared by a native without European assistance or superintendence. It is alphabetically arranged, and is fuller in vocables than the S'abdakalpadruma of the late Sir Rájá Rádhákánta Deva, and gives the etymology of every word. In this last respect it is superior to both the S'abdakalpadruma and the Dictionary compiled

under the superintendence of Dr. Wilson. The work was completed in eight volumes, of which the I, III, and V are lost. The second volume is devoted to the letter क, the IV to ट to ध, the VI to फ to र, the VII to ल to ष, and the VIII to स to ह. The codices seem to have been sadly neglected, and have suffered much from damp and the ravages of rats. The work was sent to press by Bábu Jayagopál Bysák, the son of the author, and sixty pages of it, comprising about one half of the vocables beginning with letter अ, were printed, when the death of the editor put a stop to the undertaking.

Beginning. अ अव्ययं अभावे अल्पे निषेधे क्षपायाञ्च अः पुं विष्णौ ॥
अशब्दः स्याद्भावे च स्वल्पार्थप्रतिषेधयोः ।
अनुकम्पायाञ्च तथा वासुदेवे त्वनव्ययमिति मेदिनी ॥

End. क्लादिनी स्त्री सल्लक्यां ॥ ह्रीलिलज्जे इत्यस्मात् औनादिककुप्रत्यये रेफस्य वा लत्वे क्लीकुः । ह्रीकुः क्लीकुः सलज्जे स्यात् जतुकचपुणोरपीति उणादिकोषः क्लीकु वाच्यलिङ्गं लज्जिते पुं जतुनि चपुणि च ।

Colophon. समाप्तिसूचकं वाक्यं नास्ति । मध्यं खण्डितञ्च ।

विषयः । अकारादिक्रमेण शब्दानां यथासम्भवमर्थव्युत्पत्तिप्रकृतिप्रत्ययविभागकथनं, शब्दार्थविषये कोषादिप्रमाणप्रदर्शनञ्च अभिधानस्यास्य पञ्चखण्डाः सन्ति मध्ये कतिपयखण्डा न सन्ति ॥

No. 1491. संहिताविवृतिः वा वृहत्संहिताविवृतिः, मूलसहिता ।

Substance, country-made paper, 14¾ × 13 inches. Folia, 514. Lines, 13 on a page. Extent, 22,508 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Sañhitá-vivriti. A commentary on the Brihat Sañhitá of Varáha Mihira. By Bhaṭṭotpala. The text of Varáha Mihira has already been published in the Bibliotheca Indica, and a translation of it, by Dr. Kern, in the Journal of the Royal Asiatic Society of Great Britain. But the commentary is a voluminous one and rare. An imperfect copy of it has been noticed under No. 590 (ante II. p. 42), but it has been so described there as if it were an independent work. Besides the copy now under notice, a complete codex has been obtained for the Library of the Asiatic Society of Bengal.

Beginning. (टी०)। ॐ ब्रह्माजशङ्करवीन्दुकुजज्ञजीवशुक्राकॅपन्नगणनाथगुरून् प्रणम्य।
यः सङ्क्षेपाऽकॅवरलाभविह्वद्वृद्धेरावर्त्तकस्य तमहं विवृणोमि कृत्स्नम्॥
यच्छास्त्रं विपुलं चकार सविता स्वर्म्भेखिभिर्ज्योतिषां
तस्योच्छित्तिभयात्पुनः कलियुगे संश्रित्य यो भूतलम्।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधात्
इत्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते॥
वराहमिहिरोदधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरशास्त्ररत्नोज्ज्वले।
भ्रमन्ति परितो यतो लघु + येऽर्थलब्धाः(?) ततः
करोमि विवृतिप्लवं निजधियाहमच्चोत्पलः॥
(मू०)। जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः।
द्रुतकनकसदृशो दशशतमयूखमालार्चितः सविता॥

End. गुरुचरणप्रणिपातकृतप्रसादमतिना मदीयं शास्त्रं ज्योतिषग्रन्थमुपसङ्गृहीतं सङ्क्षिप्तीकृतं तस्मात्तेभ्यः पूर्वप्रणेतृभ्यः पूर्वाचार्येभ्यो नमोऽस्तु नमस्कारो भवतु।

Colophon. इति भट्टोत्पलविरचितायां संहिताविवृतौ उपसंहाराध्यायः शतमेकम्॥

विषयः। वराहमिहिरकृतबृहत्संहिताव्याख्या।

No. 1492. अष्टविकृति विवृतिः।

Substance, country-made paper, 11½ × 4¾ inches Folia, 30. Lines, 8—10 on a page. Extent, 641 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect. Complete.

Ashṭa-vikriti-vivriti, with a commentary. A set of memorial verses on the principles of reading in eight different arbitrary ways the Sañhita of the Rig Veda. By Madhasúdana, a muni or saint, son of Krishṇa-daipáyana, which name would at first sight suggest Vyása, but it is not so. The commentary is anonymous. The colophon is incorrect and quite unreliable. From the introductory portion of the commentary it appears that Madhusúdana wrote the treatise in verse, borrowing his materials from Prátisákhya treatises by Vyáḍí and Hayagríva. The works of the latter have not yet been met with, but the name of Vyáḍí or Vyálí is well known as that of an old grammarian

of high authority, who is described to have written a work, called *Sangraha*, in a hundred thousand verses of continuous anushṭup. From frequent references in latter works it would seem that he wrote a standard lexicon which Amara largely consulted. A Prátis'ákhya is also attributed to him, but as yet none of these works has been met with. Goldstücker, after reviewing the remarks of Max Müller, Weber, Bohtlink and others, comes to the conclusion that Vyáḍí "was a near relative of Páṇini, and Páṇini must have preceded him by at least two generations." *Panini*, p. 210.

The real and original object of these artificial forms of writing the text of the Rik Sañhitá, was the prevention of corruptions, interpolations and accidental omissions of the words of the text, but the love of mystery soon attached to it a religious meaning. The practice of reading or keeping by heart these arbitrary forms is still held highly meritorious, and there are many pandits in the Marhatta, Karṇáta and Draviḍa countries who go through a part of the text every day before breakfast as a pious act. The practice is very similar to that of mediæval monks of Europe who used to read the Bible backward. Five such artificial forms have already been noticed under No. 1234, ante III. p. 199. The forms described in the codex before us are respectively called (1). *Jaṭá*, or entangled. (2). *Málá*, or garland. (3). *Daṇḍa*, or staff-like. (4). *Rekhá*, or linear. (5). *Ratha*, or car-like. (6). *Dhvaja*, or flag-like. (7). *Sikhá*, or crest-like. (8). *Ghana*, or densely clotted. The Jaṭá, according to the author, should comprise five members, thus: 1st *Agnimíle;* 2nd *Íle;* 3rd *Ílegnim;* 4th *Agnimagnim;* and 5th *Agnimíle*. The 1st is called *anukrama* or the usual order; the 2nd *utkrama* or the eliding order; the 3rd *vryutkrama* or reversed order; the 4th *abhikrama* or repeating order; and 5th *sankrama* or rejoined order. The Jaṭá and the Ghana correspond exactly and in every respect with the principles laid down in the Jaṭápaṭala, (ante III. p. 200). The others are new forms and made up by different fanciful arrangements of the five-fold order. The rules, however, exceedingly brief and obscure, and the examples given are so manifestly incorrect that they do not help one to elucidate them.

Beginning. (टी०)। हरिः ॐ। अथाष्टौ विवरणानि लिख्यन्ते।

मधुसूदनमुनीश्वरचरिताष्टौ विकृतिसंवरणस्य।

तन्पूच(?) पुरोगमाचरं प्रकाश्यमारभते ॥ १ ॥

अथ मधुसूदनमहामुनिः स्वचिकीर्षितस्य निष्प्रत्यूहपरिसमापनफलकमिष्टदेवताध्यानरूपं मङ्गलमाचरन् स्वगुरुस्वनामकथनपूर्वकं चिकीर्षितं प्रतिजानीते ।

(मू०)। श्रीश्रीमन्तौ हरिचरणावात्मनोऽन्यस्य चेत-
स्यृग्वेदाष्टौविकृतिविहितिं वैदिकस्तोकनीयां ।
व्याख्याचार्यानुमति मधुसंसूदनाख्यो गुरुश्री-
कृष्णद्वैपायनतनुभवो मस्करी चर्करीति ॥ १ ॥

End. ऋत्विजं देवं यज्ञस्य । यज्ञस्य देवमृत्विजं । देवमृत्विजं देवं देवमृत्विजं । ऋत्विजं देवं देवमृत्विजं । ऋत्विजमित्यृत्विजं । होतारं रत्नधातमं । रत्नधातमं होतारं । होतारं रत्नधातमं । रत्नधातममिति रत्नधातमम् । इति घनः । जटाद्यष्टौ विकृतयः सम्पूर्णाः । एवं प्रकारेण चतुःषष्टिअध्यायो बुधैर्ज्ञेयः । इति जटाद्यष्टौविकृतीनां स्वरूपकथनं मया विरचितं यत् ।
तेन जिष्णुर्विष्णुरादिपुरुषो वेदपुरुषादिसर्वैः प्रीतो भवतात् ॥ ५६० ॥

Colophon. इति श्रीहरिचरणौ पादोपदिष्टायां श्रीकृष्णद्वैपायनतनुभवायां श्रीमधुसूदनमुनिविरचितायां श्रीव्याडीहयग्रीवीप्रातिशाख्यकारिकायां(?)श्रीमधुसूदनीशिक्षाभाष्यं नाम जटाद्यष्टविकृतिविवरणं सम्पूर्णं ।

विषयः। ऋग्वेदीयजटाद्यष्टविकृतीनां प्रत्येकलक्षणोदाहरणानि ।

No. 1493. सिद्धान्तचन्द्रिका ।

Substance, country-made yellow paper, 18 × 3¾ inches. Folia, 91. Lines, 6—7—8 on a page. Extent, 3,060 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Siddhánta-chandriká. A metrical treatise on the creation according to the Vedánta philosophy, and on the nature and attributes of Brahma. By S'ivachandra Siddhánta, disciple of Rádhákrishṇa Vedántavágís'a and Rámakrishṇa Mis'ra. A work of this name and character has been noticed by Mr. Hall, but it is said to be the work of Ráma Sunyamin, disciple of Rámabhadra Yati (*Contributions*, p. 110). The MS. examined by him was, however, defective, and the author's name seems to be incorrect. The title of Sunyamin is suspicious, and I have never heard it used.

Beginning. शङ्करः शङ्कराचार्य्यः केशवो बादरायणः ।
प्रकाशतां मम स्वान्ते प्रभया निर्न्निमित्तया ॥
श्रीराधाकृष्णवेदान्तवागीशेन च शिचितः ।
श्रीरामकृष्णमिश्रेण वृहस्पतिसमेन च ॥
विप्रः श्रीशिवचन्द्राख्यः तौ नत्वा तनुते स्मरन् ।
गुरुकल्पितसिद्धान्तनामा सिद्धान्तचन्द्रिकां ॥

End. रामकिशोररामस्त्वं भासस्व मयि निर्गुणे ।
मेघं भित्त्वा यथा भातः सूर्य्याचन्द्रमसौ तथा ॥

Colophon. इति श्रीशिवचन्द्रसिद्धान्तविरचिता सिद्धान्तचन्द्रिका समाप्ता ॥

विषयः । वेदान्तमतसिद्धजगत्प्रपञ्चस्य विवरणं ब्रह्मैक्यप्रतिपादनञ्च ॥

No. 1494. सनत्सुजातीयविवरणं, मूलसहितं ।

Substance, country-made paper, 12½ × 5 inches. Folia, 26. Lines, 15—17 on a page. Extent, 1,348 s'lokas. Character, Bengali. Date, Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Sanatsujátíya-vivarana. A commentary on an episode in the Udyoga Parva of the Mahábhárata on death and futurity. A sage of the name of Sanatasujáta, according to the legend, instructs Dhritaráshṭra on the subjects. By a disciple of S'añkara Áchárya, who withholds his name from the work.

Beginning. (टी०) । नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥
सनत्सुजातविवरणं सङ्क्षेपतो ब्रह्मजिज्ञासूनां सुखावबोधायारभ्यते ।
(मू०) । वैशम्पायन उवाच ।
ततो राजा धृतराष्ट्रो मनीषी सम्पूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते(?) महात्मा पप्रच्छ बुद्धिं परमां बुभूषन् ॥

End. (टी०) । तत्पतैकं वाचकं(?) सदामृतं निरञ्जनं ।
चित्तवृत्तिदृकसुखं तदस्म्यहं तदस्म्यहं ॥

Colophon. इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीमच्छङ्करभगवत्पूज्यपादशिष्यस्य कृतौ सनत्सुजातीयविवरणे चतुर्थोऽध्यायः समाप्तः ।

(मू॰)। अणोरणीयान् सुमनाः सर्व्वभूतेष्ववस्थितः।
पितरः सर्व्वभूतानां पुष्करे निहितं विदुः।
इत्युद्योगपर्व्वणि सनत्सुजातीये चतुर्थोऽध्यायः।
विषयः। भारतान्तर्गतोद्योगपर्व्वीयसनत्सुजातीयोपाख्यानस्य व्याख्यानं।

No. 1495. पदार्थखण्डनटिप्पनी।

Substance, country-made paper, $13\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 27. Lines, 9—10 on a page. Extent, 900 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Padártha-khaṇḍana Ṭippaní. A complete copy of the work noticed under No. 365, ante, vol. I, p. 206.

Beginning. तातस्य तर्कसरसीरुहकाननेषु चूड़ामनेर्दिनमनेश्चरणौ प्रणम्य।
श्रीरामभद्रसुकृती कृतिनां हिताय लीलावशात् किमपि कौतुकमातनोति॥

End. श्रीसार्व्वभौमकविकल्पितमर्थतत्त्वं तत्त्वेन तर्हि सुधियः परिशीलयन्तु॥

Colophon. इति श्रीरामभद्रसार्व्वभौमभट्टाचार्य्यविरचितपदार्थखण्डनटिप्पनी समाप्ता॥

विषयः। पदार्थखण्डनस्य व्याख्यानं।

No. 1496. शास्त्रसिद्धान्तलेशसङ्ग्रहः।

Substance, country-made paper, $16\frac{1}{2} \times 3$ inches. Folia, 73. Lines, 4—5—6—7—8 on a page. Extent, 2,203 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ástra-siddhánta-les'a-sañgraha alias *Siddhánta-les'a.* "An examination, in four sections, of the various schools of the Vedánta system, with strictures on the other Hindu schemes of philosophy. By Apya Díkshita, son of Rañgarája Díkshita." Hall's *Contributions*, p. 153.

Beginning. अधिगतभिदा पूर्व्वाचार्य्यानुपेत्य सहस्रधा
सरिदिव महीभेदान् सम्प्राप्य सौरिपदोद्गता।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरिणी स्वक्तिर्ब्रह्माद्वयैकपरायणा॥

End. निरतिशयानन्दस्फुरणसम्बद्धनिःसम्बिवन्धपरमेश्वरभावापत्तिराद्दन्त्येति सिद्धं ।

Colophon. इति शास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थः परिच्छेदः ॥

विषयः । अत्र चत्वारः परिच्छेदाः । तत्र १मे, आत्मा वाऽरे द्रष्टव्यः श्रोतव्य इतिश्रुति-सिद्धश्रवणविधेः अपूर्व्वविधिनियमविधिपरिसङ्ख्याविधित्रितयान्यतमरूपतानिर-सनं जीवेश्वरयोः स्वरूपनिरूपणञ्च । २ये, जगत्प्रपञ्चस्य मिथ्यात्वसंस्थापनेन ब्रह्माद्वैतप्रतिपादनं । ३ये, विद्याया एव ब्रह्मप्राप्तेः साक्षाद्धेतुत्वकथनं । ४र्थे, अविद्यालेशस्वरूपनिरूपणं, अविद्यानिवृत्तिस्वरूपनिरूपणादिकञ्च ॥

No. 1497. सिद्धान्तचन्द्रिका टीका ।

Substance, country-made yellow paper, 18 × 4 and 16 × 5 inches. Folia 175. Lines, 10—11—12—14 on a page. Extent, 12,600 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India., Appearance, old. Prose. Incorrect.

Siddhánta-chandriká ṭíká. A commentary on Sivachandra Siddhánta's treatise on the Vedánta doctrine (ante No. 1443). Anonymous.

Beginning. सिद्धान्तचन्द्रिकां सूर्य्यरश्मितुल्यां विधित्सुना ।
टीका विधीयते वादितापज्ञानाय केनचित् ॥

End. दृष्टान्तमाह मेघमिति । यथाकाशे स्थितं मेघं भित्त्वा सूर्य्याचन्द्रमसौ यथा भातः तथा मयि स्थितं गुणं भित्त्वा भासस्व ग्रन्थकर्तृपितृनाम रामकिशोर इति ।
टीका समाप्ता ॥

विषयः । शिवचन्द्रसिद्धान्तकृतसिद्धान्तचन्द्रिकाख्यवेदान्तशास्त्रस्य व्याख्यानं ।

No. 1498. पूर्व्वमीमांसार्थसङ्ग्रहः ।

Substance, country-made paper, $12\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 18. Lines, 5—8 on a page. Extent, 414 s'lokas. Character, Bengali. Date, Sm. 1863. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Purva-mímánsá-sangraha. An epitome of the Mímánsá doctrine of Jaimini. By Laugákshí Bháskara. Hall's *Contributions*, p. 186.

Beginning. वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः ।
कुरुते जैमिनिनये प्रवेशायार्थसङ्ग्रहं ॥

End. बालानां सुखबोधाय भास्करेण सुमेधसा ।
रचितोऽयं समासेन जैमिनीयार्थसङ्ग्रहः ॥

Colophon. इति श्रीलौगाक्षिभास्करविरचितं पूर्वमीमांसार्थसङ्ग्रहनामकं प्रकरणं समाप्तम् ।

विषयः । पूर्वमीमांसासूत्रजैमिनिसूत्रव्याख्यानं ।

No. 1499. प्रमाणपारायणं ।

Substance, country-made paper, 14 × 4½ inches. Folia, 54. Lines, 4—10—11 on a page. Extent, 2,252 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Pramáṇa-páráyáṇa. The fifth section of a work in defence of Prabhákara's developement of the Mímáñs'á doctrine. By Sálikanátha Mis'ra Mahá Mahopádhyáya. The entire work is named by the author *Prakraṇa-panchiká*, but it is commonly known under the title of *Sáliká.* Three of the other four sections are respectively called, *Nyáya-víthí, Nyáya-suddhi, Nirmalánjana.* I cannot ascertain the name of the fourth. Hall's *Contributions*, p. 195.

Beginning. स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्या मीमांसारम्भसिद्धये ॥
अत्र केचिदाचक्षते न मीमांसाशास्त्रमारम्भणीयमिति ।

End. सङ्ख्यानाच्च परस्परं पूर्वापरभावः । प्रत्यक्षसिद्ध एवेति न प्रमाणान्तरं व्याप्रियत इति । तस्माद्यथोदितलक्षणविषयफलानि पञ्चैव प्रमाणानीति सिद्धम् ।

Colophon. इति श्रीमहामहोपाध्यायश्रीशालिकनाथकृतौ प्रमाणपारायणे षष्ठः परिच्छेदः ।
समाप्तश्चेदं प्रमाणपारायणं नाम पञ्चमं प्रकरणम् ॥

विषयः । १ परिच्छेदे, मीमांसामतसमर्थनं । २, वेदविसंवादशङ्कानिरासः । ३, जातिनिर्णयः । ४, विज्ञाननिर्णयः । ५, प्रमाणलक्षणकथनं । ६, प्रत्यक्षादिप्रमाणसाधनं ।

No. 1500. लघुचन्द्रिका ।

Substance, country-made paper, 14 × 5½ inches. Folia, 42. Lines, 10 on a page. Extent, 1,422 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Laghu-chandriká alias *Advaita-chandriká.* A commentary on Madhusúdana Sarasvati's refutation of the Nyáya doctrine. By Brahmánanda Sarasvati, disciple of Náráyaṇa Tírtha. The MS. is incomplete. Hall's *Contributions*, p. 157.

Beginning. नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसोदामकणाकामुकदेहिने ॥
श्रीनारायणतीर्थानां गुरूणां चरणस्मृतिः ।
भूयान्मे साधिकेष्टानामनिष्टानाञ्च बाधिका ॥
अद्वैतसिद्धिव्याख्यानं ब्रह्मानन्देन भिक्षुणा ।
सङ्क्षिप्तचन्द्रिकार्थेन क्रियते लघुचन्द्रिका ॥
विष्णुं व्यापकं जीवस्वरूपं मोक्षं प्राप्त इव स्वयं विजयते ।

End. (ख०) ।

विषयः । अद्वैतसिद्धिव्याख्यानं ।

No. 1501. अध्यात्मरामायणं ।

Substance, country-made yellow paper, 15¾ × 3 inches. Folia, 231. Lines, 6—7 on a page. Extent, 5,154 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Adhyátma-Rámáyaṇa. A version of the legend of Ráma differing in many respects from that given in the Rámayáṇa of Válmíki. The work, an episode of the Brahmándá Purána, professes to reproduce the story as narrated to an assembly of sages at Naimisaranya, by Súta, who had heard it from Vyása, who had obtained it from Náráda, who on his part had obtained it on a visit to Brahmá. The claims of the work to literary merit are of the slenderest, but it abounds in philosophical dissertations. The work has lately been published in Calcutta.

Beginning. सूत उवाच । कदाचिन्नारदो योगी परानुग्रहवाञ्छया ।
पर्य्यटन् सकलान् लोकान् सत्यलोकमुपागतम् ॥
तत्र दृष्ट्वा मूर्त्तिमद्भिश्छन्दोभिः परिवेष्टितं ।
बालार्कप्रभया सम्यग्भासयन्तं सभागृहं ॥
मार्कण्डेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ।
सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितं ॥
चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं ।

End. अध्यात्मरामं पठतश्च नित्यं श्रोतुश्च भक्त्या लिखितुश्च राम ।
अतिप्रसन्नश्च सदा समीपे सीतासमेतः श्रियमातनोति ॥
रामायणं यन्मनोहरमादिकाव्यं ब्रह्मादिभिः सुरवरैरपि संस्तुतञ्च ।
श्रद्धान्वितः पठति यः शृणुयाच्च नित्यं विष्णोः प्रयाति सदनं परिशुद्धदेहः ॥

Colophon. इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकाण्ड नवमोऽध्यायः ॥
अध्यात्मोत्तरकाण्डे ग्रन्थसङ्ख्या या परिच्छिन्ना ।
ऋतुशतसङ्ख्याः श्लोकाः पुराणसङ्ख्या च पुरा हरेणोक्ता ॥
पार्वत्यै परमेश्वरेण गदिते ह्यध्यात्मरामायणे
काण्डैः सप्तभिरन्वितेतिशुभदे सर्गाश्चतुःषष्टिकाः ।
श्लोकानान्तु शतद्वयेन सहितान्युक्तानि चत्वारिंश-
त्सहाण्येव समासतः श्रुतशतेषूक्तानि तत्त्वार्थतः ।
इत्युत्तरकाण्डः समाप्तः । समाप्तश्चायं ग्रन्थः ।

विषयः । बालकाण्डस्य १ अध्याये, रामायणमाहात्म्यकथनादिः । २, रामहृदयस्तवः । ३, ब्रह्मणो विष्णुनिकटे प्रार्थनादिः । ४, रामादीनां जन्मविवरणादिः । ५, रामानयनार्थं विश्वामित्रागमनादिः । ६, ताडकादिवधः । ७, रामादीनां मिथिलागमनसीतास्वयम्बरादिः । ८, मिथिलातो स्वपुरीं प्रति रामदशरथादीनामागमनादिः ।

अयोध्याकाण्डस्य १ अध्याये, रामनिकटे नारदागमनादिः । २, रामराज्याभिषेकवार्त्तोत्थापनादिः । ३, दशरथस्य कैकेयीगृहप्रवेशादिः । ४, रामस्य दण्डकारण्यगमनोद्योगादिः । ५, वनगमनसमये पौरवासिनां खेदवाक्यानि । ६, गुहं प्रति लक्ष्मणस्य वनागमनादिवृत्तान्तसूचनादिः । ७, दशरथविलापादिः । ८, रामशोकार्त्तभरतवाक्यादिः । ९, भरतस्य रामसन्दर्शनार्थं चित्रकूटपर्व्वते गमनादिः ।

आरण्यकाण्डस्य १ अध्याये, रामलक्ष्मणादेर्दण्डकारण्यप्रवेशः, रामकर्तृकविराध-

विषयः। राक्षसवधविवरणञ्च। २, रामादेः शरभङ्गसुतीक्ष्णाद्याश्रमगमनादिः। ३, रामादीनामगस्त्याश्रमगमनादिः। ४, रामादेः पञ्चवटीवासादिः। ५, शूर्पनखानासाच्छेदखरदूषणवधादिः। ६, रावणमारीचसंवादः। ७, सीताहरणादिः। ८, रामविलापः। ९, कबन्धराक्षसवधादिः। १०, शबर्याश्रमगमनादिः।

किष्किन्धाकाण्डस्य १ अध्याये, रामसुग्रीवयोर्मैत्रीकथनरामपरीक्षाकथनादिः। २, वालिसुग्रीवयोर्युद्धं, वालिबधश्च। ३, वालिसत्कारसुग्रीवराज्याभिषेकादिः। ४, रामस्य ऋष्यमूकपर्वते वासः, सीतार्थं तत्कृतविलापश्च। ५, लक्ष्मणस्य सुग्रीवभवने गमनं, सुग्रीवस्य रामनिकटे समागमनञ्च। ६, सीतान्वेषणार्थं चतुर्दिक्षु वानराणां गमनं। ७, ८, सीतान्वेषणार्थं दक्षिणदिग्गतानां समुद्रतीरस्थानां वानराणां चिन्तादिः।

सुन्दरकाण्डस्य १ अध्याये, हनुमत्कर्तृकं समुद्रलङ्घनं। २, रावणकर्तृकसीताभर्त्सनादिः। ३, हनुमत्सीतयोः कथोपकथनादिः। ४, हनुमत्कर्तृको रावणारामभङ्गः, कतिपयराक्षसबधः, हनुमद्रावणयोः कथोपकथनं, लङ्कादाहश्च। ५, सीताहनुमतोः कथोपकथनं, वानराणां रामसमीपे प्रत्यागमनसीतासंवादकथनादिः।

लङ्काकाण्डस्य १ अध्याये, समुद्रतरणादिविषये रामवाक्यादिः। २, हनुमद्विक्रमं दृष्ट्वा रावणस्य विमर्षवाक्यादिः। ३, विभीषणस्य रामसमीपे आगमनं, विभीषणराज्याभिषेकादिः। ४, सेतुबन्धः, रामेश्वरशिवस्थापनं, रावणदूतकर्तृको रामसैन्यवर्णनादिः। ५, रावणस्य क्रोधाविमर्षौ युद्धारम्भश्च। ६, ७, लक्ष्मणमूर्च्छा, रामरावणयुद्धं, हनुमत औषधानयनार्थं गमनादिः। ८, कुम्भकर्णबधादिः। ९, इन्द्रजिद्बधादिः। १०, रामरावणयोर्घोरतरं युद्धं रावणबधश्च। ११, विभीषणशोकापनयनं, विभीषणराज्याभिषेकादिश्च। १२, रामसमीपे सीतानयनादिः। १३, रावणबधात् सन्तुष्टदेवादिकृतरामस्तवादिः। १४, पुष्पकमारुह्य रामादीनां स्वपुरीं प्रत्यागमनादिः। १५, रामराज्याभिषेकः। १६, हनुमदादीनां पारितोषिकदानप्रजाहर्षोत्पत्त्यादिः।

उत्तरकाण्डस्य १, २, अध्याये, रामचन्द्रनिकटे अगस्त्यादिमुनिसमागमनं, परस्परं वाक्यालापः, रावणकुम्भकर्णमेघनादादिजन्मवृत्तान्तः। ३, वालिसुग्रीवयोर्जन्मवृत्तान्तादिः। ४, श्वेतद्वीपे बलदर्पितस्य रावणस्य युद्धार्थागमनादिः। ५, रामगीताकथनं। ६, भार्गवादिमुनीनां रामनिकटे समागमः। परस्परं वार्त्तालापो लवणासुरबधादिश्च। ७, रामसमीपे कुशलवकर्तृकरामायणगानादिः। ८, रामसमीपे ऋषिरूपधरकालागमनादिः। ९, कुशलवयो राज्याभिषेकः रामलक्ष्मणसीतादीनां स्वधामगमनं।



No. 1502. स्याद्वादमञ्जरी वा द्वात्रिंशिकास्तवनटीका, मूलसहिता।

Substance, country-made paper, 13 × 5½ inches. Folia, 72. Lines, 11 on a page. Extent, 2,985 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Syádváda-mañjarí. A commentary, in verse, on certain hymns of Hemachandra, in praise of Arhata, and embodying the substance of the leading tenets of Arhata Philosophy. By Gaganadinamaṇi. The work is held in great esteem by the Jains. Mádhava Áchárya has quoted from it in his *Sarvadarsana Saṅgraha.*

Beginning. यस्य ज्ञानमनन्तवस्तुविषयं यः पूज्यते दैवतै-
र्नित्यं यस्य वचो न दुर्नयकृतैः कोलाहलैर्लुप्यते।
रागद्वेषमुखाद्विषाञ्च परिषत् क्षिप्ता क्षणाद्येन सा
स श्रीवीरविभुर्विधूतकलुषां बुद्धिं विधत्तां मम १॥ ॥
निःसीमप्रतिभैकजीवितवरौ निःशेषभूमिं स्पृशां
पुण्यौघेन सरस्वतीसुरगुरुस्वाङ्गैकरूपौ दधत्।
यः स्याद्वादमसाधयन्निजवपुर्दृष्टान्ततः सोऽस्तु मे
सद्बुद्ध्यम्बुनिधिः प्रबोधविधये श्रीहेमचन्द्रः प्रभुः॥ २॥
ये हेमचन्द्रमुनिमेतदुक्तग्रन्थार्थसेवामिषतः श्रयन्ते।
सम्प्राप्य ते गौरवमुज्ज्वलानां पदं कलानामुचितं भवन्ति॥ ३॥
मातर्भारति सन्निधेहि हृदि मे येनेयमाप्तस्तुते-
र्निर्मातुं विवृतिं प्रसिद्ध्यतिजवादारम्भसम्भावना।
यद्वा विस्मृतमोष्ठयोः स्फुरति यः सारस्वतः शाश्वतो
मन्त्रः श्रीउदयप्रभेतिरचनारम्यो ममाहर्निशं॥

End. कृता कर्तुमारब्धा सपर्या सेवाविधिर्यैस्ते कृतसपर्याः। आराध्यान्तरपरित्यागेन त्वय्येव सेवा हेवाकिता(?) परिशीलयन्तीति शिखरिणीच्छन्दोऽलङ्कृतकाव्यार्थः।

Colophon. इति अन्ययोगव्यवच्छेदद्वात्रिंशिकास्तवनटीका समाप्ता।
येषामुज्ज्वलहेतुहेतिरुचिरः प्रामाणिकाध्वस्पृशी
हेमाचार्यसमुद्भवस्तवनभूरर्थः समर्थः सखा।
तेषां दुर्नयदस्युसम्भव+या स्पृष्टात्मनां सम्भव-
त्यायासेन जिनागमपुरप्राप्तिश्शिवश्रीपदा(?)॥ १॥

वानुवैद्यमहोदधेर्भगवतः श्रीहेमसूरेर्गिरां
गम्भीरार्थविलोकने यदभवद्दृष्टिः प्रकृष्टा मम ।
श्रीवीरः (वीरः) समयादरा+च्छपरा भूतप्रभूता वयं
तन्नूनं गुरुपादरेणुकणिकासिद्धाञ्जनस्योर्जितं ॥ २ ॥
अन्यान्यशास्त्रतरुसङ्ग+वितच्छारि पुष्पोपमेयकतिचिन्निचिचि+मेषैः (?) ।
दृष्ट्वा ममाञ्जिमजिनस्तुतिवृत्तिमेनां मालामिवामलहृदो हृदये वहन्तु ॥ ३ ॥
प्रमाणसिद्धान्तविरुद्धमत्र यत्किञ्चिदुक्तं मतिमान्द्यदोषात् ।
॰ ॰दैमनुत्वार्य्य तदार्यचित्ताः प्रसादमाधाय विशोधयन्तु ॥ ४ ॥
॰धामेष सुधाभुजां गुरुरिति त्रैलोक्यविस्तारिणा
ग्रन्थेयं प्रतिभान्तरादनुमितिनिर्दम्भमुज्जृम्भते ।
किञ्चामी विबुधा सखेति (?) वचनोद्गारं यदीयं मुदा
+श्रसन्तः प्रथयन्ति +मतितमां संवादमेदस्विनीं ॥ ५ ॥
नागेन्द्र गच्छतो (?) विन्दवचोऽलङ्कारकौस्तुभः ।
ते विश्ववन्द्यासुरुदयप्रभसूरयः (?) ॥ ६ ॥
श्रीम+सेनसूरिभिरकारि तत्त्वदम्गगनदिनमणिभिर्वृत्तिरियमनुरचिता ।
++++++++++++++शाके दीपमहासिशनौ (?) ॥ ७ ॥
श्रीजिनप्रभसूरीणां साहाय्योद्भिन्नसौरभा ।
श्रुतावुत्तंसनसतां वृत्तिः स्याद्वादमञ्जरी ॥ ८ ॥
विभाणे कलिनिर्जयाजिनतुलां श्रीहेमचन्द्रप्रभौ
तद्धद्धस्तुतिवृत्तिनिर्मितभयाद्भक्तिर्मयाविष्कृता ।
निर्णेतुर्गुणदूषणे निजगिरां तन्नार्थये सज्जनात्
तस्यास्तत्त्वमकृत्रिमा बहुमतिः सास्त्यत्र सम्यग्यतः ॥ ९ ॥
इति श्रीस्याद्वादमञ्जरीग्रन्थः समाप्तः ॥

विषयः । स्याद्वादनामकजिनस्तुतिव्याख्यानं ।

No. 1503. अद्वैतसिद्धिः ।

Substance, country-made paper, $14\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 125. Lines, 11—12 on a page. Extent, 5,022 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Advaita-siddhi. An essay on the Non-dual theory of the modern Vedántins, establishing the illusory character of all created objects, and refuting the Nyáya theory. By Madhusúdana Sarasvatí, disciple of Vis'ves'vara Sarasvatí. Mr. Hall notices an abridgment of this work under the name of Nyáya-ratnávali. *Contributions* pp. 109—157.

Beginning. यो यः कल्पितमात्मतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानां ।
स्पर्शेन निर्धूततमोरजोभ्यः पादोत्थितेभ्यस्तु नमो रजोभ्यः ॥ २ ॥
बहुभिर्विहिता बुधैः परार्थं विजयन्ते मितविस्तरा निबन्धाः ।
मम तु श्रम एष नूनमात्मम्भरितां भावयितुं भविष्यतीह ॥ ३ ॥
————मणिना मधुसूदनेन सङ्गृह्य शास्त्रनिचयं रचितातियत्नात् ।
बोधाय वादिविजयाय च सत्वराणामद्वैतसिद्धिरियमस्तु मुदे बुधानाम् ॥ ४ ॥

End. प्रातिभाषिकलक्षणञ्च व्याप्तं तथापि करणसंसर्गिदोषप्रयुक्तत्वं तद्संसर्गिदोष-प्रयुक्तत्वञ्च तयोर्लक्षणं निरवद्यं। सत्त्वैविध्योपपत्तिः ॥ ५२ ॥
अविद्यातत्कार्यात्मकनिविडबन्धव्यपगमे
यमद्वैतं सत्यप्रततपरमानन्दममृतं ।
भजन्ते भूमानं भवभयभिदं भव्यमतयो
नमस्तस्मै नित्यं निखिलनिगमेशाय हरये ॥
अनादिसुखरूपता निखिलदुःखनिर्मुक्तता
निरन्तरमनन्तता स्फुरणरूपता च स्वतः ।
त्रिकालपरमार्थता त्रिविधभेदशून्यात्मता
मम श्रुतिशतार्पित+दृहमस्मि पूर्णो हरिः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यविश्वेश्वरसरस्वतीश्रीचरणशिष्यश्रीमधुसूदन-सरस्वतीविरचितायामद्वैतसिद्धौ सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं नाम प्रथमः परिच्छेदः समाप्तः ।

विषयः। सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं ।

No. 1504. न्यायत्रिसूत्रीवार्त्तिकं ।

Substance, country-made paper, 14 × 5½ inches. Folia, 17. Lines, 4—9—10 on a page. Extent, 515 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Nyáya-trisutrí-várttika. A commentary on the first three aphorisms of the Nyáya Sútra of Gotama, comprising an epitome of the Nyáya doctrine. By Udyotakara A'chárya.

Beginning. यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद ।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः ॥

iEnd. प्रधानं प्रत्यक्षं इति यत्र संन्यायसूत्रेवं यत्र पुनर्व्यवस्था तत्र गुणप्रधानतानाश्चिन्त्यत इति ।

Colophon. इति श्रीपरमर्षिभारद्वाजश्रीमदुद्योतकरन्यायाचार्य्यप्रणीतं न्यायत्रिसूत्रीवार्त्तिकं सम्पूर्णं ॥

विषयः । गोतमोक्तसूत्रत्रयव्याख्यानेन समस्तगोतमसूत्रतात्पर्य्यकथनं ॥

No. 1505. ज्योत्स्ना, हिरण्यकेशिसूत्रव्याख्या ।

Substance, country-made yellow paper, 13¼ × 5¼ inches. Folia, 126. Lines, 9 on a page. Extent 1,366 s'lokas. Character, Nágara, Date, Sam. 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Jyotsná alias *Hiranyakes'í-sútra-vyákhyá.* A commentary on the Kalpa Sútra of Hiranyakes'í. By an unknown author. The MS. is incomplete, ending at the tenth Prasna, and wanting 16 leaves at the end.

Beginning. उक्ता अग्निष्टोमादयः संस्थाः यूपैकादशिनी (?) यूपैकादशिन्यौ च अथेदानीमग्निष्टोमादिष्वाकाङ्क्षितं याजमानकर्म्म वक्तुं शिष्यावधानाय प्रतिजानीते ॥ अग्निष्टोमस्य याजमानं व्याख्यास्यामः ।

End.

Colophon. श्रीमद्भगवत्सत्याषाढहिरण्यकेशिसूत्राम्बुधिगतनिगूढार्थरत्नलाभकृतविद्वज्जनसन्तापशमिकायां ज्योत्स्नाख्यायां वृत्तौ दशमप्रश्नस्याष्टमः पटलः । समाप्तो दशमः प्रश्नः ॥

विषयः । हिरण्यकेशिसूत्रव्याख्यानं । पुस्तकमिदं एकशतत्रयस्त्रिंशत्पत्रे सम्पूर्णं परन्तु एकशतसप्तविंशतिपत्रावधि एकशतद्वात्रिंशत्पत्रपर्य्यन्तं नास्ति ।

No. 1506. नैषधः, दीपिकाख्यटीकासहितः ।

Substance, country-made paper, 15¼ × 7 inches. Folia, 381. Lines, 10—12—18 on a page. Extent, 13,358 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Text, verse. Commentary, prose. Incorrect.

Dípiká alias *Naishadha-dípiká.* A commentary on the well-known Epic poem called *Naishadha*, on the adventures of Nala. By Narahari.

Beginning. (मू॰) । निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्त्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥

(टी॰) । पारं प्रबन्धाम्बुनिधेः प्रयातुं यत्नः किल स्वान्त तवैष हन्त ।
निःश्वासलीलानिहतान्तरायहेरम्बमालम्बनमाश्रयेथाः ॥ १ ॥
त्वदनुग्रहलेशमात्रलाभादियमुच्छृङ्खलगामिनी मनीषा ।
अपि कर्षति मामगम्यभूमौ शरणं मे भव शारदे नमस्ते ॥ २ ॥
अज्ञानतिमिरपाटनपटीयसीं शुभगुणोदयोल्लसितां ।
नीराजनाय करवै प्रदीपिकां काव्यमहसाजः ॥ ३ ॥

End. (मू॰) । श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मा मल्लदेवी च यं ।
द्वाविंशो नवसाहसाङ्क(?)चरिते चम्पूकृतोऽयं गतः
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः ॥

Colophon. इति श्रीनैषधीये महाकाव्ये द्वाविंशः सर्गः ॥ नैषधः सम्पूर्णः ॥

(टी॰) । यं प्रासूत त्रिलिङ्गक्षितिपतिसततराधिताङ्घ्रिः स्वयम्भूः
पातिव्रत्यैकसीमास्वकरिनरहरिं नालमायच(?) माता ।
यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां
द्वाविंशस्तात्सर्गः सुकृतसुयशसो धाम नीराजितोऽभूत् ॥
इति श्रीनैषधीये महाकाव्ये शशाङ्कवर्णनं नाम द्वाविंशः सर्गः ॥

विषयः । नैषधचरितवर्णनं ।

No. 1507. मीमांसाशास्त्रसर्व्वस्वं ।

Substance, country-made paper, 14½ × 3¾ inches. Folia, 82 Lines, 4—5—7—8 on a page. Extent, 2,730 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Mímáñsá-s'ástra-sarvas'va alias *Mímáñsá-sarvas'va.* An epitome of the Mímáñs'á doctrine. By Haláyudha, the Minister of Lakshmaṇa Sena of Bengal, and author of several works, such as the *Bráhmáṇa Sarvas'va, Smṛiti Sarvas'va,* &c. Hall's *Contributions,* &c., pp. 182—207. Journal As. Soc. 1865, p. 128.

Beginning. इह खलु साङ्गवेदाध्ययनानन्तरं विचारकर्त्तव्यतार्थं गुरुगृहवासावसानेनि वृत्तिं प्रतिपादयितुं जैमिनिना आद्यसूत्रं प्रणीतं। तत्र स्वाध्यायोऽध्येतव्य इत्यनेन विहिताया भावनाया भाव्याकाङ्क्षायां किं विश्वजिन्न्यायात् स्वर्गः फलं उतास्वरादिग्रहणद्वारा वा वाक्यार्थज्ञानमिति सन्देहः ॥

End. तन्नियमस्यापि दृष्टमेव प्रयोजनं तेषां करिष्यमाणप्रयोगकर्म्मकौशलं भक्षणादि सामर्थ्यं भवतीति। तस्मात् भक्षार्थोऽयमुपदेश इति सिद्धं ॥

Colophon. इति मीमांसाशास्त्रसर्व्वस्वे तृतीयाध्यायस्य चतुर्थः पादः।

विषयः। सङ्क्षेपेण मीमांसकसिद्धान्तकथनं।

No. 1508. रमलप्रश्नः ।

Substance, country-made paper, 6 × 4¾ inches. Folia, 9. Lines, 9 on a page. Extent, 81 s'lokas. Character, Nágara. Date, Sm. 1860. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Ramala-pras'na. A treatise on cleromancy or divination with a set of dice. Author unknown.

Beginning. ॥ अ व ज द ॥ इत्यक्षरचतुष्टयं। पाशपार्श्वे लिखितव्यं ततः पाशकं हस्ते कृत्वा यत्किञ्चिद् भूतं भविष्यं वर्त्तमानञ्च मनसि अवधार्य्य॥ देवतामन्त्रेण इत्यभिमन्त्रितं कृत्वा एकाग्रचित्तेन पाशकं वारत्रयं पातयितव्यं।

End. हो देवतापूजेतो कार्य्य होइगो।

Colophon. इति प्रश्नः सम्पूर्णः।

विषय। मन्त्रविशेषाभिमन्त्रितपाशविशेषद्वारा प्रश्नगणनं।

No. 1509. ललितास्तवरत्नं ।

Substance, country-made paper, 8½ × 3¼ inches. Folia, 22. Lines, 6—7 on a page. Extent, 317 s'lokas. Character, Nágara. Date, SM. 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Lalitá-stava-ratna. A hymn in praise of Lalitá, a form of Durgá. By the great sage (Ṛishi) Durvás'á.

Beginning. वन्दे गजेन्द्रवदनं वामाङ्कारूढवल्लभाश्लिष्टं ।
कुङ्कुमपरागशोणं कुवलयनीरजकोरकापीडं ॥

End. ललितायास्तवरत्नं ललितपदाभिः प्रणीतमार्य्याभिः ।
प्रतिदिनमवनौ पठतां फलानि वक्तुं प्रगल्भते सैव ॥

Colophon. इति श्रीदुर्व्वासमहर्षिकृतं ललितास्तवरत्नं सम्पूर्णं ।

विषयः । ललितादेवीस्तोत्रकथनं ।

No. 1510. तर्कामृतं ।

Substance, country-made paper, 7¾ × 4 inches. Folia, 12. Lines, 12—13—14 on a page. Extent, 351 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tarkámṛita. An elementary treatise on the Vais'esheka doctrine. By Jagádís'h Tarkálaṅkára. There are several commentaries and annotations on this work. Vide ante No. 144, and Hall's *Contributions,* p. 76.

Beginning. ब्रह्माद्या निखिलार्च्चिताखिलद्युसन्दोहाः सदाभीष्टदाः
स्वाज्ञानप्रशमाय यत्र मनसो वृत्तीः समस्ता दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकवीजं परं
हृत्पद्मे विनिधाय तं निरुपमं तर्कामृतं तन्यते ॥

End. विशेष्यसङ्गतस्य अन्ययोगव्यवच्छेदः पार्थ एव धनुर्धर इत्यादौ एवं दिशा सर्व्वं वोध्यं ।

Colophon. इति तर्कामृतं ।

विषयः । अत्र प्रथमं, आत्मा वाऽरे द्रष्टव्यः श्रोतव्य इत्यादिश्रुतिव्याख्यानं । ततः द्रव्य-प्रमाणकथनं । ततः द्रव्यनामस्य द्वैविध्यकथनं । ततस्चतुर्व्विंशतिप्रकारगुण-

कथनं। ततः गुणोत्पत्तिप्रक्रियाकथनं। ततः कर्मोत्पत्तिप्रक्रियाकथनं। ततः प्रमात्मकज्ञानकथनं। ततः अनुमाननिरूपणं, हेत्वाभासनिरूपणञ्च। ततः उपमाननिरूपणं। ततः शब्दप्रमाणकथनं। ततः शाब्दबोधप्रक्रियाकथनं। ततः कारकविभक्त्याद्यर्थकथनं, आख्यातार्थकथनञ्च। ततः कृत्प्रत्ययार्थनिरूपणं, एवकाराद्यर्थनिरूपणञ्च॥

No. 1511. मन्त्रभागवतः, मन्त्ररहस्यप्रकाशिकानामटीकासहितः।

Substance, country-made paper, 11 × 5 inches. Folia, 40. Lines, 7—13 on a page. Extent, 1,624 s'lokas. Character, Nágara. Date, Sm. 1728. Place of deposit, Benares, Bábu Haríshchandra. Appearance, old. Prose and verse. Corrected.

Mantra bhágavata. A compilation of mantras bearing on the worship of Ráma and Krishṇa, compiled from the Vedas and other ancient works, and illustrated and explained with a running commentary. By Nílakaṇṭha son of Govinda Suri. The commentary is named *Mantra-rahasya-prakás'iká.*

Beginning. (टी॰)। सत्यं ज्ञानमनन्तं यत् तद्विष्णोः परमं पदं।
प्राहुं मन्त्रेषु गोपालविष्णोः कर्माणि पश्यत॥
ननु सत्यादिलक्षणमखण्डैकरसं विष्णोः परमं पदनीयं स्वरूपञ्चेन्निरवद्ये तत्राविद्यावद्विषयाणि न सम्भवन्ति।

(मू॰)। तं नेमि ऋभवो यथा नमस्व सहूतिभिः। नेदीयो यज्ञमङ्गिरः॥ १॥

End. (मू॰)। स समुद्रो अपीच्यस्तुरोद्यामिव रोहति निपदासु यजुर्दधे। स माया अर्चिना पदा स्तृणान्नाकमारुहन्नभं तामन्यके समे॥ १०॥

(टी॰)। वाक्यार्थे व्यासवाल्मीकी पदार्थे यास्कपाणिनी।
रामकृष्णकथां मन्त्रैर्गायतो मम नायकौ॥ १॥
एतच्छतद्वयमृचां रामकृष्णकथानुगं।
व्याख्यातं भगवांस्तेन तुष्यतात् सात्वताम्पतिः॥ २॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ स्वोद्धृतमन्त्रभागवतव्याख्यायां मन्त्ररहस्यप्रकाशिकायां मथुराकाण्डश्चतुर्थः।

विषयः। रामकृष्णकथानुगानामृचां व्याख्यानं।

No. 1512. अनुक्रमणिकाविवरणं ।

Substance, country-made paper, 12 × 5 inches. Folia, 47. Lines, 9 on a page. Extent, 1,057 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Corrected.

Anukramaṇiká-vivaraṇa. An Index to the hymns of the Rig Veda, their deities, their authors, and their metres. By Jagannátha. The work follows the order of Saunaka's treatise on the subject.

Beginning. नमामि विष्णुं शिरसाऽव्ययं समं शिवञ्च सोमं वृषभेन्द्रगामिनं ।
गणाधिपं भक्तमनोरथप्रदं हरिञ्च वाक्सिद्धिकरीञ्च भारतीम् ॥ १ ॥
अनुक्रमणिकोक्तानि सूक्तादिप्रभृतीन्यहं ।
छन्दोगति(?) निवक्ष्यामि जगन्नाथो यथामति ॥ २ ॥

End. समसित् चतुष्कम् ४ । संवनन आङ्गिरसः सञ्ज्ञानमानुष्टुभम् । तृतीया त्रिष्टुप् ।
६४ । ऋचः २१९ ।

Colophon. इति जगन्नाथकृते अनुक्रमणिकाविवरणे अष्टमाङ्कः समाप्तः ।

विषयः । ऋग्वेदीयमन्त्राणामृषिदैवतच्छन्दःसङ्ख्यानिर्णयः ।

No. 1513. हठदीपिका, ज्योत्स्नाख्यटीकासहिता ।

Substance, country-made paper, 11¾ × 6 inches. Folia, 105. Lines, 9—10—11—12—13 on a page. Extent, 1,000 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Generally correct.

Jyotsná alias *Haṭha-dípiká-ṭíká.* A commentary on the Haṭha-dípiká—a treatise on the performance of Yoga meditations. By Bráhmánanda. The MS. includes the text of Svátmaráma. Contents. I. Seats; II. Regulation of the breath; III. Gesticulations; IV. The peculiarities of perfect meditation, or exclusive devotion of the mind to the object of meditation.

Beginning. (मूलस्य) । श्रीआदिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।
विभ्राजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहिणीव ॥ १ ॥

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना।
केवलं राजयोगाय हठविद्योपदिश्यते ॥ २ ॥
भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम्।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥ ३ ॥

(टीकायाः)। गुरुं नत्वा शिवं साक्षाद् ब्रह्मानन्देन तन्यते।
हठप्रदीपिकाज्योत्स्ना योगमार्गप्रकाशिका ॥ १ ॥
इदानीन्तनानां सुबोधार्थमस्याः सुविज्ञाय गोरक्षसिद्धान्तहार्द्दं
मया मेरुशास्त्रिप्रमुखाभिधात् स्फुटं कथ्यते ह्यत्यन्तगूढोऽपि भावः।
मुमुक्षुजनहितार्थं राजयोगद्वारा कैवल्यफलां हठप्रदीपिकां विधित्सुः
परमकारुणिकः स्वात्मारामयोगीन्द्रस्तत्प्रत्यूहनिवृत्तये हठयोगप्रवर्त्तकश्रीमदादि-
नाथनमस्कारलक्षणं मङ्गलं तावदाचरति, श्रीआदिनाथायेत्यादिना ॥

End. (मू०)। यावन्नैव प्रविशति चरन्मारुतो मध्यभागे
यावद्बिन्दुर्न भवति दृढः प्राणवातप्रबन्धात्।
यावद्ध्याने सहजसदृशं जायते नैव तत्त्वं
तावज्ज्ञानं वदति तदिदं दम्भमिथ्याप्रलापः ॥ ११४ ॥

Colophon. इति श्रीसहजानन्दचिन्तामणिस्वात्मारामचिन्तामणियोगीन्द्रविरचितायां हठ-
दीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः समाप्तः।

(टी०)। ग्राह्यमेव विदुषां हितं यतो भाषणं मम यदप्यसंस्कृतं।
रत्न गच्छति पयोमलच्छिलं ह्यंव(?) इत्यभिहितं शिरोर्यथा ॥
सदर्थद्योतनकरी तमःस्तोमविनाशिनी।
ब्रह्मानन्देन ज्योत्स्नेयं शिवाङ्घ्रियुगलेऽर्पिता ॥
इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानन्दकृतायां ज्योत्स्नाभिधायां समाधि-
निरूपणं नाम चतुर्थोपदेशः।

विषयः। १ प्रथमे, उपदेशाभिधप्रकरणे कूर्माद्यासनविधिकथनादिः। २, प्राणायाम-
प्रकारः। ३, खेचर्यादिमुद्राकथनं। ४, समाधिलक्षणकथनं ॥

No. 1514. हस्तसञ्जीवनं, भाष्यसहितं।

Substance, country-made paper, $11\frac{3}{4} \times 5\frac{3}{4}$ inches. Folia, 13. Lines, 11—12 on a page. Extent, 390 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Hasta-sañjívana. A treatise on palmistry and divination. Author unknown.

Beginning. श्रीशङ्खेश्वरपार्श्वं प्रणमन् ध्यायंस्तमेव हृजिनवृषभं ।
हस्तप्रश्नस्य लक्षणपरीक्षणे दक्षतां वक्ष्ये ॥ १ ॥
श्रीनाभेयः प्रभुर्जीयात् सर्वज्ञो जगदीश्वरः ।
येन लाक्षणिकी विद्या निर्दिष्टा भुवनश्रिये ॥ २ ॥
श्रीवर्द्धमानो जयतु सर्वज्ञानिशिरोमणिः ।
पञ्चहस्तोत्तरो वीरः सिद्धार्थन्टपनन्दनः ॥ ३ ॥
अङ्कविद्या निमित्तानामष्टानामपि गीयते ।
मुख्या शुभाशुभज्ञाने नारदादिनिवेदिता ॥ ४ ॥

End. करस्पर्शात् स्पर्शादिव परिणतां काञ्चनमहा-
रसप्रेङ्खन् सिद्धिं सगुरुवचसा मेऽस्य विजयात् ।
विदित्वा इच्छानां य इह कुरुते निर्णयमहो
महोभिस्तस्य स्याङ्गुवनभवनावासनविधिः ॥ ५४ ॥

Colophon. इति हस्तसञ्जीवने सिद्धज्ञाने हस्तस्पर्शनाधिकारः सम्पूर्णः ।

विषयः । १ प्रथमाधिकारे, हस्तप्रशंसा । हस्ते तीर्थादिध्यानेन पुण्यसाधनं । हस्ताङ्गुल्यादिनामानि । हस्तावलोकनविधिः । तिथ्यानयनं । वारानयनं । नक्षत्रानयनं । राश्युपरिग्रहदर्शनं । वर्षदर्शनं । मासदर्शनं । पक्षदर्शनं । दिनदर्शनं । दिनलग्नचक्रं । द्रेक्काणः । योगदर्शन । दिक्चक्रदर्शनं । देहचक्रदर्शनं । प्रथमाधिकारः ।

२ अधिकारे, कराङ्गुलीस्पर्शानुसारेण प्रश्नगणनादिः । चन्द्रसूर्यादिस्वरज्ञानादिः ।

No. 1515. पराशरहोरा उत्तरभागः ।

Substance, country-made paper, $11\frac{1}{2} \times 5\frac{3}{4}$ inches. Folia, 22. Lines, 13 on a page. Extent, 770 s'lokas. Character, Nágara. Date, Sᴍ. 1931, S'ᴋ. 1796. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Parásara-horá. On the division of time into *horás* or hours, and directions for the preparation of horoscopes. Parásara explains the subject in reply to queries by Maitreya; but the work in its present form is obviously of a later date and due to a compiler.

Beginning. भगवन् सर्वमाख्यातं जातकं विस्तरेण मे ।
सप्तसहस्रायुतग्रन्थैरशीत्यध्यायसंयुतैः ॥ १ ॥
सङ्करात्तत्फलानान्तु ग्रहाणां गतिसङ्करात् ।
नान्येदमीदृगस्थेयमिति वक्तुमलं नराः ॥ २ ॥
कलौ युगे ततोऽल्पैव बुद्धिः पापोत्तरा नराः ।
अतो न चास्य प्रचयगमनं न प्रयोजनम् ॥ ३ ॥
अत्र त्रेतायुगे केचिद् द्वापरे च कृते युगे ।
कुशाग्रमतयः सर्वे पुण्यभाजश्चिरायुषः ॥ ४ ॥
अतोऽल्पबुद्धिगम्यं यच्छास्त्रमेतद्वदस्व मे ।
लोकयात्रापरिज्ञानमायुषो निर्णयं तथा ॥ ५ ॥

End. वेदेभ्यश्च समुद्धृत्य ब्रह्मा प्रोवाच विस्तृतं ॥ ३ ॥
शास्त्रमाद्यं तदेवेदं वेदवेदाङ्गचक्षुषः ।
गर्गस्तस्मादतः प्राह मया तस्माद्यथा तथा ॥ ४ ॥
तदुक्तं तव मैत्रेय शास्त्रमाद्यन्तमेव हि ॥ ५ ॥

Colophon. इति श्रीपराशरहोरायामुत्तरभागे विंशोऽध्यायः ।

विषयः । राश्यर्द्धभागात्मकहोराविवरणं, तच्छुभाशुभकथनञ्च ।

No. 1516. वृहस्पतिसंहिता ।

Substance, country-made paper, 11½ × 6 inches. Folia, 123. Lines, 11 on a page. Extent, 3,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India; another copy, Calcutta, Bhavasañkara Vidyáratna. Appearance, new. Verse. Incorrect.

Vrihaspati Sañhitá. A Smriti work on the principal sacraments necessary from conception to death. By Vrihaspati. The work has been twice printed in Calcutta.

Beginning. सङ्क्रान्तीयाः स्युरेष्वेव योगो ह्ययगजादयः ।
हेमराजततानादिकांस्यपात्राद्यमत्रके ॥
नव मुक्त्यादयः कार्यास्तथैवाभरणादयः ।
गजाश्वशालारम्भश्च तथा तेषु प्रवेशनं ॥

End. (मध्ये असंलग्नं)। पञ्चयोरुभयोरुक्तं पञ्चम्यां पुत्रसिद्धये ।
श्राद्धं नवम्यामश्वानां सिद्धये ग्रन्थिते च तौ ॥

नित्यश्राद्धं पश्चाच्छास्त्रं सर्वसम्पत्प्रसूतये ।
त्रयोदशं विशेषेण समग्राः सर्वसम्पदः ॥

Colophon. इति श्रीबृहस्पतिसंहिता समाप्ता ।

विषयः । प्रथमाध्यायो नास्ति । २ अध्याये, तिथ्यादिगुणः । ३, दोषलक्षणं । ४, दोषापवादलक्षणं । ५, अङ्कुरार्पणं । ६, मुहूर्त्तविधानं । ७, पुंसवनकर्म । ८, सीमन्तकर्म । ९, जातकर्म । १०, नामकरणं । ११, कर्णवेधः । १२, निष्क्रमणं । १३, १४, १५, अन्नप्राशनं । १६, चूडाकर्म । १७, उपनयनं । १८, विद्यारम्भादिकालः । १९, व्रतादिकालाकालविधानं । २०, विवाहवधूगृहप्रवेशादिः । २१, राश्यर्द्धविचारः । २२, यात्राकालादिकथनं । २३, प्रातःकालक्रियाविभागः । २४, राजाभिषेचनं । २५, नक्षत्रपुण्यकालक्रियाविधानं । २६, पवित्रारोपणं । २७, शान्तिकालक्रियाविधानं । २८, नानाक्रियासत्कालस्य कृषिकर्मणश्च विधानं । (अत्र २८ अध्यायात् परमसुलभपत्राणि सन्ति तेनाध्यायनिश्चयो न जायते ।)

No. 1517. रेखाजातकसुधाकरः ।

Substance, country-made paper, 11½ × 6 inches. Folia, 66. Lines, 9—11—12—14 on a page. Extent, 1,500 s'lokas. Character, Nágara. Date Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Rekhájátaka-sudhákara. On certain signs on the body indicative of the future prospects of the person who has them. The first half (*Purvárddha*) of the work is divided into 9 chapters, and treats of 1, three lines on the palm of the right hand; 2, the mode of calculating the year of birth from those lines; 3, ditto the month of do. do.; 4, ditto the demilunation of do. do.; 5, ditto the date of the moon of do. do.; 6, ditto auspicious times for performing particular acts, from ditto; 7, ditto the span of life of do. do.; 8, the peculiar characteristics of a line called Náda; 9, the mode of divining past events in a man's life.—The second half has no division of chapters, it treats of the signs on the persons of women, of men, of kings, of wealthy men, of impotency; of calculating future events from the form of the members of the body; of calculation of longevity from marks on the palms; of marks on the soles of the feet; of toes and fingers; of shoulders and neck; of the teeth, tongue, &c. The name of the author of the work is not given. The work is of considerable repute among astrologers.

Beginning. यन्नामधेयं सकलार्त्तिभञ्जनं यत्कीर्त्तनं वै कलिकल्मषघ्नं ।
यो वै रसानां यशसाञ्च रूपं देवः स पायात् करुणानिधिर्नः ॥ १ ॥
यं देवदेवं मुनिसिद्धसङ्घाः स्तुवन्ति गायन्ति च सामगीतैः ।
तं वन्द आद्यं शशिलेखचूडाविराजितं शम्भुमुमार्द्धदेहं ॥ २ ॥
यज्जातकं व्यासपराशराख्यश्रीवृद्धयैकात्यायनछागलेयैः ।
क्षतं तदेवाद्यमहं(?) ब्रवीमि युक्तं सुसामुद्रिकयुक्तिभेदैः ॥ ३ ॥
अथ त्रिरेखाध्यायः ।
रेखावशात् कुत्र + जन्मकाले ज्ञानं तथा तत्फलसाधनञ्च ।
वक्ष्ये शिवं भूमिधरेन्द्रकन्याप्रियं नमस्कृत्य गुरुं स्वकञ्च ॥ ४ ॥

End. व्यर्थं लक्ष्मज्ञानं लोके क्षीणायुषां यस्मात् ।
यत्नाच्च पुनः शुभमपि कररेखाप्रभृतिकञ्च ॥
संवदति वाह्याभ्यन्तरमपरं तत्र समुद्रेण निर्द्दिष्टं ॥

Colophon. इति श्रीरेखाजातकसुधाकरः सम्पूर्णतामगमत् ॥

विषयः । प्रथमाध्याये, करान्तर्गत्रिरेखानिरूपणादिः । २, रेखाद्वारा जन्मकालशाकनिर्णयः । ३, रेखाद्वारा मासनिर्णयः । ४, रेखाद्वारा पक्षनिर्णयः । ५, रेखाद्वारा तिथिनिर्णयः । ६, रेखाद्वारा इष्टकालनिर्णयः । ७, आयुःप्रमाणं । ८, नदाख्यरेखाफलं । ९, नष्टजातकं । इति पूर्वार्द्धम् ।
इतः परमध्यायनिर्द्देशो नास्ति । स्त्रीदेहचिह्नवर्णनं । पुरुषदेहचिह्नवर्णनं । राजचिह्नवर्णनं । धनिचिह्नवर्णनं । दरिद्रचिह्नवर्णनं । क्लीवादिलक्षणं । अङ्गप्रत्यङ्गादिलक्षणद्वारा शुभाशुभफलकथनं । हस्तरेखाद्वारा आयुर्गणनादिः। पुरुषपादतलस्थितध्वजार्धरेखाद्याकाररेखाशुभाशुभफलं । हस्तपदाङ्गुल्यादिलक्षणानि । ग्रीवास्कन्धादिलक्षणानि । दन्तजिह्वाताल्वादीनां लक्षणानि च ।

No. 1518. वृहदृग्विधानं ।

Substance, country-made paper, $11\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 26. Lines, 9 on a page. Extent, 511 s'lokas. Character, Nágara. Date, Sm. 1930. Copied from a MS. bearing date Sm. 1844. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Corrected.

Vríhad-rig-vidhána. On reading and reciting the Rig Veda under particular rules and restrictions, and the merits thereof. The rules refer principally to the reciting of the Gáyatrí. Attributed to Saunaka

Acháarya. The style of the work is, however, very like that of the Tantras.

Beginning. निष्कृतिर्न हि वेदानां मन्त्राणां कलिदोषतः ।
कलिदोषनिवृत्त्यर्थं गायत्रीमाश्रयेद् द्विजः ॥ १ ॥
गायत्रीमन्त्रसिद्ध्यर्थं गायत्र्ययुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिद्ध्यर्थं लक्षकं जपेत् ॥ २ ॥

End. ऋद्गितिः प्रजपेत्पादं सपिण्डान् भोजयेद्यदि ।
अयुतञ्चेद् ब्रह्मचारी नरकान् मुच्यते तदा ॥ ८३ ॥

Colophon. इति बृहदृग्विधानं समाप्तं ।

विषयः । ऋग्वेदीयानां मन्त्राणां सूक्तानां जपस्य फलम् ।

No. 1519. ऋग्विधानं ।

Substance, country-made paper, $11\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 42. Lines, 8 on a page. Extent, 840 s'lokas. Character, Nágara. Date, Sm. 1931, Copied from a MS. bearing date Sm. 1786. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Corrected.

Rig-vidhána. On the mode and merits of reciting the hymns of the Rig Veda under certain rules and instructions.—By Saunaka Ácharya.

Beginning. ॐ स्वयम्भुवे ब्रह्मणे विश्वगोप्त्रे नमस्कृत्वा मन्त्रदृग्भ्यस्तथैव च ।
विवक्षुरस्मदृग्विधानं पुराणं पुरा दृष्टमृषिभिर्मन्त्रदृग्भिः ॥ १ ॥
मन्त्रेभ्यो मन्त्रदृग्भ्यश्च समाम्नायानुपूर्वशः ।
कर्मणामृषिदृष्टानां विधिं प्रोवाच शौनकः ॥ २ ॥

End. कुले जन्मनि शीले वा प्रज्ञायामुद्यमेऽपि वा ।
ऋग्विधानपरिज्ञानाद्गच्छन्ति चरितार्थताम् ॥ ४७ ॥
तुष्यन्ति देवताः सर्वाः सम्पद्यन्ते विभूतयः ।
दुराधयः प्रणश्यन्ति नित्यमृग्विधिपाठिनाम् ॥ ४८ ॥
नमः शौनकाय नमः शौनकाय ॥

Colophon. इति ऋग्विधानं समाप्तम् ।

विषयः । अत्र चत्वारोऽध्यायाः सन्ति । तत्र प्रथमे जपपरिभाषा उक्ता । अनन्तरं सर्वत्रैव ऋग्वेदीयमन्त्रसूक्तानां जपादिफलकीर्त्तनम् ।

No. 1520. भावचिन्तामणिः ।

Substance, country-made paper, 11¾ × 6 inches. Folia, 4. Lines, 13 on a page. Extent, 133 s'lokas. Character, Nágara. Date, Sm. 1796. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Bháva-chintámaṇi. On expiations for overcoming transcendental causes which prevent the birth of a son. An extract from a Tantra.

Beginning. अथ प्राणिनां पूर्व्वजन्मशापद्योतकं । पार्व्वत्युवाच ।

देवदेव जगन्नाथ शूलपाणे वृषध्वज ।

केन योगेन मर्त्यानां बालाख्यं शिशुनाशनं ॥ १ ॥

तत्सर्व्वं यत्र योगीश ब्रूहि मे शशिशेखर ।

शापमोक्षञ्च कृपया प्राणिनामल्पमेधसां ॥ २ ॥

End. लग्नाधिपे गुरौ पुत्रे शनिदृष्टिसमन्विते ।

पुत्रेशे भौमराशिस्थे दत्तपुत्रा भवन्ति हि ॥

Colophon. इति भावचिन्तामणौ पुत्रभावनिरूपणाध्यायो नाम षष्ठः पटलः समाप्तेयं सन्तानदीपिका ॥

विषयः । अत्र पुत्रानुत्पत्तिप्रतिबन्धकशापमोचनकथनं, पुत्रोत्पादकग्रहयोगकथनञ्च ।

No. 1521. सामान्यसूत्रं ।

Substance, country-made paper, 7 × 3 inches. Folia, 4. Lines, 8—10 on a page. Extent, 80 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Corrected.

Sámánya Sútra. The first chapter of the Ápastamba-kálpa-sútra —on technical terms of the Bráhmanic liturgy.

Beginning. यज्ञं व्याख्यास्यामः स त्रयाणां वर्णानां ब्राह्मणराजन्ययोः वैश्यस्य च त्रिभिर्वेदैर्विधीयते ।

End. कर्म्मणि लौकिकः सम्पद्यते । यथा समारूढे ॥

Colophon. इति सामान्यसूत्रं ।

विषयः । यज्ञव्याख्यानं ।

No. 1522. वाद्‌रायणप्रश्नः, सटीकः ।

Substance, country-made paper, 11¾ × 6 inches. Folia, 12. Lines, 10—11—12 on a page. Extent, 350 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Vádaráyaṇa-prasna. On the span of animal life and on divination by means of putting questions to persons whose future life has to be foretold. By Vádaráyaṇa who does not appear to be the same with Vyása. Attached to the text is a commentary by Bhaṭṭotpala.

Beginning. (मू॰) । पूर्व्वं परीच्यमन्यत् पश्चात् शुभाशुभं पुंसां ।
जगद्‌भ्युद्य तमखिलं करोति किं प्राप्तकालस्य ॥
(टी॰) । केशाजार्कनिशाकरच्छितिजविज्जीवा + + सूर्य्यजान्
विघ्नशं खगुरुं प्रणम्य शिरसा देवीञ्च वागीश्वरीं
प्रश्नेऽस्मिन् मुनिवाद्‌रायणकृते स्पष्टार्थसम्पत्तये
शिष्याणां हितकाम्यया द्विजवरष्टीकां करोत्युत्पलः ॥

End. (मू॰) । लग्नैकादशमे पापौ पृच्छकस्य धनं भवेत् ।
तिष्ठति शुभसहितश्चेत् तदापि वृद्धिं वदेन्महतां ॥ २६ ॥

Colophon. इति श्रीवाद्‌रायणप्रश्नविद्या समाप्ता ।
(टी॰) । चिन्तामणीति विख्याता टीकेयं शास्त्रवल्लभा ।
अनुष्टुभांशजीन्यस्याः(?) मत्वमाम(?)मुदीरितं ॥ ४ ॥
इति उत्पलाचार्य्यविकृता वाद्‌रायणप्रश्नटीका समाप्ता ।

विषयः । अत्र प्रथमं मनुष्यगोमहिषादीनां आयुःमङ्ख्याकथनं । ततः प्रश्नगणनया लाभालाभसुखदुःखजयपराजयजीवितमरणादिज्ञानकथनं ।

No. 1523. उपदेशसूत्रविवृतिः ।

Substance, country-made paper, 11¾ × 6 inches. Folia, 36. Lines, 10—11 on a page. Extent, 1,000 s'lokas. Character, Nágara. Date, Sm. 1939. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Upades'a-sútra-vivṛiti. A commentary on the Upades'a Sútra—a treatise on casting nativities and horoscopes, attributed to Jaimini. The commentator's name is not given.

Beginning. पूर्व्वाचार्य्यं नमस्कृत्य जैमिनेः सौत्रजातके ।
आयुर्द्दायोदाहरणं कुर्व्वे बालोपकारकं ॥ १ ॥
अथ श्रीमज्जैमिनिजातकानुसारेणायुर्द्दायादिफलविचारः क्रियते ।

End. लेपलाभपदस्थले भूतं सम्पन्नं तत एव सर्व्वमपि विचारणायेति दिक् ।

Colophon. इत्युपदेशसूत्रे जैमिनीये तृतीयपादविवृतिः ।

विषयः । अत्र जैमिनिजातकगणनानुसारेण बालकस्य आयुर्द्दायायुदाहरणं

No. 1524. कर्म्मप्रकाशवृत्तिः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 32. Lines, 10—11 on a page. Extent, 775 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Karma-prakás'a-vritti. On astrological rules for casting nativities, divination, &c., &c. The MS. is incomplete, and the author's name does not appear. The codex comprises twenty chapters.

Beginning. उद्यत्कोटिदिवाकरद्युतिनिभं रक्ताङ्गरागांशुकं
हस्ते मोदकपाशमङ्कुशधरं वीणात्मगीःसंयुतं ।
ब्रह्मेन्द्रप्रमुखैश्च किन्नरगणैः सिद्धैश्च विद्याधरैः
सेव्यं सततसुखदं गजेन्द्रवदनं वाक्सिद्धिदं तं भजे ॥ १ ॥
गिरीशं दिनेशं गिरं विष्णुरामं गुरुं खिन्दिकं रोमकाचार्य्यवर्यान् ।
प्रणम्याथ कर्म्मप्रकाशस्य वृत्तिं करोमीह बालावबोधाय सम्यक् ॥ २ ॥
नत्वा गिरं गणपतिं ग्रहवर्गमुख्यं तं कर्म्मसाक्षिणमलक्ष्यगुणं गुरुञ्च ।
श्रीखिन्दिकोक्तगुरुताजिकतन्त्रदीपात् कर्म्मप्रकाशमनुदीपकमुद्गिरामि ॥ ३ ॥

End. पर्व्वान्तलग्नाच्च विलोमवृत्त्या यत् स्यात् विलग्नं जनिलग्नमेतत् ।

Colophon. समाप्तिसूचकवाक्यं नास्ति ।

विषयः । अत्र विंशत्यध्यायाः । १मे, राश्यधिकारः । २ये, ग्रहाधिकारः । ३ये, षोड़शयोगाधिकारः । ४र्थे, द्वाविंशत्यहजभावाधिकारः । ५मे, निषेककालाधिकारः । ६ष्ठे, अरिष्टादिकथनं । ७मे, जीवननिर्णयः । ८, शरीरनिर्णयः । ९मे, जन्मदिवसस्य गणनं । १०मे, दशाधिकारः । ११शे, धनाधिकारः । १२शे, शरीरदोषाधिकारः । १३शे, प्रकृत्यधिकारः, अर्थात् परदारादियोगकथनं । १४शे,

प्रत्ययाधिकारः, अर्थात् ग्रहाणां केन्द्रस्थानादिस्थितौ शुभाशुभकथनं। १५शे, कर्म्माधिकारः। १६शे, दरिद्रयोगकथनं। १७शे, सहजाधिकारः। १८शे, पितृमात्रधिकारः। १९शे, स्त्रीजातकाधिकारः। २०शे, प्रकीर्णाधिकारः।

No. 1525. जटापटलदीपिका।

Substance, country-made paper, 8½ × 3½ inches. Folia, 24. Lines, 7 on a page. Extent, 420 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Dr. Rájendralála Mitra. Appearance, new. Prose. Incorrect.

Jaṭápáṭala-dipiká. A commentary on the Jaṭápáṭala, a work on the various mystical modes of writing and reading the hymns of the Rig Veda according to the rules of Hayagríva. (*Vide* No. 1234.) By Dayásaṅkara, son of Dharanídhara Vyávahárika.

Beginning. अपारसंसारसमुद्रमग्नस्वभक्तजन्तूद्धरणे दयालुः।
घृतैकदीक्षः पुरतस्तनोतु शिवः शिवं मे शिवया समेतः॥ १॥
यस्यानुग्रहवशतोऽच्युतादिदेवाः संसिद्धिं विबुधवरोचितां प्रयाताः।
भारत्याः कुवलयपत्रलोचनाया भूत्यै स प्रभवतु मे कृपाकटाक्षः॥ २॥
नत्वा भाष्यकृतः पूर्व्वान् जटापटलदीपिकां।
तनोमि विदुषां प्रीत्यै हयग्रीवमतानुगां॥ ३॥

End. परायातमात्सर्य्यदोषाः कवीन्द्राः कृतिं वीक्ष्य मे सप्रमोदा भवेयुः।
खलास्तोपहासं विधायाथ बाला अवाप्यापि सम्यक् जटाया रहस्यं॥

Colophon. इति श्रीव्यावहारिकोपनामकधरणीधरसूनुना दयाशङ्करेण कृता जटापटलव्याख्या दीपिकाख्या समाप्तिमगात्॥

विषयः। जटापटलस्य व्याख्यानम्।

No. 1526. काव्यप्रकाशादर्शः, वा काव्यप्रकाशटीका।

Substance, country-made yellow paper, 21 × 3½ inches. Folia, 103. Lines, 9—10 on a page. Extent, 1,824 s'lokas. Character, Bengali. Date, Sk. 1777. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kávya-prakás'ádars'a. A commentary on the Kávya-prakás'a,—a treatise on rhetoric. By Mahes'vara Nyáyálaṅkára.

Beginning. मुखैश्चतुर्भिः स्तुवते विधात्रे स्तोत्रे स्तुतीनाञ्च चतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरोऽर्थवर्गान्नमो ददानाय चतुर्भुजाय ॥
दुर्व्याख्याजनितप्रमोहशमनी वैषम्यविध्वंसिनी
वैषद्यादतिरोचनी रसखनी काव्यार्गलोद्घाटिनी ।
टीका विज्ञजनप्रमोदजननी भावार्थचिन्तामनी
भट्टाचार्य्यमहेश्वरेण रचिता काव्यप्रकाशोपरि ॥

End. इदानीमेषां दोषाद्‌ यथायोगमिति । कारिकार्थमुपसंहृत्य दर्शयति तदेते इति ।

Colophon. इति श्रीमहेश्वरन्यायालङ्कारभट्टाचार्य्यकृते काव्यप्रकाशादर्शे दशमोऽर्थालङ्कार-प्रतिविम्बः । समाप्तश्चायं ग्रन्थः ।

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1527. काव्यप्रकाशटीका ।

Substance, country-made yellow paper, 17 × 3 inches. Folia, 58. Lines, 6 on a page. Extent, 1,966 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kávyaprakás'a-ṭíká. A commentary on the Kávyaprakás'a. By Gadádhara Chakravartti Bhaṭṭáchárya. The codex is a mere fragment.

Beginning. ग्रन्थारम्भे कर्त्तव्ये इति शेषः। तेन ग्रन्थारम्भपूर्व्वकाले परामृशतीति लभ्यते ।

End. अभेदे विषयविषयिभावरूपसम्बन्धासम्भवादत आह स्वाकार इवाभिन्नोऽपीति (इतः खण्डितं ।)

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1528. यजुर्वेदिकुशण्डिका ।

Substance, country-made yellow paper, 17 × 3¾ inches. Folia, 7. Lines, 8 on a page. Extent, 196 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Yajurvedi-kushaṇḍiká. A manual for the performance of the fire sacrifice as a part of the nuptial ceremony, according to the canons of the Yajur Veda. By Pas'upati Bhaṭṭa. The author was a minister of Lakshmaṇa Sena of Gaur, and flourished in the beginning of the twelfth century.

Beginning. अथ यजुर्व्वेदिनां दशकर्म्मपद्धतिर्लिख्यते । तत्रादौ होमकुशण्डिका ।

End. इतिमन्त्रेण तिलकं दद्यात् ।

Colophon. इति यजुर्व्वेदिकुशण्डिका समाप्ता ।

विषयः । यजुर्व्वेदोक्तं वह्निस्थापनविधानं ।

No. 1529. स्तवमाला ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 40. Lines, 15—18 on a page. Extent, 2,300 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Stava-málá. A series of hymns in praise of Kṛishṇa and Rádhá. By Rúpa Gos'vámí, one of the associates of Chaitanya.

Beginning. श्रीमदीश्वररूपेण रसामृतकृताकृता ।
स्तवमालानुजीवेन जीवेन समग्रह्यत ॥
पूर्व्वं चैतन्यदेवस्य कृष्णदेवस्य तत् परं ।
श्रीराधायास्ततः कृष्णराधयोर्लिख्यते स्तवः ।

End. इति श्रीकृष्णनामस्तोत्रं समाप्तं ।

Colophon. इति श्रीरूपगोस्वामिना कृता स्तवमाला समाप्ता ।

विषयः । कृष्णराधिकयोः स्तुतिकथनं ।

No. 1530. वर्षकौमुदी ।

Substance, country-made yellow paper, $23 \times 4\frac{1}{4}$ inches. Folia, 151. Lines, 8—9 on a page. Extent, 5,738 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Varsha-kaumudí. A liturgical calendar, describing the various religious duties enjoined for each day of a lunar year. By Govindánanda Ácharya.

Beginning. चिन्ताश्मीयति धातरि व्रजवधूचित्तेषु पाशीयति
श्रीवाजिस्तवति(?) प्रसादविद्दितश्यामाम्बुजन्मीयति ।
यन्नेत्राञ्जनचातुरी जलधिजा वक्त्राम्बुजेऽलीयति
क्षौणीभारहराय यादवकुलोत्तंसाय तस्मै नमः ॥
धुनोतु ध्वान्तमस्माकमन्तश्चिन्ताभिसम्भृतं ।
गोविन्दवदनोद्भूतपाञ्चजन्यजयध्वनिः ॥
येनाद्यातिष(?)पङ्कजेषु नितरां मार्त्तण्डविद्राधितुं (?)
श्रीगोविन्दपदारविन्दयुगलैर्नलोमबालायितं (?) ।
वेदान्तस्मृतिसन्ततित्रिपथगोन्मेषे हि माचीयितं
केषां नोपविशीलितो गणपतिभट्टः सतां द्दग्विधः ॥
तत्तनुजन्मा विदुषामनुरागमधूनिकाभिवासिक्तः ।
मधुरिपुपदारविन्दश्रद्धामृतमाधुरीरसाभिज्ञः ॥
आलोच्याखिलसङ्ग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यग् गाथा विविच्य मुनिभिः + + + + संहिता ।
श्रीमत्तातपदारविन्दविलसत् + लीभवोद्देशतः
श्रीगोविन्दकविः करोति ललितां वर्षक्रियाकौमुदीं ॥

End. सर्व्वान्तर्यामिने तस्मै गोविन्दाय नमो नमः ।
यत्कृपा विदुषामस्यामनुरागप्रवर्त्तिनी ॥ १ ॥

Colophon. इति श्रीगोविन्दानन्दाचार्य्यकृता वर्षकौमुदी समाप्ता ।

विषयः । प्रथमं तिथिनिरूपणं । ततः तिथ्योर्युग्मकथनं । उभयदिने तिथिलाभे शुक्लकृष्णभेदेन व्यवस्थानिरूपणं । प्रतिपदादिपञ्चदशतिथिकृत्यकथनञ्च । ततो ग्रहणे पारणव्यवस्थाकथनं । ग्रहणकर्त्तव्यकर्म्मनिरूपणञ्च । ततो गोविन्दादिदेवतापूजाविधिकथनं । ततः सङ्क्रान्तिविवेचनं, सङ्क्रान्तिव्रतकथनञ्च । ततो मासपदार्थनिरूपणं । ततः पक्षपदार्थनिरूपणं । ततो वैशाखादिद्वादशमासकृत्यनिरूपणं । ततो गङ्गातुलसीशालग्रामानां माहात्म्यकथनं । ततः सूतिकाषष्ठीपूजाविधिप्रयोगकथनं । ततो मङ्गलचण्डिकापूजाविधिप्रयोगकथनं । ततो जन्मतिथिकृत्यं, अनध्यायकथनञ्च । ततः शूद्राणां विधवानां पतिव्रतानाञ्च धर्म्मकथनं ॥

No. 1531. विधिवादटीका ।

Substance, country-made yellow paper, 19½ × 3½ inches. Folia, 32. Lines, 8—9 on a page. Extent, 1,312 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Corrected.

Vidhiváda-ṭíká. A commentary on Gaṅges'a's chapter on religious injunction, in the S'abdakhaṇḍa of his Chintámaṇi. By Mathuránátha Tarkavágís'a.

Beginning. उच्छन्नप्रच्छन्नग्रन्थे वेदस्याचारमूलकत्वनिरूपणानन्तरं प्रवर्त्तकज्ञानं निरूपयितुं प्रवर्त्तकज्ञाने आचारमूलत्वस्य उपपादकत्वरूपोपोद्घातसङ्गतिं दर्शयन् शिष्यावधानाय प्रतिजानीते आचारेति ।

End. पाकादावनागतपाकादौ सिद्धासिद्धेति उक्तं इतः परं खण्डितं ।

विषयः । गङ्गेशोपाध्यायकृतविधिवादस्य व्याख्यानं ।

No. 1532. भाषारत्नं ।

Substance, country-made yellow paper, 18 × 4 inches. Folia, 53. Lines, 5—6—7 on a page. Extent, 1,784 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bháshá-ratna. An elementary treatise on the seven categories of the Mímáñsá. By Kanáda Tarkavágís'a Bhaṭṭácharya.

Beginning. चूडामणिपदाम्भोजभ्रमरीभूतमौलिना ।
सङ्क्षिप्य श्रीकणादेन भाषारत्नं वितन्यते ॥

End. यथा गङ्गायां घोष इत्यादौ तीरे संयोगरूपः शक्त्या प्रवाहसम्बन्ध इति सङ्क्षेपः।

Colophon. इति श्रीकणादतर्कवागीशभट्टाचार्य्यविरचितं भाषारत्नं समाप्तम् ।

विषयः । वैशेषिकमतसिद्धद्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावात्मकसप्तपदार्थनिरूपणं ।

No. 1533. रामलीलामृतं, चतुर्थसर्गमात्रं ।

Substance, country-made paper, 16 × 3½ inches. Folia, 10. Lines, 5 on a page. Extent, 162 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Rámalílámṛita. A poem on the career of Ráma. By Krishṇamohana. The codex contains only a part of the fourth book.

Beginning. येषा वचसि मस्तके च नियतं योऽप्यर्द्धनारीमयः
भक्त्यालिङ्गितलिङ्गपूजनमहानन्दोऽपि कामान्तकः ।
तन्नैकाजिरतापरा(?) त्रिपथगा तत्पुङ्गतायाम्वता(?)
दाता पूज्यतमो विचित्रचरितो भीमोऽत्यभीमोऽवतात् ॥

End. ० ० ०

Colophon. इति श्रीकृष्णमोहनकृतश्रीरामलीलामृते चतुर्थः सर्गः ।

विषयः । रामलीलावर्णनं ॥

No. 1534. रामलीलामृतक्रमदीपिका, वा रामलीलामृतटीका चतुर्थसर्गीया ।

Substance, country-made yellow paper, 16 × 3½ inches. Folia, 13. Lines, 6—10 on a page. Extent, 584 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Rámalílámṛita-krama-dípiká. A commentary on the last named work, by the author himself. Like the text, the commentary comprises only the fourth book.

Beginning. इह सर्गे चित्रकाव्यविवक्षया श्रीमहादेवचरितस्य चित्रत्वं कीर्त्तयन् मङ्गलमाचरति भक्त्या इत्यादिः ।

End. ० ० ०

Colophon. इति श्रीकृष्णमोहनकृतश्रीरामलीलामृतक्रमदीपिकानामकटीकायां चतुर्थः सर्गः ।

विषयः । रामलीलामृतस्य व्याख्यानं ।

No. 1535. दशश्लोकी ।

Substance, country-made yellow paper, 13½ × 3 inches. Folium, 1. Lines, 7. Extent, 10 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Das'a-s'lokí. Ten stanzas on the essence of the Vedánta doctrine. By S'añkara Áchárya. Mr. Hall takes *Das'a-s'lokí* to be the name of the text, and *Siddhántavindu* to be the name of a commentary on it by Madhusúdana Sarasvatí, (*Contributions*, p. 108); but the MS. before me denies this, and takes the latter to be the name of the text, and at first sight, it appears to be correct. The former, meaning simply "ten stanzas," can scarcely be the original name of a poetical work, and *Siddhánta-vindu*, or "conclusion in a drop," would be a very appropriate poetical designation for a work which in the space of ten stanzas gives the substance of the Vedánta philosophy. In the codex of the commentary belonging to the Sanskrit College of Calcutta, it is, however, distinctly mentioned that S'añkara wrote the *Das'a-s'loki* (श्रीशङ्करो दश-श्लोकीं प्रणिनाय। अतः प्रत्ययस्यालम्बनविशेषनिर्णयाय आह भगवान् आचार्य्यः न भूमिरिति।) and Madhusúdana was the author of the commentary. Its colophon says, "this is the end of the work named Siddhánta-vindu, composed by Madhusúdana Sarasvatí." (इति श्रीमधुसूदनसरस्वतीविरचितः सिद्धान्त-विन्दुनामग्रन्थः समाप्तः) Pandit Táránátha Váchaspatí published an abstract of the commentary under the name of Siddhánta-vindusára. Brahmánanda Sarasvatí is the author of a second commentary on the text.

Beginning. न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात् सुषुप्त्यैकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहं॥

End. न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्व्ववेदान्तसिद्धं ब्रवीमि।

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं सिद्धान्तविन्दु समाप्तम्।

विषयः। दशभिः श्लोकैः पृथिव्यादिपदार्थानां मिथ्यात्वव्यवस्थापनपूर्व्वकं परमात्मनः सत्यत्वव्यवस्थापनं।

No. 1536. अभिषेकपद्धतिः।

Substance, country-made yellow paper, 15 × 2¾ inches. Folia, 6. Lines, 8 on a page. Extent, 171 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Abhisheka-paddhati. A manual for the consecration of S'ákta divinities and the ordination of S'ákta neophytes. Anonymous.

Beginning. (प्रथमपत्रं नास्ति।)

End. कृतार्थमात्मानं मन्यमानो मातृकाः साधकांश्च सन्तोष्य विदुष्याच्छिद्रावधारण-वचनं कुर्य्यात् ।

Colophon. इत्यभिषेकपद्धतिः ।

विषयः । अत्र प्रथमं मालासंस्कारः । ततः कवचसंस्कारः । ततः शाक्ताभिषेककथनं । ततः पूर्णाभिषेककथनं ।

No. 1537. शक्तिवादः ।

Substance, country-made paper, 17 × 3 inches. Folia, 15. Lines, 7 on page. Extent, 841 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'aktiváda alias *S'aktivichára*. A philosophical disquisition on the powers of words, or the relation between their sounds and senses. The MS. is incomplete, and the author's name does not occur in it; but the name is Gadádhara Nyáyasiddhántavágís'a Bhaṭṭáchárya. Hall's *Contributions*, p. 56.

Beginning. शक्तिलक्षणे पदवृत्ती वृत्त्या पदप्रतिपाद्य एव पदार्थः इत्यभिधीयते तत्र शक्तिविषयो वाच्यः, स एव पदार्थो मुख्यार्थः अथ केयं शक्तिः अत्र नैयायिकाः अस्माच्छब्दादयमर्थो बोद्धव्य इति परमेश्वरसङ्केतः शक्तिः ।

End. इदन्तु तत्त्वं अहं पण्डित इति जानाति इत्युवाच इत्यादिस्थले । इतः परं खण्डितं ।

विषयः । पदानां अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरसङ्केतरूपशक्तिनिरूपणं ।

No. 1538. अपूर्ववादरहस्यं ।

Substance, country-made paper, 16 × 2½ inches. Folia, 29. Lines, 7 on a page. Extent, 989 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Apurva-váda-rahasya. A commentary on the chapter on the use of the imperative mood in Vedic injunctions and the rewards of religious rites in the *S'abda Khaṇḍa* of the *Chintámaṇi* of Gaṅges'a. By Raghunátha Siromaṇí. Mr. Hall apparently takes the Apurva-váda to be an independent work on the moral relation of cause and effect. *Contributions*, p. 190.

Beginning. प्रथमं दशपत्राणि न सन्ति ।

End. यथा विश्वजिता यजेतेत्यादाविति ।

Colophon. इति शब्दपरिच्छेदरहस्ये अपूर्व्ववादरहस्यं समाप्तं ।

विषयः । गङ्गेशोपाध्यायकृतापूर्व्ववादस्य व्याख्यानं ।

No. 1539. शुद्ध्यादिसङ्ग्रहः ।

Substance, country-made yellow paper, 16¾ × 3 inches. Folia, 115. Lines, 6 on a page. Extent, 3,924 s'lokas. Character, Bengali. Date, Sk. 1733. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'uddh-yádi-sangraha. A compilation on purification, mourning and S'ráddha. Anonymous.

Beginning. व्रजशिशुवृन्दवयस्यं सततमुपास्यं विरिञ्च्याद्यैः ।

वेदविदितरहस्यं गिरीशनमस्यं नमस्यामः ॥

अथ शुद्धिव्यवस्थायां सङ्क्षेपः ।

End. वाग्दत्तायाः कन्यायाः कुमारीवद्विवाहः ।

Colophon. इति श्रीमतां सङ्क्षेपः ।

विषयः । प्रथमं शुद्धिव्यवस्थाकथनं । ततः श्राद्धव्यवस्थाकथनं । ततः तिथिव्यवस्थाकथनं । ततः प्रायश्चित्तव्यवस्थाकथनं । तत उद्वाहव्यवस्थाकथनं ।

No. 1540. सेतुसङ्ग्रहः ।

Substance, country-made yellow paper, 17¾ × 5½ inches. Folia, 300. Lines, 8—9 on a page. Extent, 10,200 s'lokas. Character, Bengali. Date, Sk. 1766. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Setu-sangraha. Annotations on the Mugdhabodha grammar of Vopadeva. By Gangádhara, son of S'ivaprasáda Tarkapanchánana of Kumárahaṭṭa near Calcutta.

Beginning. गङ्गाधरः शिवं नत्वा कुरुते सेतुसङ्ग्रहं ।

दुर्गम्यमुग्धबोधाख्यसरित्सन्तरणार्थिनां ॥

End. अथशब्दो मङ्गलार्थः तथा च आदावन्ते च मध्ये च मङ्गलाचरणं स्मृतं ।

Colophon. इति कुमारनिवासिश्रीलशिवप्रसादतर्कपञ्चाननात्मजगङ्गाधरकृतदुर्गम्यमुग्धबोधाख्यसरित्सन्तरणहेतुसेतुसङ्ग्रहे इत्यादिपदः । इति कृदन्ताध्यायः ॥

विषयः । मुग्धबोधव्याकरणस्य व्याख्यानं ।

No. 1541. आख्यातविचारः ।

Substance, country-made yellow paper, 21 × 3½ inches. Folia, 16. Lines, 8 on a page. Extent, 760 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

A'khyáta-vichára. A philosophical disquisition on conjugation. By Gadádhara Bhaṭṭáchárya.

Beginning. धातुप्रकृतिकाश्च लकारकृत्तन् यङनिच्प्रभृतयः केचिद्धात्वर्थान्वितमधिकार्थं ब्रुवते ।

End. तस्य विश्वर्थत्वे तत्तात्पर्य्येणाधुनिकानां न भुञ्जीतेत्यादिप्रयोगापत्तिरिति दिक् ।

Colophon. इति महामहोपाध्यायश्रीगदाधरभट्टाचार्य्यकृतआख्यातविचारः समाप्तः ।

विषयः । आख्यातशक्तिनिरूपणं ।

No. 1542. अनुमित्यादिबाधान्तटीका ।

Substance, country-made yellow paper, 19 × 3½ inches. Folia, 336. Lines, 8—9—10—11 on a page. Extent, 15,890 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Anumityádi-bádhánanta-ṭíká. A commentary on a portion of the Anumána Khaṇḍa of Gaṅges'a. By Jagadís'a Nyáyapanchánana.

Beginning. सस्मिताननसरोजमङ्गने रिङ्गमानमतिलोलकुण्डलं ।
रोचनोल्लसितभालमस्तु मे कैशवं शैशवं वपुः ॥
प्राचैरनुचितविविधचोद्यैः कलुषीकृतोऽप्यधुना
दीधितियुतमणिरेषः श्रीजगदीशप्रकाशितः स्फुरतु ।

End. तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन समानप्रकारकतया तथात्वं तत्तद्व्याप्तिमात्रघटत्वज्ञानन्तधर्म्मान्तर्भावेनानन्तहेतुत्वकल्पः । पुस्तकमिदं सम्पूर्णप्रायं ।

विषयः । अनुमित्यादिबाधान्तदीधितिव्याख्यानं ।

No. 1543. न्यायवार्त्तिकतात्पर्य्यटीका ।

Substance, country-made paper, 13¾ × 5½ inches. Folia, 99. Lines, 10 on a page. Extent, 2,138 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Nyáya-vártika-tátparya-ṭíká. A commentary on the Nyáya-vártika of Udyotakara. By Váchaspati Mís'ra, disciple of Martaṇḍa-tilaka Svámin. Hall's *Contributions*, p. 21.

Beginning. परीक्षानन्तरमुपदेशक्रमानुरोधेन प्रवृत्तिः ? परीक्षितुं युक्ता सा कस्मान्न परीक्ष्यत इति शङ्कानिराकरणाय सूत्रमित्याह । मनसोऽनन्तरेति ।

End. कराः कृतोऽञ्जलिरयं बलिरेष दत्तः कायो मणाप्रहताच(?) यथाभिलाषम् । अभ्यर्थये वितथनप्रपयांश्च(?) वर्षे मा माविलीकुरुत कीर्त्तिनदीः परेषाम् ॥

Colophon. इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां पञ्चमोऽध्यायः समाप्तः ॥

विषयः । उद्योतकरविरचितन्यायवार्त्तिकतात्पर्यग्रन्थव्याख्यानं ।

No. 1544. शब्दशक्तिप्रकाशिकाप्रबोधिनी ।

Substance, country-made paper, 16 × 4¼ inches. Folia, 33. Lines, 10 on a page. Extent, 1,237 s'lokas. Character, Bengali. Date, Sk. 1754. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'abdas'akti-prakás'iká-prabodhiní. A commentary on the S'abdas'akti prakás'iká of Jagadís'a Tarkálankára. By Rámabhadra Siddhánta vágís'a. Hall's *Contributions*, p. 55.

Beginning. विश्वतात जगन्मातरेवं गौरीगिरीशयोः ।
मिथः सम्भाषया स्वैरं हेरम्बं समुपास्महे ॥
गुरुमिव गुरुमिह नत्वा तत्कृतशक्तिप्रकाशेषु ।
श्रीरामभद्रकृती कुरुते टीकां मुदे सुधियः ॥
शब्दशक्तीति । शब्दस्य शक्तिर्बोधसामर्थ्यं तत्प्रकाशिकेत्यर्थः ।

End. इत्यादौ चाभावस्य संशयकोटितयानुभवस्य बाधितत्वादित्याशयेनाङ्करित्युक्ताऽस्वरसो व्यञ्जितः ।

Colophon. इत्यन्तं प्रचरन्ती शब्दशक्तिप्रकाशिकाप्रबोधिनी श्रीरामभद्रसिद्धान्तवागीशविर-चिता । श्रीविष्णुचरणाब्जे तु मनोऽलिर्मेऽस्तु नित्यशः ॥

विषयः । शब्दशक्तिप्रकाशिकाव्याख्यानं ।

No. 1545. चिन्तामणिप्रकाशः । प्रत्यक्षखण्डः ।

Substance, country-made paper, 8 × 3 inches. Folia, 153. Lines, 12—13—14 on a page. Extent, 9,446 s'lokas. Character, Nágara. Date, Sk. 1633. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Chintámaṇi-prakás'a. A commentary on the *Chintámaṇi* of *Gaṅge-s'a.* By Ruchidatta Mahámahopádhyáya. The MS. is incomplete and limited to the *Pratyaksha Khaṇḍa.* This work is distinct from Jayadeva's *Maṇyáloka* which has the alternative title of Chintámaṇi-prakás'a.

Beginning. कृष्णोत्तरच्छदपटार्द्धकृतान्तरालमुक्तालनिश्वसितनुन्नपयोधराग्रं ।
इन्दौ स्फुटागसि विभिन्नतनोस्तनोतु सुप्तं वृषा शयनसीम्नि शिवं शिवायाः ॥
अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरोः ।
चिन्तामणौ ग्रन्थमणौ प्रकाशोऽयं प्रकाश्यते ॥
प्रारिप्सितविघ्नविनाशाय कृतं मनस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति ।
गुणातीत इति ।

End. प्रश्नेति—पदात् पदार्थस्मरणं प्रश्नष्टवक्ताकमेति तन्न तत्रोल्लेखिस्मरणाभिप्राये-णैवाऊरिति । श्रीः ।

Colophon. इति श्रीमहामहोपाध्यायरुचिदत्तविरचितचिन्तामणिप्रत्यक्षखण्डप्रकाशः समाप्तः।
सोदरनगरनिवासी रुचिदत्तः सूरिमूर्द्धन्यः ।
चिन्तामणिप्रकाशं व्यरचयदान्वीक्षिकीकोशं ॥
शके १६३३ । आश्विने मासि ।

विषयः । गङ्गेशोपाध्यायकृतचिन्तामणिप्रत्यक्षखण्डस्य व्याख्यानं ।

No. 1546. चिन्तामणिप्रकाशः, अनुमानखण्डः ।

Substance, country-made paper, 8 × 3 inches. Folia, 148. Lines, 12 on a page. Extent, 4,301 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Chintámaṇi-prakás'a. The first volume of the work noticed under the last preceding No. It explains the Anumána Khaṇḍa of Gaṅges'a.

Beginning. प्रणयकलहकेलिभीषणं भीतिहेतोः प्रकटयति समन्तान्मायया कायमस्मिन् ।
समयमथ भवान्या गाढमालिङ्ग्यमानो घटयतु घनविघ्नध्वंसमस्माकमीशः ॥
निशम्य सकलं शास्त्रं नानागुरुमुखाम्बुजात् ।
अनुमानप्रकाशोऽयं रुचिदत्तेन तन्यते ॥
सङ्गतिं दर्शयन्नेव शिष्यावधानार्थमिदानीमनुमाननिरूपणं क्रियते,—इति प्रतिजानीते,—प्रत्यक्षेति ।

End. ईश्वरोपगृहीतशरीरस्य कारणत्वादिति भावः। असिद्धेरिति, अप्रसिद्धेरित्यर्थः। अन्यहेतुमाह, अदृष्टेति। तथा च सर्व्वासङ्ग्रह इति भावः। वाद्यन्तरमतं दूषयति, नापीति। द्वितीयपक्षे दोषमाह घटादेरिति अतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । गङ्गेशोपाध्यायकृतचिन्तामण्यनुमानखण्डस्य ईश्वरानुमानप्रकरणं यावद् व्याख्यानं ।

No. 1547. प्रत्यक्षमणिदीधितिव्याख्याविवेचनं ।

Substance, country-made paper, 10 × 4 inches. Folia, 126. Lines, 8—9 on a page. Extent, 2,687 s'lokas. Character, Nágara. Date, Sм. 1670. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pratyaksha-maṇididhiti-vyákhyá-vivechana. An exposition of Raghunátha's commentary on the *Pratyaksha Khaṇḍa* of Gaṅges'a. By Rudra Nyáyaváchaspati.

Beginning. अनिर्व्वाच्यगुणग्राममनानताशेषकामदं ।
चिराय चिन्मयं + न प्रणम्याहमुपास्महे ॥
विद्यानिवासपुत्त्रस्य न्यायवाचस्पतेरियं ।
निर्म्मितिर्निर्म्मलधियामानन्दयतु मानसं ॥
प्रेक्षावदिति । प्रेक्षावत्प्रवृत्तये प्रयोजनवत्तामभिधेयसम्बन्धौ च—

End. अन्यथा तत्रापि विशिष्टज्ञानधामयेव प्रवृत्तौ हेतुः स्यादतोऽपि चेति । श्रीः ।

Colophon. इति श्रीमद्विविधपण्डितमण्डलीमुकुटमणिश्रीरुद्रन्यायवाचस्पतिभट्टाचार्य्यविरचितश्रीमहामहोपाध्यायभट्टाचार्य्यशिरोमणिप्रकाशितप्रत्यक्षमणिदीधितिव्याख्याविवेचनं सम्पूर्णतामगमत् । संवत् १६७० । आश्विने ।

विषयः। रघुनाथशिरोमणिकृतप्रत्यक्षचिन्तामणिदीधितिनामकटीकायाः व्याख्यानं।

No. 1548. मण्यालोकदर्पणं।

Substance, country-made paper, 9 × 3½ inches. Folia, 221. Lines, 11—12 on a page. Extent, 3,390 s'lokas. Character, Nágara. Date, Sm. 1669. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Maṇyáloka-darpaṇa. Annotations on the *Maṇyáloka* of Jayadeva Mis'ra. By Mahes'a Ṭhakkura. The MS. is limited to the *Pratyaksha Khaṇḍa.*

Beginning. शङ्करजगदम्बिकयोरङ्के पङ्केन खेलन्तं।

लम्बोदरमवलम्बे सम्बेरमराजचारुमुखं॥

पुंसामार्त्तिभिदे कलानिधिकुलोत्तंसाय संसारभी-

विध्वंसाय मुनीन्द्रमानससरोहंसाय कंसारये।

चञ्चालम्बितशिक्यमुज्ज्वलरुचिं गुञ्जावतंसादिना

यं साशङ्कमुपागमत् कमलभूः कृष्णाय तुभ्यं नमः॥

चतुर्भिरास्यैश्चतुरोऽपि वेदानुच्चारयन्नक्रमतो विरिञ्चिः।

पाठाग्रपश्या + विशेषमीष(?) मन्तोषिशिष्यः शिवमातनोतु॥

हृतेनावनतिं (?) महीधरसुता भागावरुद्धं शिरो

नैवोद्धाति चारुसान्त्वनवचो मूकायिताद्धें मुखे।

आश्लेषेऽपि यथोचितं न हि भवत्येकाकिना बाहुना

मामव्यादिति विक्लवः प्रियतमामानापनोदे शिवः॥

धनाय पद्मां भविकाय दुर्गां मृडाय गौरीमितरे श्रयन्तु।

अहं महानन्दपदस्य धात्रीं विद्याविधात्रीं गिरमाश्रितोऽस्मि॥

गौर्य्या गिरीशादिव कार्त्तिकेयो यो धीरया चन्द्रपतेरलम्भि।

आलोकमुद्दीपयितुं नवीनं स दर्पणं व्यातनुते महेशः॥

अत्र श्लोकानां व्याख्या टीकाकृता सुगमत्वात् (न) कृता सा चैवं। प्रारीप्सित-प्रतिबन्धकविघ्नविघातकं पुरभिन्नमस्कारूपं मङ्गलं शिष्यशिक्षायै निबध्नाति गुणेति।

End. प्रमुष्टेति। तथा चायथार्थत्वमौत्सर्गिकमिति भावः। तत्रोल्लेखिस्मरणमभि-प्रेत्याह,—तदाहुरिति। तत्रेदन्ताविचारः समाप्तः॥

विधाय विदुषां प्रीत्यै प्रत्यक्षालोकदर्पणं ।
श्रीगोपाले महेशेन तस्याकारि समर्पणं ॥

Colophon. इति श्रीमहेशठक्कुरविरचिते आलोकदर्पणे प्रत्यक्षखण्डः समाप्तः ।
संवत्। १६६९। श्रावणवदि २ रा।

विषयः । जयदेवमिश्रकृतप्रत्यक्षचिन्तामण्यालोकटीकाया व्याख्यानं ।

No. 1549. आगमकौमुदी ।

Substance, palm-leaf, 18 × 1½ inches. Folia, 112. Lines, 4 on a page, Extent, 1,848 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

A'gama-Kaumudí. A compilation from different Tantras on the S'ákta cult, giving a brief exposition of its principles and supplying all the principal mantras for the worship of S'ákta divinities. By Rámakṛishṇa.

Beginning. सर्व्वमन्त्रसमाराध्यं कृष्णं न्यस्य हृदम्बुजे ।
तन्यते रामकृष्णेन श्रीमदागमकौमुदी ॥

End. झटित्यारोग्यदा विद्या चिरजीवनुकारिणी ।
धनसम्पत्प्रदा चैव शत्रोराशुविनाशिनी ॥
इति प्रत्यङ्गिराप्रकरणं ।

Colophon. इति महामहोपाध्यायश्रीरामकृष्णकृता आगमकौमुदी समाप्ता ॥

विषयः । अत्र प्रथमं अकथहचक्र-नक्षत्रचक्र-राशिचक्र-भूतचक्र-नाड़ीचक्र-अकडमचक्र-जातिचक्र-ऋणिधनिचक्राणि। ततः अदीक्षितपुरुषप्रशुलक्षणं गुरुलक्षणञ्च । ततः पञ्चदेवतापूजा स्त्रीशूद्रयोः प्रणवरहितमन्त्रदानञ्च। ततः शूद्रस्य मन्त्रदाननिषेधः सिद्धमन्त्रे विचाराभावकथनं । दीक्षायां चान्द्रशौरविचारः। हरचक्रं चक्रशुद्धिप्रकरणञ्च । मन्त्राणां दशविधसंस्कारः। दीक्षाप्रकरणं। षट्चक्रकथनं। प्राणायामः। मातृकान्यासः। कराङ्गन्यासः। आधारशक्तिध्यानं। अर्घ्यस्थापणं। प्राणप्रतिष्ठा। आवाहनमुद्रा। शिवपूजाप्रकरणं। स्वाहास्वधाविचारः। नैवेद्यनिवेदनमन्त्राः। जपसमर्पणमन्त्राः। मालालक्षणं। जपलक्षणं। मालासंस्कारः। प्रणामलक्षणं। मन्त्रग्रहणविधिः। उपदेशप्रकरणं पुरश्चरणविधिः। रामकृष्णगोपालानां मन्त्राः, तङ्गायत्री च। लक्ष्मीसरस्वती-

शिवानां मन्त्राः, काल्यादिशक्तिमन्त्राश्च। दुर्गामन्त्राः। भुवनेश्वरीमन्त्राः। मन्त्रभेदाः। मालामन्त्राः। सुन्दरीमन्त्राः। तारामन्त्राः। श्यामामन्त्राः। अनिरुद्धमन्त्राः। प्रचण्डचण्डिकामन्त्राः। गणेशमन्त्राः। उपविद्या। योगिनीमन्त्राः। मृत्युञ्जयमन्त्राः। कर्णपिशाचीमन्त्राः। हनूमतो मन्त्राः। गरुडमन्त्राः। यन्त्रसंस्कारः। मन्त्रगायत्री। जपप्रकरणं। भूमौ मालापतनजनितदोषाः। वैष्णवादौ जपनिषेधः। प्रकीर्णकथनं। प्रत्यङ्गिराकथनञ्च॥

No. 1550. शुद्ध्यादिव्यवस्थासङ्क्षेपः।

Substance, palm-leaf, 20 × 1½ inches. Folia, 131. Lines, 4—5 on a page. Extent, 2,423 s'lokas. Character, Bengali. Date, Sk. 1610. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

S'uddhyádi-vyavasthá-sankshepa. An elaborate treatise on funerals, mournings, Sráddha, s'ati, and impurity of the person arising from birth in one's family and other causes, as also on certain religious rites to be performed on particular lunar days, and on the determination of the particular moments when such rites should be observed. By Chintámaṇi Nyayvágis'a Bhaṭṭáchárya of Gaur. The work professes to be a part of a comprehensive digest of civil and canonical law, which bore the title of *Smṛiti-vyavasthá.* No complete MS. of this digest has as yet been met with.

Beginning. ॐ नमः श्रीपरमदेवतायै। अथ शुद्ध्यादिव्यवस्थासङ्क्षेपः। तत्रादौ शुद्धिपदार्थो निरूप्यते। तत्र विहितकर्म्मार्हत्वप्रयोजको धर्म्मविशेषः शुद्धिः।

End. एतासु पौर्णमास्यन्तमासो ग्राह्य इति तिथिव्यवस्था सम्पूर्णा।

Colophon. इति गौड़देशनिवासिमहामहोपाध्यायश्रीचिन्तामणिन्यायवागीशभट्टाचार्य्यकृतौ स्मृतिव्यवस्थायां शुद्ध्यादितिथ्यन्तसङ्क्षेपः समाप्तः।

शाके हरित् षोड़शकेऽर्कवारे पचे वलचे दिवसे तु ++।

सारं स्मृतीनां मधुमासि विद्वान् श्रीमान् प्रसादो व्यलिखत्त्वरावान्॥

यत्राङ्काः १६१०।

विषयः। शुद्धिलक्षणं। सहमरणानुमरणयोर्व्यवस्था। अनयोरशौचसङ्करकथनं। अतिक्रान्ताशौचव्यवस्था। अशौचविधिनिषेधौ। अशौचसङ्करकथनं। गर्भस्रावाशौचं। स्त्र्यशौचं। बालाद्यशौचं विदेशस्थाशौचं। सपिण्डाद्यशौचं। अशौच-

विषयः। वर्ज्यावर्ज्यनिरूपणं। मातामहाद्यशौचं। मृत्युविशेषाशौचं। शौचापवादः शवानुगमनाशौचं। अस्थिसञ्चयकथनं। अङ्गस्पर्शनकथनं। गङ्गायामस्थिक्षेपविधिः। द्रव्यशुद्धिकथनं। वापीकूपतड़ागेषु मृते जलशुद्धिनिरूपणं। गृहमरणे तच्छुद्धिकथनं। सूतिकादिमरणे दाहव्यवस्था। पर्णनरदाहव्यवस्था। मुमूर्षुकृत्यं। प्रेततर्पणविधिः। पुत्रस्य वर्षमध्ये कृत्यनिरूपणं। पिण्डदानव्यवस्था। अशौचान्तिमदिनकृत्यं। अशौचान्तद्वितीयदिनकृत्यं। वृषोत्सर्गकालनिरूपणं। वृषलक्षणं। प्रेतक्रियाधिकारिणः। स्त्रियाः श्राद्धाधिकारिणः। सामान्यतोऽनधिकारिणः। दत्तकपुत्रग्रहणविधिः। तदशौचादिनिरूपणं। पूर्व्वामध्यमोत्तराभेदेन मृतक्रियायास्त्रैविध्यकीर्त्तनं। उभयमुखीदानं। विपुलगृहदानं। श्राद्धलक्षणं। देवतालक्षणं। यागलक्षणं। साहित्यलक्षणं। तन्त्रतालक्षणं। नवान्नश्राद्धकालः। मघात्रयोदशीश्राद्धविधिः। अश्वयुक्कृष्णपक्षनिमित्तकश्राद्धकथनं। शस्त्रादिहतानां चतुर्द्दशीश्राद्धकथनं। अष्टकाश्राद्धकथनं। श्राद्धवेलानिरूपणं। मलमासकर्त्तव्यकर्म्मनिरूपणं। लम्भितावर्द्धमानाद्यमावस्याश्राद्धकालनिरूपणं। पार्व्वणव्यवस्था। निमन्त्रणविधिः। दर्भकथनं। श्राद्धशेषभोजने नियमकथनं। आमश्राद्धव्यवस्था। जीवत्पितृकस्य श्राद्धव्यवस्था। मासिकषाण्मासिककालकथनं। सपिण्डीकरणविधिः। तदपकर्षव्यवस्था। विघ्नपतितादिश्राद्धकालकथणं। एकोद्दिष्टकालः। अम्बुघटश्राद्धकथनं। त्रिदण्डिसन्न्यासिनां मरणे तस्य पूर्व्वाश्रमपुत्रकृत्यनिरूपणं। सपिण्डीकरणान्तश्राद्धाधिकारिनिरूपणं। जन्मतिथिव्यवस्था। पवित्रव्यवस्था। प्रतिपत्कृत्यनिरूपणं। द्वितीया। तृतीया। चतुर्थी। पञ्चमी। षष्ठी। सप्तमी। विधानसप्तमी। माघसप्तमी। अष्टमी। जन्माष्टमीव्यवस्था। दूर्व्वाष्टमी। भीष्माष्टमी। नवमी। श्रीरामनवमीव्यवस्था। दशमी। दुर्गोत्सवव्यवस्था। बलिदानव्यवस्था। धूपादिनिरूपणं। उपचाराः। एकादशी। चातुर्म्मास्यव्रतव्यवस्था। आरब्धव्रतत्यागप्रायश्चित्तं। नक्तव्रतव्यवस्था। मत्स्यादिभोजनत्यागफलं। हरिशयनव्यवस्था। द्वादशी। श्रवणाद्वादशीव्यवस्था। त्रयोदशी। वारुणत्रयोदशीव्यवस्था। चतुर्द्दशी। सावित्रीचतुर्द्दशीव्यवस्था। अनन्तव्रतं। अघोराख्यचतुर्द्दशी। प्रेतचतुर्द्दशी। भूतचतुर्द्दशी। रटन्तीपूजाव्यवस्था। पाषाणचतुर्द्दशी। मदनचतुर्द्दशी। पूर्णिमा। महाज्यैष्ठीव्यवस्था। शिवरात्रिव्यवस्था। कोजागरव्यवस्था। सङ्क्रान्तिः। रात्रिसङ्क्रमणव्यवस्था। कार्त्तिकमासकृत्यनिरूपणं। ग्रहणव्यवस्था। अमावास्या। अर्द्धोदययोगव्यवस्था। युगाद्यानिरूपणं। युगाद्यारहस्यकथनं। मन्वन्तराव्यवस्था।

No. 1551. क्रमदीपिका ।

Substance, palm-leaf, 11 × 1½ inches. Folia, 76. Lines, 3 on a page. Extent, 1,008 s'lokas. Character, Bengali. Date, Sk. 1609. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Corrected.

Kramadípiká. Rules for the worship of Vishṇu in the different forms of Kṛishṇa, Gopála, &c. Anonymous.

Beginning. कला तु माया नरकान्तमूर्त्तिः कलं क्वणद्वेणुनिनादरम्यः ।
श्रितो हृदिव्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥
गुरुचरणसरोरुहद्वयोत्थान् मह्वितरजःकणकान् प्रणम्य मूर्द्ध्ना ।
गदितमिह विरिञ्चिनारदाद्यैः यजनविधिं कथयामि शार्ङ्गपाणेः ॥

End. जगदिदमनुविद्धं येन यस्मिन् प्रसूते
यदनुततमजस्रं याति चाधिष्ठितायाः ।
यदुरुमहदुदर्व्विर्य्योविध+ +गोपीं
श्रोमभितसुखबोधज्योतिषं नौमि कृष्णं ॥

Colophon. इति श्रीक्रमदीपिकायां अष्टमः पटलः । समाप्तश्चायं ग्रन्थः ।

विषयः । विष्णोरर्च्चनविशेषविधानं ।

No. 1552. आधानप्रायश्चित्तं ।

Substance, country-made paper, 9¾ × 3¾ inches. Folia, 22. Lines, 8—11—12 on a page. Extent, 532 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

A'dhána-práyas'chitta. Expiations for irregularities and defects in the performance of A'dhána rites, or the collection and preservation of the household sacred fire. Anonymous.

Beginning. अथ कानिचित् प्रायश्चित्तानि लिख्यन्ते । विहरणकालात् प्राक् गार्हपत्यनाशे शुचिर्भूत्वा गार्हपत्यभस्मनारणी लेपयित्वा यजमानो मन्थनं कुर्य्यात् कारयेद्वा ।

End. द्वितीयाधानेषु सङ्कल्पात् परतो नालभ्भुकायां अपवध्यैव समापयेत् ।

Colophon. इत्याधानप्रायश्चित्तं ।

विषयः । आधानप्रायश्चित्तप्रकरणं ।

No. 1553. ऐष्टिकप्रायश्चित्तं ।

Substance, country-made paper, 9 × 4½ inches. Folia, 13. Lines, 4—11—12 on a page. Extent, 264 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aishṭika-práyas'chitta. Expiations for errors, irregularities and accidents occurring during the performance of Ishṭi rites, according to the rules of Bodháyana and A's'valáyana. Anonymous.

Beginning. आश्वलायनस्य बौधायनमवलम्ब्य दर्शपूर्णमासादीनि कर्म्माणि कुर्वन्तः सुगमपक्षमवलम्ब्य ऐष्टिकानि प्रायश्चित्तानि कानिचित् लिख्यन्ते ।

End. प्राश्य शेषं समापयेत् ।

Colophon इति कानिचित प्रायश्चित्तानि समाप्तानि ।

विषयः । ऐष्टिकप्रायश्चित्तप्रकरणं ।

No. 1554. दर्शपूर्णमासप्रकरणं ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 15. Lines, 7—14 on a page. Extent, 451 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dars'apúrṇamása-prakaraṇa. The chapter of the new and the full moon rites from of the Bhodháyana Kálpa Sútra.

Beginning. अमावास्येन पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चनमुपकल्पयत एकाहेन वा द्व्यहेन वा यथर्त्तेय वै ब्राह्मणं भवति ।

End. सन्तिष्ठत अमावास्यं वा पौर्णमासं वा हविः ।

Colophon. इति बौधायनसूत्रे दर्शपूर्णमासप्रकरणं समाप्तं ।

विषयः । दर्शपूर्णमासप्रकरणं ।

No. 1555. दर्शपूर्णमासप्रायश्चित्तप्रकरणं ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 21. Lines, 11—12—13—15 on a page. Extent, 586 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dars'a-púrṇamása-práyas'chitta-parkaraṇa. Expiations for errors, irregularities and accidents occurring during the performance of the new- and the full-moon sacrifices according to the rules of Bodháyana. Anonymous.

Beginning. विच्छिन्नं मन्त्राद्यं गोयेन(?) मन्थनेन प्रत्यवरूढेऽग्नौ आयतपक्षेयात् (?) ।

End. तद्देव होमकालेऽन्वाधानवर्जमिति एतैवाहतैकस्मिन्नुद्वापे वै द्वयोर्वेति चाविच्छतिषु अन्वाहित——इतः परं खण्डितं ।

विषयः । बौधायनसूत्रोक्तदर्शपूर्णमासप्रायश्चित्तप्रकरणं ।

No. 1556. ऐकाह्निकचातुर्मास्यप्रयोगः ।

Substance, country-made paper, $9\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 7. Lines, 10—11—12 on a page. Extent, 154 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aikáhika-cháturmásya-prayoga. A guide to the performance of the Ephemeral and the Quadimensial rites according to the rules of Bodháyana.

Beginning. ॐ बौधायनीयकल्पमवलम्ब्य ऐकाह्निकचातुर्मास्यप्रयोगः प्रकाश्यते ।

End. बौधयनीयकल्पोक्तचातुर्मस्यनिरूपणं ।
ऐकाह्निकेन विधिना कारीत्थं चतुष्टये ॥

Colophon. इति बौधायनोक्तचातुर्मास्यप्रयोगः ।

विषयः । चातुर्म्मास्यप्रयोगकथनं ।

No. 1557. न्यायरत्नमाला ।

Substance, country-made paper, 10×4 inches. Folia, 63. Lines, 8 on a page. Extent, 1,500 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Nyáya-ratnamálá. A dissertation on some of the leading topics of the Nyáya doctrine. The MS. is incomplete, and the author's name is not ascertainable. Hall's *Contributions*, p. 172.

Beginning. अङ्गस्वरूपसम्बन्धं प्रमाणं सप्रकारकं ।
यदुक्तं वार्त्तिकि (?) सम्यक् तत् सङ्क्षेपेण + कथ्यते ॥

यदङ्गस्वरूपं यथाविधं यस्य तस्य प्रधानेन सम्बन्धो यथा च यस्य ।

End. विशेषद्वयत्यागेन सामान्यस्यैव वाच्यता ॥

यद्यपि नियोगस्य कृत्युद्देश्यतया प्रधानस्यान्यादृशी———— इत्यतः खण्डितं ।

विषयः । यदङ्गस्वरूपं यथाविधं, प्रधानेन सह तस्य च यादृशः सम्बन्धः, यथा च तत्र प्रमाणं, तत्समुदायनिरूपणं । जातिद्रव्यगुणक्रियाभेदेन दृष्टार्थाङ्गानां चतुर्विधत्वनिरूपणं । सन्निपातोपकारकं, आरादुपकारकश्चेति अदृष्टार्थस्य द्वैविध्यनिरूपणं । पुनरेषामवान्तरभेदनिरूपणं । दृष्टादृष्टोभयार्थकनिरूपणं । नियमादृष्टकथनं । सामान्यतोऽङ्गलक्षणं । विधिशक्तिनिरूपणं । जातिलिङ्गसङ्ख्यानामेककारकान्वितत्वकथनं । श्रुतिलिङ्गाधिकरणं । विनियोगस्वरूपकथनं स्वर्गकामफलविशिष्टत्वेन भाव्यताकथनं । तत्र तत्र न्यायकीर्त्तनञ्च । लिङ्गवाक्यसमाख्यादीनामवान्तरभेदकथनपूर्व्वकं तत्तत्स्वरूपकथनं । अन्विताभिधानकथनं । अपूर्व्वकथनं । दैवनिर्म्मितस्यैव निदाघसमयवर्त्तिमध्यन्दिनतपनातपनिपातसन्तप्ततनोरिव मेघपुष्पगर्भमेघजालस्य सन्तापोत्पादकत्वं कर्म्मणः फलजनकत्वमुत अन्यकृतस्य प्रपादिवद् वा भोजनादिवद्वा स्वयं कृतस्येति निरूपणं । केषां केनप्रकारेण अनुष्ठायकत्वमिति तन्निरूपणं । एकप्रयोगविधिविधेयानां बहूनामङ्गप्रधानानामेककर्त्तृकाणामवश्यम्भाविनि क्रमे सति तद्विशेषनिरूपणं । क्रमवादः । प्रयोगविशेषविचारः । कर्म्माधिकारनिरूपणं । प्रयोगविध्यधिकारविधीनां स्वरूपकथनं । उपदेशात्मकातिदेशात्मकत्वभेदात् शब्दस्य द्वैविध्यकथनं । तत्तल्लक्षणनिरूपणं । आतिदेशिकाङ्गसम्बन्धनिरूपणं । स्वर्गकामो यजेतेत्यादौ प्रकृतिप्रत्ययादीनामर्थविवेचनं । उहनिरूपणं । विकृतिषु पदार्थेयत्ताचिन्तनं । प्रकृतिलक्षणादिविचारः । तन्त्रलक्षणं । प्रयोगपरिमाणचिन्तनं । श्रमताया निमित्तत्वकथनं । लिङर्थनिरूपणं । इतः खण्डितं ।

No. 1558. अद्वैतसिद्ध्युपन्यासः ।

Substance, country-made paper, 10 × 4½ inches. Folia, 9. Lines, 9—10 on a page. Extent, 208 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Advaitya-siddhiyupanyása. An illustration of the *Advaita-siddhi* of Madhusúdana Sarasvati, designed to prove the non-dual theory as opposed to the Nyáya doctrine. The MS. is incomplete, and the author's name cannot be made out. Hall's *Contributions*, pp. 109—157.

Beginning. साक्षी चेता केवलो निर्गुणश्चेति श्रुत्या च ब्रह्मणानादिदैवैः समेतैर्यद्गुणशङ्करः।

End. प्रागेव ईश्वितत्वादिश्रवणेन तस्य सोपाधिकत्वासम्भवाच्चेन्न——(इतः खण्डितं ।)

विषयः । अद्वैतवादसंस्थापनं ।

No. 1559. छलाक्षरं, वा पवमानं ।

Substance, country-made paper, 11 × 4½ inches. Folia, 10. Lines, 6 on a page. Extent, 108 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Chhalákshara alias *Pavamána.* Initials of Rig mantras required for the performance of the Pavamána rite. This MS. appears quite distinct from the works noticed on pp. 14, 16, 17, and 50.

Beginning. अग्रमभो तू तू । त्वमग्ने भू । अग्निं दू कू । अग्निर्हैत्वापूर्षेदि । प्रेष्ठ कोढीकुल- न्नोभोगा । एह्युषु ईनु । आतेश ज । त्वामग्ने वी । ग्ने विवस्वयो । एकोनविंशति- प्रथमः ।

End. पवस्व मघुङ्लस भीगु । अभिद्युम्नं ढौलैभुभू । यासो तानीघ्लै टकुवेक । एत- मुत्यचौ केडुतैाङ्लु खे । सस्नेतने इंनुगू । त्वद्धर्द्दचिणुचागि । एषस्य गैमी डैाढै दूके ॥ २५ ॥

पञ्चविंशदेकादश ॥ २८४ ॥ पवमानं समाप्तम् ॥

विषयः । ऋकप्रतीकानि ।

No. 1560. एकाम्रचन्द्रिका ।

Substance, palm-leaf, 13 × 1¼ inches. Folia, 103. Lines, 5 on a page. Extent, 2,253 s'lokas. Character, Uḍiyá. Date, ? Place of deposit, Calcutta, Government of India, another copy Calcutta, Dr. Rájendralála Mitra. Appearance, old. Prose and verse. Generally correct.

Ekámra-chandriká. A guide to pilgrims visiting Bhuvanes'vara, giving in detail the religious duties to be performed at the different sacred spots, temples, images and pools of that place, and the merit of doing the same. The work is made up of extensive quotations from the Kapila Sañhitá, the Ekámra Puráṇa, the S'iva Puráṇa, and other works which treat of the sacred places of Orissa, and comprises a summary of the religious history of the place. It is divided into four chapters (*Prakás'as*). All the principal temples have been described at some length, and anecdotes—mostly apocryphal—regarding them given in detail. Anonymous.

Beginning. विघ्नेश्वरं नमस्कृत्य ततस्त्रिभुवनेश्वरं ।

अष्टादशपुराणाब्धेर्लिखाम्येकाम्रचन्द्रिकाम् ॥

End. इति सर्वपुराणाब्धेरेषैकैकाम्रचन्द्रिका समुद्धृत्य महादेवपादयोरर्पिता मया ॥

Colophon. इत्येकाम्रचन्द्रिकायां चतुर्थः प्रकाशः ।

इतः परं "आचार्याय प्रदातव्यं" इत्याद्यष्टौ श्लोकाः सन्ति ।

विषयः। अत्र चत्वारः प्रकाशाः सन्ति । तत्र प्रथमे प्रकाशे ।—अनन्तपुरुषोत्तमादिदर्शनम् । उग्रेश्वरदर्शनं । एकाम्रक्षेत्रमाहात्म्यवर्णनादिः । एकाम्रेश्वरदर्शनं । कल्पवृक्षदर्शनं । कुमारदर्शनं । गणेशदर्शनं । गोपालिनीदर्शनं । गुप्तेश्वरदर्शनं । चण्डेश्वरदर्शनं । चित्रेश्वरदर्शनं । त्रिभुवनेश्वरदर्शनं । पादहरातीर्थेश्वरयोर्दर्शनं । विन्दुसरःस्नानादिफलं । विश्वेश्वरदर्शनं । वृषभदर्शनं । मङ्गलाचरणादिः । शवरेश्वरदर्शनं । क्षेत्रपालोक्तिः ।

२, प्र० ।—अष्टायतनमाहात्म्यादिः । अलावुकेश्वरमाहात्म्यं । आम्रातकेश्वरदर्शनं । इन्द्रेश्वरदर्शनं । ईशानेश्वरमाहात्म्यं । ईशानेश्वरादिदर्शनं । उत्तरेश्वरादिदर्शनं । उत्पलेश्वरदर्शनं । कपिलेश्वरदर्शनं । कपालमोचनेश्वरदर्शनं । कपालीशिशिरदर्शनं । कोटितीर्थमाहात्म्यं । केदारेश्वरमाहात्म्यं । कुक्कुटेश्वरदर्शनं । गङ्गायमुनामाहात्म्यं । गन्धवतीमाहात्म्यं । गौरीकुण्डादिमाहात्म्यं । गोकर्णेश्वरदर्शनं । चतुर्दशयात्राकर्त्तव्यतोक्तिः । जटिलेश्वरदर्शनं । देवीपादतीर्थमाहात्म्यं । दैत्येश्वरदर्शनं । पापनाशनकुण्डमाहात्म्यं । पूर्वेश्वरदर्शनं । वैद्यनाथेश्वरदर्शनं । ब्रह्मेश्वरादिमाहात्म्यं । भास्करेश्वरदर्शनं । भीमेश्वरादिदर्शनं । मध्यमेश्वरदर्शनं । यमेश्वरदर्शनं । रामेश्वरादिमाहात्म्यं । रुद्रेश्वरदर्शनं । रावणेश्वरदर्शनं । लड्डुकेश्वरदर्शनं । लक्ष्मीश्वरदर्शनं । शक्रेश्वरादिदर्शनं । सुवर्णजालेश्वरमाहात्म्यं । सुरेश्वरमाहात्म्यं । सिद्धेश्वरादिमाहात्म्यं । सिद्धेश्वरमाहात्म्यं । स्वर्णकूटेश्वरदर्शनं । सूक्ष्मेश्वरदर्शनं ।

३, प्र० ।—अष्टमीयात्रा । अशोकाष्टमीयात्रारम्भः । उत्थापनचतुर्दशीयात्रा । चन्दनयात्रा । दमनकभञ्जनयात्रा । घृतकम्बलयात्रा । परशुरामाष्टमीयात्रा । पवित्रारोहणयात्रा । शयनयात्रा । वन्दापनायात्रा । माघसप्तमीयात्रा । यमद्वितीयायात्रा । शिवरात्रियात्रा । षष्ठीयात्रा ।

४, प्र० ।—अष्टतीर्थविधुक्तिः । अलावुकुण्डगमनं । अनन्तपुरुषोत्तमादिदर्शनं । आम्रकतलमृत्युफलं । कोटिलिङ्गार्चनविधिः । गङ्गायमुनातीर्थगमनं । चातुर्मास्यविधिः । छायायात्रा । पापनाशिनीकुण्डे गमनादिः । परमेश्वरप्रार्थना । ब्रह्मकुण्डगमनं । विन्दुह्रदे शरीरत्यागः । मेघकुण्डगमनं । रामकुण्डगमनादिः । क्षेत्रपालप्रदक्षिणा । क्षेत्रवासफलं । क्षेत्रमरणं ।

No. 1561. एकाम्रपुराणं ।

Substance, palm-leaf, Púrva Khaṇḍa 16½ × 1⅓, Uttara Khaṇḍa 15 × 1¼ inches. Folia, 205. Lines, 4—6—7 on a page. Extent, 6,000 s'lokas. Character, Uḍíyá. Date, ? Place of deposit, Calcutta, Government of India. Another copy, Calcutta, Dr. Rájendralála Mitra. Appearance, old. Verse. Incorrect.

Ekámra Puráṇa. One of the *Upa* or minor Puráṇas, designed to record the religious merits and anecdotes connected with the several temples and sacred places of a tract of land called Ekámra Kshetra, or the sacred grove of the solitary mango tree, now known by the name of Bhuvanes'vara in the Puri district. It is divided into five parts *(Añs'as)*, and comprises in all 70 chapters. The work cannot be under any circumstance earlier than the 8th century of the Christian era. CONTENTS: 1. Introduction. 2. Enquiry of the sages regarding the place. 3. Story of S'iva's journey from Benares to Bhuvanes'-vara. 4. Story of Brahmá's connection with the place. 5. The primary Sargas. 6. Characteristics of the Yugas. 7. The seven Dvipas. 8. Praise of Bhárata Varsha. 9. The seven Pátálas or lower regions. 10. The upper regions. 11. Description of Ekámra. 12. Desire of Brahmá to see the place. 13. He visits the lingams. 14. Origin of Brahmes'vara. 15. Advice to the Devas. 16. Origin of Bháskares'vara. 17. Do. of Rámes'vara. 18 and 19. Do. of Sídhes'vara. 20 and 21. Vinduhrada Lake. 22. The penance of Pratikása. 23. Praise of the Lake. 24. Praise of the sacred field of the mango grove. 25. Visit of Kratu ? 26 and 27. The wars of the Devas and. Asuras. 28. Story of Kálanemi. 29. The arrival of Mahes'a. 30. Story of Hiraṇyáksha. 31. Bhrigu's account. 32. Advent of Hiraṇya and Kas'hipu in Ekámra. 33. The advent of the Deví. 34 to 36. Story of Kírtivása and the Deví. 37. Praise of the Deví's feet. 38. Praise of Meghes'vara. 39 and 40. Praise of Pápanásana pool. 41. Pool of Alábu. 42. Praise of Kapiles'vara. 43. Rules for worshipping Koṭiliña. 44 and 45. Story of a father and son. 46. Praise of Suparṇajales'vara. 47. Story of Bálakhilya. 48. Praise of Gokarṇes'vara. 49. Do. of Paras'urámes'vara. 50. Visit of Ráma to the place. 51. Description of Pariplava. 52. Destruction of Kumáṭhánañga. 53. Praise of Rámes'vara. 54.

and 55. Worship of eight images in eight diagrams. 56. Praise of Ámratakes'vara. 57. Do. of Jaṭiles'vara. 58 and 59. Peculiarities of perfect lingams. 60. The guardians of the sacred grove. 61. Praise of Bhímes'vara. 62. Do. of Savanes'vara. 63. Merits of walking round the circuit of the sacred place. 64. The festival of Chháyá játrá. 65. Story of Bhavishya and Sambhú. 66. Festivals of Bhuvanes'vara. 67. Car festival. 68. The festival of As'okaratha. 69. The fourteen great festivals. 70. Summary of the work.

Beginning. कीर्त्तिर्यस्य सुरासुरैर्मुनिवरैरागीयते नित्यशो
नाकच्मातलवासिभिः सुरनरैर्विद्याधरैः किन्नरैः ।
पातालेष्वपि कन्दरेषु च महीशाणां गतैः पन्नगै-
र्ब्रह्मोपेन्द्रसवासवान्वितजगत्कर्त्त्रे नमः शम्भवे ॥

End. एकस्तेजोरजोभिः परिहृतविमलज्योतिषां यो विभाग-
स्तस्थौ ते लोकपालाः सुविधृतशिरसा शासने नित्ययुक्ताः ।
सृष्टाङ्गाभूतसङ्घाश्चतुरजनि जगत्यच्चभूतात्मकं यो
योऽसौ मूर्त्तिविभक्ति द्विगुणितचतुरां पातु वः कृत्तिवासाः ॥

Colophon. इत्येकाम्रपुराणे षट्साहस्त्र्यामैश्वर्य्यां संहितायां पञ्चमेऽंशे सप्ततितमोऽध्यायः ।

विषयः । १ अध्याये, वस्तुनिर्द्देशः । २ अध्याये, आदिप्रश्नः । ३, गौरीशङ्करसंवादः । ४, ब्रह्मगीताकथनं । ५, आदिसर्गः । ६, युगधर्म्माः । ७, सप्तद्वीपकीर्त्तनं । ८, भारतवर्षानुकीर्त्तनं । ९, सप्तपातालकीर्त्तनं । १०, ऊर्द्ध्वलोककीर्त्तनं । ११, एकाम्रवर्णनं । १२, ब्रह्मोद्वेगः । १३, लिङ्गदर्शनं । १४, ब्रह्मेश्वरप्रभवः । १५, सर्वद्देवोपदेशः । १६, भास्करेश्वरप्रभवः । १७, रामेश्वरप्रभवः । १८, सिद्धेश्वरमाहात्म्यं । १९, सिद्धेश्वरानुकीर्त्तनं । २०, विन्दुह्रदस्वरूपम् । २१, विन्दुह्रदोत्पत्तिः । २२, प्रतिकासव्रतकीर्त्तनं । २३, विन्दुह्रदमाहात्म्यं । २४, चैत्रमाहात्म्यं । २५, क्रतुदर्शनं । २६, देवासुरसन्नहनं । २७, देवासुरसङ्ग्रामः । २८, कालनेमिशक्तिवेधः । २९, महेशागमनं । ३०, हिरण्याक्षवधः । ३१, भृगुवाक्यं । ३२, हिरण्यकशिपुतपोवनागमनं । ३३, देव्यवतरणं । ३४, कृत्तिवासस उपाख्यानं । ३५, देव्याः सम्बोधनं । ३६, कृत्तिवासःकृतासुरवधः । ३७, देवीपदद्वयमाहात्म्यम् । ३८, मेघेश्वरमाहात्म्यं । ३९, ४०, पापनाशनमाहात्म्यं । ४१, अलावुतीर्थमाहात्म्यं । ४२, कपिलेश्वरमाहात्म्यं । ४३, कोटिलिङ्गार्चनविधिः । ४४, पितापुत्रसङ्कथा । ४५, पितृसम्बोधनं । ४६, सुपर्णजलेश्वरमाहात्म्यं । ४७, वालखिल्यशिवसंवादः । ४८ गोकर्णेश्वरमाहात्म्यम् । ४९, परशुरामेश्वरमाहात्म्यम् । ५०, श्रीरामागमनं । ५१,

पारिप्लववर्णनं । ५२, कमठानङ्गवधः । ५३, श्रीरामेश्वरानुकीर्त्तनं । ५४, अष्टायतनविधिः । ५५, अष्टमूर्त्त्यर्चनविधिः । ५६, आघातकेश्वरमाहात्म्यं । ५७, जटिलेश्वरमाहात्म्यं । ५८, सिद्धलिङ्गानुकीर्त्तनं । ५९, साधारणोक्तिः । ६०, क्षेत्रपालोत्पत्तिः । ६१, भीमेश्वरमाहात्म्ये अष्टषष्ठ्यानुकीर्त्तनं । ६२, प्रवरेश्वरमाहात्म्यं । ६३, क्षेत्रप्रदक्षिणमाहात्म्यं । ६४, छायायात्रावर्णनं । ६५, भविष्यत्पप्रश्नसंवादः । ६६, यात्राकथनम् । ६७, रथप्रतिष्ठा । ६८, अशोकरथयात्रा । ६९, चतुर्दशयात्राकीर्त्तनं । ७०, अनुक्रमणिका ॥

No. 1562. अन्वयबोधिनी ।

Substance, country-made paper, 12¾ × 6½ inches. Folia, 33. Lines, 16—18 on a page. Extent, 1,753 s'lokas. Character, Nágara. Date, Sk. 1580. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Anvaya-bodhíní. A gloss on S'rídhara Svámí's commentary on that portion of the Bhágavata Puráṇa which contains a hymn by the Devas on the attributes of the Godhead. By Chakrachúḍámaṇi Chakravartí. The hymn is called *Devastuti.*

Beginning. अथ श्रीवेदस्तुतिव्याख्या श्रीधरपूज्यपादैर्या कृता सैव तदनुकूलाधिकपदकदम्बसम्बद्धिता वक्त्रार्थो यथा स्यात् तथा स्वीयानां सुखप्रबोधाय मयात्र लिख्यते ।

End. यथोपदिष्टं गुरुणा बुद्धौ श्रीनन्दसूनुना ।
तथैव कृतवानस्मि न मे दोषा न मे गुणाः ॥
खाष्टबाणनिशानाथमिते शाके श्रुतिस्तुतेः ।
पूर्णतामनयद् व्याख्यां चूड़ामणिकविः सुधीः ॥

Colophon. इति चक्रचूड़ामणिचक्रवर्त्तिविरचितायामन्वयबोधिन्यां टीकायां सप्ताशीतितमोऽध्यायः ।

विषयः । श्रीमद्भागवतीयवेदस्तुत्यध्यायस्य श्रीधरस्वामिकृतटीकाया व्याख्यानं ।

No. 1563. भगवद्गीताभाष्यं ।

Substance, country-made paper, 12½ × 4¾ inches. Folia, 159. Lines, 4—6—8 on a page. Extent, 2,782 s'lokas. Character, Nágara Date, Sm. 1782. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Bhagavadgítá-bháshya. A commentary on the Bhagavadgítá. By Rámánuja. The work is now in course of publication in a serial form in Calcutta.

Beginning. यत्पादाम्भोरुहध्यानानन्दनिष्टतचेतसः ।
मुक्तिमप्यवजानन्ति तं वन्दे पुरुषोत्तमं ॥
End. ईश्वरे कर्तृताबुद्धिः सत्त्वोपादेयतान्तिमे(?) ।
स्वकर्मपरिणामश्च शास्त्रसारार्थ उच्यते ॥
Colophon. इति श्रीभगवद्रामानुजविरचिते श्रीभगवद्गीताभाष्ये अष्टादशोऽध्यायः। समाप्तश्चायं ग्रन्थः ।
विषयः । भगवद्गीताव्याख्यानं ।

No. 1564. आधानप्रकरणं ।

Substance, country-made paper, 10 × 4½ inches. Folia, 27. Lines, 8—9 on a page. Extent, 416 s'lokas. Character, Nágara. Date, Sm. 1814. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A'dhána-prakaraṇa. A manual for the preservation of the sacred household fire according to the rules of Bodháyana. Anonymous. This is distinct from the work noticed under No. 1344. (vol. III).

Beginning. अथोपव्याहरणं विज्ञायते ऋत्वादौ ऋत्वादौ ऋतुकामं कामयीत यज्ञाङ्गादौ यज्ञाङ्गकाममिति ।
End. अथ पौर्णमासवैमृधाभ्यां यजते सन्तिष्ठतेऽग्न्याधेयं सन्तिष्ठतेऽग्न्याधेयं ॥ २२ ।
Colophon. इति बौधायनीसूत्रे आधानप्रकरणं ।
विषयः । ऋत्वादिकर्मप्रारम्भे कर्त्तव्याग्न्याधानविधिः ।

No. 1565. जगन्नाथवल्लभनाटकं ।

Substance, country-made paper, 13½ × 4½ inches. Folia, 21. Lines, 6—7—8 on a page. Extent, 403 s'lokas. Character, Nágara. Date, Sk. 1776. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Corrected.

Jagannátha-vallabha Náṭaka. A drama on the amatory career of Krishṇa in Vrindávana. By Ráya Rámánanda, a follower of Chaitanya; composed by order of Rájá Pratáparudra of Orissa.

Beginning. स्वराञ्चितविपञ्चिकामुरजवेणुसङ्गीतकं
त्रिभङ्गतनुवल्लरीवलितमुग्धहासोल्वणं।
वयस्यकरतालिकारणितनूपुरैरुज्ज्वलं
मुरारिनटनं सदा दिशतु शर्म्म लोकत्रये॥ १॥

End. श्रद्धाबद्धमतिर्मम प्रतिदिनं गोपाललीलस्य यः
संसेवेत रहस्यमेतदतुलं लीलामृतं लोलधीः।
तस्मिन्मद्गतमानसे किल कृपादृष्ट्या भवत्या सदा
भाव्यं येन निजेशितां व्रजवने सिद्धिं समाप्नोति सः॥
मद.। तथास्तु। इति निष्क्रान्ताः सर्व्वे॥

Colophon. इति श्रीरामानन्दरायकविविरचितं श्रीजगन्नाथवल्लभनाटकं सम्पूर्णम्॥

विषयः। प्रथमे अङ्के। नान्दीपद्यानि। नटीसूत्रधारयोः प्रस्तावनाङ्गीभूतवाक्यैः कथोपकथनं। श्रीकृष्णविदूषकयोर्वृन्दावनवर्णनादिपरवाक्यैः कथोपकथनञ्च।
२ अङ्के। मदनिकाशोकशशिमुखीश्रीकृष्णविदूषकादीनां भावपरीक्षापरवाक्यैः कथोपकथनं।
३ अङ्के। अशोकमञ्जरीमदनिकाराधाशशिमुखीमाधव्यादीनां भावप्रकाशनपरवाक्यैः कथोपकथनं।
४ अङ्के। श्रीकृष्णमदनिकाविदूषकमाधवीराधादीनां कथोपकथनं राधाभिमानस्य।
५ अङ्के। शशिमुखीमदनिकाराधाकृष्णादीनां कथोपकथनं राधामानभङ्गस्य।

गजपतिप्रतापरुद्रादिष्टेन रामानन्दरायेण श्रीराधाकृष्णयोः केलिरत्र नाटकच्छलेन वर्णितः।

No. 1566. आर्य्यभटसिद्धान्तः, वा वृद्धार्य्यभटसिद्धान्तः।

Substance, foolscap paper, 13 × 4 inches. Folia, 8. Lines, 8 on a page. Extent, 160 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

A'ryabhaṭa-siddhánta alias *Vṛiddháryabhaṭa-siddhánta.* A treatise on Hindu astronomy. By A'ryábhaṭa. This is a very rare work of considerable age and merit. From the metre of the verses in which the name of the author occurs in this and other works, it is clear that the second word is *bhaṭa* and not *bhaṭṭa* as it is commonly written. The late Dr. Bhau Dájí was the first to notice the fact. CONTENTS: Chapter I. On the determination of time. II. Planets. III. Spheres and astronomical geography.

Beginning. प्रणिपत्यैकमनेककं सत्यां देवतां परं ब्रह्म ।
आर्य्यभट्टः श्रीनिगदति गणितं कालक्रियां गोलं ॥

End. आर्य्यभटीयं नाम्ना पूर्व्वं स्वपद्भूवः सदा नित्ये ।
सुकृतायुषोऽस्तु नाशं कुरुते प्रतिकञ्चुकं योऽस्याः ॥ ५० ॥

Colophon. इत्यार्य्यभटसिद्धान्ते गोलपदस्तृतीयः । इति वृद्धार्य्यभटसिद्धान्तः सम्पूर्णः ।

विषयः । अत्र त्रयोऽध्यायाः सन्ति । तत्र १–मे, कालनिरूपणं। २–ये, ग्रहादीनां क्रिया-निरूपणं । ३–ये, भूगोलनिरूपणं ।

No. 1567. व्याससिद्धान्तः ।

Substance, foolscap paper, 13 × 8 inches. Folia, 15. Lines, 8 on a page. Extent, 304 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Vyása-siddhánta. A treatise on Hindu astronomy. By Vyása. The work professes to be a part of the Dharmas'ástra or Smṛiti of the author. CONTENTS: Chapter I. Spheres and regions of the universe. II. The seven great continents ending in the north in Meru; influence of the planets on the sun; the duration of days and nights in the planets. III. Directions for constructing wooden globes.

Beginning. भवं नारायणं साक्षात् प्रणिपत्य कृताञ्जलिः ।
भक्त्या परमयाभ्यर्च्य पप्रच्छेदृषिस्तदा ॥

End. नरयन्त्रं तथा साधु दिवा च विमले रवौ ।
छायां समाधयेत् प्रोक्तकालसाधनमुत्तमं ॥

Colophon. इति श्रीव्यासदेवकृतौ धर्म्मशास्त्रे व्यासस्मृतौ वेदाङ्गमध्ये ज्योतिःशास्त्रे वेदाङ्गमध्ये गोलाध्यायः समाप्तोऽयं ।

विषयः । अत्र त्रयोऽध्यायाः सन्ति । तत्र १–मे, भुवनकोशवर्णनं । २–ये, सप्तद्वीपेषु पूर्व्वादिदिक्षु देवनिर्म्मितनगरीनिरूपणं, सर्व्वेषां वर्षाणामुत्तरतो मेरोः स्थितिकथनं, राशिबलाबललेन रवेस्तीव्रत्वमन्दत्वकथनं, मेषादौ अहोरात्रप्रमाणनिरूपणञ्च । ३–ये, दारुमयभूगोलरचनाप्रणालीकथनं ।

No. 1568. महासिद्धान्तः ।

Substance, foolscap paper, 13 × 4 inches. Folia, 37. Lines, 8 on a page. Extent, 766 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Mahá-siddhánta. A treatise on Hindu astronomy. By A'ryabhaṭa. CONTENTS: Chapter I. True motion of the planets. II. Motion of the planets as determined by Parásara. III. Apparent motion of the planets. IV. Astronomical questions. V. Lunar eclipses. VI. Solar eclipses. VII. Ascending nodes of planets. VIII. Crossing of planets. IX. Ascension of the planets. X. The shadows of planets. XI. Conjunction of planets. XII. Wars of planets. XIII. Paths of planets. XIV—XVI. Astronomical calculations. XVII. The spheres of the universe. XVIII. The terrestrial globe.

Beginning. विविधखगागमपाटीकुट्टवीजादिदृष्टशास्त्रेण ।
आर्य्यभटेन क्रियते सिद्धान्तो रुचिरार्य्याभिः ॥

End. घनयोगमिघनघ्ने(?) पदयोगघनैक्यमशेषकेतौ वा ।
एवं गुणनादीनां शोधनिषेधं सुखो ययोः ॥

Colophon. इति श्रीमदार्य्यभट्टकृते महासिद्धान्ते गोलाध्याये कुटकाध्यायोऽष्टादशः ।
समाप्तोऽयं ।

विषयः । अत्र अष्टादशाध्यायाः सन्ति । तत्र १–मे, ग्रहाणां मध्यगतिवर्णनं । २–ये-पराशरमतसिद्धग्रहगतिवर्णनं । ३–ये, ग्रहाणां स्पष्टगतिवर्णनं । ४–र्थे, प्रश्न, विवरणं । ५–मे, चन्द्रग्रहणनिरूपणं । ६–ष्ठे, सूर्य्यग्रहणनिरूपणं । ७–मे, शृङ्गोन्नतिनिरूपणं । ८–मे, केद्यकनिरूपणं । ९–मे, ग्रहाणामुदयनिरूपणं । १०–मे, ग्रहच्छायानिरूपणं । ११–शे, ग्रहयुतिनिरूपणं । १२–शे, ग्रहयुद्धनिरूपणं । १३–शे, ग्रहाणां पातनिरूपणं । १४–शे, पठितगणितप्रश्नविवरणं । १५–शे, मध्यमप्रश्नविवरणं । १६–शे, पाटीगणितविवरणं । १७–शे, भुवनकोशनिरूपणं । १८–शे, भूगोलविवरणं ॥

No. 1569. ब्रह्मसिद्धान्तः, शाकलसंहितान्तर्गतः ।

Substance, foolscap paper, 13 × 4 inches. Folia, 38. Lines, 8 on a page. Extent, 788 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Incorrect.

Brahma-siddhánta. A treatise on Hindu astronomy. The work professes to be a part of the S'ákala Sañhitá. CONTENTS : I. Measure of time. II. Relative position of planets. III. Lunar asterisms and moon's age. IV. Ascension and descension of planets. V. Wars of planets. VI. Crossing of the paths of planets.

Beginning. ध्यानयोगासनारूढं ब्रह्माणं त्रिजगद्गुरुं ।
अभिवाद्य सुखासीनो नारदः पर्य्यपृच्छत ॥ १ ॥
देवदेव जगन्नाथ सर्व्वज्ञ कमलासन ।
ज्योतिषां चरितं ज्ञानं ब्रूहि कालाश्रयं महत् ॥ २ ॥

End. न देयं यस्य कस्यापि रहस्यं शास्त्रमुत्तमं ।
एतद्देयं सुशिष्यायान्यूनवत्सरवासिने ॥

Colophon. इति शाकलसंहितायां द्वितीयप्रश्ने ब्रह्मसिद्धान्ते षष्ठोऽध्यायः ॥

विषयः । अत्र षट् अध्यायाः सन्ति । तत्र १-मे, कालनिरूपणं । २-ये, ग्रहाणां उच्चनीचस्थानादिकथनं । ३-ये, तिथिनक्षत्रादिनिरूपणं । ४-र्थे, ग्रहाणामुदयास्तादिकथनं । ५-मे, ग्रहसमागमयुद्धादिकथनं । ६-ष्ठे, वेधकादिकथनं ॥

No. 1570. नक्षत्रेष्ट्यादिनानाविधेष्टिः ।

Substance, country-made paper, 8½ × 4 inches. Folia, 17. Lines, 11—12 on a page. Extent, 362 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nakshatreshṭádi. Rules for the performance of Ishṭi rites. Anonymous.

Beginning. अथ नक्षत्रेष्टयः । तास्च पुरोडाशभेदेनादिनिमित्ते आयुष्मत्यः कर्त्तव्या इति नैमित्तिकविधिविषयत्वलाभाय प्रायश्चित्तप्रकरणे बौधायनेनोक्ता अपि काम्या अपि भवन्ति ।

End. मचचसवे कृतानाम्रत्विजामन्ययजमानस्यार्त्विज्यं निषिद्धं। एवं चातुर्मास्यादि-सर्व्वकर्म्मसु इति प्रदीपः ॥ ६ ॥

Colophon. समाप्तिसूचकवाक्यं नास्ति।

विषयः। नचत्रेष्ट्यादिनानाविधेष्टिप्रकरणं ॥

No. 1571. बौधायनीयद्वैधकाण्डं।

Substance, country-made paper, $9\frac{3}{4} \times 4$ inches. Folia, 47. Lines, 12 on a page. Extent, 1,241 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Baudhayaníya Draidhakáṇḍa. Directions for the performance of various Vedic rites according to the rules of Bodháyana. Anonymous.

Beginning. (तृतीयप्रश्नस्य प्रा०) अग्नीन् पुनराधास्यमानो भवति। तदाहुः। कृतयजुः-सम्भृतसम्भारो भवति।

End. हिरण्यं चमसं ददाति। राशीकृतं धान्यं ददाति। मरायुकृतं (?) धान्यं ददाति।+त्येतानि च नित्यानि दद्यात्। वो एतान्येवेति शालीकिः।

Colophon. इति बौधायनीये द्वैधकाण्डे पञ्चमः प्रश्नः।

विषयः। अत्र प्रथमद्वितीयप्रश्नौ न स्तः। तृतीये प्रश्ने, अग्न्याधानाङ्गहोमादिकथनं। पिण्डपितृयज्ञकथनं। आग्रयणहोमादिः। उपवसथीयदिवसकृत्यं। अग्निहोत्र-कथनं। अनुयाजेष्टिकथनं। ब्रह्मकर्म्मादिकथनं। पशुबधकर्त्तव्यसङ्क्षेपः। ४, मन्त्रगणाम्नातप्रायश्चित्तानि। ५, वाजपेयकर्त्तव्यतादिः। यजमानविषय-कर्म। राजसूयकर्त्तव्यकर्मादिः। इष्टिकल्पकथनादिः। द्वादशाहकर्त्तव्यादिः।

No. 1572. मित्रविन्देष्टिः।

Substance, country-made paper, $9\frac{3}{4} \times 4$ inches. Folia, 2. Lines, 12 on a page. Extent, 128 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Mitravindeshṭi. Directions for the performance of the Vedic rite called Mitravindeshṭi. Anonymous.

Beginning. अथ मित्रविन्देष्टिः। श्रीकामो वायुःकामो वा मित्रप्राप्तिकामो वा श्रीपरमेश्वर-
प्रीतिकामो वैतामिष्टिं कुर्य्यात्।

End. उत्थाती वाचश्छन्नं(?) यथा दैवतं ब्राह्मणतर्पणान्तं समानं। न पुनरालम्भः।
सन्तिष्ठते मित्रविन्दा मह्यावैराजीष्टिः॥

विषयः। मित्रविन्देष्टिकथनं।

No. 1573. शास्त्रसिद्धान्तलेशसङ्ग्रहः।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 126. Lines, 7—11 on a page. Extent, 1,606 s'lokas. Character, Nágara. Date, SM. 1719. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

S'ástrasiddhánta-les'a-sañgraha alias *Siddhántales'a*. An elaborate dissertation on the principal topics of the Vedánta doctrine, in course of which the theories of all the different Vedánta schools, are noticed, and strictures passed on the other schools of Hindu philosophy. By Apya Díkshita, son of Rañgarája Díkshita. A commentary on this work has been noticed under No. 60 (ante Vol. I, p. 35,) Hall's *Contributions*, p. 153.

Beginning. अधिगतभिदा पूर्व्वाचार्य्यानुपेत्य सहस्रधा
सरिद्दिव महीभेदान् सम्प्राप्य शौरिपदोद्गता।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा॥
प्राचीनैर्व्यवहारसिद्धविषयेष्वात्मैकसिद्धौ परं
सन्नह्यद्भिरनादरात् सरणयो नानाविधा दर्शिताः।
तन्मूलानिह सङ्ग्रहेण कतिचित् सिद्धान्तभेदान् धियः
शुद्ध्यै सङ्कलयामि तातचरणव्याख्यावचःख्यापितान्॥
तेषूपपादनापेक्षान् पक्षान् प्रायो यथामति।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरं॥
तत्र तावदात्मा वा अरे द्रष्टव्यः श्रोतव्य इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापात-
प्रतिपन्ने ब्रह्मणि समुदितजिज्ञासस्य इत्यादि।

End. निरतिशयानन्दस्फुरणसम्बद्धनिसं + ब्रह्मपरमेश्वरभावापत्तिराद्यतेति सिद्ध-
मिति।
विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलेरप्पय्यदीक्षित इति प्रथितस्तनूजः॥
तन्त्राण्यधीत्य सकलानि सदावदाततव्याख्यानकौशलकलाविशदीकृतानि।
आम्नायमूलमनुरुध्य च सम्प्रदायसिद्धान्तभेदलवसङ्ग्रहमित्यकार्षीत्॥

Colophon. इति शास्त्रसिद्धान्तलेशसङ्ग्रहे चतुर्थः परिच्छेदः। संवत् १७१९। चैत्रशुदिः।
(मध्ये खण्डितमिदं)

विषयः। निखिलवेदान्तप्रकरणानां सिद्धान्तसारं सङ्कलय्य निर्म्मितोऽयं ग्रन्थः। तत्र
१ प्रथमपरिच्छेदे।—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यत्र प्रतीयमानो विधिः किं विध इति विवेचनं। अपूर्व्वविधिलक्षणं। नियमविधिलक्षणं। परिसङ्ख्या-लक्षणं। आत्मा वा अरे इत्यत्र अयमपूर्व्वविधिरिति भाष्यानुसारिणां मतकथनं। नियमविधिरयमिति सङ्क्षेपशारीरकानुसारिण इति तन्मतोपपादनं। परि-सङ्ख्याविधिरयमिति वार्त्तिकानुसारिणां नयप्रदर्शनं। नात्र त्रिविधस्यापि विधेः सम्भवः किन्तु कर्म्मकाण्डविचारवद् ब्रह्मकाण्डविचारोऽपि अध्ययनविधिमूल इति वाचस्पतिमिश्रानुयायिनां मतकथनं। जगज्जन्मस्थितिलयकारणत्वरूपं ब्रह्मणो लक्षणत्रयमिति कौमुदीकारमतकीर्त्तनं। एकमेव लक्षणमिदमभिन्ननिमित्तोपा-दानतया अद्वितीयं ब्रह्म उपलक्षयतीत्यन्यमतप्रदर्शनं। परिणामस्वरूपकथनं। विवर्त्तस्वरूपकथनं। शुद्धं ब्रह्मैव जगदुपादानमिति सङ्क्षेपशारीरकमतानुया-यिनां नयप्रदर्शनं। सर्व्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्म उपादान-मिति विवरणानुसारिणां मतकथनं। मायाऽविद्ययोर्भेदवादिमतनिरूपणं। तयो-रभेदवादिनां नयकथनं। जीवोपादानवादकथनं। पदार्थतत्त्वनिर्णयकार-मतानुसारेण मायोपादानत्ववादखण्डनं। विवर्त्तपरिणामोपादानद्वयसाधारण-मन्यद् ब्रह्मलक्षणमिति केषाञ्चिन्मतकथनं। उपादानत्वलक्षणं। जीवाश्रितमाया-विषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्त्तमानतया उपादानमिति वाचस्पतिमिश्रमतकीर्त्तनं। मायाशक्तिरेव उपादानं न ब्रह्मेति मुक्तावलीकारमत-कथनं। ईश्वरलक्षणं। जीवलक्षणं। अत्र प्रकटार्थविवरणकारमतं। तत्त्वविवेक-कारमतं। सङ्क्षेपशारीरकमतकथनं। विद्यारण्यादीनां मतकीर्त्तनं। विश्व-तैजसप्राज्ञादीनां लक्षणकथनं। शङ्करमतेन जीवेश्वरलक्षणनिरूपणं। प्रतिबिम्बे-श्वरवादिनां मतेन पारमार्थिक-व्यावहारिक-प्रातिभासिकभेदात् जीवस्य त्रैविध्य-मुक्त्वा तत्तल्लक्षणकथनं। बिम्बप्रतिबिम्बभावेन जीवेश्वरयोर्विभाग इति विवरणानु-

विषयः । सारिणां सिद्धान्तनिरूपणं। अन्येषां मतेन बिम्बादिवादखण्डनपूर्व्वकमवच्छेदवादसंस्थापनं। न प्रतिविम्बो नाप्यवच्छेदो जीवः, किन्तु कौन्तेयस्यैव राधेयत्ववद्विकृतस्य ब्रह्मण एव अविद्यया जीवभाव इति केषाञ्चिन्मतकथनं। एकजीववादकथनं। अत्र वाचस्पतिमिश्रतत्त्वकारादीनां मतकथनं। नानाजीववादकथनं। कर्तृत्वस्वरूपनिरूपणं। ईश्वरस्य सर्व्वज्ञत्वसंस्थापनं। अन्तःकरणोपाधिकत्वेन जीवस्य परिच्छिन्नत्वमिति केषाञ्चिन्मतकथनं। जीवस्य किञ्चिज्ज्ञत्वोपपादनं। आवरणविक्षेपशक्तिनिरूपणं। अज्ञानस्वरूपकथनं। अत्र न्यायचन्द्रिकाकारादीनां मतकथनं। जीवात्मपरमात्मनोः साक्षित्वविवेचनं। अन्तःकरणवृत्तिनिरूपणं। अध्यासादिस्वरूपविमर्शनं। द्रव्यादिप्रत्यक्षे कारणकथनं। अपरोक्षज्ञानस्वरूपनिरूपणं। अत्र नानाविधमतकथनं। जीवब्रह्मणोरभेदकथनं।

२–ये परिच्छेदे।—अद्वितीये ब्रह्मणि वेदान्तानां समन्वयकथनं। प्रपञ्चस्य सत्यासत्यत्वनिरूपणप्रसङ्गेन विविधवादकीर्त्तनं। (यजमानः प्रस्तरः) इत्यादौ शास्त्रदीपिकान्यायरत्नमालादीनां सिद्धान्तकथनं। घटादिप्रत्यक्षे न्यायसुधाकारादीनां नयकथनं। आकाशे नीलिमभ्रान्तिकारणकथनं। प्रत्यक्षात् श्रुतेः प्राधान्ये भामतीविवरण-वार्त्तिकादीनां मतोपन्यासः। प्रपञ्चस्य असत्त्वस्थापनपुरःसरमसत्त्वलक्षणकथनं। ब्रह्मणि पारमार्थिकसत्यत्वं प्रपञ्चे तु व्यावहारिकसत्यत्वमित्यादि केषाञ्चिन्मतं तत्कथनं। प्रतिविम्बमिथ्यात्वमभ्युपगच्छतां त्रिविधजीववादिनां विद्यारण्यगुरुप्रभृतीनां मतकीर्त्तनं। प्रतिविम्बस्वरूपच्छायाया द्रव्यान्तरत्वशङ्कानिरसनं। अज्ञानविक्षेपशक्तिं विहाय आवरणशक्त्यंशमात्रनिवर्त्तकत्वं ज्ञानस्य न स्वाभाविकमित्यन्यमतकथनं। स्वप्ने ज्ञानस्य सूक्ष्मशरीरावयवभूतसूक्ष्मेन्द्रियसन्निकर्षजन्यत्वमिति केषाञ्चिन्मतकथनपूर्व्वकं तत्खण्डनं। सृष्टिदृष्टिवादत्वमिति केषाञ्चिदाचार्य्याणां मतकथनं। दृष्टिसृष्टिवादे सृष्टिदृष्टिवादे च चित्सुखाचार्य्य–रामाद्वयाचार्य्यप्रभृतीनां मतकथनं। अद्वैतदीपिकानुसारेण मिथ्यात्वलक्षणकीर्त्तनं। उपाधिस्वरूपकथनं। आत्मनोऽणुपरिमाणवत्त्ववादखण्डनपूर्व्वकं विभुत्वसंस्थापनं।

३–ये परिच्छेदे।—कर्म्मणां ब्रह्मप्राप्तिहेतुत्ववादखण्डनपूर्व्वकं विद्यायास्तत्प्राप्तिहेतुत्वसंस्थापनं। अत्र भामतीकारविवरणकारादीनां मतकथनं। कर्म्मणां चित्तशुद्धिद्वारा विद्योपयोगित्वकथनं। शूद्रस्यापि विद्यार्थं कर्म्माधिकारनिरूपणं। केषाञ्चिन्मतेन क्षत्रियवैश्ययोरपि ब्राह्मणवत् सन्न्यासाधिकारनिरूपणं। ब्रह्मसंस्थस्यैव श्रवणादिषु मुख्यः अधिकार इति केषाञ्चिन्मतकथनं। अत्र नानाविधमतोपन्यासः। निर्गुणस्य ब्रह्मण उपासना नास्तीति शङ्कानिरसनं। ब्रह्मसाक्षात्कारे नानाविधमतकथनं। जीवन्मुक्तिनिरूपणं। अत्र नानाविधमतकथनं।

४-र्थे परिच्छेदे।—अविद्यालेशानुवृत्त्या जीवन्मुक्तिरिति सति सिद्धान्ते तदविद्या-लेशस्वरूपनिरूपणं। अत्र विविधवादकथनं। अपवर्गकारणादिनिरूपणप्रसङ्गेन नानामतकथनं। मुक्तस्य ईश्वरभावापत्तिकथनं। अत्र नानाविधमतकीर्त्तनं।

No. 1574. बौधायनचातुर्मास्यसूत्रं।

Substance, country-made paper, 8¾ × 4¼ inches. Folia, 14. Lines, 12 on a page. Extent, 300 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Baudháyana-cháturmásya Sútra. The aphorisms of Bodháyana on the Quadrimensial rite, being a part of the author's Kalpa Sútra.

Beginning. ॐ वैश्वदेवेनविमिर्यक्ष्यमाणो भवति फाल्गुन्यां वा चैत्र्यां वा पौर्णमास्यां नक्षत्रप्रयोग इत्येक आऊरुदगयन आपर्य्यमानपक्षस्य पुण्याहे प्रयुञ्जीतेति।

End. हवीꣳष्यनुवत्सरीणाꣳ स्वस्तिमास्स्त इत्यास्से।

Colophon. इति बौधायनीयचातुर्मास्यसूत्रं सम्पूर्णं।

विषयः। चातुर्मास्ययागप्रकरणं।

No. 1575. निविद्प्रउगाध्यायौ।

Substance, country-made paper, 10 × 4½ inches. Folia, 8. Lines, 10 on a page. Extent, 135 s'lokas. Character, Nágara. Date, Sm. 1814. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Nivid and *Prayüga.* The initials of the Nivid and Prayüga mantras.

Beginning. निविदाध्यायः। अग्निर्देवेद्धः। अग्निः सुसमित्। होता देववृतः। होता मनुवृतः (?)। प्रणीर्यज्ञानां।

End. विश्व आसोमपीतयः। वाचमद्यं देवीं वाचास्मिन् यज्ञे सुपेशसा। सरती हवामहे।

Colophon. इति प्रउगाध्यायः॥

विषयः। निविद्प्रउगकर्मकथनम्।

No. 1576. आश्वलायनीयं प्रायश्चित्तं ।

Substance, country-made paper, 9¼ × 4¼ inches. Folia, 10. Lines, 12 on a page. Extent, 285 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

A's'valáyaníya Práyas'chitta. An exposition of As'valáyana's chapter on expiations for errors and accidents occurring in course of performing Vedic rites. The codex is incomplete and the author's name cannot be made out.

Beginning. अथाश्वलायनीयं। आह्वनीये विद्यमाने यदि गार्हपत्योऽनुगच्छेत्। अवक्षामेभ्यो मन्थनं कृत्वा ह्वनीयोऽनुगमयितव्यः।

End. इति सिद्धान्तभाष्ये। ऋत्विजामेक इति सूत्रात्। प्रपञ्चितमिति दिक्।

Colophon. (परिसमाप्तिवाक्याभावात् खण्डितमिति भाति।)

विषयः। वैदिककर्म्मणामङ्गवैकल्ये तत्र कर्त्तव्यप्रायश्चित्तविशेषाः।

No. 1577. मीमांसावार्त्तिकं ।

Substance, country-made paper, 10½ × 4½ inches. Folia, 113. Lines, 6—9—10 on a page. Extent, 2,475 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Mímáñs'á-vártika. A commentary on the Mímáñs'á aphorisms of Jaimini. By Kumárila Bhaṭṭa. The MS. is incomplete; the work is in course of publication in the Bibliotheca Indica. Hall's *Contributions*, p. 170.

Beginning. द्रव्यसंस्कारकर्म्मसु परार्थत्वात् फलश्रुतिरर्थवादः। अपायस्त्रोकार्थिन उपायमन्विच्छतः पर्णमयीत्वमुपायत्वेन विधीयते।

End. अपि च गुणवचनोऽयं स यदा द्रव्ये उपसर्जनीभूतः तदा द्रव्यस्य यल्लिङ्गसङ्ख्यं तल्लभते। इह (खण्डितं)

विषयः। मीमांसासूत्रव्याख्यानं। अत्र चतुर्थाध्यायतृतीयपादावधि दशमाध्यायकतिपयपर्य्यन्तं वर्त्तते।

No. 1578. नाममाला, वा शीघ्रबोधिनी।

Substance, country-made paper, 10 × 5 inches. Folia, **19**. Lines, 12 on a page. Extent, 472 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old, decayed. Verse. Correct.

Námamálá alias *S'ighrabodhiní.* A metrical Lexicon in four parts. By Puṇḍaríka Viṭṭhala, of the Kármáṭha (?) caste. The first part gives the names of the different parts of the body, and also of all things and attributes of women; the second, inanimate objects, mountains, trees, &c.; the third is devoted to celestial objects; and the fourth to words of several meanings, synonyms, prepositions, names of arts, sciences, &c.

Beginning. गणेशं भारतीं नत्वा श्रीमद्विट्ठलसूरिणा।
शीघ्रबोधिनिका नाम क्रियते नाममालिका॥
चतुःकाण्डमिता रम्या षष्ठ्या सह चतुःशती।
कवेः शीघ्रकवित्वाय श्रोतुर्बुद्धिसमृद्धये॥
देहं तत्त्वकलाङ्गानि नारीणां जातिभेदकाः।
सौन्दर्य्यं वस्त्रमाकल्पहावभावरसादिकाः॥

End. इत्येवं बालबोधार्थं किञ्चित् किञ्चित् प्रकाशितं।
किन्त्वत्राद्दृष्टमन्यत्र द्रष्टव्यं साद्बोत्तमैः॥
यावद्धरिकथावाणी सिन्धुरिन्दुरवी दिशः।
भूमौ तिष्ठतु तावत्तु नाममालापि वैट्ठली॥

Colophon. इति श्रीकार्म्मोटजातीयपुण्डरीकविट्ठलकृतौ शीघ्रबोधिनीनाममालायामनेकार्थ-काण्डश्चतुर्थः। समाप्तेयं शीघ्रबोधिनी नाममाला।

विषयः। १ प्रथमे शृङ्गारकाण्डे,—नारीनां देहसौन्दर्य्यवेशहावभावादीनां नामकथनं।
२-ये राजकाण्डे,—भू-गिरि-वृक्षसङ्ग्रामादीनां नामकथनं।
३-ये दैवकाण्डे,—आकाशपूर्णिमादिनरात्रिस्वर्गसुरादीनां नामकीर्त्तनं।
४-र्थे नानार्थकाण्डे,—नानार्थशब्दकथनं। अव्ययानामर्थकथनं। चतुर्द्दशवि-द्याचतुःषष्टिकलादीनां नामकथनञ्च।

No. 1579. लेशसङ्ग्रहः, वा मीमांसालेशसङ्ग्रहः ।

Substance, country-made paper, 10½ × 3½ inches. Folia, 40. Lines, 9 on a page. Extent, 1,175 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, very decayed. Prose. Correct.

Mímáṅsá-les'a-saṅgraha alias *Les'a-saṅgraha.* A commentary on the *S'ástra-siddhánta-les'a* of Apya Díkshita. By Dharmaya Díkshita, a disciple of the author. Mr. Hall notices a commentary on the text by Achyuta Kṛishṇánanda Tírtha, disciple of Svayamprakás'a Sarasvati, (*Contributions*, p. 153,) and a third has been described under No. 60 (vol. I, p 35). The text occurs under No. 1573.

Beginning. उपासकानामचिराद् वाञ्छितार्थप्रदायिने ।
हृद्ये वाङ्मनःकायैर्नमः साम्बशिवाय च ॥
गुरुमप्पययज्वानं नत्वा धर्म्मयदीक्षितः ।
तद्वचःख्यापितार्थेषु तनुते लेशसङ्ग्रहं ॥
यज्ञादिकर्म्मभिर्नित्यैः शुद्धान्तःकरणो द्विजः ।
जिज्ञासते त्वां विश्वेशत्वत्पदाम्भोजचिन्तकः ॥
ननु यज्ञादिकर्म्मणां स्वर्गादिसाधनानां ।

End. सूत्रार्थः सर्व्वोऽपि विषयवाक्येऽस्मिन् निवद्ध एव । तथा हि,———

Colophon. इतः परं लिप्यभावात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । अप्पयदीक्षितकृतशास्त्रसिद्धान्तलेशसङ्ग्रहाभिधानग्रन्थस्य व्याख्यानं ।

No. 1580. प्रायश्चित्तसङ्क्षेपः ।

Substance, palm-leaf, 14½ × 1½ inches. Folia, 36. Lines, 4 on a page. Extent, 522 s'lokas. Character, Bengali. Date, Sk. 1611. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Práyas'chitta-saṅkshepa. A summary of the rules on expiations for sins of all kinds. By Chintámaṇi Nyáyálaṅkára Bhaṭṭácharya.

Beginning. अथ प्रायश्चित्तव्यवस्था । तत्रादौ प्रायश्चित्तलक्षणं । तथा च हारीतः,——
प्रयतत्वाद्वापचितमशुभं नाशयतीति प्रायश्चित्तं ।

End. बालाङ्गोजनविषयं आमान्नविषयं वा—इति शूलपाणिः।

Colophon. इति गौड़देशनिवासिश्रीचिन्तामणिन्यायालङ्कारभट्टाचार्य्यकृतौ प्रायश्चित्त-सङ्क्षेपः समाप्तः। शकाब्दाः १६११।

विषयः। प्रायश्चित्तलक्षणं। अतिपातकमहापातकानुपातकोपपातकनिरूपणं। एषां प्रायश्चित्तकथनञ्च। पतितसंसर्गप्रायश्चित्तं। गोबधप्रायश्चित्तं। बाल्यादिभेदेन प्रायश्चित्तव्यवस्थानिरूपणं। ज्ञानकृतादिनिरूपणं। ब्राह्मणस्वामिकादिगोबध-प्रायश्चित्तं। एकहायन्यादिगोबधप्रायश्चित्तं। रोधादिनिमित्तकगोबधप्रायश्चित्तं। अस्थिभङ्गादिप्रायश्चित्तं। अपालनादिनिमित्तगोबधप्रायश्चित्तं। गोबधापवादः। क्षत्रियादिबधप्रायश्चित्तं। स्त्रीबधप्रायश्चित्तं। गर्भबधप्रायश्चित्तं। मार्ज्जारबधप्राय-श्चित्तं। मत्स्यादिबधप्रायश्चित्तं। मण्डपोद्यानादिभङ्गप्रायश्चित्तं। देवागारादि-भेदनप्रायश्चित्तं। अभिचारप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। शूद्रान्नभक्षण-प्रायश्चित्तं। चर्व्वितताम्बूलादिभक्षणप्रायश्चित्तम्।

No. 1581. विश्वप्रकाशः।

Substance, country-made paper, 9 × 3½ inches. Folia, 133. Lines, 8 on a page. Extent, 2,112 s'lokas. Character, Nágara. Date, Sk. 1619. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Vis'vapraka's'a. A dictionary of the Sanskrit language. By Mahes'vara. The author is best known by his title of Rájas'ekhara. Vide Wilson's Miscellaneous Essays, III.

Beginning. स्तवीमहि महत्क्लेशमोहान्तकभिषग्वरं।
त्रैधातुकनिदानज्ञं सर्व्वज्ञं दुःखहायनं॥
कलाविलासाम्बुकरन्दविन्दुमुद्राविनिद्रे हृदयारविन्दे।
या कल्पयन्ती रमते कवीनां देवीं नमस्यामि सरस्वतीं तां॥
कवीन्द्रकुमुदानन्दकन्दो+सुधाकरं।
वाचस्पतिमतिस्पर्द्धिशेमुषीचन्द्रकोज्ज्वलं॥
क्षुभ्यत्क्षीराब्धिकल्लोलमालोल्लासियशःश्रियं।
गुरुं वन्दे जगद्वन्द्यं गुणरत्नैकरोहणं॥
श्रीसारसाकन्दपतेरनवद्यविद्यवि+तरङ्गपदसन्वयमेव बिभ्रत्।
यश्चन्द्रचारुचरितो हरिचन्द्रनामा स्वव्याख्यया चरकतन्त्रमलञ्चकार॥

आसीदसीमवसुधाधिपवन्दनीये तस्यान्वये सकलवैद्यकुलावतंसः ।
शक्रस्य द(?)+ इव गाधिपुराधिपस्य श्रीकृष्ण इत्यमलकीर्त्तिलतावितानः ॥
सङ्कल्पसङ्ग+ + + + + + +जल्पकल्पानलाकुलितवादिसहस्रसिन्धुः ।
तर्कचयत्रिनयनस्तनयो यदीयो दामोदरः समभवद्भिषजां वरेण्यः ॥
तस्याभवत् स्तनुरुदारवाचो वाचस्पतिश्रीललनाविलासी ।
सद्वन्द्यविद्यानलिनीदिनेशः श्रीमहेशः सत्कुमुदाकरेन्दुः ॥
यज्जात्मजः सकलवैद्यकतत्त्वरत्नरत्नाकरश्रियमवाप्य च केशवोऽभूत् ।
कीर्त्तिनिकेतनमनिन्द्यपदप्रमाणवाक्यप्रपञ्चरचनाचतुराननश्रीः ॥
कृष्णस्य तस्य च सुतः स्मितपुण्डरीक+ +तपत्रपरभागयशःपताकः ।
श्रीब्रह्म इत्य+ + +मुखारविन्दसोल्लासलासितरसार्द्रसरस्वतीकः ॥
तस्यात्मजः सरसकैरवकान्तकीर्त्तिः श्रीमन्महेश्वर इति प्रथितः कवीन्द्रः ।
निःशेषवाङ्मयमहार्णवपारदृश्वा शब्दागमाम्बुरुहषण्डरविर्बभूव ॥
यः साहसाङ्कचरितादिमहाप्रबन्धनिर्म्माणनैपुणगुणागतगौरवश्रीः ।
यो वैद्यकत्रयसरोजसरोजबन्धुर्बन्धुः सताञ्च कविकैरवकाननेन्दुः ॥
इयं कृतिस्तस्य महेश्वरस्य वैदग्ध्यसिन्धोः पुरुषोत्तमानां ।
देदीप्यतां हृत्कमलेषु नित्यमाकल्पमाकल्पितकौस्तुभश्रीः ॥
लब्धैः कथञ्चिदभिजातसुवर्णकारैः + +न केशवतरत्नधिशब्दरत्नैः ।
विश्वप्रकाश इति काञ्चनबन्धुशोभां विभ्रन्मयात्र घटितो मुखखण्ड एषः ॥

— — — — — — — — —

भोगीन्द्रकात्यायनसाहसाङ्कवाचस्पतिव्याड़िपुरःसराणां ।
स विश्वरूपामरमङ्गलानां शुभाङ्कवोपालितभाण्डरीणां ॥
कोशावकाशात् प्रकटप्रभावः सम्भावितानर्थगुणः स एषः ।
सम्पादयन्नेष्यति वाञ्छितार्थान् कथं न चिन्तामणीनां कवीनां ॥

End. एतान्त+कृतधियः कृतकृत्यभावमापादयन्तु सदयं मदयन्तु चेतः ।
नित्यं महेश्वरकवेः परिभावयन्तो वाचः परो +निरमाहि(?) भवन्तु लोके ॥

Colophon. इति श्रीकमलवैद्यराजशेखरस्य कविराजपरमेश्वरस्य गद्यपद्यविद्यानिधेः श्रीमन्महेश्वरस्य कृते(तौ) विश्वप्रकाशे अभिधानरत्ने द्वितीयः परिच्छेदः समाप्तः ।
ग्रन्थसङ्ख्या २२४० । शके १६१९ पौष ।

विषयः । नानार्थशब्दनिरूपणं ।

No. 1582. सूर्य्यार्घ्यदानप्रयोगः ।

Substance, country-made paper, 10 × 4½ inches. Folia, 11. Lines, 7—8 on a page. Extent, 125 s'lokas. Character, Nágara. Date, Sk. 1630. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Súryárghyadána-prayoga. A manual for performing the rite of offering an arghya to the sun. By Vaidyanátha. A work of this name has been noticed under No. 21 (*ante* I, p. 14), but it is by a different author.

Beginning. अथ त्वचार्घ्यदानप्रयोगः । देशकालौ सङ्कीर्त्त्य ममामुकरोगस्य समूलनाशद्वारा चिरारोग्यप्राप्तये त्वचकल्पोक्तप्रकारेण त्वचस्य न्यासपूर्वकं (इत्यादिः)

End. त्वारोग्यर्थे(?)विचिकीर्षितस्य सूर्य्यार्घ्यदानस्य शुभं प्रयोगं ।
दैकरिः(?)मूलवचोऽनुरूपं श्रीवैद्यनाथो रचयाञ्चकार ॥
खवह्निषड्भूयुतशाककाले १६३० आषाढमासे नवमीदिने च ।
कनखरायां शिवराजधान्यां भागीरथीनीरपविचितायाम् ॥

विषयः । सूर्य्यार्घ्यदानविधिः ।

No. 1583. भाट्टदीपिका ।

Substance, country-made paper, 9¾ × 4¼ inches. Folia, 74. Lines, 9—10—11—12 on a page. Extent, 1,628 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Bháṭṭa-dípiká. A commentary on the aphorisms of the Mímáṅsá doctrine. By Khaṇḍa Deva. The MS. is limited to the 9th book. According to Mr. Hall, the work begins with the second quarter of the first book. *Contributions*, p. 179.

Beginning. अथातः क्रत्वर्थः । एवं सिद्धे शेषि(?) निरूपिते शेषत्वे प्रयोजनं निरूपितप्रयोज्यत्वमिह निरूप्येत ।

End. षाज्यद्रव्यकमनुषक्तपत्नीवद्देवत्यमुपांशुयागप्रकृतिकं । शेषसङ्ख्याशब्दो तु पूर्व्वस्य कर्म्मणः समाप्तप्रायतया कथञ्चिदनुवादाविति सिद्धस्त्रिविध ऊहः ।

Colophon. इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां नवमस्य चतुर्थः ।

साक्षाद्रुद्रद्वयं(?) स्विम(?)कृततपसाराध्यनारायणः सन्
योऽसौ सोऽनन्तदेवः स्वयमजनि महारुद्रदेवात्मकः सन् ।
भूत्वा श्रीखण्डदेवः स जगति विदुषां वेदशास्त्रार्थतत्त्वं
व्याख्याय ब्रह्मभावं निरुपधियतिराट् श्रीधरेन्द्रो जगाम ॥
(श्रीनृसिंहाश्रमकृतं पद्यमिदं । ग्रन्थकारविषयं)

विषयः । भट्टकृतमीमांसादर्शनस्य नवमाध्यायस्य व्याख्यानं ।

No. 1584. श्रुतिसारसमुद्धरणं ।

Substance, country-made paper, 10 × 4½ inches. Folia, 16. Lines, 9 on a page. Extent, 360 s'lokas. Character, Nágara. Date, Sm. 1931. Place of deposit, Monastery of Dandis at Siüḍi, District Vírubhuma. Appearance, new. Verse. Generally correct.

S'rutisára-samudharaṇa. A disquisition on the Vedántic doctrine of aduality, in course of which the Vais'eshika and other doctrines are refuted. By Toṭaka Áchárya.

Beginning. त्रैलोक्यनाथहरिमीश्वमुदारसत्त्वं शक्तेस्तनूजतनयं परमेष्ठिकल्पम् ।
जीमूतमुक्तविमलाम्बरचारुवर्णं वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम् ॥
सकलं मनसा क्रियया जनितं समवेक्ष्य विनाशितया तु जगत् ।
निरविद्यत कश्चिदतो निखिलादविनाशिकृतेन न लभ्यमिति ॥

End. भूः पादौ यस्य खश्चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नतोऽस्मि ॥

Colophon. इति श्रीमद्भगवत्पूज्यपादशिष्यश्रीतोटकाचार्य्यविरचितं श्रुतिसारसमुद्धरणप्रकरणं समाप्तं । संवत् १९३१ । आषाढशुदि ।

विषयः । निर्व्वेदादनन्तरं गुरूपसदनप्रकारकीर्त्तनं । आत्मनो निर्गुणत्वव्यवस्थापनं । तत्र वैशेषिकादिमतखण्डनं । जगतोऽनित्यत्वव्यवस्थापनं । आत्माकाशयोः संयोगसम्बन्धेन देहघटादौ स्थितिरिति कणभक्षाक्षपादमतखण्डनं । आकाशस्य नित्यत्ववादखण्डनं । जगत्सृष्टिनिरूपणं । तत्त्वमसिवाक्यार्थनिरूपणं । साङ्ख्यमतखण्डनं । जीवात्मस्वरूपनिरूपणं । मनसो नित्यत्ववादखण्डनं । परमात्मजीवात्मनोरभेदनिरूपणं । ब्रह्मस्वरूपादिनिर्णयश्च ।

No. 1585. तत्त्वसारः ।

Substance, country-made paper, 6 × 3 inches. Folia, 32. Lines, 5 on a page. Extent, 193 s'lokas. Character, Nágara. Date, ? Place of deposit, Monastery of Dandis at Siüḍi, District Vírubhuma. Appearance, new. Verse. Generally correct.

Tattva-sára. An epitome of the Vedánta doctrine. By Sankara A'chárya. It is different from the work of this name noticed on page 90, of vol. I.

Beginning. ॐ नत्वा दत्तात्रेयनिर्व्वाणं पूर्णानन्दं निरञ्जनं ।
यस्य विज्ञानमात्रेण जीवः शिवत्वमाप्नुयात् ॥
दत्तपादप्रसादेन ज्ञानभानुः प्रकाशितः ।
नाशितं तिमिराज्ञानं स्वात्मज्ञानञ्च दर्शितं ॥
देहाभिमानं निर्मुच्य नामरूपादिवर्णकं ।
ब्रह्मानन्दश्च सम्प्राप्यः सच्चिदानन्दलक्षणः ॥

End. अस्य ग्रन्थस्य व्याख्यानं हृदि यस्य स्थिरं भवेत् ।
बहुजन्मनोऽन्धकारो नश्यते निशि चन्द्रमाः ॥ हरिः । ॐ तत्सत् ।

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं तत्त्वसारवेदान्तप्रकरणं समाप्तं ।

विषयः । मोक्षोपायकथनं । जगतो ब्रह्माकारत्वं । ब्रह्मचर्य्याश्रमदिव्यत्वकथनं । कुटीचरकृत्यनिरूपणं । योगाभ्यासफलकथनं । आत्मस्वरूपकथनं । बोधोपायकीर्त्तनं । एकजीववादः । ब्रह्मस्वरूपनिरूपणं । योगिदण्डिप्रभृतिकृत्यं कर्म्मणां हेयत्वनिरूपणं । अभेदज्ञानप्रशंसा । वैराग्यादिसाधनचतुष्टयनिरूपणं । परापश्यन्त्यादिचतुर्व्विधवाक्साधनलक्षणादिकं । मातृकामन्त्रनिरूपणं । साङ्ख्य–पातञ्जल–न्याय–मीमांसा–शैवादिशास्त्रनिन्दा । जीवन्मुक्तिस्वरूपकीर्त्तनं । योगस्य हृच्चत्वेन निरूपणं । सर्व्वत्र ब्रह्मदृष्टिकर्त्तव्यता ।

No. 1586. तन्त्ररत्नटीका ।

Substance, country-made paper, 10½ × 4½ inches. Folia, 47. Lines, 4—8 on a page. Extent, 1,344 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Tantraratna-ṭíká. A Scholia on the Tantraratna, a commentary by Kumárila Bhaṭṭa on a portion of the Mímáñsá aphorisms of Jaimini. The MS. is defective and the author's name is not apparent. The Tantraratna has been noticed under No. 240. Hall's *Contributions*, p. 170.

Beginning. अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा । पूर्वाध्याये शेषपर्यायमेदसर्थमेव चिन्तित-
मिह ।

End. तस्मात् सम्बन्धभाव्यमानः । तस्य च भाव्यमानस्य च करणे नि (इत्यतः खण्डितं)

विषयः । मीमांसात्मकतन्त्ररत्नस्य चतुर्थपादस्य व्याख्यानं ।

No. 1587. अनेकार्थसङ्ग्रहः ।

Substance, country-made paper, 10 × 3¾ inches. Folia, 95. Lines, 10 on a page. Extent, 1,996 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Anekártha-sañgraha. A dictionary of Sanskrit synonyms. By Hemachandra A'chárya. The words are classed according to the number of vowels in each. Wilson's Essays, III.

Beginning. नत्वा हरिं कृतैकार्थशब्दशब्दो ह सङ्ग्रहः ।
एकस्वरादिषट्काण्डा(?) कुर्वेऽनेकार्थसङ्ग्रहं ॥ १ ॥
अकारादिक्रमोऽत्रादौ ककारादिक्रमोऽन्ततः ।
उद्देशवचनं पूर्वं पश्चादर्थप्रकाशनम् ॥
(अव्ययकाण्डस्य आदौ खण्डितं ।)

End. सुवहस्तु सम्यग्वहे सुवहो मल्लकीद्रुमे ।
रास्नाशेफालिकागोधापटोलीपर्णिकासु च ॥ ८०७ ॥

Colophon. इत्याचार्यहेमचन्द्रविरचितेऽनेकार्थसङ्ग्रहे त्रिस्वरकाण्डः समाप्तः ।

विषयः । अकारादिक्रमेणानेकार्थशब्दकथनं ।

No. 1588. ऋक्सङ्ख्यापरिशिष्टं ।

Substance, country-made paper, 9¼ × 4 inches. Folium, 1. Lines, 14. Extent, 14 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Ṛik-saṅkhyá-paris'ishṭa. An Index to the verses of the Rik Saṅhitá used by persons belonging to the Kauthumi S'ákhá. Anonymous.

Beginning. शतद्वयं तथैकोनं गायत्रं परिकीर्त्तितं ।
अनुष्टुप् पञ्चपञ्चाशत्पञ्चषष्टितथोष्णिहं ॥

End. नवशतसहस्रैकं त्रिंशत्सहस्राधिकं तथा ।
कौथुमानामृचां सम्यक् सङ्ख्यामाहुर्मनीषिणः ॥

Colophon. इति ऋक्सङ्ख्यापरिशिष्टं समाप्तम् ।

विषयः । कौथुमीशाखीयानामृचां सङ्ख्याकथनं ।

No. 1589. सोमोत्पत्तिः ।

Substance, country-made paper, 9¼ × 4 inches. Folia, 2. Lines, 11 on a page. Extent, 28 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Somotpatti. A legend on the origin of the Soma creeper, related by Gárgya in response to a question of Bhágurí. From its style the work appears to be an extract from some Puráṇa or Tantra, but there is nothing in the codex to indicate from which.

Beginning. अग्निहोत्रकृतासीनं गार्ग्यं दृष्ट्वं महामुनिं ।
विनयेनोपसङ्क्रम्य भागुरिः परिपृच्छति ॥ १ ॥
कथं सोमसमुत्पत्तिः कथं वा चीयते पुनः ।
केनायं कः समुत्थानं केन दृष्टिश्च ब्रूहि माम् ॥ २ ॥

End. य इमाञ्च सोमोत्पत्तिं पर्वकाले सदा पठेत् ।
सर्वपापविशुद्धात्मा सोमलोकं स गच्छति ॥ २५ ॥

विषयः । सोमलतोत्पत्तिकथनं ।

No. 1590. महानाम्नीपरिशिष्टं ।

Substance, country-made paper, 9¼ × 4 inches. Folium, 1. Lines, 10. Extent, 11 s'lokas. Character, Nágara. Date, Sm. 1666. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Mahánámní-parísishṭa. An index to the *Mahánámní*—one of the Sáma Sañhitás. Anonymous.

Beginning. महानाम्न्यास्वयोद्श्रपदास्वतुर्दशोत्तमास्वासां विवेकः ।

End. शाक्वराणेव चीणि पराणि पदानभ्यासो शाक्वरोऽक्षाचरः ॥ १ ॥

Colophon. इति महानाम्नीपरिशिष्टं ।

विषयः । महानाम्नीपद्विवेकः ।

No. 1591. धातुलक्षणं ।

Substance, country-made paper, 10 × 4¼ inches. Folia, 2. Lines, 10—11 on a page. Extent, 29 s'lokas. Character, Nágara. Date, Sm. 1692. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dhátu-lakshaṇa. A summary of Vedic roots. Anonymous.

Beginning. स्वरश्च । न विशन्ति मत्याः । इत्येवं सर्वत्र । अत एष कोऽधिकारी । ऋचां(?)

End. गहलाति सर्वं दृष्ट्वा । ज्वसङ्गात्रेण । विना प्रयत्नं । सिमाः पवखाढ ।

Colophon. इति धातुलक्षणं समाप्तिमगमत् ।

विषयः । वेदप्रसिद्धकतिपयधातुलक्षणं ।

No. 1592. व्यूहनवरात्रः ।

Substance, country-made paper, 9½ × 4 inches. Folia, 24. Lines, 10 on a page. Extent, 460 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vyúha-navarátra. A guide to the performance of the Vedic rite called *Vyúha-navarátra.* Anonymous.

विषयः । सकादीनां विशेषकथनं । भूतशुद्धिप्रकारकीर्त्तनं । प्राणायामस्वरूपकथनं । प्राणप्रतिष्ठाविधिः । मातृका-केवल-संहार-सृष्टिस्थित्यादिन्यासनिरूपणं । श्रीकण्ठादिना मातृकान्यासकथनं । केशवादिमातृकान्यासादिकथनञ्च । पञ्चायतनपूजाविधानं । शिवाय षोड़शोपचारदानमन्त्रकथनं । तत्र तत्र आसनादिनिरूपणञ्च । होमविधानं । विस्तरतो नित्यपूजानुष्ठानाशक्तौ सङ्क्षेपेण पूजाविधानं । शाक्तस्य सङ्क्षेपपूजाकरणे दोषकथनं । सूतकादौ नित्यपूजाकर्त्तव्यताविधानं । दीक्षाविधानं । दीक्षालक्षणं । आणवी-शाक्तेयी-शाम्भवीभेदेन दीक्षायास्त्रैविध्यकथनपूर्व्वकं तत्तल्लक्षणकीर्त्तनं । पुस्तकलिखितमन्त्रजापसिद्धिहानिकथनं । गुरुभक्तिमाहात्म्यं । गुरुलक्षणं । मध्यदेशकुरुक्षेत्रादिवासिनां गुरूणां श्रेष्ठत्वकथनं । गौड़-तैल-मागध-केरलादिवासिनां गुरूणां मध्यमत्वकीर्त्तनं । कर्णाट-काश्मीर-कलिङ्ग-कामरूपादिवासिनां गुरूणामधमत्वनिरूपणञ्च । दुष्टलक्षणं । गृहस्थस्य भिक्षु-वानप्रस्थादिभ्यो मन्त्रग्रहणे दोषकथनं । पित्रादिभ्यो मन्त्रग्रहणे दोषः । प्रतिलोमदीक्षानिषेधः । स्त्रिया अपि गुरुत्वकथनं । गुरुणा सार्द्धं ऋणादानक्रयविक्रयादिनिषेधः । गुरौ मनुष्यज्ञाने दोषः । शिष्यलक्षणं । निन्दितशिष्यपरिग्रहे दोषः । गुरुशिष्यपरीक्षाप्रकारः । शूद्रादिभ्यः प्रणवादियुक्तमन्त्रदाननिषेधः । मन्त्राणां ब्रह्मक्षत्रादिभेदकथनं । मन्त्राणां पुं-स्त्र्यादिदैवतादौ दोषादोषनिरूपणं । तेषां सुप्तप्रबुद्धत्वादिनिर्णयः । मन्त्रदोषाः । मन्त्राणां बालत्वादिनिरूपणं । तेषां दीप्तक्षुधार्त्तत्वादिकथनं । मन्त्रदोषनिरसनोपायकीर्त्तनं । मन्त्राणां दशविधसंस्कारनिरूपणं । मन्त्रमेलनप्रकारः । गणमैत्रीविचारः । राशिचक्रादिनिर्म्माणप्रकारः । पाञ्चभौतिकचक्रादिनिरूपणं । सिद्धसाध्यादिनिरूपणं । वर्णशोधनप्रकारः । ऋणधनशोधनकथनं । षट्पदचक्रादिकथनं । मन्त्रग्रहणे मासतिथ्यादिनिरूपणं । शिवमन्त्रावलीनिरूपणं । तत्र मन्त्रविशेषेण ध्यानगायत्र्यादिनिरूपणं । दक्षिणामूर्त्तिमन्त्रादिनिरूपणं । चिन्तामणिमन्त्रादिनिरूपणं । भैरवमन्त्रादिनिरूपणं । वटुकमन्त्रादिनिरूपणं । गजाश्वादिप्रयोगः । ऊर्द्ध्वाम्नायप्रशंसा । तन्माहात्म्यकथनञ्च । पराप्रसादमन्त्रनिरूपणादिकं । प्रपञ्चन्यास-युवनन्यासादिकथनं । दैवतन्यास-महाषोढादिन्यासकथनञ्च । ब्राह्मणस्य सर्व्वथैव सात्त्विकबलिदानकर्त्तव्यता । त्र्यम्बकमन्त्रनिरूपणादिकम् । अत्र कामनाविशेषे होमविशेषविधानं । मन्त्रविचारप्रकरणेऽस्मिन् सर्व्वत्र प्रयोगनिरूपणमस्ति । एवं परत्र । भुवनेश्वरीमन्त्रनिरूपणादिकं । मातङ्गीमन्त्रनिरूपणादिकं । उच्छिष्टचाण्डालिनीमन्त्रादिकथनञ्च । दुर्गामन्त्रविधानादिकं । बालाया मन्त्रादिनिरूपणं ।

No. 1622. विलक्षणचतुर्द्दशकं ।

Substance, country-made paper, 13 × 3 inches. Folia, 2. Lines, 5 on a page. Extent, 29 s'lokas. Character, Bengali. Date, ? Place of deposit, Mayanáḍála, Post Khayarásula, Zillá Vírabhúma, Bábu Nandalála Mukhyopádhyáya. Appearance, fresh. Verse. Correct.

Vilakshaṇa-chaturdas'aka. A poem in 14 stanzas on the relation of Chaitanya to Krishṇa. By Sadás'iva Kavirája Gos'vámí.

Beginning. सुमोच विषयस्पृहां व्रजविलासिनीनागरः
करोति चरितं मुनेर्मुनिविचिन्त्यपादाम्बुजः ।
तटे लवणवारिधेः स्वपिति दुग्धसिन्धु जयौ
विलक्षणविचेष्टितो विहरते शचीनन्दनः ॥ १ ॥

End. विलक्षणचतुर्द्दशप्रमितपद्यमत्यद्भुतं
सदाशिवरसज्ञया सरसमेतदास्वादितं ।
शचीसुतपदाम्बुजे निविड़भक्तियोगप्रदं
विशन्तु सुखसागरे परिपठन्तु सन्तश्चिरं ॥ १५ ॥

Colophon. इति श्रीसदाशिवकविराजगोस्वामिविरचितं विलक्षणचतुर्द्दशकं समाप्तम् ।

विषयः । शचीनन्दनस्य श्रीकृष्णावतारात् वैलक्षण्यकथनपूर्व्वकं तदीयचेष्टादिवर्णनं ।

No. 1623. गङ्गादेवीस्तोत्रं ।

Substance, country-made paper, 13 × 4½ inches. Folia, 2. Lines, 7 on a page. Extent, 48 s'lokas. Character, Bengali. Date, ? Place of deposit, Mayanáḍála, Post Khayarásula, Zillá Vírabhúma, Bábu Nandalála Mukhyopádhyáya. Appearance, fresh. Verse. Correct.

Gaṅgádeví-stotra. A poem in praise of Gaṅgádeví, daughter of Nityánanda, the coadjutor of Chaitanya. By Abhiráma Gos'vámí.

Beginning. श्रीराधा युगप+रिच मुदितौ संसेव्यभावौ मिथः
प्रेमाविष्टतया पुरा विगलितौ तद्वस्तु गङ्गाघनौ ।
सा त्वं सूर्य्यसुता सुता हि कृपया जाताम्बुनाधीश्वरी
नित्यानन्दसुते प्रसीद गदितं प्रेम्णो वरी मञ्जरी ॥

End. गोपालोऽहं प्रसिद्धो विरचनमस्तं रामदासो हि नाम्ना
स्तोत्रं शास्त्रार्थसारं कलिमलमथनं देवि भृत्यस्तवास्मि ।
किन्त्वज्ञस्याननेन मे भगवति कृपया वाचि + + + + यत्
तत् सम्पूर्णं भवेत्त्वत्पद्युगकमले चार्पितञ्चास्तु नित्यं ॥

Colophon. इति श्रीअभिरामगोस्वामिनाविरचितं श्रीमतीगङ्गादेवीस्तोत्रं सम्पूर्णं ।

विषयः । नित्यानन्दतनयाया गङ्गायाः स्तवनं ।

No. 1624. गौराङ्गस्मरणैकादशकं ।

Substance, country-made paper, 13 × 5 inches. Folium 1. Lines, 14. Extent, 24 s'lokas. Character, Bengali. Date, ? Place of deposit, Mayanáḍála, Post Khayarásula, Zillá Vírabhúma, Bábu Nandalála Mukhyopádhyáya. Appearance, fresh. Verse. Correct.

Gauráṅga-smaraṇaikádas'aka. Eleven stanzas in praise of Gauráṅga. By Vis'vanátha Chakravartí.

Beginning. श्रीगौराङ्गमहाप्रभोश्चरणयोर्या केशशेषादिभिः
सेवागम्यतमा स्वभक्तविहिता लोकैस्तु या लभ्यते ।
तां तन्मानसिकस्मृतिं प्रथयितुं भाव्यां सदा सत्तमैः
स्तौमि प्रात्यहिकं तदीयचरितं श्रीमन्नवद्वीपजं ॥

End. श्रीगौराङ्गविधोः स्वधामनि नवद्वीपेऽष्टकालोद्भवां
भाव्यां भव्यगणेन गोकुलविधोर्लीलास्मृतिर्यादृशी ।
लीलां द्योतयदेतदेकदशकं प्रीत्यन्वितो यः पठेत्
तं प्रीणाति सदैव यः करुणया तं गौरमध्येम्यहं ॥

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिना विरचितं गौराङ्गस्मरणैकादशकं समाप्तम् ।

विषयः । गौराङ्गस्तवनं ।

No. 1625. वैष्णवाभिधानं ।

Substance, country-made paper, 7 × 4 inches. Folia, 3. Lines, 11 on a page. Extent, 48 s'lokas. Character, Bengali. Date, ? Place of deposit, Mayanáḍála, Post Khayarásula, Zillá Vírabhúma, Bábu Nandalála Mukhyopádhyáya. Appearance, fresh. Verse. Correct.

Vaishṇavábhidhána. The names and titles of the followers and companions of Chaitanya. By Devakinandana Kaviràja.

Beginning. प्रणम्यादौ कृपादृष्टिं कृतार्थीकृतभूतलं ।
सर्व्ववाञ्छाकल्पतरुं श्रीगुरुं पुरुषोत्तमं ॥
महायशोमहाभागान् महापतितपावनान् ।
महाभागवतान् सर्व्वान् वैष्णवान् विष्णुरूपिणः ॥

End. सर्व्वेषामप्युपादेयः सर्व्ववेदाधिकस्तथा ।
श्रवणाध्ययनो (?) नित्यं वैष्णवानां विशेषतः ॥

Colophon. इति देवकीनन्दनकविराजविरचितं श्रीवैष्णवाभिधानं समाप्तम् ।

विषयः । गौराङ्गपार्षदानां वैष्णवानां नामनिरूपणं ।

No. 1626. स्तवावली ।

Substance, country-made paper, 12 × 4½ inches. Folia, 50. Lines, 8—9 on a page. Extent, 1,328 s'lokas. Character, Bengali. Date, Sk. 1695. Place of deposit, Keñdo Gráma, Thána Siuḍi, Zilla Vírabhúma, Paṇḍit Bhagavánachandra Gos'vámí. Appearance, old. Prose and verse. Correct.

Stavávalí. A collection of poems by different authors in praise of Chaitanya.

Beginning. हरिर्दृष्ट्वा गोष्ठे मुकुरगतमात्मानमतुलं
स्वमाधुर्य्यं राधा प्रियतमसखीवात्ममभितः ।
अहो गौड़े जातः प्रभुरपरगौरैकतनुभाक्
शचीसूनुः किं मे नयनसरणिं यास्यति पुनः ॥

End. यत्पादाम्बुजयुग्मविच्युतरजःसेवाप्रभावादहं
गान्धर्व्वासरसी गिरीन्द्रनिकटे कष्टेऽपि नित्यं वसन् ।
तत् प्रेयोगणपालितो जितसुधाधारा मुकुन्दाभिधा
उद्गायामि शृणोमि मां पुनरहो श्रीमान् स्वरूपोऽवतु ॥

Colophon. इति स्तवमाला समाप्ता ।
हा किं करोमि सततं भवने प्रमत्तः सङ्गोऽपि नास्ति सुधियो मम दुर्ज्जनस्य ।
याचे तथापि प्रणतिं विदधन्नहं ते स्वामिन् स्ववेऽत्र सुरतिं पुरुदुःखदुःखी ॥

वाणग्रहरसच्मामिमिते शाके रवेर्द्दिने ।
माघे सितचतुर्थ्यान्तु लिखितैषा स्तवावली ॥

विषयः । (जीवगोस्वामिसङ्गृहीतस्तवमालातो भिन्नोऽयं ग्रन्थः ।) अथ चैतन्याष्टकं । गौराङ्गस्तवकल्पतरुः । मनःशिक्षैकादशकं । युगलस्तोत्रं । गोवर्द्धनाश्रयदशकं । गोवर्द्धनवासप्रार्थनादशकं । राधाकुण्डाष्टकं । व्रजविलासस्तवः । विलापकुसुमाञ्जलिः । प्रेमपूरस्तोत्रं । स्वनियमदशकं । राधिकाष्टोत्तरशतनामस्तोत्रं । राधिकाष्टकं । प्रेमाम्भोजमकरन्दस्तोत्रं । स्वसङ्कल्पप्रकाशस्तोत्रं । राधाकृष्णोज्ज्वलकुसुमकेलिः । आकाङ्क्षास्तोत्रं । नवाष्टकं । गोपालराजस्तोत्रं । मदनगोपालस्तोत्रं । विशाखानन्दनस्तोत्रं । मुकुन्दाष्टकं । उत्कण्ठादशकं । नवयुवद्वन्द्वदिदृक्षाष्टकं । अभीष्टप्रार्थनाष्टकं । दाननिवर्त्तनकुण्डाष्टकं । व्रजनवयुगस्तोत्रं ।

No. 1627. राधारसमञ्जरी ।

Substance, country-made paper, 14 × 4½ inches. Folia, 3. Lines, 10 on a page. Extent, 64 s'lokas. Character, Bengali. Date, ? Place of deposit, Keñdo Gráma, Thána Siudi, Zilla Vírabhúma, Paṇḍit Bhagavánachandra Gos'vámí, also another copy at Berhámpura, with Bábu Rádhikáprasáda Dása Sena. Appearance, old. Verse. Incorrect.

Rádhá-rasa-mañjarí. A poem in praise of the personal charms and attributes of Rádhá. By Chaitanyachandra, the great reformer.

Beginning. कुचकमलभरार्त्ता केशरिक्षीणमध्या विपुलतरनितम्बा पक्वविम्बाधरोष्ठी ।
प्रणयतमवयस्यास्कन्धविन्यस्तहस्ता निधुवनरसकुञ्जं याति राधा निकुञ्जं ॥

End. अङ्गे गौरसुचन्द्रिका सुचरिते लावण्यभङ्गात्मवा
श्यामप्रेमसुधानिधौ रहसि सा सम्पर्णलक्ष्मीः स्वयं ।
लावण्यात् कमला प्रमोहनपदं रूपेण यद्वैभवं
राधायाः समता न चास्ति भुवने ब्रह्माण्डभाण्डे क्वचित् ॥

Colophon. इति चैतन्यचन्द्रेण विरचिता राधारसमञ्जरी समाप्ता ।

विषयः । राधाया निकुञ्जाभिसारवर्णनं । तस्या रूपातिशयवर्णनञ्च ।

No. 1628. गङ्गाष्टकं ।

Substance, country-made paper, 13 × 3 inches. Folium 1. Lines, 12 Extent, 19 s'lokas. Character, Bengali. Date, ? Place of deposit, Keñdo Gráma, Thána Siuḍi, Zilla Bírabhúma, Paṇḍit Bhagavánachandra Gos'vámí. Appearance, old. Verse. Incorrect.

Gañgáshṭaka. Eight stanzas in praise of Gañgá Deví, daughter of Nityánanda. By Rúpa Gos'vámí. See No. 1623 for another poem in praise of this lady.

Beginning. कृष्णपादपद्मयुग्मभक्तिपूरवर्द्धिनी
नामकैकदेशयोगपापराशिनाशिनी ।
तापदग्धतापितान्तरथहेतुशोधिनी
मामुनातु सर्व्वदैव रोचिणेयनन्दिनी ॥ १ ॥

End. तुष्टिदेन चाष्टकेन ये स्तुवन्ति चेश्वरीं
सम्मितं विहाय सोऽपि कालचक्र+श्वरीं ।
यः स++ सद्विरक्तच+ ++ निजस्मितं
नित्यसिद्धदेहभावनित्यवस्तु सेवितं ॥

Colophon. इति श्रीरूपगोस्वामिना विरचितश्रीनित्यानन्दसुतागङ्गाष्टकं समाप्तम् ।

विषयः । नित्यानन्ददुहितुर्गङ्गायाः स्तोत्रं ।

No. 1629. सुबोधिनी ।

Substance, country-made paper, 16 × 4¼ inches. Folia, 256. Lines, 7—8—9—10 on a page. Extent, 20,128 s'lokas. Character, Bengali. Date, Sk. 1726. Place of deposit, Gopálapura, Post Khayarás'úla, Zillá Bírabhúma, Bábu Binodavihári Kaviràja. Appearance, old. Prose. Incorrect.

Subodhiní. A commentary on the author's treatise on the Yoga, called Yogámrita. By Gopála Kaviràja, son of Siddhes'vara, and grandson of Rámaráma. The author says, that he wrote the commentary because the commentaries written on the work by others were found difficult for beginners.

Beginning. क्वचिद्बालसुबोधाय क्वचिद्गूढार्थवित्तये ।
योगामृतस्य टीकाञ्च नत्वा वक्ति रघूत्तमं ॥
तत्रादौ विघ्नविघाताय निजेष्टदेवतास्मरणरूपमङ्गलं निबध्नाति ।

End. अधुनेति । इदानीं प्राथम्येनेत्यर्थः । पुनः स्वस्थितिभूमिं स्थापयन्नाह,—येन भूमीत्यादिः ।

Colophon. इति सुबोधिन्यां सुस्थाधिकारः ।

तातः सिद्धेश्वरो यस्य रामरामः पितामहः ।

तेनेयं लिखिता टीका गोपालेन सुबोधिनी ॥

पूर्व्वटीकाकृतां वाक्यं क्वचिदर्थस्य गौरवात् ।

अचत्यं लिखितं तेन न दोषो गुरुबोधिते ॥ शकाब्दाः १७२६ ।

विषयः । स्वकृतयोगामृतग्रन्थस्य व्याख्यानं ।

No. 1630 तत्त्वचन्द्रिका ।

Substance, country-made paper, 16 × 4¼ inches. Folia, 225. Lines, 6 on a page. Extent, 8,606 s'lokas. Character, Bengali. Date, ? Place of deposit, Gopálapura, Post Khayarás'úla, Zillá Bírabhúma, Bábu Binodavihárí Kavirája. Appearance, old. Prose. Incorrect.

Tattva-chandriká. A commentary on Chakradatta's *Chikitsá-sára-saṅgraha*—a treatise on practice of medicine. By S'ivadása Sena, son of Anánta, grandson of Uddharana, great grandson of Lakshmidhara, great great grandson of Kákustha, and great great great grandson of Sangu Sena, who was the court physician of one S'ikhares'vara. The author was a resident of Málánchi, a village in Bengal.

Beginning. यः सप्तवर्षदेशीयो दधार धरणीधरं ।

कंसध्वंसकरं वन्दे तं देवं देवकीसुतं ॥

तातः किमथ मातोन यं दृष्ट्वा दृष्टपूर्व्वकं ।

अभूत् स्कन्देऽपि सन्देहस्तं देवं शिवयोर्भजे ॥

टीकारत्नप्रभा चक्रदत्तनिर्म्मितसङ्ग्रहे ।

यद्यप्यास्ते तथाप्येष सङ्क्षेपाय ममोद्यमः ॥

विस्तराक्ताश्च सङ्क्षिप्य प्रतिक्षिप्य च दुर्व्वचः ।

व्याख्यान्तरञ्च निक्षिप्य टीकेयं क्रियते मया ॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं प्रारिप्सितग्रन्थसमाप्तिफलकं तत्प्रतिबन्धकध्वंसमात्रफलकं वा स्वयं कृतमिष्टदेवतानमस्कारं शिष्यशिक्षार्थ-मादौ निबध्नाति,—गुणेति ।

End. आसीत् सभायां शिखरेश्वरस्य लब्धप्रतिष्ठः किल साङ्गसेनः ।
वाणीविलासं कविसार्व्वभौमं विजित्य यः प्राप यशोऽनुरागं ॥
काकुस्थ्यसेनस्तनयस्ततोऽभूत् ततोऽपि लक्ष्मीधरसेननामा ।
तस्माद्भूद्दुद्धरणस्तनूजस्तस्मादनन्तस्तनयोऽथ जज्ञे ॥
मालञ्चिकाग्रामनिवासभूमेर्गौड़ावनी+ + + + + + + ।
+ + + + + + + चक्रदत्तटीकामिमां श्रीशिवदाससेनः ॥
टीकासु पूर्व्वैर्विहितासु येऽर्था ये वा गुरुभ्योऽधिगता मयापि ।
सन्त्यत्र ते वस्तदलं श्रमेण टीकान्तरान्वेषणजेन धीराः ॥

Colophon. इति श्रीशिवदाससेनकृता तत्त्वचन्द्रिकाख्या चक्रसङ्ग्रहटीका समाप्ता ।

विषयः । चक्रदत्तकृतचिकित्सासारसङ्ग्रहाभिधग्रन्थस्य व्याख्यानं ।

No. 1631. कामधेनुः ।

Substance, country-made paper, 13 × 3 inches. Folia, 55. Lines, 5 on a page. Extent, 1,431 s'lokas. Character, Bengali. Date, Sk. 1702. Place of deposit, Bhímagada, Post Khayarás'úla, Zillá Bírabhúma, Paṇdit Bámácharaṇa Bhaṭṭáchárya. Appearance, old. Prose. Generally correct.

Kámadhenu. A commentary on the author's list of verbs entitled *Kavikalpa-druma.* By Vopadeva. One Bhagavata S'armá completed the copying of the codex on Sunday the 6th of the month of Pausa of the S'aka year 1702.

Beginning. येन विधिद्विकरणैर्व्याख्यातैर्धातुलोहितैः ।
प्रकाशैः सम्प्रकाश्यन्ते क्रियास्तं नौमि गोपतिं ॥
कविकल्पद्रुमो धातुपाठो विरचितो मया ।
धातुवृत्तिः कवेः कामधेनुर्नाम्नाभिधीयते ॥
तत्र प्रयोगा धातूनामितक्रमादिफलार्पकाः ।
शप्तिपोस्त्वनितां तुल्यप्रयोगानामभेदकाः ॥
ग्रन्थारम्भे विघ्नविघाताय ग्रन्थकृत् उचितेष्टदेवतास्मरणरूपं मङ्गलमाचरति, शब्दाकरेत्यादि ।

End. अथ ग्रन्थकृत् स्वमाख्यानं ख्यापयति, विद्वज्जनेशेत्यादि । य एष कविकल्पद्रुमो नाम ग्रन्थः वोपदेवद्विजेन तेने + + + स सेव्यः । स्वर्गं गीर्वाणेत्यादिना स्वीयकीर्त्त्या समाच्छादनं । — — — — — — — —
भागीरथीनीरविमुक्तिकासः श्रीकामदेवं कविकल्पधेनुं ॥

Colophon. ध्यात्वा श्रीगुरुपादपद्ममलं भक्तालिभिः सेवितं
शाके हस्तखसिन्धुचन्द्रविमिते मासे सहस्ये मुदा ।
वारेऽर्कस्य तिथौ गुहाननमिते श्रीकामधेनुं कवेः
श्रीमद्भागवतो द्विजः समलिखच्छ्रीमित्रगेहे वसन् ॥

विषयः । स्वकृतकविकल्पद्रुमाभिधधातुपाठस्य व्याख्यानं ।

No. 1632. अणीयसीनाम्नी माघटीका ।

Substance, country-made paper, 16 × 3 inches. Folia, 41. Lines, 7 on a page. Extent, 395 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zillá Bírabhúma, Paṇḍit Bámácharaṇa Bhaṭṭáchárya. Appearance, new. Prose. Generally correct.

Aṅíyasí-ṭíká. A commentary on the epic poem called Mágha. By Bhagíratha. *Vide* Vol. III. No. 1273 for the text, and IV. No. 1595, for a commentary by another.

Beginning. प्रणमामि सदाधारे व्याकारे पार+स्रवां ।
वाणीकल्पलतां वन्दे षट्पदार्थतरुश्रितां ॥
बोधार्थमल्पबुद्धीनां टीकामेतामणीयसीं ।
विदधाति द्विजः श्रीमान + +वति भगीरथः ॥
अत्र हि काव्यप्रबन्धेन चित्तप्रश्रमकारणं भगवन्नारायणमुपश्लोकयन् विशिष्टवस्तु-
निर्देशार्थमिदं नमस्कारमुखं काव्यं निवबन्ध ।

End. अस्य श्रीः लक्ष्मीः चिरं गता. इदं सम्प्रत्यपि श्रियं शोभां रचति, अत एव
अनयोर्महद्सादृश्यं ॥८२ ॥

Colophon. इति माघकाव्ये तृतीयसर्गटीका सम्पूर्णा ।

विषयः । माघकृतशिशुपालवधस्य व्याख्यानं ।

No. 1633. दैवज्ञवल्लभा ।

Substance, country-made paper, 14 × 3 inches. Folia, 18. Lines, 6 on a page. Extent, 395 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post, Khayarás'úla, Zillá Bírabhúma, Paṇḍit Bámácharaṇa Bhaṭṭácharya. Appearance, old. Verse. Incorrect.

Daivajña-vallabhá. A treatise on astrology and divination. By Varáha-mihira. A very scarce work.

Beginning. नत्वा दि+तुममलं भैरवमद्वैतमीश्वरं ।
+ + + + +कृतप्रश्ने दैवज्ञवल्लभारचना ॥
दीप्ताद्यं दशभेदं व्योमचराणां निरूप्य भावफलं ।
स्पृष्टो यद् यत् कथयति शुभाशुभं तत्तदन्यथा नोक्तम् ॥

End. यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्म्मणः पङ्क्त्या व्यञ्जयति ॥

Colophon. इति दैवज्ञवल्लभायां वराहमिहिरकृतायां षोड़शोऽध्यायः ।
आदित्यदासतनयस्तदवाप्तबोधः कापित्थलः सवितलब्धवरप्रसादः ।
आवन्तिको मुनिमतान्यवलोक्य यत्नाद्देतां वराहमिहिरो रचयाञ्चकार ॥
इति दैवज्ञवल्लभा समाप्ता ॥

विषयः । शुभाशुभप्रश्नकरणे फलपुष्पादिधारणकर्त्तव्यता । प्रश्नकर्तुरिङ्गितादिना शुभाशुभनिरूपणं । लग्ननिर्णयः । शुभाशुभज्ञानोपायः । लाभालाभनिरूपणोपायः । गमनागमननिरूपणं । शत्रुगमागमनिरूपणं । प्रवासस्थितस्य शुभाशुभज्ञानं । जयपराजयज्ञानोपायकथनं । ग्रहकोपविशेषेण मृत्युकथनं । नष्टलाभोपायकथनं । मुष्टिचिन्तनं । वृष्टिगणना । विवाहगणना । कन्यापुत्रजन्मगणना । प्रकीर्णकगणना । नृपयात्रादिनिरूपणं ।

No. 1634. सिद्धान्तचिन्तामणिः ।

Substance, country-made paper, 17 × 4 inches. Folia, 24. Lines, 7 on a page. Extent, 1,298 s'lokas. Character, Bengali. Date, ? Place of deposit, Gopálapura, Post Khayarás'úla, Zillá Bírabhúma, Bábu S'ríkaṇtha Kavirája. Appearance, old. Prose. Incorrect.

Siddhánta-chandriká. A commentary on Mádhava Kara's treatise on diagnosis called *Rugvinis'chaya.* The MS. is incomplete, and the author's name cannot be made out.

Beginning. ईशमनीशं कारणमकारणं कारणमव्यक्तं ।
आदिमनादिं शाश्वतमशाश्वतमहमच्युतं वन्दे ॥
आयुर्वेदमहोदधिं सुकृतिभिर्वैद्यैर्विमथ्योद्धृता
ये व्याख्यामणयो नितान्तकुमतिध्वान्तौघविध्वंसिनः ।

तेभ्यः केवलरामकृष्णकृपया व्यक्तीकृतः केनचित्

++सोऽयमुपास्यतामनुदिनं सिद्धान्तचिन्तामणिः ॥

यद्यपि सुमनोवृन्दे ++ सदालिरामोदेत् !

तथापि कदाचित् मन्दं कुन्दं न किं भजते ॥

अथ खलु निखिलतत्त्वज्ञानमहामहिमा++धिया मार्ज्जितसन्ततखान्तसन्तापसन्ततिः यशोदयानन्दबलेन च कलितकलेवरो माधवकरः सर्व्वेषां सुखेन प्रकृतिविकारादितत्त्वज्ञानार्थं रोगनिर्णयहेतुमिमाविश्चकार । तत्र प्रथमं परमप्रामाणिकपरिप्राप्तकर्त्तव्यताकप्रारिप्सितविघ्नविघातफलकं कृतेष्टदेवताशिवप्रणामरूपं मङ्गलं ग्रन्थाध्येतॄणामपि शिवाय शिष्यशिक्षार्थञ्च ग्रन्थादौ तन्निबद्धवान् । प्रणम्येत्यादि ।

End. चरके, ग्रहणीदुष्टत्वेनाग्निमान्द्यादीनामपि ग्रहणीरोगत्वेनाभिधानात् । यदाह,— यश्चाग्निः पूर्व्वमुद्दिष्टो रोगानीके चतुर्व्विधः । (इतः खण्डितं ।)

विषयः । माधवकृतरुग्विनिश्चयाभिधग्रन्थस्य व्याख्यानं ।

No. 1635. नानौषधविधिः ।

Substance, country-made yellow paper, 13 × 3½ inches. Folia, 14. Lines, 10 on a page. Extent, 420 s'lokas. Character, Bengali. Date, ? Place of deposit, Gopálapura, Post Khayarás'úla, Zillá Vírabhúma, Bábu S'ríkantha Kaveràja. Appearance, new. Prose and verse. Incorrect.

Nánaushadha-vidhi. A treatise on Indian materia medica, treating principally of metallic medicines. Author's name unknown.

Beginning. अथ धातूनां शोधनं वक्ष्यामः । स्वर्णं रौप्यं ताम्रं सीसकं रङ्गं गन्धकाश्मपित्तलं खर्प्परञ्च । इत्यादि ।

End. सप्ताहदीप्तमिव जठराग्नेः शालीषष्टिकदर्भेषु ।

Colophon. इति नानौषधिविधिः समाप्तः ।

विषयः । सर्व्वेषां धातूनां शोधनोपायकथनं । स्वर्णमारणविधिः । रौप्यमारणविधिः । ताम्रमारणविधिः । सीसकमारणविधिः । रङ्गमारणविधिः । मुक्तामारणविधिः । हीरकमारणविधिः । मण्डूरशोधनं । हिङ्गुलशोधनं । हिङ्गुलस्य मारणाभावकथनं । हरितालशोधनं । मनःशिलाशोधनं । तुत्थकशोधनं । पारदशोधनं । पारदमारणविधिः । गन्धकशोधनं । तन्मारणकर्त्तव्यता । कज्ज्वलीकरणविधिः । अभ्रकशोधनं । अभ्रकमारणविधिः । पारदमारणप्रक्रिया । पारदबन्धनोपायकथनं । सद्यो हरितालमारणप्रक्रिया । पञ्चामृतरसः । माक्षिकशोधनं । नागरङ्गशोधनं ।

No. 1636. सुबोधिनी ।

Substance, palm-leaf, 15 × 2 inches. Folia, 115. Lines, 5 on a page. Extent, 4,061 s'lokas. Character, Bengali. Date, ? Place of deposit, Gánguṭe, Post Purendrapura, Zillá Vírabhúma, Gopínátha Bhaṭṭácharya. Appearance, old. Prose. Correct.

Subodhiní. A commentary on the Bhaṭṭi Kávya. By Kumudánanda. This is not near so well-known as the work of Bharata Mallika. The author follows the rules of Páṇini in explaining the text.

Beginning. श्रीकृष्णगिरिशौ नत्वा धर्म्मकामार्थमोक्षदौ ।
चक्रे श्रीकुमुदानन्दो भट्टिटीकां सुबोधिनीं ॥
अत्र कविना श्रीस्वामिसूनुना सर्गबन्धलक्षणं प्रकीर्णकाण्डं प्रथमं दर्शयितुं तस्य विषयव्यापकत्वात् तत्रादौ वस्तुनिर्द्देशं कुर्व्वन् इष्टदेवतास्मरणात्मकं मङ्गलं विघ्नोपशान्तये करोति । रुचिरनाम छन्द आदौ निबध्य पश्चाज्जात्यादिच्छन्दसा सर्गनिर्व्वाहः । यथा छन्दोमञ्जर्य्यां ।——जतौ भजौ रुचिरेत्यादि । अभूदिति ।

End. इतः समुद्रात् उत्तरा या दिक् तस्याः । उत्तरा हि वसन् रामः लवणतोयतो दक्षिणतः ।

Colophon. इति श्रीकुमुदानन्दकृतायां सुबोधिन्यां भट्टिटीकायामष्टमः सर्गः ।

विषयः । भट्टिकाव्यस्य अष्टमसर्गान्तं व्याख्यानं ।

No. 1637. भट्टिबोधिनी ।

Substance, palm-leaf, 15 × 2 inches. Folia, 108. Lines, 4 on a page. Extent, 2,268 s'lokas. Character, Bengali. Date, ? Place of deposit, Gáṅguṭe, Post Purendrapura, Zillá Vírabhúma, Gopínátha Bhaṭṭácharya. Appearance, old. Prose. Correct.

Bhaṭṭibodhiní. A commentary on the Bhaṭṭi Kávya. By Naranáráyaṇa Vidyávinoda Ácharya, son of Vánes'vara, who was brother of Jaṭádhara of the family of Púrvagráma. The object of this work is to explain all grammatical references by citing the authority of the Sañkshiptasára grammar.

Beginning. नत्वा रामपदद्वन्द्वमरविन्दं भवच्छिदं ।
विद्याविनोद आचार्य्यः कुरुते भट्टिबोधिनीं ।

पूर्व्वग्रामिकुले कलानिधिनिभश्चक्री सुमेरुस्थितो
भ्राता यस्य जटाधरो द्विजवरो वाणेश्वरस्तत्सुतः।
तत् पुत्रः प्रथितोऽभवत् कविवरो नारायणो नामतः
सोऽभूद्भ्यसनेन शास्त्रनिच+ विद्याविनोदार्थतः॥
सन्ति यद्यपि भूयांसः शब्दलक्षणचक्षुषः।
तथापि जौमराभ्यासविशेषायैव शिष्यते॥
प्रायो हि मत्सरधियः कवयः पृथिव्यां सन्ति क्वचित् क्वचिदपि प्रियसाधुवादाः।
एकं प्रियाप्रणयिकर्म्म करोमि नित्यं मध्ये द्वयोरपरमादरवत्तयैव॥
अथ पाणिनिक्षतलक्षणार्थानवगन्तुमशक्नुवतां भाष्यकारजिनेन्द्रप्रभृतिनानामतानुसारिणां सन्देहसन्दोहव्याधिपीडितानां शिष्यप्रशिष्याणामुद्दिधीर्षुर्भगवान् श्रीधरस्वामिसूनुर्भट्टिहरिः काव्यच्छलेन समस्तं व्याकरणार्थं दर्शयन् रामकथयैवात्र मङ्गलान्तरमनादृत्य काव्यमिदमारब्धवान्। तत्र शब्दलक्षणं धातुमूलकत्वात् सकलपादानां धातुपादं प्रथममेव अभिधास्यामीति सत्यां चिकीर्षायां भवतेः क्रियासामान्यवाचित्वादाह,—अभूदिति।

End.. प्रतिदिशं धीरमन्द्रमुच्चैर्निस्वनमुदस्यन् चिपन् तड़िल+ + + +++++ जलदोऽप्येवं।

Colophon. भट्टिकाव्यस्य एकादशसर्गान्तं व्याख्यानं।

No. 1638. काव्यप्रकाशविस्तारिका।

Substance, country-made paper, 13 × 4 inches. Folia, 128. Lines, 10 on a page. Extent, 6,400 s'lokas. Character, Bengali. Date, ? Place of deposit, Sájiná, Post Purendrapura, Zillá Vírabhúma, Rames'chandra Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Kávyaprakás'a-vistáriká. A commentary on the Kávyaprakás'a, a treatise on rhetoric. By Paramánanda Chakravartí. Incomplete. This is a little-known work.

Beginning. प्रियायाः पद्मायाः प्रणयकुपितायाः स्तुतिपरः
प्रसादं निर्म्मित्सुर्जलधिजनिवाणीपरिदृढः।
परस्याः कौटिल्यात् कटुनि वचसि प्रोद्यति भृशं
प्रदीप्तायां तस्यां जयति विनमद्वक्त्रकमलः॥

काय्यी कदर्य्यैरिव नो भवद्भिर्नवेति हेला कृतिनः कृतौ नः।
निवारितान्तःकलुषः किशोरतां दधत् कलाभ्यन्न पुनः पुरातनः॥
न्यायाचार्य्यमनङ्गीकृतपरपक्षं बहुज्ञमीशानं।
गुरुमिह नत्वा काव्यप्रकाशविस्तारिकां तनुमः॥
प्रधने द्रोणजवाणैः चतविचतमुत्तरोदरगं।
रचतु परीचितं मे वचनं विबुधः सुदर्शनेनाशु॥
अथाविगीतविशिष्टाचारपरम्पराप्राप्तप्रारिप्सितसमाप्तिप्रतिबन्धकदुरितध्वंसहेतु-भूतमङ्गलाचारपरां प्रथमकारिकामवतारयति इत्यिकृत्। ग्रन्थेत्यादि।

End. प्रभोरिति। इदानीमेषां दोषाणां यथा योगमित्यस्यार्थमुपसंहृत्य दर्शयति तद्देत इति। सम्पूर्णमिदं काव्यलक्षणमिति 'तददोषौ' इत्यादि यत् काव्य-लक्षणमुक्तं तद्विशेषणानां दोषगुणालङ्काराणां कथनात् सम्पूर्णमित्यर्थः॥

Colophon. इति श्रीपरमानन्दचक्रवर्त्तिकृतौ काव्यप्रकाशविस्तारिकायां अर्थालङ्कारविवेचनो नाम दशम उल्लासः। समाप्तोऽयं ग्रन्थः।

विषयः। काव्यप्रकाशस्य व्याख्यानं।

No. 1639. हर्षहृदया।

Substance, country-made paper, 14 × 4 inches. Folia, 73. Lines, 8 on a page. Extent, 2,610 s'lokas. Character, Bengali. Date, ? Place of deposit, Sájiná, Post Purendrapura, Zilla Vírabhúma, Rámachandra Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Harsha-hṛidaya. A commentary on the Naishadha of S'rí Harsha. By Gopinátha A'chárya. No. 1205 notices a commentary by a different author.

Beginning. नमामि वाचामधिदेवतां तां त्रिलोकनाथैकनिकेतनस्थां।
प्रसादमासाद्य यदीयमेव वागीश्वरस्यापि कवित्वशक्तिः॥
अस्येव सम्प्रति महाकविभिः प्रणीता नानार्थबोधमधुरा विवृतिस्त्वनेका।
तेषां तदद्य तुलना न तथा ममैषा खद्योतकीटतुलनेव यथेन्दुकान्तेः॥
वक्तुं सुधीरपि गुरूननुपास्य यस्य शक्नोति किञ्चिदपि नैव रहस्यमस्य।
काव्ये श्रमोऽत्र विवृतौ कविपण्डितस्य मोहाय किन्नु मम सम्प्रति बालकस्य॥
तथापि बाल्याच्चपलत्वमुच्चैरय्य प्रवृत्तोऽस्मि विधातुमेतत्।

+ + + + + विधुरोऽपि काव्ये बालस्य किं क्षत्यविधौ विचारः ॥
निपीय इति ।

End. विजयसेननाम्नो गौड़ेश्वरस्य प्रशस्तिरचनायास्तस्य श्रीहर्षकवेः काव्यस्य नैषधस्य चरिते पञ्चमः सर्गोऽगमत्। पञ्चानां पूरणः पञ्चमः। पुरस्कृतस्य कैतवं कपटो यत्र सर्गे ।

Colophon. इति गोपीनाथाचार्य्यकृतौ हर्षहृद्याख्यायां नलचरितटीकायां पञ्चमः सर्गः।

विषयः। श्रीहर्षकृतनैषधचरिताभिधानकाव्यस्य पञ्चमसर्गान्तं यावद् व्याख्यानं ।

No. 1640. धातुपारायणः ।

Substance, country-made paper, 16 × 4 inches. Folia, 17. Lines, 8 on a page. Extent, 426 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Vámácharaṇa Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Dhátupáráyaṇa. The classification and conjugation of the Sanskrit roots. By Jumaranandi, the author of the exposition of the aphorisms of the Saṅkshiptasára grammar. The work is intended to serve as an appendix to his grammar.

Beginning. धातवोऽतिप्रसिद्धा ये पठ्यन्ते च गणे गणे ।
तेषामेव निबन्धोऽयं शिशूनां प्रतिपत्तये ॥ तत्रादौ भ्वादिगणः ।

End. प्रेङ्खालयति अवगुण्ठालयति अवधीरयति । इत्यादिः।

Colophon. इति श्रीमज्जुमरनन्दिकृतौ धातुपारायणः समाप्तः ।

विषयः। भ्वादिगणादिधातुनिरूपणं।

No. 1641. भागवतकौमुदी ।

Substance, country-made paper, 13 × 4 inches. Folia, 22. Lines, 16 on a page. Extent, 1,512 s'lokas. Character, Bengali. Date, ? Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Gopálachandra Vidyálaṅkára. Appearance, old. Prose. Incorrect.

Bhágavata-kaumudí. Notes on some difficult passages on the Bhágavata Puráṇa. By Rámakṛishṇa. The MS. is incomplete.

Beginning. प्रणम्य परमं ब्रह्म दुरूहार्थस्वरूपिणा ।
तन्यते रामकृष्णेन श्रीभागवतकौमुदी ॥
अथ तमेव विदित्वा इति श्रुतौ परमपुरुषार्थं मोक्षं प्रति तत्त्वज्ञानस्य हेतुता दर्शिता ।

End. अतो विप्रस्य प्रमाणमयत्वेन प्रमेयात् मत्तः श्रेष्ठत्वं ॥ श्रीः ।

विषयः । श्रीमद्भागवतीयविषमस्थानोद्घाटनपूर्व्वकं तत्र तत्र समाधानकीर्त्तनं ।

No. 1642. स्मृतिसारः ।

Substance, palm-leaf, 19 × 1¼ inches. Folia, 107. Lines, 3 on a page. Extent, 1,590 s'lokas. Character, Bengali. Date, Sk. 1610. Place of deposit, Mayanádal, Post Khayarás'úla, Zilla Vírabhúma, Vishṇuchandra Bhaṭṭáchárya. Appearance, very old. Prose. Correct.

Smṛitisára. An epitome of the Smṛitis. The MS. is confined to expositions for omissions and irregularities in the performance of ceremonies, and for offences and sins. By Yádava Vidyábhushaṇa Bhaṭṭáchárya. The author belongs to the school of Raghunandana. Nos. 649 and 1077 bear the name of this work, but they are separate works.

Beginning. भूयः प्रणम्य रघुनाथपदारविन्दं मन्वादितन्त्रनिवहानभिवीक्ष्य यत्नैः ।
उद्धृत्य सारमखिलं निखिलस्मृतीनां श्रीयादवेन विदधे स्मृतिसार एषः ॥
अथ प्रायश्चित्तनिरूपणं । पापक्षयमात्रसाधनं कर्म्म प्रायश्चित्तमिति तच्चिन्त्यं ।

End. श्राद्धदिने स्त्रीगमने अहोरात्रमभोजनं । दिवामैथुने दिनमेकं व्रती भवेदिति ।

Colophon. इति श्रीमहामहोपाध्यायस्मार्त्तानुयायिश्रीयादवविद्याभूषणभट्टाचार्य्यविरचितस्मृतिसारे प्रायश्चित्तप्रकरणं समाप्तं । शकाब्दाः १६१०

विषयः । प्रायश्चित्तनिरुक्तं । प्रायश्चित्तपूर्व्वाहकृत्यं । गोवधप्रायश्चित्तनिरूपणं । व्यवस्थापत्रलेखनप्रकारः । एकहायनादिगोवधप्रायश्चित्तं । गोवधापवादः । क्षत्रियादिगोवधप्रायश्चित्तं । स्त्रीवधप्रायश्चित्तं । व्यभिचारिणीवधप्रायश्चित्तं । गर्भिणीवधप्रायश्चित्तं । धेनुसङ्कलनकथनं । चण्डालाद्यन्नभक्षणप्रायश्चित्तं । चण्डालादिस्पृष्टान्नभोजनादिप्रायश्चित्तं । अज्ञानतः कुक्कुराद्युच्छिष्टभोजनप्रायश्चित्तं । अन्त्यजस्त्रीगमनप्रायश्चित्तं । शूद्रादिस्पृष्टान्नकेशकीटाद्युपहतान्नादिभोजनप्रायश्चित्तं । गोमांसभक्षणप्रायश्चित्तं । रेतोमूत्रपुरीषादिभक्षणप्रायश्चित्तं । विण्मूत्रदूषितफलादिभक्षणप्रायश्चित्तं । श्लेष्माश्रुभक्षणप्रायश्चित्तं । पतितान्नभोजनप्रायश्चित्तं । देवा-

र्थोपकल्पितहथापायसभोजनप्रायश्चित्तं । वागदुष्टादिभोजनप्रायश्चित्तं । शूद्र-भाजने तथा भिन्नकांस्यभाजने भोजनप्रायश्चित्तं । सूतकाद्यन्नभोजनप्रायश्चित्तं । स्वसदत्तादिष्टतभोजनप्रायश्चित्तं । भोजनकाले रेतोमूत्रपुरीषाद्युत्सर्गे प्रायश्चित्तं । कृततैलाभ्यङ्गस्य भोजनादिप्रायश्चित्तं । स्वकीयोच्छिष्टादिभोजनप्रायश्चित्तं । कुत्सितपङ्क्तिभोजनप्रायश्चित्तं । ब्रह्मवधसुरापानादिमहापातकप्रायश्चित्तं । क्षत्रि-यादिस्वामिकसुवर्णस्तेयादिप्रायश्चित्तं । पतितसंसर्गप्रायश्चित्तं । चण्डालादिसंसर्ग-प्रायश्चित्तं । यज्ञोपवीतच्छेदादिप्रायश्चित्तं । अनातुरस्य सन्ध्याद्यकरणप्रायश्चित्तं । शूद्रपरिग्रहप्रायश्चित्तं । मिथ्याभाषणप्रायश्चित्तं । स्वभार्य्यायां मातृभगिन्यादि-कथनप्रायश्चित्तं । उच्छिष्टस्य चण्डालादिदर्शनप्रायश्चित्तं । विप्रादिमध्यगमन-प्रायश्चित्तं । मिथ्याशपथप्रायश्चित्तं । अभिशापकर्त्तुः प्रायश्चित्तं । जलाग्न्यादौ अशुचिप्रक्षेपप्रायश्चित्तं । देवाभावे इष्टकादिना स्वगृहकरणप्रायश्चित्तं । ष्ठीवन-प्रायश्चित्तं । व्रतभङ्गप्रायश्चित्तं । रजकादिस्पर्शप्रायश्चित्तं । उच्छिष्टब्राह्मणस्य शूद्र-स्पर्शनप्रायश्चित्तं । सवर्णोच्छिष्टस्पर्शप्रायश्चित्तं । लशुनादिस्पर्शप्रायश्चित्तं । उच्छि-ष्टस्य नरादिपुरीषस्पर्शप्रायश्चित्तं । रजस्वलास्पर्शप्रायश्चित्तं । प्रायश्चित्तसङ्क्षेपः । व्रात्यप्रायश्चित्तकथनञ्च ।

No. 1643. सूर्य्यशतकटीका ।

Substance, palm-leaf, 14 × 1½ inches. Folia, 42. Lines, 4 on a page. Extent, 976 s'lokas. Character, Bengali. Date, Sk. 1623. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zilla Vírabhúma, Vámácharaṇa Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Súryas'ataka-ṭiká. A commentary on Mayúra Bhaṭṭa's century of verses in praise of the Sun. By Jayamangala. The hymn is believed to possess the merit of curing leprosy.

Beginning. भक्तमयूरवक्त्राब्जपदविन्यासशालिनी ।
नर्त्तकीव नरीनर्त्ति सभामध्ये सरस्वती ॥ जम्भेत्यादि ।

End. तावद् यो निर्णीयते स आदित्यः भवद्भ्योऽभीष्टं ददात्विति ॥ १०० ॥

Colophon. इति श्रीमयूरभट्टविरचितसूर्य्यशतकस्य टीका जयमङ्गलविरचिता समाप्ता ।
शाकेऽनन्तर्त्तुविमिते सपक्षवह्निके पुनः ।
लिखिता सूरशतके टीकासौ यत्नपूर्व्विका ॥

विषयः । मयूरभट्टकृतसूर्य्यशतकस्य व्याख्यानं ।

No. 1644. वैषम्योद्धरणी ।

Substance, country-made paper, 15 × 3 inches. Folia, 67. Lines, 9 on a page. Extent, 2,939 s'lokas. Character, Bengali. Date, Sk. 1594. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Zillá Vírabhúma, Gopálachandra Vidyálaṅkára. Appearance, old. Prose. Correct.

Vaishamyoddharaṇí. A commentary on the Kírátárjuníya. By Vaṅkimadása. A little-known work.

Beginning. अथ वङ्किमदासेन प्रणम्य परमेश्वरीं ।
वैषम्योद्धरणी काव्ये भारवीये विधीयते ॥
काव्यं कुर्व्वन् कविस्तल्लक्षणं वस्तुनिर्द्देशं निद्धान आह,—श्रिय इति ।

End. श्रिया लोकान्तरसम्बन्धिन्या स्वतेजःसम्पदा च उपजगुः उपगीतवन्तः स्तुतवन्त इत्यर्थः ।

Colophon. इति वङ्किमदासकविराजकृतायां वैषम्योद्धरण्यां किरातार्ज्जुनीयटिप्पन्यामष्टादशः सर्गः ।
ब्रह्मास्यग्रहचन्द्रशेखरमुखक्षौणीमिते भूपतेः
शाके कार्त्तिकसञ्ज्ञके शनिदिने मासे सितायां तिथौ ।
अष्टम्यां लिखिता सुबोध-विषमा टीका मुदा भारवेः
श्रीदामोदरशर्म्मणा सुरवरं नत्वा हरिं कामदं ॥

विषयः । किरातार्ज्जुनीयकाव्यस्य व्याख्यानं ।

No. 1645. क्रमदीपिका ।

Substance, palm-leaf, 19 × 1½ inches. Folia, 75. Lines, 3 on a page. Extent, 908 s'lokas. Character, Bengali. Date, Sk. 1609. Place of deposit, Bhímagaḍa, Post Khayarás'úla, Vámácharaṇa Bhaṭṭácharya. Appearance, old. Verse. Correct.

Kramadípiká. A second copy of the work noticed under No. 1552. A Tántric compilation of details regarding the secret mantras of Vaishṇava deities.

Beginning. कला तु माया नवका तु मूर्त्तिः कलक्वणद्वेणुनिनादरम्यः ।
श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥
गुरुचरणसरोरुहद्वयोत्थान् मदितरजःकणकान् प्रणम्य मूर्ध्ना ।
गदितमिह विरच्य नारदाद्यैर्यजनविधिं कथयामि शार्ङ्गपाणेः ॥

End. जगदिदमनुविद्धं येन यस्मिन् प्रसूते
यदनु ततमजस्रं याति चाधिष्ठिताया(?)।
यदुरुमहदुदर्च्चिर्य्यो विधत्ते च गोपी
तममितसुखबोधज्योतिषं नौमि कृष्णं॥

Colophon. इति श्रीक्रमदीपिकायामष्टमः पटलः। समाप्तश्चायं ग्रन्थः। शकाब्दाः १६०९।

विषयः। १ प्रथमपटले,—गोपालमन्त्रस्य सर्व्ववर्णस्त्रीपुरुषेषु श्रीघ्रफलदातृत्वकथनपूर्व्वकं तन्मन्त्रादिनिरूपणं। आसनभूतशुद्ध्यादिकथनं। केशवकीर्त्त्यादिन्यासप्रकारः। द्वारदेवताकथनं। तत्त्वन्यासादिप्रकारकथनं। प्राणायामप्रकारः। पीठन्यासादिकथनं।

२ये,—फलकथनपूर्व्वकं 'गोपीजनवल्लभाय स्वाहा' इति मन्त्रोद्धारप्रकारकथनं। अत्र छन्दऋष्यादिनिरूपणं। प्रद्युम्नजगन्मोहनमन्त्रशक्तिनिरूपणं। मन्त्रार्थनिरूपणं। कृष्णशब्दनिर्व्वचनं। तत्त्वदशकन्यासनिरूपणं। गृहिवनवासिप्रभृतीनां न्यासभेदकथनं। भूतिन्यासकथनं। विभूतिपञ्जरकथनं। वर्णन्यासादिनिरूपणं। नाराचादिमुद्रानिरूपणं।

३, ४र्थे,—श्रीकृष्णध्यानकथनं। श्रीकृष्णस्य ध्यानमालाकथनं। नारदस्य ध्यानकथनं। विशेषार्घ्यस्थापनादिविधिः। जपप्रकारकीर्त्तनं। शिष्यलक्षणं। दीक्षाविधानं। अत्र कलशादिस्थापनविधिः। अङ्गदेवताध्यानादिकथनं। रुक्मिण्यादीनां रूपादिकथनं। बलदेवस्य ध्यानं। सुभद्राया ध्यानं। विशेषार्घ्यदानमन्त्रादिकथनं।

५, ६ष्ठे,—दीक्षितस्य कर्त्तव्यतानिरूपणं। मन्त्रजपस्थानादिनिरूपणं। पुरश्चरणकथनं। तदुपसंहारनिरूपणं। श्रीकृष्णस्य प्रातःकालीनध्यानकथनं। मध्याह्नध्यानकथनं। सायाह्नध्यानकथनं। तर्पणविधिः। पायसादिषोडशद्रव्यनिरूपणं। श्रीकृष्णमन्त्रनिर्म्माणप्रकारकथनं। शक्ति-माया-लक्ष्मीबीजाद्युद्धारप्रकारः। सिद्धमन्त्रप्रयोगः। विविधमन्त्रोद्धारप्रकारः। तत्र तत्र ध्यानकथनं। प्रत्येकं पुरश्चरणकथनं। उच्चाटनादौ मन्त्रादिनिरूपणं। जयकामादौ होमादिविधानं।

७, ८मे,—श्रीकृष्णस्य चतुर्व्वर्गसाधनध्यानकथनं। विंशत्यक्षरमन्त्रेण पूजाविधानं। अष्टचत्वारिंशदक्षरादिश्रीकृष्णमन्त्रनिरूपणादिकं। अष्टनिधिपूजा। राजोपचारकथनं। विविधमन्त्रकथनं। तत्र तत्र ध्यानादिकथनञ्च। गोर्य्यादौ पूजाविशेषकथनं। सिद्धमन्त्रस्य वश्यादिविधिः। स्त्रीवशीकरणादिकथनं। मुमुक्षूणाम् प्रक्रियानिरूपणं। त्रैलोक्यमोहनमन्त्रकथनं। ध्यानकथनं। गरुड़मन्त्रकथनं। मोहनगायत्रीकथनं। आत्मार्च्चनकथनं। योगकथनं। तत्फलकथनञ्च। चक्रबन्धश्लोकमध्ये केशवेति ग्रन्थकृन्नामोल्लेखनं॥

No. 1646. शालहोत्र ।

Substance, country-made paper, 9 × 4¼ inches. Folia, 41. Lines, 7 on a page. Extent, 375 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'álahotra. A Hindi translation of a treatise on the Veterinary Art. The original is ascribed to Nakula, one of the Páṇḍava brothers. The translator was one Chetana. The Sanskrit original is supposed to be the most ancient work extant on the subject. *Vide* No. 1648.

Beginning. श्रीगणेशाय नमः ॥ अथ शालहोत्रभाषा ॥ दोहा ॥

नमो निरञ्जनदेव गुरुमार्तण्डब्रह्माण्ड ।

रोगहरण आनन्दकर सुखदायक जगवन्द्य ॥ १ ॥

End. श्रीराम मासकार्तिकक्रष्णपक्षद्वितीया तिथि शुभा नाम ।

चेतनचन्द्रमो भाषित गुरुको किया प्रणाम ॥

Colophon. इति श्रीपण्डितचेतनक्रतशालहोत्र समाप्त ॥

विषयः । अश्वचिकित्साकथनं ।

No. 1647. अश्ववैद्यकं ।

Substance, English paper, 8½ × 7 inches. Folia, 261. Lines, 9 on a page. Extent, 1,615 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

As'va-vaidyaka. A treatise on the Veterinary Art. By Jayadatta, son of Vijayadatta. Though professing to be an epitome, this is an elaborate work, treating, in considerable detail, of all the topics connected with the subject. It is divided into 68 sections. Contents: I. Introduction. II. Names and descriptions of the different parts of a horse's body. III. Characteristics of those parts. IV to VI. Effects of particular whirls of hair and marks on the body of a horse. VII. Motion of horses. VIII. Power and endurance of horses. IX. The voice of horses. X. Marks indicating defects. XI. Causes, other than disease, leading to weeping, refusal of food, &c. XII. Effects of particular shadows. XIII. Ditto of smell of the body. XIV. Size. XV. Span of life. XVI. Marks on the teeth indicating age. XVII. Ten stages in the life of a horse and its characteristics. XVIII. Mode of ascertaining the race of horses. XIX. Rules regarding riding. XX. Barren mares how to be made fruitful. XXI. Characteristics of a pregnant

mare. XXII. Rules to be observed during confinement. XXIII. Nursing of foals. XXIV. Rules regarding food for horses. XXV. Veterinary Materia Medica. XXVI. Modes of stabling, and feeding during different seasons. XXVII. Cautery with alkaline leys. XXVIII. Bleeding with a lancet. XXIX. Use of aromatics for promoting health. XXX. Fomentation. XXXI. Oleaginous drinks. XXXII. Medicated oils. XXXIII. Five bitters; medicines for fatigue. XXXIV. Decay not caused by disease. XXXV. Sickness from change of season. XXXVI. Worms. XXXVII. Diseases due to wind. XXXVIII. Names of certain diseases. XXXIX. Treatment of diseases of the mouth and the eyes. XL. Ditto of the head. XLI. Ditto of the ears. XLII. Ditto of coughs. XLIII. Ditto of hiccup. XLIV. Ditto of boils. XLV. Ditto of running from the nose. XLVI. Ditto of a disease called Ghrini: it is characterised by sores within the nostrils and running, and is apparently the same with glanders. XLVII. Ditto of diseases of the foot. XLVIII. Ditto of fevers. XLIX. Ditto of dyspepsia. L. Ditto of diarrhœa. LI. Ditto of dysentery. LII. Ditto of megrims. LIII. Ditto of worms and slime in the bowels. LIV. Ditto of frequent staling. LV. Ditto of leprosy. LVI. Ditto of Anasarca. LVII. Ditto of the diseases of the scrotum. LVIII. Ditto of the diseases of the belly. LIX. Ditto of piles. LX. Ditto of Utkarna, a disease in which the ears, tail and the skin of the body lose their power of action and swellings follow—apparently farcy. LXI. Ditto of diseases originating in excess of wind. LXII. Ditto of madness. LXIII. Ditto of fainting. LXIV. Curable and incurable diseases. LXV. Equine Toxicology. LXVI. Diagnostics from the breath. LXVII. and LXVIII. Equine vices.

Beginning. श्रीगणेशाय नमः। श्रीशालिहोत्राय नमः।

प्रणम्य शङ्करं भक्त्या शङ्करं सर्व्वदेहिनां।
शिवाय जगतो जातं शिवाश्चापि विशेषतः॥ १॥
शिष्यावबोधं शब्दार्थं ग्रन्थं विस्तारवर्ज्जितं।
लक्षणं वाजिदेहस्थं सङ्क्षेपेण यथाक्रमं॥ २॥
चिकित्सा च समासेन सिद्धौषधसमन्विता।
मुनिप्रोक्तानि शास्त्राणि सम्यगालोक्य वाजिनां॥ ३॥
श्रीमद्विजयदत्तस्य पुत्रेण क्रियतेऽधुना।
श्रीमता जयदत्तेन वाहानां हितमिच्छता॥ ४॥

अध्यायानां यथायोगं षष्ट्यष्टादिकसङ्ख्यया ।
श्लोकानां हि सहस्रेण शताष्टसंयुतेन च ॥ ५ ॥
प्रदेशलक्षणञ्चैव जीवितञ्च वयस्तथा ।
दशाविभागं क्षेत्रञ्च देशज्ञानञ्च वाहनं ॥ ६ ॥
वन्ध्याक्रमं प्रसूतायाः शिशोश्च प्रतिपालनं ।
द्रव्यमात्राधिकञ्चैव निघण्टं शोषणक्रमं ॥ ७ ॥
विधिः क्षाराग्निशस्त्राणां शिरावेधविधिस्तथा ।
निरूहे च विधिश्चैव वस्तिश्चैवानुवासने ॥ ८ ॥
नस्यस्वेदविधिश्चैव स्नेहपानान्यविक्रमं ।
तैलपाकविधानञ्च घृतपाकविधिं तथा ॥ ९ ॥
आन्तोपचारं वाहानां तथारिष्टत्रयं पुनः ।
स्मरोगचिकित्साञ्च चिह्नपूर्व्वां समासतः ॥ १० ॥
वातादीनाञ्च दोषाणां कोपहेतुन्तथैव च ।
निदानञ्चैव चिह्नञ्च रोगाणाञ्च चिकित्सितं ॥ ११ ॥
साध्यासाध्यविवेकञ्च कृच्छ्रसाध्येतिनिश्चयं ।
प्रकृतिञ्च तुरङ्गानां कथयाम्यनुपूर्व्वतः ॥ १२ ॥
रसोनादि तथा कल्कं मुनिभिः पूर्व्वचोदितं ।

End. रक्तपित्तज्वरं हन्ति कासं श्वासं तथा घृणिं ।
विद्रधिं क्षयरोगञ्च नाशयेद् वाजिनां ध्रुवं ॥ २५ ॥

Colophon. इति श्रीसामन्तजयदत्तकृताश्ववैद्यकशास्त्रं समाप्तं ।

विषयः। अत्राष्टषष्ट्यध्यायाः सन्ति । तत्र १-मे,—ग्रन्थाभिधेयविवरणं । २,—वाजिदेहस्थ-प्रदेशाः । ३,—अश्वाङ्गलक्षणं । ४,—स्थानविशेषे आवर्त्तचिह्नेन वाजिनां शुभाशुभप्रदत्वकीर्त्तनं । ५,—वाजिनां पुण्ड्रचिह्ननिरूपणं । (पुण्ड्रपदेन लोमराजि-विरचित-शङ्ख-गदा-धनुर्वाणादिचिह्नमुच्यते') । ६,—वाजिनां पुष्पचिह्ननिरूपणं। ७,—वाजिनां गतिनिरूपणं। ८,—वाजिनां बलनिरूपणं। ९,—वाजिनां स्वरनिरूपणं । १०,—वाजिनां दोषज्ञापकचिह्ननिरूपणं । ११,—वाजिनामुत्पात-प्रकरणं । (उत्पातस्तु व्याधिरहितस्य वाजिनः ग्रासत्यागाश्रुपातादयश्च) । १२,—वाजिच्छायानां शुभाशुभप्रदत्वकीर्त्तनं । १३,—सुगन्धदुर्गन्धभेदेन वाजिनां शुभाशुभप्रदत्वकीर्त्तनं । १४,—वाजिप्रमाणनिरूपणं । १५,—अश्वायुर्लक्षणं । १६,—वाजिनां दन्तोद्भेदादिना वयोनिरूपणं। १७,—वाजिनां दशविधदशापरिमाण-निरूपणं, दशविधक्षेत्रनिरूपणञ्च । प्रत्येकदशापरिमाणन्तु द्विसप्ततिदिनाधिकवर्षत्रयं।

विषयः। दशविधचेत्रन्तु गुह्यादिललाटपर्य्यन्तं प्रथमं चेत्रं। ललाटादिमस्तकं २-यं चेत्रं। ग्रीवास्कन्धादिकं ३-यं चेत्रं। उरोजानुककुदादिकं ४-र्थं चेत्रं। अंसकं ५-मं चेत्रं। दन्तिका ६-ष्ठं चेत्रं। स्फिक् ७-मं चेत्रं। स्फूरकौ (?) ८-मं चेत्रं। जङ्घा ९-मं चेत्रं। कूर्चसन्धिः खुरञ्च १०-मं चेत्रं। १८,—वाजिनां जन्मदेशनिरूपणं। १९,—अश्वानां वाहनविधिः। २०,—बन्ध्याया वड़वाया गर्भधारणविधिः। २१,—सगर्भाया वड़वाया लक्षणं। २२,—सूतिकानियमः। २३—अश्वशिशुपालन-नियमः। २४,—चनकव्रीहिमुद्गयवादीनां वाजिभोजनद्रव्याणां परिमाणकथनं। २५,—वाजिरोगनाशकभेतजनामानि। २६,—वाजिनां सर्व्वर्तुपोषणविधिः। (कस्मिन् ऋतौ कीदृशनियमेन अश्वः पालितव्य इत्यस्य नियमः)। २७,—वाजिनां रोगनाशकक्षारदाहविधिः। २८,—वाजिनां शिरावेधविधिः। २९,—अश्वानुवास-नविधिः। (अपराह्णसमये सुगन्धद्रव्येण सुवासितकरणं अनुवासनं)। ३०,—वाजिनां स्वेदविधिः। ३१,—स्नेहपानविधिः। ३२,—वाजिरोगनाशकतैलविधिः। ३३,—पञ्चतिक्तघृतविधानं, वाजिनां श्रमशान्तिकरणोपायश्च। ३४,—खस्यारिष्टलक्षणं। (खस्यारिष्टस्तु रोगं विना यो वाजी दुर्मना हीनवर्णश्च स गतायुरित्यादिरूपः)। ३५,—वेधारिष्टलक्षणं। (ऋतौ शरदि, ग्रीष्मे च पानतः अश्वानां वेधाख्य उपसर्गो जायते, येनोपसर्गेन अश्वा अधोमुखाः सज्वराः श्वासकारिणश्च तिष्ठन्ति)। ३६,—अश्वानां कीटवेधारिष्टलक्षणं। (वर्षादिऋतौ तोयादिसेवनात् वाजिनां य उपसर्गो जायते स कीटवेधाख्य उपसर्गः। ३७,—वातादीनां प्रकोपसमयनि-रूपणं। ३८,—वाजिरोगाणामवान्तरनामनिर्देशः। ३९,—वाजिनां मुखरोग-निदानचिकित्से, नेत्ररोगचिकित्सा च। ४०,—शिरोरोगनिदानचिकित्से। ४१,—कर्णरोगचिकित्सा। ४२,—कासरोगचिकित्सा। ४३,—हिक्काचिकित्सा। ४४,—व्रणचिकित्सा। ४५,—सिङ्घानकरोगचिकित्सा। ४६,—घूर्णिरोगचिकित्सा। ४७,—पादरोगचिकित्सा। ४८,—ज्वरचिकित्सा। ४९,—अजीर्णचिकित्सा। ५०,—अतिसारचिकित्सा। ५१,—उदावर्त्तचिकित्सा। ५२,—प्रस्कन्नचिकित्सा। ५३,—कृमिकोष्ठश्लेष्मकोष्ठचिकित्सा। ५४,—मूत्रचिकित्सा। ५५,—कुष्ठचिकि-त्सा। ५६,—शोथचिकित्सा। ५७,—मुष्करोगचिकित्सा। ५८,—उदररोग-चिकित्सा। ५९,—अर्शश्चिकित्सा। ६०,—उत्कर्णचिकित्सा। ६१,—वातव्याधि-चिकित्सा। ६२,—उन्मादचिकित्सा। ६३,—अपस्मारचिकित्सा। ६४,—वाजि-रोगानां साध्यासाध्यत्वनिरूपणं। ६५,—विषचिकित्सा। ६६,—वाजिनां वातादि-प्रकृतिज्ञानं। ६७, ६८,—कल्कविधिनिरूपणं॥

No. 1648. अश्वचिकित्सितं ।

Substance, English paper, 9 × 7 inches. Folia, 82. Lines, 9 on a page. Extent, 438 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

As'va-chikitsita. The Sanskrit original of the work, noticed under No. 1646. It comprises 18 Chapters. Contents : I. Introduction. II. Classification according to quality. III. Colors of horses—the white the best. IV. Whirls on eighteen places and their effects. V. Ascertainment of age from marks on the teeth. VI. Auspicious and inauspicious marks. VII. Of all qualities speed the most important. VIII and IX. On riders. X. Constitution of horses. XI. Seasonal influences. XII. Snuffs. XIII. Biliary complaints. XIV. Medicated butters. XV. Medicated decoctions. XVI. Poisonous drugs. XVII. Rules regarding stabling. XVIII. Not found in the MS. but it refers, according to the Introduction, to exercise. This work has been quoted largely in the Agni Purána, chapter 288.

Beginning. श्रीगणेशाय नमः ।

जयति स पाण्डवनाथो धर्म्मनिधानो युधिष्ठिरो न्टपतिः ।
भीमार्ज्जुनसहदेवास्तदनुचरा ये वाजिशास्त्रतत्त्वज्ञाः ॥ १ ॥
दृष्ट्वा सम्यक् नकुलो ज्ञानं सर्व्वशालिहोत्रीयं ।
ब्रूते शास्त्रार्थमन्यच्छास्त्रं कृत्वा समासेन ॥ २ ॥
प्रश्नो जातिर्वर्णमावर्त्तदन्ता लक्षं वेगो वाहनं धातुरक्षं ।
कालो नस्यं पिण्डमाज्यं कषायं शालां चेष्टां वाजिनामत्र वक्ष्ये ॥ ३ ॥

End. अश्वस्याङ्गं प्रलिपेद्धरिद्रया वरिष्ठया मङ्गल्या च ।
सुपविचान् दोषघ्नैर्विभूषयेदलङ्कारैः ॥ १० ॥

Colophon. इति श्रीनकुलकृतेऽश्वचिकित्सिते अश्वशालाविधिः अष्टादशोऽध्यायः ।

विषयः । अत्र १-मे,—शालिहोत्रमुनेः समीपे शक्रस्य रथयोग्यवाजिविषयकप्रश्नः । २-ये,—उत्तममध्यमनीचकनीयसां भेदेन चतुर्द्धा वाजिनिरूपणं । ३-ये,—सप्तवर्णानां वाजिनां मध्ये श्वेतवर्णस्य वाजिनः श्रेष्ठत्वकथनं । ४-र्थे,—ललाटादिविंशतिस्थानेषु आवर्त्तचिह्नेन वाजिन उत्तमतानिर्देशः । ५-मे,—दन्तविशेषेण वाजिनामायुःसङ्ख्याविज्ञानं । ६-ष्ठे,—चिह्नभेदेन वाजिनां सुलक्षणत्वकथनं । ७-मे,—सर्व्वेषां वाजिगुणानां मध्ये वेगगुणस्य अधिकत्वकथनं । ८-मे, ९-मे,—

अश्वारोहिलक्षणं । १०-मे,—वाजिनां धातुपरीक्षा । ११-शे,—ऋतुविशेषे वाजिसेवाविशेषनिरूपणं । १२-शे,—वाजिनां रोगविशेषे नश्ययोगनिरूपणं । १३-शे,—वाजिनां पित्तादिदोषे तत् शमनार्थं पिण्डयोगनिरूपणं । १४-शे,—वाजिनां रोगनाशकाद्यनिरूपणं । १५-शे,—वाजिनां रोगनाशकक्वाथनिरूपणं । १६-शे,—वाजिनां रोगनाशकविषप्रयोगः । १७-शे,—अश्वशालाविधिः । (एतद्ग्रन्थशेषे अष्टादशोऽध्याय इति यदुक्तं तद्भ्रममूलकं गणनायामष्टादशाध्यायस्याप्राप्तत्वात्) ।

No. 1649. सङ्कल्पकौमुदी ।

Substance, country-made paper, 15 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 1,722 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipárá, Rámadhana Vidyálañkára. Appearance, old. Prose and verse. Correct.

Sañkalpa-kaumudí. Rules regarding religious resolution to perform a ceremony, and directions for particular duties on certain occasions. By Rámakṛishṇa.

Beginning. प्रणम्य कमलाकान्तं देववन्द्यपदाम्बुजं ।
तन्यते रामकृष्णेन रम्या सङ्कल्पकौमुदी ॥
यद्यपि सङ्कल्पपदं नानार्थं, तथापि 'सङ्कल्पः कर्म्ममानसम्' इत्यमरकोषात् मानसं कर्म्म मनःसङ्कल्पितं कर्म्म । मनःसङ्कल्पितत्वं आहार्य्यारोपविषयत्वं ।
यथा रुद्रयामले,——
न्यायेनोपार्ज्जितं द्रव्यं मनसोपार्ज्जितन्तु वा ।
निवेदयेदिष्टदेवे भक्तिश्रद्धासमन्वितः ॥ इत्यादि ।

End. अत एव मठस्क्वादि+नम इति छात्रपाठाय कल्पितं गृहं मठो न तु छात्राणां स्वत्वं, तत्र आदिपदग्राह्यः अतिथ्यादिः । किञ्च मीमांसकैः विग्रहस्वीकारेऽपि विग्रहस्य देवतात्वं न स्वीक्रियते । इति शिवं ॥

Colophon. समाप्तेयं सङ्कल्पकौमुदी ।

विषयः । सङ्कल्पलक्षणं । सङ्कल्पविचारः । सङ्कल्पानुष्ठाने अशौचादिव्यवस्था । व्रतप्रतिष्ठादौ तद्व्यवस्था । सङ्कल्पितकाम्यादिश्राद्धव्यवस्था । महाभारतादिसङ्कल्पविशेषकथनं । विवाहे वरपित्रा कन्यापित्रा वा नान्दीश्राद्धे कृते नाशौचप्रतिबन्धकत्वं । आरब्धाकरणे निन्दाकीर्त्तनं । विवाहानन्तरम् अशौचेऽपि चतुर्थीहोमादिकं कार्य्यमिति

विषयः। कथनं। आरम्भशब्दार्थनिरूपणं। दम्भलक्षणनिरूपणं। सङ्कल्पेन विनेतिवचनस्य विशेषव्याख्यानं। अपवित्रः पवित्रो वेत्यस्य विशेषव्याख्यानं। सूर्य्यः सोमो यम इत्यादिमन्त्रस्य विष्णुस्मरणानन्तरमेव पाठ्यतेति कथनं। 'ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृत' इत्यस्य विशेषव्याख्यानं। जलाशयेतिशब्दार्थनिरूपणं। सङ्कल्पे दिङ्नियमः। 'मासपक्षतिथीनाञ्च' इत्यस्य विशेषव्याख्यानं। 'अद्य कृष्णाष्टमीं देवीम्' इत्यत्र अद्यपदपाठविचारः। उपवासलक्षणं। सङ्कल्पवाक्ये उपवासपदनिवेशविचारः। जन्मतिथिकृत्यनिरूपणं। गोत्रोल्लेखविचारः। आश्विने मासि शुक्ले पक्षे अष्टम्यां तिथौ महाष्टम्यामित्युल्लेखः। न तु महाष्टम्यां तिथाविति कथनं। स्नानलक्षणादिकं। गङ्गायां पतितं दृष्ट्वादिजलं गङ्गैवेति कथनं। चण्डीपाठसङ्कल्पविचारः। शष्कुलीशब्दार्थनिरूपणं। उपवासपारणादिनिरूपणं। एकादश्यादौ पितृश्राद्धोपस्थितौ तत्कर्त्तव्यता। अतिदेशलक्षणादिकथनं। उपवासदिने काम्यश्राद्धनिषेधः। श्रवणद्वादशीनिरूपणं। अस्याः पारणव्यवस्था। मठाद्युत्सर्गनिरूपणञ्च। इति।

No. 1650. श्राद्धचिन्तामणिः।

Substance, palm leaves, 14½ × 2¼ inches. Folia, 133. Lines, 6 on a page. Extent, 3,491 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

S'ráddha-chintámaṇi. Rules regarding offerings to the manes on particular occasions. By Váchaspati Mis'ra.

Beginning. प्रणम्य परमं तेजो विचार्य्याचार्य्यसंहिताः।
श्रीवाचस्पतिधीरेण श्राद्धस्य विधिरुच्यते॥

End. न ब्रह्मचारिणः कुर्य्युरुदकं पतिता न च।
पाषण्डमाश्रिताः स्तेना न व्रात्या न विकर्म्मिणः॥
गर्भभर्त्तृद्रुहश्चैव सुराप्यश्चैव योषितः।
स्तेना हिरण्यमात्रापहर्त्तारः। सुराप्य इति त्रैवर्णिकमात्रस्त्रीपरमिति सर्व्वचतुरस्रं॥

Colophon. इति महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचितः श्राद्धचिन्तामणिः सम्पूर्णः॥

विषयः। श्राद्धलक्षणं। तत्र प्राचीनमतं, नव्यमतञ्च। अत्र लक्ष्मीधर-वर्द्धमानादीनां नयकीर्त्तनं। श्राद्धभेदनिरूपणं। एकोद्दिष्ट-पार्व्वण-वृद्धिश्राद्धादीनां लक्षणादिकथनं। श्राद्धदेशनिरूपणं। पितृतीर्थादिकथनं। निषिद्धदेशकथनं। भूमि-

विषयः। संस्कारादिकीर्त्तनं। अग्रभागमदत्त्वा परकीयगृहे श्राद्धनिषेधः। अस्वामिकस्थाननिरूपणं। श्राद्धकालनिरूपणं। अष्टकाश्राद्धद्रव्यकथनं। सर्व्वत्रानादेशे पशुशब्देन छागस्यैव ग्रहणमिति कथनं। नवोदकश्राद्धादीनां नित्यत्वकथनं। अश्वयुक्कृष्णश्राद्धविचारः। अत्र श्राद्धविवेकादिमतकीर्त्तनं। मघात्रयोदशीश्राद्धनिरूपणं। शस्त्रादिहतानां चतुर्द्दशीकर्त्तव्यश्राद्धकथनं। काम्यश्राद्धनिरूपणं। क्षीणाद्यमावस्यानिरूपणं। पिण्डपितृयज्ञादिश्राद्धव्यवस्था। श्राद्धवेलानिरूपणं। मासलक्षणादिकथनं। अत्र हलायुधपारिजातादीनां मतकथनं। श्राद्धदेशस्थापनीयद्रव्यकथनं। दौहित्रघृतलक्षणं। श्राद्धदेशादपसारणीयद्रव्यादिकथनं। श्राद्धविहितब्राह्मणाः। पङ्क्तिपावनलक्षणं। त्रिमध्वादिलक्षणं। श्राद्धसम्यक्लक्षणं। श्राद्धनिषिद्धब्राह्मणलक्षणादिकथनं। हविष्यनिरूपणं। तत्र वाड्रीणसलक्षणं। अक्षारलवणनिरूपणं। श्राद्धे वर्ज्जनीयद्रव्यकथनं। मांसनिरूपणं। फलानि। कन्दकथनं। शाककथनं। लवणकथनं। सहजतो निषिद्धद्रव्यकथनं। तीर्थश्राद्धविहितद्रव्यनिरूपणं। दर्भादिलक्षणं। निमन्त्रणप्रकारादिकथनं। अर्घ्यपात्रादिनिरूपणं। गन्धादिनिरूपणं। परिवेषणविधिः। पात्रविशेषे फलविशेषकथनं। श्राद्धीयभोजनं। वेदिकरणविधिः। याचकेभ्यः अन्नदानं। श्राद्धोत्तरकर्म्मविधानं। परिभाषा। पार्व्वणश्राद्धप्रयोगोल्लेखप्रकारः। आमश्राद्धविधिः। तीर्थश्राद्धविधिः। जीवत्पितृकश्राद्धविधिः। एकोद्दिष्टश्राद्धविधानं। षोड़शश्राद्धानि। वृषोत्सर्गविधिः। उदकुम्भनिर्णयः। मासिकापकर्षकथनं। सपिण्डनापकर्षकथनं। सपिण्डने निषिद्धनक्षत्राणि। सपिण्डीकरणविधिः। आभ्युदयिकश्राद्धविधिः। तत्कालनिरूपणं। श्राद्धाधिकारिनिरूपणं। द्वादशविधपुत्रकथनं। पुत्रत्वातिदेशकथनं। पुत्रपदनिर्व्वचनं। स्त्रीश्राद्धाधिकारिनिरूपणं। अनधिकारिनिरूपणञ्च।

No. 1651. काव्यप्रकाशरहस्यप्रकाशः।

Substance, country-made paper, 17 × 3 inches. Folia, 185. Lines, 8—9 on a page. Extent, 7,076 s'lokas. Character, Bengali. Date, Sk. 1579. Place of deposit, Navadvípa, Harinátha Tarkasiddhánta. Appearance, old. Prose. Correct.

Kávya-prakás'a-rahasya-prakás'a. A commentary on the Kávya-prakás'a of Mammaṭṭa Bhaṭṭa. By Jadagís'a Tarkapañchánana.

Beginning. निद्राणेव मदैकमुद्रितमतौ पुष्पायुधे सायुधे
प्रीतेवार्पितलोचनाम्बुजबलौ चक्रायुधेऽनायुधे ।
सैवासीत् कुपितेव किञ्च जगतां विद्रावणे रावणे
शम्भोः कापि कृपा दृगन्तकलिता भिन्द्यादविद्यामदं ॥
सम्प्रति स्वमतिप्रीत्यै श्रीजगदीशद्विजो धीमान् ।
काव्यप्रकाशस्यूत्तौ सरसरहस्यं प्रकाशयति ॥
ग्रन्थारम्भे क्रियमाणस्य मङ्गलस्य निष्फलत्वशङ्कां निराकुर्व्वन् नियतिकृतनियम-
रहितामित्यादिश्लोकव्याख्यां ग्रन्थकृदारभते ॥ ग्रन्थारम्भ——इत्यादि ।

End. तत्र शिष्यजिज्ञासाक्रमेण तत्कथनात् शिष्यजिज्ञासानिवृत्तौ वक्तव्याभावेन
सम्पूर्णम् अनपेक्षितवाक्यान्तरं । श्रीः ।
बाले ! त्वं किमु कातरासि पिशुनव्यालावलीव्याहतौ
हा मातः ! सरलौषधव्यतिकरे कस्मादसौ व्याहतिः ।
तत् किं हन्त ! तदौषधं प्रतिपदं मागास्तदीयास्पदं
तेषां तद्विषपूर्णकर्णकुहरे कोपीच्छया गच्छति ॥

Colophon. इति श्रीजगदीशतर्कपञ्चाननभट्टाचार्य्यकृते काव्यप्रकाशरहस्यप्रकाशे अर्थालङ्कार-
निरूपको दशमोल्लासः समाप्तः ।
कन्दर्पं दहते विधुञ्च वहते भागीरथीं बिभ्रते
मृत्युं वारयते विषं वशयते ब्रह्माणमुच्छासते ।
वाणं वर्द्धयते हर्षं कलयते इच्छाधिमातन्वते
पापं खण्डयते जगन्नटयते कस्मैचिदस्मै नमः ॥
शाके रन्ध्राद्रिवाणक्षितिपरिगणिते माघमासे नवम्यां
पक्षे चैवावलक्षे ग्रहपतिदिवसे जीवयुग्युग्मलग्ने ।
न्यायालङ्कारधीरो निजगुरुरचितं पुस्तमेतत् समस्तं
स्वीयं स्वीयाङ्गनस्थो व्यलिखदनलसोऽध्यापनार्थं सुखेन ॥
शुभमस्तु शकाब्दाः १५७९ ।

विषयः । काव्यप्रकाशस्य व्याख्यानं ।

No. 1652. उपमानखण्डः ।

Substance, country-made paper, 14 × 4 inches. Folia, 22. Lines, 5 on a page. Extent, 261 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipádá, Khudiráma Nyáyabhúshaṇa. Appearance, fresh. Prose. Correct.

Upamána Khaṇḍa of the *Nyáya-chintámaṇi.* A complete codex of the work noticed under No. 601, Vol. II, p. 50.

Beginning. तत्र सादृश्यप्रमाकरणमुपमानमिति केचित्। सादृश्यञ्च पदार्थान्तरं। तथापि सदृशव्यवहारादबाधितादस्ति सादृश्यं।

End. गोसदृशो न गवय इत्यत्रापि परम्परया तात्पर्य्यमस्त्येवेति सर्व्वमवदातं।

Colophon. इति महामहोपाध्यायश्रीगङ्गेशचिन्तामणिविरचिते श्रीतत्त्वचिन्तामणौ उपमानखण्डः समाप्तः। शुभं।

विषयः। उपमानलक्षणं। उपमानात्मकसादृश्यज्ञानविषयस्य सादृश्यस्य नैयायिकमतसिद्धषट्पदार्थातिरिक्तपदार्थत्वखण्डनं। उपमानस्य प्रमाणान्तरत्वव्यवस्थापनञ्च।

No. 1653. श्राद्धदर्पणं।

Substance, country-made paper, 15 × 4 inches. Folia, 35. Lines, 7 on a page. Extent, 898 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Khudiráma Nyáyabhúshaṇa. Appearance, fresh. Prose and verse. Correct.

S'ráddha-darpaṇa. On periodical and occasional offerings to the manes. By Jayakṛishṇa Tarkavágís'a.

Beginning. प्रणम्य सच्चिदानन्दं भुक्तिमुक्तिप्रदायकं।
क्रियते जयकृष्णेन निर्म्मलं श्राद्धदर्पणं॥
तत्र पार्व्वणप्रसङ्गात् श्राद्धलक्षणमुच्यते,—सम्बन्धपदोपनीतान् पितॄनुद्दिश्य हविस्त्यागः श्राद्धमिति।

End. तत्र च अष्टमी नार्द्धरात्रे न वा पूर्व्वाह्ने,—तत्र पूजा कुत्र कार्य्या, तथा च अर्द्धरात्रे एव न कालान्तरे। इति शं।

Colophon. इति श्रीजयकृष्णतर्कवागीशकृतश्राद्धदर्पणं समाप्तं।

विषयः। पार्व्वणस्वरूपकथनं। तत्र पूर्व्वदिने निरामिषसकृद्भोजनादिविचारः। ब्राह्मणोपवशनात् प्राक् यज्ञेश्वरस्य स्मरणमेव कर्त्तव्यं, न तु पूजनमिति मैथिलमतदूषणं। विष्णुमुद्दिश्य निवेदितान्नेन श्राद्धं कर्त्तव्यं न वेत्यत्र निवेदितशेषान्नेन तदनुष्ठानमिति सिद्धान्तः। अनुज्ञाग्रहणविचारः। पार्व्वणातिदेशकथनादिकं। अर्घ्यदानप्रकरणं। गन्धादिदानविधिः। दक्षिणावाक्यविचारः। श्राद्धे पाकविचारः। स्त्रीशूद्रकर्तृकश्राद्धविधिः। विघ्नपतितश्राद्धकालनिरूपणं। अशौचान्त-

कृत्यविचारः । अपकर्षणपिण्डननिरूपणं । एकोद्दिष्टविधिः । सपिण्डनक्रमनिरूपणं । मघात्रयोदशी । दीपान्विता । नवान्नश्राद्धविधिः । वारुणी । अम्बुवाची । जन्माष्टमीविचारः । इति ।

No. 1654. मुद्राराक्षसपूर्व्वपीठिका ।

Substance, country-made paper, 16 × 4 inches. Folia, 40. Lines, 5 on a page. Extent, 575 s'lokas. Character, Bengali. Date, ? Place of deposit, Sántipura, S'rínátha Bhaṭṭáchárya. Appearance, new. Prose. Generally correct.

Mudrá-rákshasa-púrvapíṭhiká. A prose version of the well-known drama of *Mudrá-rákshasa*, or 'the Signet and the Minister' of Vis'ákha Deva. By Ananta Kaví. The author lived on the banks of the Godávarí River. The drama itself has been printed several times, and translated into English in Wilson's Hindu Theatre.

Beginning. सर्व्वे साधुजनाः सदायतहृदा सत्सम्प्रदायादलं
यज्ज्ञानाय कणादगौतमसतान्यालोक्य, तत्त्वार्थदान् ।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दाकरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितं ॥
पञ्चाशद्वर्णभेदैरपरिमिततरैरर्थजातैश्च युक्ता
नानालङ्काररम्या गणितगुणगणा साधुवृत्तैरुपेता ।
वाक्स्थैर्यतत्प्रसादात् प्रसरति रसनोपान्तदेशे निमेषा-
न्नित्यं चित्तेऽनुरक्ते वसतु मम सुखं भारती सा रसाढ्या ।
यद्गलस्फारहाराऽभयवरदकरा स्वस्वधम्मिल्लभारा
मूलाधाराधिकारा निगमनिधिधरा काव्यकोटिप्रचारा ॥
संसारानल्पकारा शयनभयहरा चिद्घनैकावतारा
तारा शृङ्गारधारा मनसि निवसतां सर्व्वदा सर्व्वसारा ॥
अभूद् भवस्यातिसुखाय या भुवं विशाखदेवाभिधसद्बुधस्य ।
कृतिस्तदीयामिह पूर्व्वसङ्कथां करोम्यनन्तो विदुषां सुखाय ॥
अस्ति पुरन्दरसुन्दरदिग्भागे भगवद्भागीरथीपरिसरे समस्तवस्तुविश्रमविश्रान्तिभाजनजनजेगीयमाननिवासविराजमानं कुसुमपुरं नाम नगरं ।——

End. मलयकेतुविरोधपुरःसरं मन्त्रिराक्षसेन सह चन्द्रगुप्तो मैत्रीं कर्त्तुमुद्यतः, तथा घटनार्थमुद्यममकरोत्।

Colophon. इति श्रीमद्गोदावरीपरिसरालङ्कृतपुण्यसम्बस्थितिमतिविलासशालिश्रीयुक्तानन्तकविविरचिता मुद्राराक्षसपूर्व्वपीठिका समाप्ता।

विषयः। कुसुमपुरवर्णनं। नन्दस्य उदग्रधन्व-तीक्ष्णधन्वेत्यादिनवपुत्रनामकीर्त्तनं। प्रतिपक्षभूपालानां नन्दसमीपे सुवर्णपट्टिकान्तःसंस्थापितारत्निमानद्देवदारुकाष्ठप्ररणविवरणं। चामरग्राहिण्या सुमङ्गलया सह नन्दस्य वसन्तोत्सवदर्शनाय प्रमदवनप्रवेशः। तत्र च पिपीलिकापङ्क्तिसन्दर्शनेन राजमुखकमलं सस्मितमाकलय्य सुमङ्गलायां स्मितवदनायां वदन्त्याञ्च महाराजस्मितेनैव मम स्मितं सञ्जातमिति राज्ञो 'मत्स्मितहेतुं कथय नो चेत् त्वां निग्रहिष्ये' इति सुमङ्गलां प्रति निर्देशकथनं। ततस्तु कस्यचित् ब्राह्मणस्य उपदेशेन सुमङ्गलया राज्ञः स्मितकारणकथनं। सुबुद्धिशर्म्माभिधेयाय द्विजाय मन्त्रिराक्षसपदवीं प्रदाय नन्दस्य स्वामात्यकृत्ये नियोजनवृत्तान्तः। नन्दस्य मृत्युः। गुरुदक्षिणासङ्ग्रहाय सुविद्यस्य कुसुमपुरप्रवेशः। तस्य पुनः विद्याबलेन नन्दमृतदेहप्रवेशः। राक्षसानुसन्धानेन सुविद्यस्य पूर्व्वदेहदाहनं। कुसुमपुरं परित्यज्य राक्षसस्य पर्व्वतेश्वरसन्निलप्राप्तिकथनं। कृत्रिमनन्दस्य शकटाराभिधेन मन्त्रिणा सार्द्धं मृगयानुष्ठानार्थं वनप्रयाणं। तत्र च कस्याञ्चित् दीर्घिकायां शिलापट्टलिखितं,

"अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य, तयोर्द्वयोरेकतरं जहाति॥
तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनं।
अर्द्धराज्यहरं विप्रं यो न हन्यात् स हन्यते"॥

इति श्लोकद्वयं निर्व्वर्ण्य कदाचित् स्वनिधनमाशङ्कमानेन शकटारेण पिपासितस्य राज्ञो निधनादिवृत्तान्तकथनं। उदग्रधन्वाभिधस्य नन्दकुमारस्य राज्याभिषेकादिविवरणं। नन्दनिधनकारणं तत्त्वतो निर्णेतुं करुणाकरनामकस्य तपस्विनो वीरसाधनप्रकारकथनं। शकटारमेव सुधन्वापरनामधेयस्य नन्दस्य घातकं ज्ञात्वा तद्वधाय राज्ञ आदेशः। पलपञ्चकमितचणकजलमात्राहारं दत्वा सपुत्रकलत्रस्य शकटारस्य भूमिगृहवासरूपदण्डविधानं। तावन्मात्राहारेण कथमपि धृतजीवितस्य विकटारस्य शकटारपुत्रस्य राजकारुण्येन मोचनकथनं। कुसुमपुरप्रत्यागमनपुरःसरं राक्षसस्य पुनरमात्यपदग्रहणविवरणं। राक्षसस्य विकटारं प्रति श्राद्धोपयोगिब्राह्मणनिमन्त्रणार्थमादेशः। कुशमूले माक्षिकप्रक्षेपणार्थं विक्षिप्तनयनेन शिवगुप्ततनयेन विष्णुगुप्तेन सह विकटारस्य साक्षात्कारविवरणादिकं।

श्राद्धकाले आसनापसारितस्य विष्णुगुप्तस्य शिखाबन्धनप्रतिज्ञा। राजसेन–भागुरायण–विजयवर्म्मादिभिः सार्द्धं चन्द्रगुप्तस्य विष्णुगुप्तानुगमनकथनं। पर्व्वतेश्वरेण सह तेषां मैत्र्यादिकथनं। कुसुमपुररोधादिकथनं। चन्द्रगुप्तस्य राज्यलाभः। पर्व्वतेश्वरेण सह राक्षसस्य सन्धिः, चन्द्रगुप्तनाशाय विषकन्याप्रेरणञ्च। पर्व्वतेश्वरहननं। मन्त्रिराक्षसेन सह चन्द्रगुप्तस्य मित्रताघटनञ्च।

No. 1655. वृहन्नीलतन्त्रं।

Substance, some leaves of country-made yellow paper, and some of country-made white paper, 13 × 4½ inches. Folia, 215. Lines, 5 on a page. Extent, 3,225 s'lokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Rámadhana Vidyálañkára. Appearance, fresh. Verse. Incorrect.

Vṛihannila Tantra. One of the 64 original Tantras, attributed to Mahádeva. Its subject is the ritual of the S'ákta divinities, giving special preeminence to the worship of a form of Máyá named Nílasarasvatí.

Beginning. कैलासशिखरासीनं भैरवं कालसञ्ज्ञितं।
प्रोवाच सादरं देवी तस्य वक्षःसमाश्रिता॥
पुरा प्रतिश्रुतं देव कालीतन्त्रप्रकाशने।
नीलतन्त्रप्रकाशाय तद्वदस्व सदाशिव॥
यस्य विज्ञानमात्रेण विजयी भुवि जायते।
यज्ज्ञात्वा साधकाः सर्व्वे विचरन्ति यथा तथा॥ इत्यादि।

End. मत्वान्निध्यं महेशानि तत्र तिष्ठति निश्चितं।
सर्व्वविद्या भवत्येव संशयो नास्ति कश्चन॥
अहं शिवः परात्मा च विना तासु महेश्वरि।
शव एव महेशानि कथितं दुर्लभं शिवे॥

Colophon. इति श्रीवृहन्नीलतन्त्रे सर्व्वतन्त्रोत्तमे भैरवपार्व्वतीसंवादे त्रयोविंशतिपटलं समाप्तं। समाप्तोऽयं ग्रन्थः।

विषयः। १ पटले,—शिवाशिवसंवादेन तन्त्रकथनप्रतिज्ञानिनिरूपणं। नीलसरस्वत्या वीजादिनिरूपणं। स्नानतिलकादिप्रकारकथनं। द्वादशादिष्वपि तान्त्रिकसन्ध्याया अनुष्ठानकर्त्तव्यतादिकं।

२ पटले,—एकलिङ्गस्थानलक्षणं। साधनयोग्यस्थाननिरूपणं। नीलसरस्वतीपूजा-

विषयः। विधानं। पुष्पनिरूपणं। त्रिविधगुरुनिरूपणं। बलिदानं। मन्त्रध्यानप्रकारः। नीलसरस्वतीस्तोत्रं। ताराष्टकं। अष्टाङ्गप्रणामलक्षणं।

३, ४ पटले,—दीक्षाविधिः। दीक्षाया आवश्यकता। सद्गुरुलक्षणादिकथनं। पितुरपि गुरोर्गरीयस्त्वकथनं। दीक्षाकालः। तत्स्थानं। तत्र नक्षत्रादिनिरूपणं। गुरोः सन्निधाने अन्यदेवपूजानिषेधः। पुरश्चरणविधिः।

५ पटले,—नैमित्तिक-काम्यपूजाविधानं। ब्राह्मण-राजन्य-वैश्यानां सुरापाननिषेधः। सुराभेदकथनं। अमन्त्रितसुरापाने प्रायश्चित्तविधानं। ऊर्व्वशी-भार्गवोपाख्यानं। वैधसुरापाने न दोष इति कथनं। अनुकल्पासवनिरूपणं। पीठार्च्चनविधिः। पीठनिरूपणं। सिद्धस्थानकथनं। महोत्तमस्थाननिरूपणं।

६ पटले,—कौलिकार्चनमाहात्म्यं। शक्तिपूजाप्रकारकथनं। कालीप्रयोगकथनं। शिवाबलिदानविधिः। शाक्तानामाचारक्रमकीर्त्तनं। कौलानां प्रायश्चित्तादिपञ्चकविवर्ज्जनावश्यकता। वैधहिंसातिरिक्तहिंसायां दोषः। समयाचारलक्षणं। कालिकापूजनविधिः। रटन्तीपूजाविधिः। अन्नपूर्णापूजाविधिः। ऋतुभेदे दैनिकऋतुभेदकथनं। तत्र षट्कर्म्मविधानं। आसनविनियोगः। ज्योतीरूपदर्शनोपायकीर्त्तनं। कौलिकाचारकथनं। होमविधानं।

७, ८ पटले,—निग्रहोपायकीर्त्तनं। वशीकरणं। शान्तिस्तोत्रं। महाचीनक्रमकीर्त्तनं। सारस्वतप्रयोगकथनं। अत्र सुरेन्द्रसुराचार्य्ययोः संवादकीर्त्तनं। पुनरन्नपूर्णापूजाविधानं। कुमारीपूजाविधिः। यन्त्रकथनं। रक्तादिदानयोग्यपशुनिरूपणं। दारुवनवृत्तान्तकीर्त्तनं। कलियुगे तारिण्यादिमन्त्राणां प्राधान्यकथनं। कालीमन्त्रकथनादिकं। मन्त्रसंस्कारप्रकारः। तत्र दशविधसंस्कारकथनं। त्रिविधशाम्भवचक्रकथनं। ब्रह्मस्वरूपकथनादिकं।

९, १०, ११ पटले,—प्रकारान्तरेण वीरसाधनकथनं। नायिकासाधनं। शीवीजादिसमुद्धारप्रकारः। विद्यारत्नकथनं। नीलसरस्वत्या आविर्भावकथनादिकं। हयग्रीवसोमकयोरुपाख्यानं। मत्स्यरूपेण विष्णुना सह तयोर्युद्धादिकीर्त्तनं। सर्व्वज्ञताकारणकथनं।

१२, १३, १४, १५ पटले,—विद्योत्पत्तिकथनं। स्त्रीपुरकथनं। प्रलयकाले वटपत्रशयानायाः कालिकायाः ब्रह्मादिकृतस्तोत्रादिकथनं। कामाख्यामन्त्रकथनं। चतुःषष्टियोगिनीकथनं। ब्रह्मपुत्रनदोत्पत्त्यादिकथनं। वरुणकुण्डादिकथनं। वायुकूट-चन्द्रकूटपर्व्वतादिकथनं। सोमकुण्डकथनं। भस्मकूटगिरिकथनं। ऊर्व्वशीकुण्डकथनं। मणिकूटादिकथनं। वासवकुण्डोपाख्यानं। ब्रह्मकूट-नीलकूटादिकथनं। ऊर्व्वशी-सिद्धगणेशादीनां ध्यानं।

१६, १७, १८ पटले,—सदाचारलक्षणं। सङ्क्षेपेण राजकर्म्मकथनं। महाष्टम्यादौ दुर्गापूजाविधानं। नीराजनविधिः। ज्यैष्ठपूर्णिमायां कालिकायाः स्नानयात्राविधानं। आश्विनकार्त्तिकमासादौ तस्याः स्नानादिविधानं। सारस्वतध्यानादिकथनं। होमार्थं कुण्डनिर्म्माणविधानं। होमविधिः। तारानामसहस्रस्तोत्रं। हरिनामग्रहण–तुलसीस्पर्शनादिनिषेधः।

१९, २०, २१, २२, २३ पटले,—ताराकवचकथनं। गुप्तमन्त्रादिकीर्त्तनं। ताराशतनामस्तोत्रं। ज्ञानोपायकीर्त्तनं। सीसकप्रयोगेन रौप्यकरणप्रकारः। पारदभस्मीकरणप्रकारः। त्रिविधभावनिरूपणं। कालीनामसहस्रस्तोत्रं। कालीशतनामस्तोत्रं। अन्नदामन्त्रकथनं। अन्नदाशतनामस्तोत्रं। हृन्नीलतन्त्रफलश्रुतिः।

No. 1657. भागवतसन्दर्भे क्रमसन्दर्भः।

Substance, country-made paper, 13 × 4 inches. Folia, 52. Lines, 12—15 on a page. Extent, 2,437 s'lokas. Character, Bengali. Date, ? Place of deposit, Sántipura, Pandit Kálidása Vidyávagís'a. Appearance, old. Prose. Correct.

Krama Sandarbha. The philosophy of the Bhágavata Purána illustrated, supplying omissions and deficiencies in the commentary of the Bhágavata by S'rídhara Svámi. By Jíva Gósvámí. The work is in seven parts, and is known under the collective name of Bhágavata Sandarbha ; the codex under notice comprises a portion of the last part, entitled *Krama Sandarbha.*

Beginning. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥
श्रीमद्भागवतं नौमि यस्यैकस्य प्रसादतः।
अज्ञातानपि जानाति सर्व्वः सर्व्वागमानपि॥
श्रीभागवतसन्दर्भान् श्रीमद्वैष्णवतोषणीं।
दृष्ट्वा भागवतव्याख्या लिख्यतेऽत्र यथामति॥)
जयेतां मथुराभूमौ श्रीलरूपसनातनौ।
यौ विलेखयतस्तत्त्वज्ञापकौ पुस्तिकामिमां॥

यस्य ब्रह्मेति सञ्ज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ता-
प्यंशो यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च ।
एकं यस्यैव रूपं विलसति परमव्योम्नि नारायणाख्यं
स श्रीकृष्णस्वरूपः स्फुरतु भगवान् प्रेम दद्यात् भजद्भ्यः ॥
अथैवं सूचितानां श्रीकृष्णवाच्यवाचकतालक्षणसम्बन्धतद्भजनलक्षणाभिधेय-
तत्प्रेमलक्षणप्रयोजनानां निर्णयाय पूर्व्वं तत्त्वसन्दर्भादिषट्सन्दर्भा निरूपिताः।
अधुना तु श्रीमद्भागवतक्रमव्याख्यानाय तत्रापि सम्बन्धाभिधेयप्रयोजननिर्णय-
प्रदर्शनाय च सप्तमः क्रमसन्दर्भोऽयमारभ्यते ।
श्रीभागवतसिद्धार्थी टीका इष्टिवदा++ ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्यैकरक्षकान् ॥
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ।
तत्र तत्र च विज्ञेयः सन्दर्भः क्रमनामकः ॥
ऋथात्र परिभाषेयं ज्ञातव्या यद्यपेक्ष्यते ।
मूलं सटीकमङ्काद्यैः परिच्छेद्यं सच्चानया ॥
अङ्का वाक्यान्त-एवात्र देयाः पद्यान्ततो न तु ।
बहुपद्यैकवाक्यत्वे गर्भाङ्का विन्दुमस्तकाः ॥
यस्मिन् पद्ये नास्ति टीका तद्व्यङ्केन योजयेत् ।
एकपद्यान्यवाक्यत्वे सङ्ख्याशब्दास्तु कान्तकाः ॥
बहुपद्यैकवाक्यत्वेऽप्यमी ज्ञेयास्तथाविधाः ।
यथाद्येकं युग्मकञ्च त्रिकमित्याद्युदाहृतिः ॥
जन्माद्यस्येत्यत्र श्रीस्वामिचरणानामयमभिप्रायः। परं परमेश्वरमिति न पुन-
रभेदवादिनामिव चिन्मात्रं ब्रह्मेत्यर्थः । इत्यादि ।

End. ततो निमित्ताभावे नैमित्तिकस्याप्यभावात्। टेलोपाच सिध्यन्ति ॥ ३२ ॥ २७ ॥

Colophon. इति प्रथमक्रमसन्दर्भे एकोनविंशोऽध्यायः ॥
इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेव-
चरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे सप्त-
सन्दर्भात्मकश्रीभागवतसन्दर्भे प्रथमस्कन्धस्य क्रमसन्दर्भः समाप्तः ॥

विषयः । श्रीधरस्वामिकृताया भागवतटीकायाः परिशिष्टरूपेयं विवृतिः। किञ्च यत्र यत्र
स्वामिना व्याख्या न कृता कृताप्यस्फुटा वा तत्र तत्र विशदीकरणं ।

No. 1657. भागवतसन्दर्भे परमात्मसन्दर्भः ।

Substance, country-made paper, 13 × 4 inches. Folia, 67. Lines, 8—9—10 on a page. Extent, 2,010 s'lokas. Character, Bengali. Date, Sk. 1593. Place of deposit, S'ántipura, Pandit Kálidása Vidyávágís'a. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose and verse. Correct.

Paramátma-sandarbha. The third part of the work noticed under the last preceding No. 1656. It treats of the Divine spirit.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं ।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥
अथ परमात्मा विव्रियते । यद्यपि परमात्मत्वं वैकुण्ठेऽपि प्रभोरस्ति । इत्यादि ।

End. यथेन्द्रियैः पृथग् द्वारैरर्थो बहुगुणाश्रयः ।
एको ++यते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥
इत्येव उदाहरणीयं । अनेनैव गतिसामान्यञ्च सिध्यतीति । २ । २ । श्रीशुकः ।
प्रत्यवस्थापितं वदन्तीत्यादि पद्यं ।

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे परमात्मसन्दर्भो नाम तृतीयः सन्दर्भः । शुभमस्तु शकाब्दाः १५९३ ।

विषयः । परमात्मनिरूपणादिकं । गुणावताराणां तारतम्यविवेचनं । जीवमायादीनां स्वरूपादिनिरूपणं । विवर्त्तसमाधानं । परमात्मप्रपञ्चयोरभेदकीर्त्तनं । परमात्मनो जगद्भिन्नत्वकथनञ्च । जगतोऽसत्यत्वकथनं । श्रीधरकृतटीकाया अभिप्रायप्रकाशनं । निर्गुणे परात्मनि कर्तृत्वादीनां समन्वयः । लीलावतारप्रयोजनकीर्त्तनं । वेदान्तसूत्रादीनामभिप्रायकथनं । भागवतप्रशंसा । भगवत्येव सर्व्वेषां शास्त्राणां तात्पर्य्यप्रदर्शनं । ग्रन्थस्यायं श्रीमद्भागवतीयानां केषाञ्चित् श्लोकानां गूढार्थप्रकाशनमुखेन निर्म्मिततया तट्टीकास्थानीयः ।

No. 1658. श्रीकृष्णसन्दर्भः ।

Substance, country-made paper, 13 × 4 inches. Folia, 77. Lines, 13 on a page. Extent, 3,816 s'lokas. Character, Bengali. Date, ? Place of

deposit, S'ántipura, Kálidása Vidyávágís'a. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, fresh. Prose and verse. Correct.

S'ríkṛishṇa-sandarbha. The fourth part of the work noticed under No. 1656. It treats of Krishṇa as the divine spirit.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥
अथ पूर्व्वं सन्दर्भत्रयेण यस्य सर्व्वपरत्वं साधितं तस्य श्रीभगवतो निर्द्धारणाय सन्दर्भोऽयमारभ्यते। इत्यादि।

End. अपि परिपाटीरिति। पूर्णं सम्बन्धः।
गौरश्यामरुचोज्ज्वलाभिरसनैरक्ष्णोर्विलासोत्सवै-
र्नृत्यन्तीभिरशेषमादनकलावैदग्ध्यदिग्धात्मभिः।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदाभिः सदा
राधामाधवमाधुरीभिरभितश्चित्तं समाक्रम्यतां ॥

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीकृष्णसन्दर्भो नाम चतुर्थः सन्दर्भः।

विषयः। ग्रन्थः खल्वयं श्रीमद्भागवतीयानां केषाञ्चित् श्लोकानां गूढार्थप्रकाशनमुखेन निर्म्मिततया तट्टीकास्थानीयः। तत्र श्रीकृष्णस्य भगवत्तानिरूपणं। चतुर्व्यूहकथनं। भगवत्स्वरूपनिरूपणं। अंशबोधकवाक्यानां समाधानं। श्रीकृष्णस्य पूर्णतासंस्थापनं। अवतारप्रसङ्गः। श्रीकृष्णनाममाहात्म्यकीर्त्तनं। अन्यान्यशास्त्रेभ्यो भागवतस्य श्रैष्ठ्यकथनं। अभ्यासनिरूपणं। प्रतिनिधिवाक्यनिरूपणं। सर्व्वशास्त्रसमन्वयः। श्रीकृष्णरूपपरिच्छदादीनां नित्यत्वकीर्त्तनं। असुरेषु यद्रूपं स्फुरति तत्तस्य स्वरूपं न भवति, किन्तु मायाकल्पितमेवेतिकथनं। अनिरुद्धप्रद्युम्नादिलोकनिरूपणं। गोलोकवर्णनं। वृन्दावनवर्णनं। गोलोकगोकुलयोरभेदकथनं। मथुरावर्णनं। द्वारकादीनां नित्यधामत्वनिरूपणं। गोकुलवासिनामप्राकृतदेहत्वादिकथनं। प्रकटाप्रकटद्विविधलीलाव्यवस्था। रुक्मिण्यादीनां श्रीकृष्णस्वरूपशक्तिरूपत्वकथनं। ताभ्यो गोपीनां श्रेष्ठत्वकथनं। तासु च राधिकाया एव श्रेष्ठतमत्वकीर्त्तनञ्च। श्रीकृष्णस्य सर्व्वत्र प्रकाशेऽपि श्रीवृन्दावने वरपरमाद्भुतप्रकाश इति कथनं।

No. 1659. द्वितीयस्कन्धक्रमसन्दर्भः ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 44. Lines, 10 on a page. Extent, 1,210 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Paṇdit Kálidása Vidyávagís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose. Correct.

Krama-sandarbha. The second book of the last part of the work noticed under No. 1656.

Beginning. द्वितीयक्रमसन्दर्भे सन्दर्भानां समाहृतिः ।
क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥
अथ द्वितीयस्कन्धस्य क्रमसन्दर्भः । अथ शुकदेवस्य । अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रिय इत्यादिना श्रीकृष्ण एव स्वरतिं अन्त्य म्रियमाणानां श्रोतव्यादिप्रश्नेनैवान्तकाले श्रीकृष्ण एव मय्युपदिश्यतामिति राजाभिप्रायानन्तरं ।

End. तथा च तृतीये वक्ष्यते,—कुत्र चत्तुर्भगवत इत्यादिना ।

Colophon. इति द्वितीये दशमः । समाप्तश्चायं द्वितीयस्कन्धक्रमसन्दर्भः ।

विषयः । श्रीधरस्वामिकृतश्रीमद्भागवतीयद्वितीयस्कन्धटीकाया अस्फुटादिस्थानविशदीकरणरूपेयं विवृतिः ।

No. 1660. तृतीयस्कन्धक्रमसन्दर्भः ।

Substance, country-made yellow paper, 14 × 5 inches. Folia, 81. Lines, 11 on a page. Extent, 2,561 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose. Correct.

Krama-sandarbha. The third book of the seventh part of the work noticed under No. 1656.

Beginning. तृतीयक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यन्निदेशेन समेऽनन्यगतेर्गतिः ॥
अथ तृतीयस्कन्धस्य क्रमसन्दर्भः ॥ १ ॥ यद्वेत्यत्र यदाश्रयमिति चित्सुखः ॥ २ ॥

End. योऽभिधत्तेमात्रं यो वा शृणोतिमात्रं किमुत अनुतिष्ठति, यः, किमुततरां श्रीदेवहूतिरित्यर्थः ।

Colophon. इति श्रीभागवते तृतीयक्रमसन्दर्भे त्रयस्त्रिंशत्तमोऽध्यायः । समाप्तोऽयं तृतीयस्कन्धक्रमसन्दर्भः ।

विषयः । श्रीधरस्वामिकृतश्रीमद्भागवततृतीयस्कन्धटीकाया अस्फुटस्थानादिविशदीकरण-रूपे विवृतिः ।

No. 1661. सदुपहाररत्नाकरः ।

Substance, country-made yellow paper, 15 × 2½ inches. Folia, 41. Lines, 5 on a page. Extent, 820 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, fresh. Verse. Correct.

Sadupahára-ratnákara. A collection of small poems by distinguished authors, classified and arranged under different heads. By Sarvánanda Kavi. The MS. is incomplete.

Beginning. तिर्य्यग्बद्धाङ्गयष्टिद्वितयभुजलताश्लेषसम्मोदद्दीनं
यावज्जन्मैव तादृङ्मिलदधरसुधास्वादसम्बन्धगन्धं ।
अन्योन्यप्रेक्षितोद्यत् स्मितसुभगमुखं पातु वश्चन्द्रमौलेः
स्त्रीपुंरूपात्मदेहप्रणयनघटनापाटवं कामुकस्य ॥
अर्थप्रौढिमगाढबन्धघटनापाद्यावरोहक्रम-
श्रव्यं यद् यदकारि सत्कविकुलैरन्यापदेशाभिधं ।
तत्तत् पद्यमतीव हृद्यमधुना सञ्चित्य यत्नादसौ
सर्व्वानन्दकविः करोति कुतुकादेकत्र सत्प्रीतये ॥
सभाहृदयरञ्जकस्फुरदनेकपद्यावली-
मणिप्रकरजन्मभाक् स्फुटरसाम्रतस्यन्दभूः ।
प्रसादशमिसम्भवभ्रमदनेककीर्त्तिर्मया
व्यधायि बुधसम्मुदे सदुपहाररत्नाकरः ॥

End. न चुम्बति मनागपि भ्रमर एष पुष्पान्तरं
परिभ्रमति पार्श्वतो विटपपद्मिनीलम्पटः ।
प्रयाति यदि यामिनी त्यजति मौनमुद्राञ्च सा
निपीय मधु निर्भरं मुदमुपैति पुष्पन्धयः ॥
इतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । प्रायः प्रास्ताविकश्लोकानाहृत्य व्रज्याक्रमेण रचितोऽयं ग्रन्थः । तत्र दुर्ज्जननिन्दा-सज्जनस्तुती । शङ्करव्रज्या । गौरीव्रज्या । शिवगणव्रज्या । विष्णुव्रज्या । लक्ष्मी-व्रज्या । सरस्वतीव्रज्या । मदनव्रज्या । दशावतारव्राज्य । सूर्य्यव्रज्या । चन्द्र-

व्रज्या। सूर्य्याचन्द्रव्रज्या। पवनव्रज्या। कल्पवृक्षव्रज्या। मेघव्रज्या। देवव्रज्या। गृहव्रज्या। प्रदीपव्रज्या। सुजनव्रज्या। दुर्ज्जनव्रज्या। सुजनदुर्ज्जनव्रज्या। गुणिव्रज्या। पामरव्रज्या। धनिव्रज्या। दरिद्रव्रज्या। वीरव्रज्या। स्त्रीव्रज्या। अलङ्कारव्रज्या। सुवर्णव्रज्या। मृगमदव्रज्या। गिरिव्रज्या। अगुरुव्रज्या। चन्दनव्रज्या। श्रीफलव्रज्या। चूतव्रज्या। पनसव्रज्या। वदरीव्रज्या। अशोकव्रज्या। किंशुकव्रज्या। अश्वत्थव्रज्या। वटव्रज्या। शाल्मलिव्रज्या। भ्रमरव्रज्या।

इतः खण्डितं।

No. 1662. अलङ्कारकौस्तुभः।

Substance, country-made paper, 13 × 4½ inches. Folia, 103. Lines, 9—10 on a page. Extent, 4,120 s'lokas. Character, Bengali. Date, Sk. 1681. Place of deposit, S'ántipura, Kálidása Vidyávágís'a. A second copy in Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, very old. Prose and verse. Correct.

Alaṅkára-kaustubha. A treatise on Rhetoric. By Kavikarṇapura, one of the followers of Chaitanya. The work is divided into ten chapters, or "rays" (*kiraṇa*), and illustrates every figure of speech and rhetorical ornament by a verse in praise of Krishṇa. The MS. is dated S'aka 1681 = A. D. 1760. The author was a renowned Vaishṇava, and wrote several works on the Vaishṇava faith. Vide Introduction to Dr. Mitra's edition of the Chaitanya Chandrodaya Náṭaka.

Beginning. ग्रन्थारम्भे स्वाभीष्टदेवतानामगुणकीर्त्तनात्मकं मङ्गलमङ्गीकुर्व्वन् ग्रन्थकारो ग्रन्थस्य निर्व्विघ्नां परिसमाप्तिमाशास्ते।

स्वानन्दरसस्वरूपः कृष्णचैतन्यविग्रहो जयति।

आपामरमपि कृपया सुधया स्नपयाम्बभूव भूमौ यः॥

स जयति येन प्रभवति सुदृशां दृशि व्यञ्जनावृत्तिः।

अतिशयितपदपदार्थो ध्वनिरिव मुरलीध्वनिर्मुरारातेः।

जयतिरत्राकर्म्मकः सर्व्वोत्कर्षवाचकः, तेन नमस्कारोऽपि व्यज्यते, स्वापकर्षबोधानुकूलव्यापारविशेषो नमस्कार इति न्यायात्॥ इत्यादि।

End. शान्तस्य न्यक्कृतत्वात् शृङ्गारः पुष्ट एव। प्रागुक्तलक्षणस्य रसस्य आनन्दस्वरूपत्वेन प्रतिपादिते चैक्ये रसस्य रसेन विरोध इति यदिह प्रतिपाद्यते,—तत्त सामग्रीभूतस्य स्थाय्यादेरेव न तु रसस्य।

Colophon. इत्यलङ्कारकौस्तुभे दोषप्रदर्शनो नाम दशमः किरणः ॥ समाप्तश्चायं ग्रन्थः ।
श्रीमतः कर्णपूरस्य चरणाब्जनिशं भजे ।
निर्म्मितः कृष्णकण्ठार्थे येनालङ्कारकौस्तुभः ॥ शुभमस्तु शकाब्दाः १६८१ ।
माधवे च सिते पक्षे चतुर्दश्यां गुरौ दिने ।
शशिवसुतुकृष्णा+ सङ्ख्ये संवत्सरागते ॥

विषयः । १ प्रथमकिरणे,—काव्यस्य शरीरादिस्वरूपं । काव्यलक्षणं । प्रकाशमतदूषणं । दर्पणमताक्षेपः । वामनमतदूषणं । काव्यत्वजातिः । कवित्वलक्षणं । वीजलक्षणं । प्रतिभालक्षणं । काव्यभेदः । काव्यस्य प्रयोजनादिकथनञ्च ।

२ ये,—शब्दस्वरूपं । वर्णानां नित्यत्वं । नादविन्दुप्रभृतीनामुत्पत्तिप्रकारः । स्फोटवादः । जात्यादिना शब्दभेदकथनं । वाचकः शब्दः । अभिधाविचारः । योगरूढादयः । प्रत्ययशक्तिविचारः । समासशक्तिनिरूपणं । सिद्धसाध्यादिभेदकथनं । लक्षणालक्षणं । तद्विचारः । सारोपा । साध्यवसानिका । उपादानलक्षणा । गूढव्यङ्ग्या लक्षणा । गतव्यङ्ग्या । व्यक्तव्यङ्ग्या । व्यञ्जनापेक्षणादिविचारः । अर्थादीनां व्यञ्जकत्वं । संयोगादयः । असंलक्ष्यक्रमव्यङ्गादयः ।

३ ये,—ध्वनिलक्षणतद्भेदादिकथनं । कविप्रौढोक्तेश्चातुर्विध्यकथनं । अविवक्षितवाच्यध्वनिः । अर्थान्तरसङ्क्रमितवाच्यध्वनिः । अत्यन्ततिरस्कृतवाच्यध्वनिः । विवक्षितान्यपरवाच्यध्वनिः । संलक्ष्यक्रमव्यङ्गध्वनिः । शब्दशक्त्युद्भवध्वनिः । अर्थशक्त्युद्भवादयश्च ।

४ र्थे,—गुणीभूतव्यङ्गकथनं । तत्र स्फुटं । अपराङ्गं । वाच्यप्रपोषकं । कष्टगम्यं । सन्दिग्धप्राधान्यादीनि च ।

५ मे,—रसलक्षणं । स्थायिविभावादीनां लक्षणं । भोजमतेन वात्सल्यप्रेमरसयोर्लक्षणं । रत्यादिलक्षणं । रसस्वरूपविचारः । तत्रायं सारः,—चित्रोत्कीर्णाभिरूपप्रतिमादिषु इमौ रामलक्ष्मणौ रामोऽयं सीताशोकाकुलः, सिंहोऽयं मृगोपघातकः-श्मशानमिदं शवसमूहार्द्रमांसादिसङ्कुलमिति कृत्रिमेष्वपि तेषु विभावादिषु अकृत्रिमवत् प्रतीयमानेषु स्वगतरसवासनाधौतरजस्तमस्तया स्वच्छतरेषु सचेतसां चेतःसु एक एव आनन्दो जायते स एव रसः, किञ्च एकस्यैव उपाधिभेदेन रत्यादिव्यपदेश इति । वीरादीनां लक्षणं । भक्तिरसलक्षणं । सम्भोगविप्रलम्भौ । पूर्व्वरागादीनां लक्षणं । दशदशाकथनं । नायकादिलक्षणं । नायकसहायनिरूपणं । सत्त्वजगुणकीर्त्तनं । नायिकाभेदकथनं । आसामलङ्काराः । मुग्धामध्याप्रभृतीनामिङ्गितानि । सखीप्रियसख्यादीनां लक्षणं । उद्दीपनविभावः । अनुभावाः । तत्र सात्त्विकभावः । सम्भिशरलतादयः । व्यभिचारिणः ।

६ ष्ठे,—गुणलक्षणं। गुणानां रसधर्म्मत्वव्यवस्थापनं। माधुर्य्यादीनां लक्षणं। वामनोक्तश्लेषादिगुणानां लक्षणकथनपूर्व्वकं केषाञ्चित् माधुर्य्यादिष्वेव अन्तर्भावनं। माधुर्य्यादिव्यञ्जकाः वर्णाः।

७ मे,—अलङ्कारलक्षणं। तस्य शब्दार्थधर्म्मत्वसंस्थापनं। पुनरुक्तवदाभासचित्रादिशब्दालङ्कारनिरूपणं।

८ मे,—उपमादिव्याघातान्तद्विषष्टिविधार्थालङ्कारनिरूपणं। सङ्करादिभेदकथनं। अलङ्कारदोषनिरूपणञ्च।

९ मे,—रीतिलक्षणं। वदर्भ्यादिचतुर्व्विधरीतिलक्षणं।

१० मे,—दोषलक्षणं। श्रवणकट्वादिषोड़शविधपददोषकथनं। प्रतिलोमाक्षराद्येकविंशतिविधवाक्यदोषनिरूपणं। नूपुरादिषु रणितादिप्रसिद्धिकथनं। कष्टादित्रयोविंशतिविधार्थदोषकथनं। रसदोषनिरूपणं। इति शम्।

No. 1663. अलङ्कारकौस्तुभटीका।

Substance, country-made paper, 14 × 4½ inches. Folia, 60. Lines, 8 on a page. Extent, 2,400 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, old. Prose. Correct.

Alankára-kaustubha Tíká. A commentary on the work noticed under the last preceding No. 1662. By Lokanátha Chakravartí.

Beginning. अद्वैतप्रकटीकृतो नरहरिप्रेष्ठः स्वरूपप्रियो-
नित्यानन्दसखः सनातनगतिः श्रीरूपहृत्केतनः।
लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभूः
साङ्गोपाङ्गसपार्षदः सदयतां देवः शचीनन्दनः॥
अथ सोऽयं कविमुकुटमणिः श्रीकर्णपूरगोस्वामी स्वकृतश्लोकानां स्वयमेव व्याख्यामाह। ग्रन्थारम्भ इति।

End. पारक्योऽधरराग इति मत्वा मत्प्रतिपक्षरमणधरसम्बन्धितामूलराग इति मत्वेत्यर्थः। अतः खण्डितं।

विषयः। कविकर्णपूरगोस्वामिकृतालङ्कारकौस्तुभस्य व्याख्यानं।

No. 1664. सत्कृत्यमुक्तावली ।

Substance, country-made yellow paper, $15\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 83. Lines, 7 on a page. Extent, 1,525 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagís'a. Appearance, fresh. Prose and verse. Correct.

Satkṛitya-muktávalí. A compilation of all the leading facts regarding astronomy and astrology, and their bearings on human destiny. By Raghunátha Sárvabhauma Bhaṭṭáchárya.

Beginning. नत्वा भाणुगणेशशम्भुगिरिजा ज्ञात्वा मुनीनां मतं
ज्योतिःसङ्ग्रहसंहितार्थमवधार्य्याचार्य्यवाक्येन च ।
सारं तेषु निगूढमाहृतवता प्रज्ञावतामाज्ञया
सङ्क्षिप्ता रघुनाथकेन रचिता सत्कृत्यमुक्तावली ॥

End. यदाह्नि मेषसङ्क्रान्तिस्तुलासङ्क्रमणं निशि ।
तदा प्रजा विवर्द्धन्ते धनधान्यसमृद्धिभिः ॥
धीराः प्रणम्य भवतो विनिवेदयामि श्रीकामदेवचरणीतलवासवस्य ।
आज्ञामवाप्य रचितो रुचिरो निबन्धो दोषो न मे बलवतीह यतो नृपाज्ञा ॥

Colophon. इति रघुनाथसार्व्वभौमभट्टाचार्य्यरचिता सत्कृत्यमुक्तावली समाप्ता ॥

विषयः । राश्यादिनिरूपणं । राशिनक्षत्रभेदकथनं । राश्यधिष्ठात्रीदेवताकथनं । राशिपर्य्यायः । तेषां वर्णकथनं । तेषां विशेषसञ्ज्ञा । द्विपदचतुष्पदादिभेदकथनं । कीटसरीसृपकथनं । ग्राम्यारण्यकथनं । जलजराशिकथनञ्च । राशीनां वश्यत्वादिविवेकः । ह्रस्वत्वादिविवेकः । तेषां रात्रिबलित्वादिकथनञ्च । दिगधिपत्वग्रकथनं । उच्चनीचकथनं । मूलत्रिकोणकथनं । लग्नमानं । भोगविवेकः । दिवादण्डादिज्ञानं । होरा । द्रेक्काणादयः । षड्वर्गविवेकः । राशिभावविवेकः । केन्द्रादिविभागः । दृष्टिज्ञानं । ग्रहपर्य्यायः । पापादिग्रहविवेकः । ग्रहाणां वर्णनिरूपणं । दिगधिपग्रहकथनं । दिग्बलित्वविवेकः । पुरुषाद्यधिपाः । जात्यधिपाः । वेदाधिपाः । गुणाधिपाः । रसाधिपाः । नैसर्गिकमित्रकथनं । नैसर्गिकशत्रुकथनं । तत्कालमित्रादिकथनं । अधिमित्रादिकथनं । बलविवेकः । माण्डव्यगोचरः । गोचरफलकालः । तदपवादः । वारवेला । कालवेला । अष्टवर्गः । नन्दादयः । अवमदिनादिनिरूपणं । शतपदचक्रं । नक्षत्राधिदेवता । ध्रुवगणादिकथनं । अधोमुखगणकथनं । ऊर्द्ध्वमुखगणकथनं । पार्श्वमुखगणकथनं । यात्रादिनक्षत्रनिरूपणं । राज्याभिषेकोप-

योगिनचत्रकथनं । नाड़ीनचत्रं । अशुभचन्द्रादिप्रतीकारः । ग्रहणं । भूकम्पः । वेलामण्डलः । कालाशुद्धिः । विवाहः द्विरागमनं । निषेकः । पुंसवनं । पञ्चामृतं । सीमन्तोन्नयनं । जातकर्म्म । नामकरणं । अन्नप्राशनं । नवान्नं । चूड़ाकरणं । विद्यारम्भः । कर्णवेधः । उपनयनं । यात्रा । गृहारम्भः । शङ्खादिधारणं । देवप्रतिष्ठा । परीचा । राजादिदर्शनं । आयव्ययफलकथनं । रोगशान्तिस्नानं । होमविधिः । औषधकरणं । आरोग्यस्नानं । पञ्जिकासाधनं । महाविषुवादिफलकथनं । हृहस्पतिसञ्चारफलकथनञ्च इति ॥

No. 1665. प्रीतिसन्दर्भः ।

Substance, country-made paper, 12 × 5 inches. Folia, 172. Lines, 10 on a page. Extent, 4,515 s'lokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Madangopála Goswámí. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, old. Prose and verse. Correct.

Príti-sandarbha. The sixth part of the work described under No. 1656. It is devoted to love for the Divinity as personified in Krishṇa.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं ।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥

अथ प्रीतिसन्दर्भो लेख्यः । इह खलु शास्त्रप्रतिपाद्यं परमतत्त्वं हि सन्दर्भचतुष्टयेन पूर्व्वं समबध्यत, तदुपासना च तदनन्तरसन्दर्भेणाभिहिता । इत्यादि ।

End. तदन्ते श्रीराधादेव्या महिमा । इति षष्ठः सन्दर्भः ।

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे प्रीतिसन्दर्भो नाम षष्ठः सन्दर्भः ।

विषयः । ग्रन्थोऽयं तत्त्वसन्दर्भवत् श्रीमद्भागवतटीकास्थानीयः । तत्र,—भगवत् प्रीतेः पुरुषार्थत्वनिरूपणं । परतत्त्वमात्रसाक्षात्कारस्य परमपुरुषार्थत्वकथनं । तस्य मुक्तित्वकथनं । तत्रैव सविशेषनिर्व्विशेषभेदकथनं । जीवन्मुक्त्युत्क्रान्तिमुक्तिभेदः । ब्रह्मसाक्षात्कारस्वरूपं । मुक्त्यपेक्षया प्रीतेः प्राधान्यकथनं । सद्योमुक्तिकथनं । क्रममुक्तिनिरूपणं । ब्रह्मसाक्षात्काररूपजीवन्मुक्तिकथनं । ब्रह्मसाक्षात्काररूपो-

त्क्रान्तिमुक्तिः। भगवत्साचात्कारस्य मुक्तित्वं। तल्लचणजीवन्मुक्तिः। तल्लचणोत्क्रान्तिमुक्तिश्च। सालोक्यादिमुक्तिभेदः। तत्रैव सामीप्यस्य आधिक्यकथनं। भगवद्भक्तेर्मुक्तित्वं। भक्तेरुपादेयत्वं। तत्र उपपत्तिप्रदर्शनं। अन्यथोदाहरणसमाधानञ्च। भगवत्प्रीतिस्वरूपलचणं। तस्या गुणातीतत्वादिकं। तत्तटस्थलचणं। तदाविर्भावभेदाः। प्रीतिलचणवाक्यानां निष्कर्षः। श्रीकृष्णप्रीतेः श्रीकृष्णाविर्भावपूर्णत्वेन श्रेष्ठत्वकथनं। प्रीतेः रत्यादिभेदनिरूपणं। अभिमानभेदेन प्रीतिभक्त्योः प्रभेदकथनं। व्रजदेवीनां कामस्य शुद्धप्रेमत्वस्थापनं। ज्ञानभक्त्यादीनां क्वचिन्मिश्रत्वनिरूपणं। रत्याद्युदाहरणं। ज्ञानिभक्तादिषु रत्यादिव्यवस्था। तत्तारतम्ये परिकराभिमानिनां प्रीत्युत्कर्षः। भगवतोऽपि तत्तदभिमानत्वं। ऐश्वर्य्यमाधुर्य्यानुभवयोस्तारतम्यं। तत्र गोकुलवासिनां श्रेष्ठत्वं। तत्रापि सखीनां। तदन्ते पित्रोः। ततो गोपीनां। तत्रापि श्रीराधायाः। भगवत्प्रीतेः रसत्वस्थापनं। अनुकार्य्येऽपि तस्या रसत्वं। लौकिकरसात् श्रेष्ठत्वकथनं। आलम्बनविभावाः। तत्र सन्देहनिरासः। उद्दीपनविभावाः। गुणकथनं। विरोधिगुणकथनं। भगवत्कामविशेषस्य प्रेमविशेषत्वं। धीरोदात्तादिभेदाः। ऐश्वर्य्यमाधुर्य्यमय्योर्माधुर्य्यमय्या लीलायाः श्रेष्ठत्वं। धर्म्मज्ञानलीलयोः समाधानं। उद्दीपने द्रव्याणि कालाश्च। प्रकाशलीलाया आधिक्यं। अनुभावसञ्चारिभावविवेचनं। रसस्य पाञ्चविध्यस्थापनञ्च। सप्तविधगौणरसकथनं। रसाभासाः। मुख्यरसनिरूपणप्रसङ्गेन शान्त्याख्यभक्तिरसकथनं। आश्रयभक्तिरसः। दास्यभक्तिरसः। प्रश्रयभक्तिरसः। वत्सलरसः। मैत्रीमयः। वल्लभानां भेदाः। मदमानादीनां समाधानं। उद्दीपनविभावाः। अनुभावाः। व्यभिचारिणः। स्थायी। सम्भोगात्मक-मोदात्मकभावविचारः। भावभेदाः। सम्भोगविप्रलम्भादिभावभेदाः। पूर्व्वरागः। मानः। प्रेमवैचित्त्यं। प्रवासः। सम्भोगभेदाः। श्रीराधाया महिमा च ॥

No. 1666. भगवत्सन्दर्भः।

Substance, some country-made and some English-made paper, 12 × 4 inches. Folia, 137. Lines, 9—10 on a page. Extent, 3,767 s'lokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Madangopála Gos'vámí. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, some leaves old and some new. Prose and verse. Generally correct.

Bhagavat-sandarbha. The second part of the work described under No. 1656. It is devoted to the attributes of the Divinity.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥ इत्यादि।

End. ब्रह्मभगवन्तौ।

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवच्चैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे भागवतसन्दर्भे भगवत्सन्दर्भो नाम द्वितीयः सन्दर्भः।

विषयः। ब्रह्मत्वपरमात्मत्वादिना तत्त्वनिरूपणं। ब्रह्मादीनामाविर्भावयोग्यता। वैकुण्ठनिरूपणं। विशुद्धसत्त्वनिरूपणं। ब्रह्मस्वरूपस्य स्वशक्तिकत्वं। विशुद्धशक्तेराश्रयत्वस्थापनं। शक्तेरचिन्त्यत्वकथनं। स्वाभाविकशक्तिनानात्वकथनं। शक्तेरन्तरङ्गादिभेदकथनं। मायाशक्तिः। स्वरूपशक्तिः। गुणानां स्वरूपभूतत्वं। श्रीविग्रहस्य नित्यत्वं। तस्य विभुत्वकथनं। सर्व्वाश्रयत्वकथनं। स्थूलसूक्ष्मातिरिक्तत्वं। प्रत्यग्रूपत्वं। स्वप्रकाशत्वञ्च। जन्मकर्म्मरूपगुणानामप्राकृतत्वं। श्रीविग्रहस्य पूर्णस्वरूपत्वं। तत्परिच्छदानां स्वरूपांशत्वं। वैकुण्ठपार्षदादीनां वर्णनं। सनकाद्यनुभवेन तेषां पूर्व्व्‌.ज्ञानां ब्रह्मानन्दतोऽपि उत्कर्षनिरूपणं। ब्रह्मभगवत्तारतम्यं। भगवत एव पूर्णतत्त्वाकारत्वं। सर्व्ववेदाभिधेयत्वं। श्रुतिस्मृतिसङ्गतिः। स्वरूपशक्तिविवरणं। सर्व्वप्रकरणार्थसङ्ग्रहेण भगवल्लक्षणनिरूपणं। भगवतो वेदभक्त्यैकगम्यत्वकथनञ्च। इति।

No. 1667. चतुर्थक्रमसन्दर्भः।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 36. Lines, 12 on a page. Extent, 1,026 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávagís a. A second copy at Calcutta, in the Family Library of Dr. Rájendralála Mitra. Appearance, fresh. Prose. Correct.

Krama-sandarbha. The fourth book of the seventh part of the work described under No. 1656. It expounds the fourth book of the Bhágavata Puráṇa.

तस्यायं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः॥
यः श्रीकृष्णपदाम्भोजभजनैकाभिलाषवान्।
तेनैव दृश्यतामेतदन्यस्मै शपथोऽर्पितः॥
श्रीमद्भागवतं श्रीमन्मन्त्रदेशिकमीश्वरं।
अथ नत्वा मन्त्रगुरून् गुरून् भागवतार्थदान्॥
श्रीभागवतसन्दर्भं वक्ष्यमाणेन लेखितुं।
श्रीमद्भागवतार्थानां सन्दर्भं काण्डमाश्रये॥ इत्यादि।

End. ततश्च ईहायास्तदनुशीलनव्यतिरिक्तचेष्टायाः॥ १२॥ १०॥ श्रीसुतः। उद्दिष्टसम्बन्धः।

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे तत्त्वसन्दर्भो नाम प्रथमः सन्दर्भः। समाप्तश्चायं तत्त्वसन्दर्भः।

विषयः। ग्रन्थोऽयं श्रीमद्भागवतीयानां केषाञ्चित् श्लोकानां व्याख्यानप्रसङ्गेन निर्म्मिततया तट्टीकास्थानीयः। तत्र प्रमाणनिरूपणप्रसङ्गेन प्रत्यक्षादीनां सदोषत्वकथनं। शब्दप्रमाणस्य निर्दोषत्वसंस्थापनं। तत्रापि श्रीमद्भागवतस्य प्राधान्यकथनं। श्रीमद्भागवतस्य सङ्क्षेपेण तात्पर्य्यकथनं। सामान्यतस्तत्त्वनिरूपणं। महापुराणलक्षणं। सर्गप्रतिसर्गादिव्याख्यानञ्च।

No. 1671. दायदीपः।

Substance, country-made paper, 12 × 3½ inches. Folia, 18. Lines, 9 on a page. Extent, 688 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávagís'a. Appearance, old. Prose and verse. Correct.

Dáya-dípa. An exposition of the law of Inheritance. By Jayakṛishṇa.

Beginning. गोविन्दचरणद्वन्द्वं देवदेवाभिवन्दितं।
प्रणम्य जयकृष्णेन दायदीपः प्रकाश्यते॥
तत्र दायपदार्थमाह।
विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विवादपदं विदुः॥ इत्यादि।

End. प्रभोरिति कर्तृषष्ठी, प्रभुः समर्थः ।

Colophon. इति जयकृष्णभट्टाचार्य्यविरचितो दायदीपः समाप्तः ।

विषयः । दायस्वरूपविचारः । पितृकृतविभागः । पितृधनोपष्टम्भनव्यवस्था । भ्रातृकृतविभागः । पितृऋणादिशोधनं । ज्येष्ठकनिष्ठमध्यमनिरुक्तिः । पितामहधने विशेषकथनं । विभागकाले निह्नुतादिधनविभागः । स्त्रीधननिरूपणादिकं । अनपत्यस्त्रीधनाधिकारः । अनपत्यपुरुषधनाधिकारः । विभागानर्हकथनं । विभाज्याविभाज्यधनकथनं । पुस्तकविभागाभावकथनं । संसृष्टधनविभागः । भूमिव्यवस्था । त्रैपुरुषिकभोगकथनं । अस्वामिदत्तविचारः ।

No. 1672. गोविन्दवल्लभनाटकं ।

Substance, country-made paper, 12 × 4 inches. Folia, 28. Lines, 7 on a page. Extent, 462 s'lokas. Character, Bengali. Date, ? Place of deposit, Korḍe, Tháná Siuḍí, Zelá Virbhum, Kuladánanda Sen. Appearance, fresh. Prose and verse. Correct.

Gavindaballabha Náṭaka. A drama on the youthful sports of Krishṇa, designed, like the "Passion Plays" of Europe, to place before the faithful the early life of the divinity in the most attractive form possible. The author's name is not known, and the MS. being incomplete, the extent of the drama cannot be ascertained. The codex closes with the fourth Act.

Beginning. (प्रथमतः त्रीणि पत्राणि न सन्ति ।) ——खिलगोपालबालप्रेरितं श्रीयशोदासविधं पशुपालनविधावादेशग्रहणार्थं धावन्तं श्रीकृष्णं स्मारयसि । नेपथ्ये ।
प्रातरुत्थाय गोविन्दो रङ्गस्थानं सह प्रियैः ।
समानैर्मल्ललीलायै जगाम कुतुकान्वितः ॥ इत्यादि ।

End. गङ्गागोविन्दकहृदि विलसतु केशवविपिननिवेशः।
द्वारमुखान्तिकनायकाख्यसदुक्तसुगीतविशेषः ॥

Colophon. इतः परमलिखिततया परिसमाप्तिवाक्यं नास्ति । (अत्र चतुर्थाङ्कस्य कियदंशपर्य्यन्तमस्ति ।)

विषयः । (गीताभिनययोग्यं नाटकमिदं ।) (अत्र तु मुख्यया संस्कृतभाषयैव) (सर्व्वासां प्रकृतीनां कथोपकथनादिकमस्ति ।)
प्रथमेऽङ्के,—यशोदारोहिण्योरभिनयेन श्रीकृष्णस्य मल्लयुद्धादिकीर्त्तनं । गोचा-

र्णं। वृन्दावनशोभावर्णनं। बलदेवस्य मधुपानोन्मत्तस्य यशोदासमीपे वनवृत्तान्तवर्णनं।

२ ये,—नन्देन श्रीदाम-सुदाम मधुमङ्गलप्रभृतिभिः श्रीकृष्णबलरामयोर्लालनं। ज्योतिर्विदाभिनयः। कृष्णस्य गोष्ठोचितवेशविन्यासादिकं।

३ ये,—गोष्ठयात्रायां मङ्गलगीतिः। श्रीदामादिभिः सार्द्धं श्रीकृष्णस्य विश्रम्भालापवर्णनं। कयाचित् राधिकासमीपे श्रीकृष्णरूपादादिकीर्त्तनं। राधाकृष्णयोरन्योन्यदर्शनं। श्रीकृष्णादीनां भोजनवर्णनं। राधिकया सह श्रीदाम्न सम्बन्धः।

४र्थे,—राधिकावयस्यया समं श्रीकृष्णस्य कथोपकथनं। बलदेवेन सह श्रीकृष्णस्य वृन्दावनप्रवेशवर्णनं। इतः परं नास्ति।

No. 1673. गोविन्दविरुदावली।

Substance, country-made paper, 11 × 4 inches. Folia, 19. Lines, 6 on a page. Extent, 371 s'lokas. Character, Bengali. Date, ? Place of deposit, Kendográma, Thána Siudi, Zelá Virbhum, Mahendranátha Mukhopádháy. Appearance, old. Prose and verse Incorrect.

Govinda-virudávalí. Hymns in praise of the appearance and career of Kṛishṇa. By Rúpa Gos'vámí.

Beginning. अथ गोविन्दविरुदावली।

इयं मङ्गलरूपा स्याद्गोविन्दविरुदावली।
यस्याः पठनमात्रेण श्रीगोविन्दः प्रसीदति।
ब्रह्मा ब्रह्माण्डभाण्डे सरसिजनयनः स्वमहाक्रीड़नानि
स्थाणुर्भङ्क्त्वा खेला खुरलितमतिना तानि येन न्ययाजि।
तादृक् क्रीड़ाण्डकोटिव्रतजलकुड़वा यस्य वैकुण्ठकुल्या
कर्त्तव्या तस्य का ते स्तुतिरिह कृतिभिः प्रोञ्छ्य लीलायितानि॥ इत्यदि।

End. रम्यया विरुदावल्या प्रोक्तलक्षणयुक्तया।
स्तूयमानः प्रमुदितो वासुदेवः प्रसीदति॥
यः स्तौति विरुदावल्या मथुरामण्डले हरिं।
अन्यया रम्यया तस्मै तूर्णमेव प्रसीदति॥

Colophon. इति श्रीमद्रूपगोस्वामिविरचिता श्रीगोविन्दविरुदावली समाप्ता।

विषयः। स्तोत्रव्याजेन श्रीकृष्णस्य रूपलीलादिवर्णनं।

No. 1674. ललितरहस्यं ।

Substance, country-made yellow paper, 9 × 5 inches. Folia, 102. Lines, 22—24 on a page. Extent, 1,466 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, S'rínátha Chaṭṭopádhyáya. Appearance, fresh. Prose and verse. Incorrect.

Lalita-rahasya. Dissertations on the leading topics of the Tantra cultus. By Rájendra Tarkavágís'a Bhaṭṭáchárya. The work is in nine chapters, and its leaning is in favour of the supremacy of Kṛishṇa.

Beginning. सुखयति नखचन्द्रैराधिसन्तप्तविश्वं मदयति मकरन्दैरिन्दिरेशासरेशान् ।
कवयति कविमूढं गुञ्जमञ्जीरशब्दैर्जयति जयति काचिन्नाथपादाम्बुजश्रीः ॥

End. कामेन कामितं छला कामस्थं चोभयेज्जगत् ।
अविचार्य्य वि + + + सुदृश्यः कर्हिचिद्बुधैः ॥
इति राजेन्द्रवन्द्येन भूयो विरचितोऽञ्जलिः ।

Colophon. इति राजेन्द्रतर्कवागीशभट्टाचार्य्यसङ्कलितललितरहस्ये नवमोल्लासः ।

विषयः । (पुराणतन्त्रशास्त्राणि सङ्गृह्य विरचितोऽयं ग्रन्थः ।)
तत्र प्रथमोल्लासे,—गुरुतत्त्वकथनं । ब्रह्मतत्त्वं । दुर्गायास्त्रिगुणात्मकत्वादिकथनं । हंसतत्त्वनिरूपणं । तत्स्वरूपकथनादिकं । सृष्ट्यादिनिरूपणं ।
२ ये,—कामकलातत्त्वकथनं । चिच्छक्तिस्वरूपादिनिरूपणं । कामकलाध्यानादिकथनं ।
३ ये,—नादतत्त्वकथनं । नादविन्द्वादीनामुत्पत्तिकथनं । शब्दब्रह्मनिरूपणं । योनिमुद्राकथनं । योगसाधनप्रकारः ।
४ र्थे,—कुण्डलिनीतत्त्वनिरूपणं । तत्स्वरूपं । ध्यानादिकथनञ्च । षट्चक्रकथनं । महामुद्रालक्षणं । महाबन्धमुद्रा । महावेधमुद्रा । खेचरीमुद्रा । मूलबन्धमुद्रा । उड्डीयनमुद्रा । जालन्धरमुद्रा । करणीमुद्रा । विपरीतमुद्रा । शक्तिचालनमुद्रा ।
५ मे—मन्त्रतत्त्वविवेचनं । मन्त्राणां स्त्रीपुंनपुंसकत्वकथनं । स्वापकालादिकथनं । निशाचार—दिवाचार—पल्लव—वीजसंयोग—भावसंयोगादिनिरूपणं । उपांशु—जपादिलक्षणं । अन्तरात्मवृत्तिकथनं । काम्यसाधननिरूपणं । वर्णमालातत्त्वकथनं ।
६ ष्ठे,—अन्तर्योगविवेचनं । ज्ञानाम्बस्नानं । शिवशक्तिमेलनरूपसन्ध्याकथनं ।

चन्द्रामृत-परानन्दादीनां पानपात्र-मांस-मद्यत्वादिना योगिषु नियमनं। अन्तर्मातृकान्यासः। मालारहस्यकथनं।

७ मे,—योगतत्त्वकथनं। योगलक्षणं। यमनियमादिनिरूपणं। अहिंसा-सत्यादिदशविधसाधनकथनं। पद्म-सिद्ध-वीरप्रभृतीनामासनानां लक्षणं। प्राणायामप्रक्रिया। तत्त्रिविधभेदनिरूपणं। तत्र साधकावस्था। घटसिद्धिः। निःश्वासगतिनिरूपणं। प्रत्याहारादीनां लक्षणं। भगवतो विशुद्धसत्त्वात्मकत्व-कथनं।

८ मे,—(अयन्तु प्रायः खण्डितः) दिव्यवीरादिभावतत्त्वनिरूपणं।

९ मे,—कामेश्वरतत्त्वनिरूपणं। श्रीकृष्णस्य कामेश्वरत्वकथनं। तत्र ध्यानादि-निरूपणञ्च।

No. 1675. योगतारावली।

Substance, country-made yellow paper, 8 × 5 inches. Folia, 5. Lines, 14 on a page. Extent, 65 s'lokas. Character, Bengali. Date, Sk. 1760. Place of deposit, S'ántipura, S'rínátha Chaṭṭopádhyáya. Appearance, old. Verse. Correct.

Yoga-táráralí. On the importance of Yoga for the regeneration of the soul, and on the mode of performing various kinds of Yoga, the most important being the Rája Yoga. By S'ankara A'chárya.

Beginning. वन्दे गुरूणां चरणारविन्दे सन्दर्शितस्वात्मसुखावबोधे।
निःश्रेयसे जाङ्गलिकायमाने संसारहालाहलमोहशान्त्यै॥

End. ब्रह्मरन्ध्रगते वायौ गिर+श्रवणं भवेत्।
शृणोति श्रवणायातं नादं मुक्तिर्न संशयः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्कराचा-र्य्यविरचिता योगतारावली समाप्ता। शकाब्दाः १७६०।

विषयः। योगाभ्यासप्रकारकीर्त्तनं। पूरककुम्भकादीनां प्रत्येकफलकथनं। राजयोगकथ-नादिकञ्च।

No. 1676. कपिलगीता ।

Substance, country-made paper, 10 x 6 inches. Folia, 97. Lines, 16 on a page. Extent, 582 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, S'rínátha Chaṭṭopádhyáya. Appearance, fresh. Verse. Correct.

Kapila-gíta. Dissertations on the importance of Yoga meditations, and the mode of performing them. By Kapila. The work is divided into five chapters.

Beginning. नत्वा श्रीगुरुपादाब्जं स्मृत्वा मोक्षार्थसिद्धिदं ।
तारकाभ्यन्तरे पञ्चब्रह्मतत्त्वं तदुच्यते ॥
पञ्चब्रह्मपञ्चदेवाः पञ्चस्थानेषु सप्तधा ।
पञ्च मातृकाः पञ्च वाक्यं पञ्च शून्यं तथैव च ॥

End. राजराजेश्वरं योगं शेषमास्ये प्रशस्यते ।
यः पठेद् भक्तियुक्तेन स मुक्तो नात्र संशयः ॥

Colophon. इति कपिलगीतायां पञ्चमोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

विषयः । (शिवाशिवसंवादेनाध्यात्मयोगनिरूपणं ।)

१, २ अध्याये,—पञ्चब्रह्म-पञ्चदेव-पञ्चस्थान-पञ्चमातृका-पञ्चवाक्य-पञ्चशून्य-पञ्चावस्था-पञ्चदेह-पञ्चवेदादीनामुद्देशः । एषां प्रपञ्च-प्रपञ्चनञ्च ।

३, ४ अध्याये,—प्रणवस्थपञ्चदेवताकथनं । प्रणवसंस्थानकथनपूर्व्वकं तत्र वेदानामवस्थितिकीर्त्तनं । सृष्टिप्रकारः । पृथक् पृथक् मातृकायां वर्णविन्यासनिरूपणं । वैष्णव-शाम्भवविद्यादिभ्यः शक्तिविद्यायाः श्रेष्ठत्वकथनं । परिच्छिन्नारदादीनां क्रमेण श्रवणकीर्त्तनादिभक्त्यङ्गाधिकारित्वं । इड़ापिङ्गलादीनां स्थानादिनिरूपणं । तत्त्वज्ञानोपायकथनं । तीर्थादीनां निन्दावादपूर्व्वकं आत्मतीर्थस्य मुख्यत्वकथनं ।

५ अध्याये,—योगाधिकारिनिरूपणं । राजराजेश्वरयोगः । कर्म्मज्ञानयोः विरोधसमन्वयः । सर्व्वत्र मनसः कर्त्तृत्वकथनं । हृदयस्थितं परतत्त्वं विहाय शिलामृत्तिकाचित्रादिषु देवताबुद्धेर्निन्दनं । जीवस्य रूपकथनं । परमात्मज्योतिर्निरूपणं । तदाधारस्थानादिकीर्त्तनं । अन्तर्देहनिरूपणं । इति ।

No. 1677. आत्मबोधटीका ।

Substance, country-made yellow paper, 14 × 4 inches. Folia, 8. Lines, 7 on a page. Extent, 189 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, S'rínátha Chaṭṭopádyáya. Appearance, new. Prose. Correct.

A'tmabodha Ṭíká. A commentary on Sañkara's *A'tmabodha* or essence of Vedánta spiritualism. By Madhusúdana Sarasvatí.

Beginning. अतमखपूजितपादं अतपथमनसोऽप्यगोचराकारं ।
विकसितजलरुहनेत्रं सीतावामाङ्कमाश्रये रामं ॥
तत्र भगवान् शङ्कराचार्य्य उत्तमाधिकारिणे वेदान्तप्रस्थानत्रयं निर्म्माय तद्वलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्व्ववेदान्तसिद्धान्तसङ्ग्रहनात्मबोधार्थप्रकरणं दिदर्शयिषुः प्रतिजानीते, तपोभिरिति ।

End. तस्मादात्मतीर्थे स्नातस्य न किञ्चिदवशिष्यते—इति भावः ।

Colophon. इति श्रीमधुसूदनसरस्वतीकृतात्मबोधप्रकरणटीका समाप्ता ।

विषयः । शङ्कराचार्य्यकृतात्मबोधस्य व्याख्यानं ।

No. 1678. वायुपुराणं ।

Substance, country-made paper, 13½ × 5¼ inches. Folia, 275. Lines, 10—11—12 on a page. Extent, 1,200 s'lokas. Character, Nágara. Date, Sk. 1689. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Váyu Puráṇa. One of the eighteen great Puráṇas attributed to Vyása. The work is divided into 2 Parts, the 1st comprising 52 chapters, and the 2nd, 40 chapters. Contents of First Part: Introduction; 2, Places meet for Satras; 3 to 7, Creation; 8, Relation of the present to the past Kalpas; 9, The four conditions of life; 10, Origin of the Asuras; 11, Description of a kind of Yoga called Pas'upata; 12, The use of regulation of breath (Práṇáyáma); 13, Accidents to Yoga; 14, Majesty of Yoga; 15, Nature of Parabrahma; 16, Adoration of the fiery essence of the soul; 17, Purification; 18, Rules regarding the religious staff; 19, expiations for Yatis; 20, Sensations at the time of death; 21, Letters and accents; 22, Duration of Kalpas; 23, A kind of Yoga called Máhes'varávatára; 24, Form of Vishṇu at the time of a

deluge; 25, Nature of hymns to Mahádeva; 26, Mahádeva's advice to Vishṇu and Brahmá; 27, Origin of vowels; 28, The body of Mahádeva described; 29, Genealogy of Ṛishis; 30, The mind-created sons of Brahmá; 31, Daksha's hymn to Mahádeva; 32, The race of Svayambhuva; 33, The regents of the seven Dvípas; 34 to 38, Sumeru and other mountains; 39 and 40, The mountains, rivers and countries of the earth; The Kailás'a mountain; 42, Descriptions of Plaksha and other continents; 43, The size of the earth; 44 and 45, Motions of Planets; 46, Hymn to Nílakanṭha; 47, Origin of Liṅgams; 48, Names of the Pítris; 49, Yajñas; 50, The four Yugas; 51, Characteristics of the four Yugas; 52, The descendants of Prajápati.

Contents of Part Second: 1, Churning of the earth; 2, The descendants of Prithu; 3, The eight kinds of Devas; 4, The descendants of Prajápati; 5, The birth of the Devas in the Vaivasvata Manantara; 6 and 7, The race of Daityas; 8, The descendants of Ṛishis; 9 to 18, S'ráddhas; 19, 20 and 21, Birth of Vaivasvata, and his descendants; 22, The descendants of Ikshâku; 23, The tribes of Mithilá; 24, 25 and 26, Birth of Soma, and his descendants; 27 and 28, The clan of the Yadus; 29, The attributes of Vishṇu; 30, Royal races; 31, Account of future Manvantaras; 32, The mansion of S'iva described; 33 to 40, The origin and merits of Gayá.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयमभृतं जगत् पिबति ॥
प्रपद्ये देवमीशानं शाश्वतं पदमव्ययं ।
महादेवं महात्मानं सर्व्वस्य जगतः पतिं ॥ १ ॥
ब्रह्माणं लोककर्त्तारं सर्व्वज्ञमपराजितं ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिं ॥ २ ॥

End. सूत उवाच । सनत्कुमारो मुनिपुङ्गवाय पुण्यां कथाञ्चाथ निवेद्य भक्त्या ।
स्वमाश्रमं पुण्यवनैरुपेतं विसृज्य सङ्गीतगुरुं जगाम ॥

Colophon. इति श्रीवायुपुराणे वायुप्रोक्ते गयामाहात्म्यं । समाप्तञ्चेदं वायुपुराणं ।

विषयः । १मे,—अनुक्रमणिका । २ये,—नैमिषीयऋषिकृतसत्रस्य स्थानादिकथनं ।
३, ४, ५, ६, ७,—प्रजापतिसृष्टिकथनं । ८,—अतीतकल्पवर्त्तमानकल्पयोर॰

विषयः। न्नरात्मकप्रतिसन्धिकीर्त्तनं। ९,—चतुराश्रमविभागः। १०,—ब्रह्मणो जघनादिदेशात् असुराद्युत्पत्तिवर्णनं। ११,—पाशुपतयोगवर्णनं। १२,—प्राणायामप्रयोजनं। १३,—योगोपसर्गवर्णनं। १४,—योगैश्वर्य्यगुणविस्तारकथनं। १५,—परब्रह्मणः सूक्ष्मत्वादिवर्णनं। १६,—हृदयस्थितस्याग्नेरुपासनविधिः। १७,—शौचाचारलक्षणं। १८,—चिह्णिव्यवस्थापनं। १९,—यतीनां प्रायश्चित्तानि। २०,—मृत्योर्नैकट्यज्ञापकअरुन्धत्यादिदर्शननिरूपणं। २१,—अक्षरमात्रादिनिरूपणं। २२,—कल्पप्रमाणादिकथनं। २३,—माहेश्वरावतारयोगः। २४,—प्रलयकाले विष्णुरूपवर्णनं। २५,—महादेवस्तववर्णनं। २६,—विष्णुब्रह्माणौ प्रति महादेववाक्यं। २७,—स्वरवर्णोत्पत्तिवर्णनं। २८,—महादेवतनूनां नामभिः परिकीर्त्तनं। २९,—ऋषिवंशानुकीर्त्तनं। ३०,—ब्रह्मणो मानसपुत्रादिवर्णनं। ३१,—दक्षकृतमहादेवस्तोत्रं। ३२,—स्वायम्भुववंशवर्णनं। ३३,—सप्तद्वीपाधिपतिवर्णनं। ३४, ३५, ३६, ३७, ३८,—सुमेरुपर्व्वतादीनां वर्णनं। ३९, ४०,—सप्तकुलाचलानां, नदीविशेषाणां, जनपदविशेषाणाञ्च वर्णनं। ४१,—कैलासपर्व्वतवर्णनं। ४२,—सक्षादिद्वीपवर्णनं। ४३,—पृथिवीप्रमाणनिरूपणं। ४४, ४५,—ज्योतिःपदार्थानां गतिनिरूपणं। ४६,—नीलकण्ठस्तवः। ४७,—लिङ्गोत्पत्तिवर्नणं। ४८,—पितृवर्गाणां नामकथनं। ४९,—यज्ञप्रवर्त्तनं। ५०,—चतुर्युगाख्यानं। ५१,—युगधर्म्मकथनं। ५२,—प्रजापतिवंशानुकीर्त्तनं। प्रथमखण्डः समाप्तः।

द्वितीयखण्डे १,—पृथिवीदोहनं। २,—पृथुवंशवर्णनं। ३,—अष्टविधदेवगणकथनं। ४,—प्रजापतिवंशानुकीर्त्तनं। ५,—वैवस्वतमन्वन्तरे देवादीनां उत्पत्तिकथनं। ६, ७,—दैत्यवंशवर्णनं। ८,—ऋषिवंशवर्णनं। ९, १०, ११, १२, १३, १४, १५, १६, १७, १८,—श्राद्धकल्पकीर्त्तनं। १९,—वैवस्वतोत्पत्तिः। २०,—वैवस्वतवंशकीर्त्तनं। २१,—वैवस्वतपुत्राणां निसर्गवर्णनं। २२,—इक्ष्वाकुवंशवर्णनं। २३,—मैथिलवंशवर्णनं। २४,—सोमजन्मवर्णनं। २५, २६,—सोमवंशवर्णनं। २७, २८,—यदुवंशवर्णनं। २९,—विष्णुमाहात्म्यं। ३०,—उर्व्वस्यादिराज्ञां वंशकीर्त्तनं। ३१,—भविष्यन्मन्वन्तरादीनां सङ्क्षेपेण वर्णनं। ३२,—शिवपुरवर्णनं। ३३, ३४, ३५, ३६, ३७, ३८, ३९, ४०,—गयामाहात्म्यं।

No. 1679. गृह्यविवरणं, वा कर्कभाष्यं ।

Substance, country-made paper, 12½ × 4½ inches. Folia, 35. Lines, 11 on a page. Extent, 1,200 s'lokas. Character, Nágara. Date, Sm. 1879. Place of deposit, Calcutta, Government of India. Appearance, old. Prose Incorrect.

Gṛihya Vivaraṇa alias *Karka-bháshya.* A commentary on the Gṛihya Sútras of A'pastambha. The MS. is incomplete, being limited to that portion which refers to Sthálipáka.

Beginning. श्रीगणेशाय नमः । श्रौताधानादीनि उक्तानि तदनन्तरं स्मार्त्तान्यभिधीयन्ते । तदादिमं सूत्रं अथातो गृह्यस्थालीपाकानां कर्म्म ॥ व्याख्यास्यत इति सूत्रशेषः । तत्रायमथशब्द आनन्तर्य्ये । श्रौतानुविधानसमनन्तरं स्मार्त्तान्यनुविधीयन्त इति ।

End. अथातः सभाप्रवेशनमित्येवमादि + + + सर्व्वं निगदव्याख्यातमेव ॥

Colophon. इति कर्कोपाध्यायकृतं गृह्यविवरणं समाप्तं ॥

विषयः । अथातो गृह्यस्थालीपाकानां कर्म्मेत्यादिगृह्यसूत्राणां व्याख्यानं ।

No. 1680. नारदपुराणं पूर्व्वोत्तरभागौ ।

Substance, country-made paper, 13¾ × 6 inches. Folia, 808. Lines, 10 on a page. Extent, 2,148 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Nárada Purána. One of the eighteen great Puráṇas attributed to Vyása. The work is divided into two parts, the first comprising 125 chapters, and the second 82. It treats of the topics common to the Puráṇas, as shown below in Sanskrit.

Beginning. ॐ श्रीगणेशाय नमः ।

वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरं ।
उपेन्द्रं सान्द्रकारुण्यं परानन्दं परात्परं ॥
ब्रह्मविष्णुमहेशाख्या यस्यांशा लोकनायकाः ।
तमादिदेवं चिद्रूपं विशुद्धं परमं भजे ॥

End. धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिर्लोकमङ्गलं ।
यः स्मारितो हरिः साक्षात् सर्व्वकारणकारणं ॥

Colophon. इति श्रीनारदीयपुराणे उत्तरवादे मोहिनीचरितं नामाध्यायो द्व्यशीतितमः ८२ समाप्तोऽयं उत्तरखण्डः ।

विषयः। अत्र पूर्व्वभागे पञ्चविंशत्यधिकैकशततमध्यायाः सन्ति। तत्र १, २, ३, ४,—नारदसनत्कुमारसंवादः। ५मे,—भगवतो मृकण्डुपुत्ररूपताकथनं। ६, ७, ८, ९, १०, ११,—गङ्गोत्पत्तिमाहात्म्यादिवर्णनं। १२शे,—वर्णानां मध्ये ब्राह्मणस्य दानपात्रत्वकथनं। १३शे,—देवतायतनस्थापने पुण्यकथनं। १४शे,—धर्म्मशास्त्रनिर्द्देशः। १५शे,—नरकवर्णनं। १६शे,—भगीरथेन गङ्गानयनवृत्तान्तं। १७, १८, १९, २०, २१, २२, २३,—विष्णुव्रतकथनं। २४। २५,—वर्णाश्रमाचारकथनं। २६,—स्मार्त्तधर्म्मकथनं। २७, २८,—श्राद्धविधिः। २९,—तिथ्यादिनिर्णयः। ३०,—प्रायश्चित्तनिर्णयः। ३१,—यममार्गनिरूपणं। ३२,—भवाटवीनिरूपणं। ३३,—योगनिरूपणं। ३४,—हरिभक्तिलक्षणं। ३५,—ज्ञाननिरूपणं। ३६,—विष्णुसेवाप्रभावः। ३७, ३८, ३९, ४०,—विष्णुमाहात्म्यं। ४१,—युगधर्म्मकथनं। ४२,—सृष्टितत्त्वनिरूपणं। ४३,—जीवतत्त्वनिरूपणं। ४४,—परलोकनिरूपणं। ४५,—मोक्षधर्म्मनिरूपणं। ४६—आध्यात्मिकादिदुःखत्रयनिरूपणं। ४७,—योगस्वरूपवर्णनं। ४८, ४९,—परमार्थनिरूपणं। ५०,—वेदाङ्गशिक्षाशास्त्रनिरूपणं। ५१,—कल्पशास्त्रनिरूपणं। ५२,—व्याकरणशास्त्रनिरूपणं। ५३,—निरुक्तशास्त्रनिरूपणं। ५४, ५५, ५६,—ज्योतिःशास्त्रनिरूपणं। ५७,—छन्दःशास्त्रनिरूपणं। ५८,—शुकोत्पत्तिवर्णनं। ५९,—ब्राह्मणकर्त्तव्यकर्म्मनिरूपणं। ६०,—वायूत्पत्त्यादिवर्णनं। ६१,—शान्तिकरशास्त्रनिरूपणं। ६२,—मोक्षशास्त्रसमादेशनं। ६३,—भागवततन्त्रनिरूपणं। ६४, ६५, ६६,—दीक्षाविधिः। ६७,—अभीष्टदेवपूजाविधिः। ६८,—गणेशमन्त्रनिरूपणं। ६९,—त्रयीमूर्त्तिनिरूपणं। ७०, ७१, ७२,—विष्णुमन्त्रनिरूपणं। ७३,—राममन्त्रनिरूपणं। ७४,—हनुमन्मन्त्रनिरूपणं। ७५,—हनूमद्दीपविधानं। ७६,—कार्त्तवीर्य्यार्जुनमन्त्रपूजादिनिरूपणं। ७७,—कार्त्तवीर्य्यकवचं। ७८,—हनमत्कवचं। ७९,—हनूमच्चरितं। ८०, ८१,—कृष्णमन्त्रनिरूपणं। ८२,—पूर्व्वजन्मनि नारदस्य महादेवात् कृष्णतत्त्वप्राप्तिवृत्तान्तकथनं। ८३,—राधांशावतारनिरूपणं। ८४,—मधुकैटभोत्पत्तिविवरणं। ८५,—कालीमन्त्रनिरूपणं। ८६,—सरस्वत्यवतारवर्णनं। ८७,—दुर्गांशावतारवर्णनं। ८८,—राधावतारचरितवर्णनं। ८९,—शक्तिसहस्रनामकथनं। ९०,—शक्तिपटलं। ९१,—महेशमन्त्रनिरूपणं। ९२,—पुराणाख्याननिरूपणं। ९३,—पद्मपुराणानुक्रमणिका। ९४,—ब्रह्मपुराणानुक्रमणिका। ९५,—वायुपुराणानुक्रमणिका। ९६,—भागवतानुक्रमणिका। ९७,—नारदपुराणानुक्रमणिका। ९८,—मार्कण्डेयपुराणानुक्रमणिका। ९९,—आग्नेयपुरा-

विषयः। णानुक्रमणिका। १००,—भविष्यपुराणानुक्रमणिका। १०१,—ब्रह्मवैवर्त्तपुराणानुक्रमणिका। १०२,—लिङ्गपुराणानुक्रमणिका। १०३,—वराहपुराणानुक्रमणिका। १०४,—स्कन्दपुराणानुक्रमणिका। १०५,—वामनपुराणानुक्रमणिका। १०६,—कूर्म्मपुराणानुक्रमणिका। १०७,—मत्स्यपुराणानुक्रमणिका। १०८,—गरुड़पुराणानुक्रमणिका। १०९,—ब्रह्माण्डपुराणानुक्रमणिका। ११०,—प्रतिपद्व्रतनिरूपणं। १११,—द्वितीयाव्रतनिरूपणं। ११२,—तृतीयाव्रतनिरूपणं। ११३,—चतुर्थीव्रतनिरूपणं। ११४,—पञ्चमीव्रतनिरूपणं। ११५,—षष्ठीव्रतनिरूपणं। ११६,—सप्तमीव्रतनिरूपणं। ११७,—अष्टमीव्रतनिरूपणं। ११८,—नवमीव्रतनिरूपणं। ११९,—दशमीव्रतनिरूपणं। १२०,—एकादशीव्रतनिरूपणं। १२१,—द्वादशीव्रतनिरूपणं। १२२,—त्रयोदशीव्रतनिरूपणं। १२३,—चतुर्द्दशीव्रतनिरूपणं। १२४,—पूर्णाव्रतनिरूपणं। १२५,—पुराणमहिमा।

उत्तरभागे द्व्यशीतिसङ्ख्यकाध्यायाः सन्ति। तत्र १मे,—द्वादशीमाहात्म्यं। २,—तिथिविचारः। ३,—विष्णोर्भक्त्यधीनत्वकथनं। ४,—नियोगाचरणनिरूपणं। ५,—यमविलापः। ६,—यमं प्रति ब्रह्मवाक्यं। ७,—लोकमोहनार्थं ब्रह्मणा मोहिन्याः प्रमदाया उत्पत्तिः। ८,—मोहिनीचरितं। ९,—रुक्माङ्गदेन राज्ञा मृगयार्थं धर्म्माङ्गदाय पुत्राय राज्यार्पणं। १०,—राज्ञ्या मृगयानिवारणार्थं रुक्माङ्गदाय राज्ञे अहिंसाधर्म्मोपदेशः। ११,—रुक्माङ्गदेन राज्ञा मृगयार्थं वनगमनं मोहिनीदर्शनञ्च। १२,—मोहिन्या सह रुक्माङ्गदस्य विवाहार्थं प्रतिज्ञाकरणं। १३,—रुक्माङ्गदेन मोहिनीविवाहः। १४,—रुक्माङ्गदेन राज्ञा गृहगोधाविमुक्तिः। १५,—रुक्माङ्गदस्य स्वनगरप्रस्थानं। १६,—पतिव्रतोपाख्यानं। १७,—मातरं प्रति धर्म्माङ्गदस्य प्रबोधवाक्यं। १८,—सन्तोषार्थं मातृभ्यो धर्म्माङ्गदेन विविधार्थप्रदानं। १९,—मोहिनीमुग्धस्य राज्ञः मोहिन्या सह पुनर्विहारार्थं पुत्रे राज्यार्पणं। २०,—धर्म्माङ्गदस्य दिग्विजयः। २१,—कामपीड़ितेन राज्ञा मोहिन्यै वित्तदानं। २२, २३, २४, २५, २६, २७,—हरिवासरदिने राज्ञो भोजने यत्नवत्या मोहिन्याः समीपे रुक्माङ्गदेन राज्ञा हरिवासरमाहात्म्यकथनं। २८, २९, ३०, ३१, ३२, ३३, ३४,—मोहिन्या भर्त्रे रुक्माङ्गदाय बहुतरक्लेशदानवृत्तान्तं। ३५, ३६, ३७,—मोहिन्यै वसुना शापदानं, तदुद्धरणाय तीर्थसेवोपदेशादिकञ्च। ३८, ३९, ४०, ४१ ४२, ४३,—गङ्गामाहात्म्यं। ४४, ४५, ४६, ४७,—गयामाहात्म्यं। ४८, ४९, ५०, ५१,—काशीमाहात्म्यं। ५२, ५३, ५४, ५५, ५६, ५७, ५८, ५९, ६०, ६१,—

पुरुषोत्तममाहात्म्यं । ६२, ६३,—प्रयागमाहात्म्यं । ६४, ६५,—कुरुक्षेत्रमाहात्म्यं । ६६,—हरिद्वारमाहात्म्यं । ६७,—बदर्य्याश्रममाहात्म्यं । ६८,—कामोदामाहात्म्यं । ६९,—कामाख्यामाहात्म्यं । ७०,—प्रभासतीर्थमाहात्म्यं । ७१,—पुष्करमाहात्म्यं । ७२,—गौतमाश्रममाहात्म्यं । ७३,—अम्बकमाहात्म्यं । ७४,—गोकर्णतीर्थमाहात्म्यं । ७५,—लक्ष्मणमाहात्म्यं । ७६,—सेतुमाहात्म्यं । ७७,—नर्मदातीर्थमाहात्म्यं । ७८,—अवन्तीमाहात्म्यं । ७९,—मथुरामाहात्म्यं । ८०,—वृन्दावनमाहात्म्यं । ८१,—वसोर्ब्रह्मान्तिकगमनवृत्तान्तं । ८२,—मोहिन्यास्तीर्थसेवनवृत्तान्तं ॥

No. 1681. काव्यप्रकाशटीका, मूलसहिता ।

Substance, country-made paper, 15¼ × 7 inches. Folia, 354. Lines, 10—11—12—13 on a page. Extent, 11,318 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Kávyálaṅkára-rahasya-nibandha alias *Kávya-prakás'a-ṭíká.* A commentary on the *Kávya-prakás'a.* By Bháskara. The codex contains the whole of the text also.—See ante, pp. 115, 116, 210, and 224 for other commentaries on the Kávya-prakás'a.

Beginning. टी० । ॐ श्रीगणेशाय नमः । ॐ नमो नारायणाय । अत्र च साहित्यदीपिकाख्यटीकाकारः श्रीभास्करः । न ते टीकाकाराः परिणमद्विद्यान्धतमसां प्रमेयं शास्त्राणां प्रतिफलति येषां न मतिषु ॥

मू० । ॐ श्रीगणेशाय नमः । ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति ॥

End. टी० । लिङ्गस्येति एकतरस्येवेति यदि तु विपरिणामेन लिङ्गवचसोरपरस्यासम्बन्धस्तदान्यस्य लक्षणे वाक्यभेदः स्यात् ॥ २८८ ॥

मू० । इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद्विचित्रं यदमुत्र सम्यग्विनिर्म्मिता संघटनैकहेतुः ॥

Colophon. इति श्रीसकलविपश्चिच्चक्रवर्त्तिश्रीमम्मटाचार्य्यविरचिते काव्यालङ्काररहस्यनिबन्धे काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशम उल्लासः ॥ समाप्तोऽयं काव्यप्रकाशः ।

विषयः । काव्यप्रकाशस्य व्याख्यानं ॥

No. 1682. न्यायमकरन्दः सटीकः ।

Substance, country-made paper, 12 × 5¼ inches. Folia, 66. Lines, 15—16—17 on a page. Extent, 4,356 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nyáya-makaranda. The identity of the human and the divine souls. By Chits'ukha Muni.

Beginning. टी॰ । श्रीगणेशाय नमः । प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनकामः शिष्टाचारपरिप्राप्ततया कृतमिष्टदेवतानमस्कारमाचारशिक्षार्थं प्रतिपादयन् प्रकरणस्याभिधेयसम्बन्धप्रयोजनानि निदर्शयति यद्भासेत्यादिना श्लोकेन ।

मू॰ । यद्भासा निखिलं विभाति विषयो यो न स्वयं ज्योतिषां
यस्माद्भर्भुवनोद्भवस्थितिलयान् लीलामयान् प्रूरयः ।
यद्वागोचरमामनन्ति मनसां वाचाञ्च विश्वात्मने
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥

End. टी॰ । ग्रन्थस्य निर्दुष्टता प्रतिपादितेति मन्तव्यं दुष्टस्य तदानन्दहेतुत्वाभावात् ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्येण श्रीमच्चित्सुखेन मुनिना विरचिता न्यायमकरन्दटीका सम्पूर्णा ।

मू॰ । स्तुतिं के नाभिनन्दन्ति नो चेद्रुचिनिदानं मत्सरसङ्घं मत्ताचित्तं (?) ।
इति श्रीआनन्दबोधभट्टारकविरचितो न्यायमकरन्दः समाप्तः ।

विषयः । जीवब्रह्मणोरेकत्वप्रतिपादनं ।

No. 1683. तर्कसङ्ग्रहटीका ।

Substance, country-made paper, 12 × 5¾ inches. Folia, 23. Lines, 4—10 on a page. Extent, 920 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tarka-sañgraha-dípiká. A commentary on the Tarka-sañgraha of Anna Bhaṭṭa. Anonymous. Hall's "Contributions," pp. 68, 69.

Beginning. ॐ स्वस्ति श्रीगणेशाय नमः ।
विश्वेश्वरं साम्बमूर्त्तिं प्रणिपत्य गुरुं गिरं ।
टीकां शिशुहितां कुर्व्वे तर्कसङ्ग्रहदीपिकां ॥

चिकीर्षितस्य ग्रन्थस्य अविघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्त-
व्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं
प्रतिजानीते निधायेति ॥

End. ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात् तस्मात् पदार्थज्ञानान्मोक्षः परमप्रयो-
जनमिति सर्व्वं रमणीयं ।

Colophon. इति श्रीमदन्नभट्टोपाध्यायकृततर्कसङ्ग्रहटीका समाप्ता ॥

विषयः । तर्कसङ्ग्रहव्याख्यानं ॥

No. 1684. अपरार्कः ।

Substance, country-made paper, 13¾ × 7½ inches. Folia, 557. Lines, 16 on a page. Extent, 21,700 s'lokas. Character, Nágara. Date, Sm. 1898. Place of deposit, Calcutta, Government of India. Appearance, new. Prose, and verse. Incorrect.

Aparárka. A commentary on the Code of Yájñavalkya. By Aparáditya Deva, a descendant of Jímútaváhana, the author of the Mitákshará.

Beginning. ॐ स्वस्ति श्रीगणेशाय नमः । श्रीगुरवे नमः ।
ॐ संसिद्ध्यर्थमिलत् सुरासुरनमन्मौलिस्थितः प्रोल्लसत्
सद्रत्नप्रभवप्रकृष्टविविधप्रेङ्खन्मयूखोज्ज्वलं ।
श्रेयो विघ्नसहामयप्रशमने दिव्यं यदेकौषधं
भूयान्नो द्विरदाननाङ्घ्रिकमलद्वन्द्वं तदिष्टाप्तये ॥
ॐ विश्वानुभूतिसम्भूतिस्थितिसंहृतिमुक्तयः ।
प्रभवन्ति यतस्तस्मै परस्मै ब्रह्मणे नमः ॥
ओं यो विश्वसर्गपरिपालनसंहृतीयो ब्रह्मा हरिस्त्रिनयनश्च भवत्यमेयः ।
तं शुद्धबोधमभयं सुखसत्स्वभावमात्मानमद्वयमनन्तमुपास्महेऽजं ॥
विश्वात्मनः शुक्लयजूंषि भानोरवाप यो योगिगणाग्रवर्य्यः ।
तं याज्ञवल्क्यं मुनिवृन्दवन्द्यं नमामि तत् कीर्त्तितधर्म्मबुद्ध्यै ॥
भक्त्या यस्य सविस्मयः पुररिपुर्ब्रह्मा च वाचस्पति-
र्विक्रान्त्या द्विषतां गणः शुचितया भास्वन् क्षमित्वेन भूः ।
जीमूतान्वयभूषणं सुविपुले योगीश्वरेणोदिते
शास्त्रे वाक्यनयानुगां वितनुते वाचं सतां सम्मतां ॥

धर्म्मसंहितामारभमानस्तस्याः पौरुषेयत्वसामान्याज्ज्ञायमानामप्रामाण्यशङ्कां मन्दा-
जनस्य तदध्ययनधारणादिविषये परिपन्थिनीमपनेतुमाह ।
योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ॥

End. श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितं ।
एवमस्त्विति होवाच नमस्कृत्य स्वयम्भुवे ॥
स्वयम्भुवे ब्रह्मणे । अतिरोहितमन्यत् ॥

Colophon. इति श्रीविद्याधरवंशप्रभवश्रीशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतश्रीमदपरा-
दित्यदेवविरचिते याज्ञवल्क्यीयधर्म्मशास्त्रनिबन्धे तृतीयोऽध्यायः ॥
सम्पूर्णश्चायमपरार्कः ॥

विषयः । याज्ञवल्क्यीयधर्म्मशास्त्रस्य व्याख्यानं ॥

No. 1685. आपस्तम्बसूत्रं, चतुर्व्विंशप्रपाठकादिसप्तविंशप्रपाठकपर्य्यन्तं ।

Substance, country-made paper, $10\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 47. Lines, 9 on a page. Extent, 1,050 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

A'pastamba Sútra. The Kalpa Sútra of A'pastamba. The MS. contains only chapters 24 to 27.

Beginning. श्रीगणेशाय नमः ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥ हरिः ॐ ॥ यज्ञं व्याख्यास्यामः ॥
स त्रयाणां वर्णानां ब्राह्मणराजन्ययोर्वैश्यस्य च स त्रिभिर्वेदैर्विधीयते ।

End. प्रतिपद्यते परिषेचनान्तं कृत्वाभिस्तेभ्य उत्तरया दक्षिणतोऽश्मानं परिनिदधाति
दधाति ॥ २२ ॥ अष्टमः पटलः ॥

Colophon. इत्यापस्तम्बसूत्रे सप्तविंशप्रश्नः ।

अत्र चतुर्व्विंशप्रपाठकादिसप्तविंशप्रपाठकपर्य्यन्तमस्ति । २४ प्रपाठके,—यज्ञव्या-
ख्यानं । २५, २६, २७ प्रपाठके,—गृह्यविवरणं ।

No. 1686. आपस्तम्बसूत्रं, त्रिंशप्रपाठकादिद्वात्रिंशप्रपाठकपर्य्यन्तं ।

Substance, country-made paper, 10½ × 5½ inches. Folia, 30. Lines, 9 on a page. Extent, 675 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

A'pastamba Sútra. The Kalpa Sútra of A'pastamba, The MS. comprises chapters, 30 to 32. Dr. Burnell says, the work comprises only 30 chapters. See ante Vol. III, p. 194.

Beginning. श्रीविघ्नहर्त्रे नमः ॥ हरिः ॐ ॥ विहारयोगान् व्याख्यास्यामो यावदायाम प्रमाणं तद्धमभ्यस्यापरस्मिन् तृतीये षड्भागोने लक्षणं करोति ।

End. इति तिलोदकप्रदानमशौकरणमनुदेशनञ्च यथार्थमूहे यथाशक्ति दक्षिणां दद्यात् ॥ १४ ॥

Colophon. इत्यापस्तम्बसूत्रे द्वात्रिंशः प्रपाठकः ॥ समाप्तञ्चापस्तम्बसूत्रं ।

विषयः । अत्र ३० प्रपाठकादि ३२ प्रपाठकपर्य्यन्तमस्ति । तत्र ३० प्रपाठके, विहारयोग-व्याख्यानं । ३१ प्रपाठके, पैतृमेधिकदहनविवरणं । ३२शे,—उत्तरपैतृमेधिक-व्याख्यानं ॥

No. 1687. शिवाष्टमूर्त्तितत्त्वप्रकाशः ।

Substance, country-made paper, 13¼ × 6¾ inches. Folia, 60. Lines, 14—17—18—20 on a page. Extent, 3,840 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

S'iváshṭamurti-tattva-prakás'a. On the eight forms of S'iva and of his identity with Parabrahma. By Rámes'vara, a disciple of Sadá-s'ivendra Sarasvatí, who was a disciple of Gopalendra Sarasvatí.

Beginning. श्रीगणेशाय । यस्या देव्या वश्याः सर्व्वे सर्व्वा विद्या यस्या आत्मा ।
या खल्वास्ते शम्भोरङ्के तां वै वन्दे विश्वाकारां ॥ १ ॥
यस्य ह्याज्ञां नातिक्रान्ताः सर्व्वे देवा विश्वेशानाः ।
यो नो ह्यात्मा कर्त्ता शम्भुस्तेषामीशस्तं वै वन्दे ॥ २ ॥
यस्य ह्यवबोधात् सकला विपत्तयो यो मायया भ्रामयतीह सर्व्वतः ।
व्याप्तञ्च येनेदमदोऽष्टमूर्त्तिभिर्वन्दे तमीशं शिवया समन्वितं ॥ ३ ॥
नास्त्यष्टमूर्त्तेरतिरिक्तमीशितुर्यस्यापि किञ्चित् श्रुतितोऽपि युक्तितः ।

क्षेत्रज्ञखं वाय्वनलेन्दुभास्करा भूमिर्जलं ये च तमाश्रये शिवं ॥ ४ ॥
सदा शिवेन्द्रवाण्याख्यं गुरुं हिमेश्वरं तथा।
नत्वाष्टमूर्त्तितत्त्वं हि शिवस्याहं प्रकाशये ॥ ५ ॥

End. यः पञ्चमूर्त्तिः प्रणवात्मसर्व्वगः पञ्चाचरेशः सकलोऽपि निष्कलः।
तस्माद्युष्मे हि समर्पयन्विभो रामेश्वरो दीपमनन्यभावगः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीपूज्यपादश्रीगोपालेन्द्रसरस्वतीशिष्यश्रीसदाशिवेन्द्रसरस्वतीशिवयोगीन्द्रशिष्यस्य रामेश्वरस्य कृतौ शिवाष्टमूर्त्तितत्त्वप्रकाशः॥

विषयः। शिवस्य क्षित्याद्यष्टमूर्त्तीणां जडशक्तिरूपमायात्वकथनं। शिवस्य परब्रह्मत्वप्रतिपादनञ्च॥

No. 1688. रत्नत्रयपरीक्षा सटीका।

Substance, country-made paper, 13 × 5 inches. Folia, 9. Lines, 12 on a page. Extent, 580 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Ratna-traya-paríkshá saṭíká. The supreme divinity and unity of the "three jewels" Vishṇu, Brahmá and S'iva. By Apya Díkshita, son of Rañgarája Adhvarindra.

Beginning. श्रीगणेशाय नमः। सर्व्वज्ञतादिकं शम्भोर्यस्या रूपं विदुर्बुधाः।
तां नमामि शिवां सत्यज्ञानानन्दस्वरूपिणीं॥ १ ॥
अथ रत्नत्रयपरीक्षाख्यामष्टश्लोकीं संक्षेपेण व्याकुर्म्महे।
नित्यं निर्द्दोषगन्धं निरतिशय सुखं ब्रह्मचैतन्यमेकं
धर्मो धर्म्मीति रूपद्वयमयति पृथक् भूयमायावशेन।
धर्म्मस्त्वत्रानुभूतिः सकलविषयिणी सर्व्वकार्य्यानुकूला-
शक्तिश्चेच्छादिरूपा भवति गुणगणस्याश्रयस्त्वेक एव॥ १ ॥
नित्यं कालत्रयाबाध्यं दोषगन्धेनापि रहितं निरतिशयसुखात्मकं। अद्वितीयमेकं ब्रह्मचैतन्यं मायया कल्पितभेदं सद्धर्म्मधर्म्मिभावं प्राप्नोति।

End. आमथ्य भाष्यदुग्धाब्धिमाप्तं रत्नत्रयं ततः।
शम्भुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितं।

Colophon. इति श्रीमत् भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यविश्वजिद्याजिश्रीरङ्गराजाध्वरीन्द्रसूनोरप्पदीक्षितकृतस्य कृतौ रत्नत्रयपरीक्षा समाप्ता॥

विषयः। शम्भुगौरीहरिरूपस्य रत्नत्रयस्य परब्रह्मैकरूपताप्रतिपादनं।

No. 1689. तिथिनिर्णयः ।

Substance, country-made paper, 10¼ × 5½ inches. Folia, 30. Lines, 7—12—13 on a page. Extent, 870 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Tithi-nirṇaya. A dissertation on the lunar days and the religious duties appertaining thereto. By Bhaṭṭoji Díkshita, son of Lakshmidhara Súri.

Beginning. श्रीगणेशाय नमः । चैत्रशुक्लप्रतिपदि वत्सरारम्भः । तत्रौदयिकी तिथिर्ग्राह्या ।
चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ॥ इति हेमाद्रौ ब्राह्मोक्तेः ।

End. अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति दिक् ॥ इति होलिकानिर्णयः ॥

Colophon. इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन विरचितस्तिथिनिर्णयः समाप्तः ॥

विषयः । संवत्सरे पञ्चदशतिथिकृत्यनिरूपणं, तिथिद्वैधशङ्कानिराकरणादिकञ्च ॥

No. 1690. श्राद्धकर्मविधिः ।

Substance, country-made paper, 12 × 6 inches. Folia, 9. Lines, 3—12 on a page. Extent, 2,750 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'ráddha-karma-vidhi. Directions for performing S'ráddhas. Anonymous.

Beginning. श्रीरामाय नमः । श्रीशोऽनीशोऽपि योऽसौ विभुरपि सुगतिर्योऽगतीनां नराणां
यो सद्धेतुर्मुनीनामपि रुचिसुधियां बोधको निश्चितोऽपि ।
योऽसूतेऽपि प्रसूते फलमपि विमलं चापवर्गादि मोऽव्यात्
कर्त्ता कर्म्मापि चास्मत्कृतिरपि करणं कारणं कोऽपि कृष्णः ।

End. तस्य पित्रादिकस्य यद्वस्तु कदलीफलाम्रफलाद्यदधिसम्मिततण्डुलनिर्मितशष्कुल्यादिरूपं अत्र पुरा इह लोके जीवनावस्थायां मनस्यभीष्टं मनोऽभिलषितं ।

Colophon. इति श्राद्धकर्मविधिः समाप्तः ।

विषयः । श्राद्धविधिः ।

No. 1691. तत्त्वसङ्ग्रहः, वा वेदान्ततत्त्वत्रयनिरूपणं ।

Substance, country-made paper, 12½ × 4¾ inches. Folia, 23. Lines, 6—10—11—13 on a page. Extent, 648 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Tattva-sangraha alias *Vedánta-tattva-traya-nirúpana.* An enquiry into the creator, the created, and the obstruction to the union of the two. By Náráyana Muni. Hall's "Contributions," p. 163.

Beginning. पशूनां पतिमीशानं नत्वा सोमं सदाश्रयं ।
रामेश्वरशिवप्रीत्यै कुरुते तत्त्वसङ्ग्रहं ॥
अथ तत्त्वत्रयं श्रुत्यागमपुराणप्रसिद्धं सङ्गृह्यते तत्र पतिः पशुः पाशश्चेति त्रीणि तत्त्वानि प्रसिद्धानि तत्र च तत्त्वत्रयस्य सम्यग्बोधो मोक्षोपाय इत्यपि प्रसिद्धं ॥

End. सर्व्वजनानुजिघृक्षया संस्कृतभाषयास्माभी रचितोऽयं प्रबन्धः ।

Colophon. इति श्रीपरिव्राजकाचार्य्यश्रीमन्नारायणमुनिकृततत्त्वत्रये ईश्वरप्रकरणमस्तु शुभदं॥

विषयः । मोक्षसाधनज्ञानविषयतत्त्वत्रयनिरूपणं । तत्त्वत्रयन्तु पतितत्त्वपशुतत्त्वपाश-तत्त्वरूपं ॥

No. 1692. वाक्यवादः वाक्यदीपिकाख्यटीकासहितः ।

Substance, country-made paper, 14 × 7 inches. Folia, 16. Lines, 15—16—17—18 on a page. Extent, 960 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old Prose. Incorrect.

Vákya-váda, together with a commentary entitled *Vákya-dípiká.* A dissertation on Syntax, or the relation of the several elements of a sentence. By Hariyas'a Mis'ra. A rare work, but of great repute.

Beginning. टी॰ । ॐ स्वस्ति श्रीगणेशाय नमः । सुप्तिङन्तचयो वाक्यमिति प्रमाणानुसारेण सुबन्तचयत्वे सति तिङन्तचयत्वस्य मिलितस्य प्रत्येकं सुबन्तचयत्वादेर्वाक्यस्य लक्षणत्वे परस्परमव्याप्तिः पदसमूहत्वमित्यस्य गैारश्वः पुरुषो हस्तीत्यादावतिव्याप्तिरित्याशयेन शङ्कते अथेति ।

मू॰ । ॐ अथ किमिदं वाक्यं नाम एकतिङ्वाक्यमिति भाष्यात् एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमूहो वाक्यमिति वैयाकरणाः ।

End. मू॰। परन्तु पदार्थतावच्छेदकरूपविशेषणस्य क्वचिदपि न परामर्शः।
Colophon. इति वाक्यवादः समाप्तः।

टी॰। पटोलपचमित्यादो पटोलादिसम्बन्धिनि लक्षणास्वीकारे पटोलादेः पदार्थतावच्छेदकत्वेऽपि तत्परामर्शानुपपत्तिरिति भावः।

स्ववत्चणत्वव्यापकाविद्यातत्प्रयुक्तदृश्याश्रयकालपूर्वत्वाभावकशुद्धविज्ञाननिरस्तविपरीतभावनीभूतश्रीमद्धरियशोमिश्रनिर्म्मितवाक्यदीपिका समाप्तिमगमत्॥

विषयः। क्रियासमभिव्याहृतस्यैव पदसमूहस्य वाक्यतावादिवैयाकरणमते वाक्यलक्षणं क्रियाविनिर्मुक्तस्यापि पदसमूहस्य वाक्यतावादिनैयायिकमतदूषणञ्च॥

No. 1693. भगवद्गीताटीका गीतासहिता।

Substance, country-made paper, 12¼ × 5¾ inches. Folia, 100. Lines, 7—9—10 on a page. Extent, 2,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Bhagavad-gítá-ṭiká. A commentary on the Bhagavadgítá. By Hariyas'a Mis'ra. It is commonly called Hariyaṣí.

Beginning. श्रीगणेशाय नमः। गुरुं नत्वा कुर्व्वे सततमनन्तत्रह्मविषयं
सुगीताप्राकट्यं परिमितनिजानन्दजनकं।
सुनिःक्षध्याहं वै विविधमतसारज्ञमधुस्‌-
दनीतो बोधार्थं अलसमनसां श्रं हरियशाः।

End. चिदानन्दघनं नत्वा पूर्णेन्दुसुन्दराननं।
शुक्लकृष्णदशम्यां हि कृष्णं तत्त्वं परं मतं॥

विषयः। भगवद्गीताव्याख्यानं।

No. 1694. मुहूर्त्तरत्नाकरं।

Substance, country-made paper, 13¼ × 5¾ inches. Folia, 84. Lines, 12 on a page. Extent, 2,500 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Muhúrta-ratnákara. An epitome of astrology relating to the performance of civil rites. By Ís'varadása.

Beginning. ओं नमः सरस्वत्यै । अथ मुहूर्त्तरत्नाकरं लिख्यते । ओं नमः शिवाय सशिवाय सदाशिवाय परमशिवाय ॥

ओं सोमसौम्यभृगुभास्करभौमा देवपूज्यरविजावपि नित्यं ।
यं नमन्ति निजवाञ्छितसिद्धौ सिद्धिदो भवतु मे स गिरीशः ॥

End. असदप्यपरपद्यं सन्त एव प्रशंसन्ति स्तकरकराणां तर्पयन्ताश्चिपातः(?) ।
विमल अपि च पद्ये दूषिते दुष्टचित्तैर्विषधररसनायां कालकूटः सदैव ॥

Colophon. इति श्रीमज्ज्योतिषरायात्मजेश्वरदासविरचितो मुहूर्त्तरत्नाभिधो व्यवहारग्रन्थः समाप्तः ॥

विषयः । अत्र १ मे,—संवत्सरनिरूपणं । २,—तिथिनिरूपणं । ३,—वारनिरूपणं । ४,—नक्षत्रनिरूपणं । ५,—योगनिरूपणं । ६,—करणनिरूपणं । ७,—मुहूर्त्तनिरूपणं । ८,—उपग्रहनिरूपणं । ९,—सङ्क्रान्तिनिरूपणं । १०,—ग्रहाणां गोचरनिरूपणं । ११,—चन्द्रताराबलनिरूपणं । १२,—लग्ननिरूपणं । १३,—संस्कारनिरूपणं । १४,—समयशुद्धिनिरूपणं । १५,—लग्नादीनां दोषनिरूपणं । १६,—ब्राह्मणक्षत्रियविशां उपनयनकालनिरूपणं । १७,—समावर्त्तननिरूपणं । १८,—क्षुरिकाबन्धनं । १९,—विवाहकालनिरूपणं । २०,—चूडाकर्मकालनिरूपणं ; द्विरागमनकालनिरूपणञ्च । २१,—राज्याभिषेककालनिरूपणं । २२,—यात्राकालनिरूपणं । २३,—वास्तुनियमः । २४,—गृहप्रवेशनियमः । २५,—प्रतिष्ठाकालादिनिरूपणं । २६,—ग्रन्थकर्तृस्थानगोत्रादिवर्णनं ।

No. 1695. शाब्दबोधप्रक्रिया ।

Substance, country-made paper, $10\frac{1}{2} \times 5$ inches. Folia, 20. Lines, 10—11—12 on a page. Extent, 580 s'lokas. Character, Nágara. Date. Sм. 1910. Place of deposit, Government of India. Appearance, old. Prose. Incorrect.

S'ábdabodha-prakriyá. The philosophy of grammar, or the logical relations of the several members of a sentence. By Rámakṛishṇa.

Beginning. श्रीरामं सानुजं नत्वा रामकृष्णवशम्बदः ।
प्रक्रियां शाब्दबोधस्य कुर्व्वे मत्यनुसारतः ॥

End. एतदधिकरणको मत्स्वामिको विनियोगानुकूलो व्यापारः देवदत्ताभिन्नाश्रयवृत्तिः इति सप्तमी ।

Colophon. समाप्तिं गता शाब्दबोधप्रक्रिया ॥

विषयः । आख्यातार्थलङाद्यर्थकारकविभक्त्यर्थानां अन्वयबोधरीतिप्रदर्शनं ॥

No. 1696. शान्तिरसनाटकं, वा द्वादशमहावाक्यसिद्धान्तः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 29. Lines, 8—12 on a page. Extent, 463 s'lokas. Character, Nágara. Date, Sm. 1889. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'ántirasa-náṭaka, alias *Dvádas'a-mahávákya-siddhánta.*

Explanations and dissertations on the twelve great maxims of the Upanishads on which the Vedánta doctrine is founded. By Vaikuṇṭha Puri. Hall's 'Contributions', p. 205.

Beginning. ओं अथ द्वादशमहावाक्यसिद्धान्तो लिख्यते । ओं नमः त्रिपुरसुन्दर्यै ।
ओं यदज्ञानप्रभावेण दृश्यते सकलं जगत् ।
यज्ज्ञानाल्लयमाप्नोति तस्मै ज्ञानात्मने नमः ॥
ओं वैकुण्ठपुरी परमहंसपरिव्राजकाचार्य्यः सङ्क्षेपतो वेदान्तस्त्रमहावाक्यार्थं प्रकटीकरोति ॥ प्रज्ञारहितसन्यासनिमित्तं तदुपकारहेतोर्वार्त्तिकशास्त्रतदर्थ-ग्रथितं शान्तिरसनाटकसञ्ज्ञकं निरूपयति ।

End. सङ्क्षेपाद् ब्रह्मस्वरूपनिरूपणवेदान्तप्रकरणेन ।

Colophon. इत्यथर्व्ववेदवाक्यब्रह्मशब्दनिर्णयो नाम द्वादशः सिद्धान्तः ॥ १२ ॥ इति द्वादश-महावाक्यः समाप्तः ॥

विषयः । परमहंसधर्म्मान्तर्गतब्रह्मविचारसाधनीभूतानां ऋग्यजुःसामाथर्व्ववेदान्तर्गत-प्रज्ञानमानन्दो ब्रह्मेत्यादिद्वादशमहावाक्यानां अर्थप्रकटीकरणं ॥

No. 1697. यशवन्तभास्करः ।

Substance, country-made paper, $14 \times 10\frac{1}{2}$ inches. Folia, 63. Lines, 5—18 on a page. Extent, 2,728 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Yasavanta-bháskara. A treatise on civil astronomy. By Bháskara, son of A'pájí Bhaṭṭa; compiled under the auspices of Prince Yasavanta Siñha, son of Mahárája Indramuni. Its subjects are : 1, Lunar months ; 2, Lunar days and religious duties enjoined on those days ; 3, Times meet for the performance of I'shṭi rites ; 4, I'shṭi rites ; 5, Religious calendar ; 6, calculation of eclipses ; 7, propriety of religious initiation during eclipses ; 8, religious observances during eclipses ; 9, expiations for eclipses.

Beginning. श्रीपुण्डरीनाथाय नमः। नित्यं गोकुलकेलिकौतुकजुषामुल्लासनावासभूः
सौभाग्यं सुमनोजनस्य विनतासूनुस्फुरद्वाहकः।
गीर्वाणारितमोविदारणपटुर्ब्रह्माण्डमुल्लासयन्
पद्मानन्दविनोददानचतुरः पायादपायाद्धरिः॥

End. वन्दे लखण्डन्टपमण्डलमौलिमालाचञ्चत्किरीटतटरत्नमरीचिदीपैः।
नीराजितानुदिनसुन्दरपादपद्मः क्षोणीतले विजयते यशवन्तदेवः॥ १॥
त्र्यम्बकेश्वरपुरीकृतवासादग्निहोत्रिकुलनीरधिचन्द्रात्।
पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः॥ २॥
वेदवाक्यनिचयावचयेन प्रेक्षितो विधिरिवेह बुधौघैः।
लोकगीतविमलायतकीर्त्तिः सोऽपि सज्जनमणिर्जयति स्म॥ ३॥
तस्मादुद्भूतकीर्त्तिः कृतसुकृतभरान् मन्त्रतन्त्रः स्वतन्त्रः
साधूनामग्रगण्यो गददलनविधौ मानवानां शरण्यः।
काशीक्षेत्राधिवासी हतकठिनतरारातिषड्वर्गदम्भः
श्रीमानापाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत्॥ ४॥
तत्सूनुना भास्करशर्म्मणास्मिन्नादेशतः श्रीयशवन्तभूपतेः।
विनिर्मिते श्रीयशवन्तभास्करे समाप्तिमायात् खलु वर्षकृत्यं॥ ५॥

Colophon. इति श्रीमन्महाराजाधिराजश्रीमदिन्द्रमणिन्टपतिनन्दनश्रीमत्कुमारयशवन्तसिंह-प्रेरितश्रीमत्काश्यपान्वयसम्भवाग्निहोत्रिकुलतिलकायमानश्रीमदापाजिभट्टसूनु-भास्करविरचिते यशवन्तभास्करे संवत्सरकृत्यप्रकाशः समाप्तोऽयं ग्रन्थः।

विषयः। अत्र प्रथमं चान्द्रादिमासनिर्णयः। ततः प्रतिपदादिपञ्चदशतिथिकृत्यं। तत इष्टिकालनिर्णयः। तत इष्टयः। ततः चैत्रादिद्वादशमासकृत्यं। ततो ग्रहण-निर्णयः। ततो ग्रहणे दीक्षाविधिः। ततो ग्रहणपुरश्चरणविधिः। ततो ग्रहण-शान्तिः।

No. 1698. चण्डिकाभाष्यं, वा शान्तनवीचण्डीटीका ।

Substance, country-made paper, 13 × 6 inches. Folia, 112. Lines, 7—14 on a page. Extent, 4,675 s'lokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Chaṇḍiká-bháshya alias *S'ántanaví-chaṇḍiṭiká.* A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Santanu Chakravartí, son of Uddharaṇa of the race of Rájádhirája Tomara.

Beginning. ब्रह्मा यस्मै हरिर्यस्मै रुद्रो यस्मै यथाक्रमः ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै नमो नमः ॥ १ ॥
अव्युत्पन्नमुखान्धकूपपतिता गावो मुनेः खिन्दते
ताः प्रोद्धर्तुमहो यतध्वमभितः स्वस्वार्थवत्सोत्सुकाः ।
सूत्रैः पाणिनिसम्भृतैरतितरामाकृष्यमाणाः पुन-
स्ता वः कामदुघा भवन्त्वभि तमस्तोमद्विषः सन्निषः ॥ २ ॥
ऐं श्रीं ह्रीं पदभावितं जगदद्ः स्रष्टुं स्वयं रचितुं
संहर्तुं समये क्षमा+ +मयीं ब्राह्मीं श्रियं चण्डिकां ।
आराध्यादिमशक्तिमार्त्तिदलनीं श्रीतोमरः शन्तनु-
र्मार्कण्डेयपुराणसिद्धमहिमां व्याख्याय विख्यायते ॥ ३ ॥
मार्कण्डेयपुराणान्तर्देवीमाहात्म्यमद्भुतं ।
अल्पाक्षरमनल्पार्थमपपाठपराङ्मुखं ॥ ४ ॥
शुभंयुः शन्तनुः शंयुः सत्कीर्त्तिस्तोमरान्वयः ।
व्याकरोति पराकृत्य कुव्याख्यानपरम्परां ॥ ५ ॥

End. यावद्भूमिम्हदि लरद्द्युतिगणश्रेणिस्फुरन्मूर्द्धसु-
स्फारस्फारपयोधिकाननगिरिव्रातोल्लसत् सत्फलं ।
धत्ते शेषमिवाहिमद्भुतवचाः स्वस्वीकृताशेषगी-
स्तावच्छान्तनवी तदावयतु+ + + + श्रीचण्डिका ॥ २ ॥

Colophon. इति श्रीराजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजश्रीशन्तनुचक्रवर्त्तिविरचितायां शान्तनव्यां चण्डीटीकायां राजवैशवरप्रदानविध्युपलक्षितस्त्रयोदशोऽध्यायः ॥१३॥
समाप्तश्चेदं चण्डिकाभाष्यं ।

विषयः । चण्डीव्याख्यानं ।

No. 1699. स्मृतिसुधाकरः ।

Substance, country-made paper, 12½ × 5½ inches. Folia, 271. Lines, **11** on a page. Extent, 5,400 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Smriti-sudhákara. A miscellaneous compilation on Smriti rites, in two parts. By Odásañkara. Contents: 1st Part, creation. Praise of deities enjoined in the Puráṇas and the Smritis. Vice condemned. Praises of Bráhmaṇas and kings. Marriage. Qualities of bridegrooms and brides. Bráhma and other marriages. The great Dvípas or Continents. The nine Varshas or countries. Áryavarta defined. Duration of lunar days and months. Bathing and putting on sectarial marks before performing a rite. Night and duties appertaining to it. Fasts. Duties appropriate on the anniversaries of birth-days. Durations of Manvantaras, Yugas, and Lunar days. Mensual fasts. Memorial fasts. Second Part. Religious calendar.

Beginning. संसारतिमिरच्छेदे सत्परिच्छेदगोचरे ।
आविरास्तां मनसि मे महसी(?)खगगोचरे ॥
अन्तस्तापविमोचनमतिरोचनमस्तशोचनं पुंसां ।
नीलेन्दीवरलोचनमस्तु परं वस्तु नः सिद्ध्यै ॥

End. इति स्मृतिसुधाकरे फाल्गुने त्रिंशत्कलाप्रकाशः ॥ ३० ॥ समाप्तश्च फाल्गुनापरपक्षः । समाप्तश्च फाल्गुनो मासः । ऋतुरपि शिशिराभिधः पूर्णः समाप्तञ्च तृतीयचातुर्मास्यं ।

Colophon. इति श्रीओदाशङ्करकृतः स्मृतिसुधाकरः समाप्तः ।

विषयः । अत्र सृष्टिनिरूपणं । ततः पुराणस्मृतिधर्म्मादिप्रशंसा । ततो अधर्म्मनिन्दा । ततो ब्राह्मणप्रशंसा । ततो राजप्रशंसा । ततो विवाहविधिः । ततो वरकन्यापरीक्षाविधिः । ततो ब्राह्मविवाहादिलक्षणं । ततः सप्तद्वीपादिनवद्वीपवर्णनं । ततो नववर्षवर्णनं । तत आर्य्यावर्त्तदेशनिरूपणं । ततः चान्द्रमासाधिमासाहोरात्रादिनिरूपणं । ततो धर्मकर्मणि स्नानतिलकादीनां कर्त्तव्यताकथनं । ततो नक्तपदार्थनिरूपणं । ततो नक्तव्रतनियमाः । तत उपवासविधिः । ततः पारणदिननियमाः । ततो जन्मदिनकृत्यं । ततो मन्वन्तरायुगाद्यादिनिरूपणं । ततः तिथिद्वैधव्यवस्था । संवत्सरैकनक्तव्रतं । ततो मासोपवासव्रतं । इति पूर्व्वखण्डः । उत्तरखण्डे तु चैत्रादिद्वादशमासेषु पञ्चदशतिथिकृत्यनिरूपणं ।

No. 1700. पञ्चकल्पटीका मूलसहिता ।

Substance, country-made paper, $14\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 402. Lines, 10—11—12 on a page. Extent, 10,854 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Pancha-kalpa. With commentary. A treatise on religious duties, moral duties, political duties, and emancipatory duties, or S'ánti Yoga. Compiled in the kingdom of Káshmira during the reign, and under the auspices, of Ranabir Sinha.

Beginning. टी० । ॐ यद्देवासुरमौलिसन्मणिविभाज्वालान्तमन्तस्तमो-
भारध्वंसकरं सदा नतियुजां निःशेषपापापहं ।
सर्व्वार्थैकनिधानमम्बुजभवा श्रीविष्णुना शम्भुना
सिद्धौ ध्यातमहोऽस्तु वो गणपतेर्भूत्यै पदाब्जद्वयं ॥

मू० । ब्रह्मक्षत्रविशो द्विजा इति वृषस्तेषां क्रमादध्ययः
शस्त्रास्था पशुपालनाथ यजनाधीते समे अन्त्यगा(?) ।
सेवाध्यापनयाजनप्रतिग्रहक्षत्राणकृष्यादयः
शिल्पं वृत्तिरनन्तरापदि दयाद्यो वर्ग उक्तः समः ॥ १ ॥

End. मू० । प्रवृत्तं तत् सर्व्वं भवति भविनां सिद्धिघटनं
समापत्त्या यासां न खलु गणतां यात्यसरपः ।
निवृत्तं तत्किञ्चिद् भवति सुकृतां यत् करुणया-
श्रमूर्त्तिर्द्देवोऽसौ जयति भगवान् भूतिविशदः ॥

टी० । रणवीरमहाराजसौराज्योत्सवशालिषु ।
काश्मीरेषु निबद्धेयं पञ्चकल्प्यास्तु सन्मुदे ॥

Colophon. इति पञ्चकल्प्यां योगानुशासनाख्यो हरिचन्दनकल्पः पञ्चमः ॥ ५ ॥

विषयः । पञ्चकल्पीव्याख्यानं । पञ्चकल्प्यान्तु पञ्च कल्पाः सन्ति । तत्र १म–कल्पे, सदाचार-कथनं । २य–कल्पे, नीतिकथनं । ३य–कल्पे, न्यायकथनं, न्यायस्तु पुरीस्थापन-सामदानादिसाधनोपन्यासादिरूपो राजधर्म्मविशेषः । ४र्थ–५म–कल्पे, शान्तियोगकथनं ।

No. 1701. श्राद्धकाण्डं ।

Substance, country-made paper, 10½ × 5¾ inches. Folia, 22. Lines, 13 on a page. Extent, 740 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'ráddha-kánḍa. A dissertation on Sráddhas, or periodical offerings to the manes. By Bhaṭṭojí Díkshita, son of Lakshmídhara Suri.

Beginning. अथ श्राद्धनिरूपणार्थं तृतीयोऽध्याय आरभ्यते, तत्र प्रेतोद्देशेन श्रद्धया द्रव्यत्याग-
विशेषः श्राद्धं तदाह मूले, मृतानान्तु भवेच्छ्राद्धं ब्राह्मणैर्वेदपारगैः ।

End. तेनैव प्रेरिता यद् यदचरीकृत्य चापलं ।
चं भम्पि तु(?) स एवैनमन्तर्यामी महेश्वरः ॥

Colophon. इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां चतुर्व्विंशतिमुनिमनुव्याख्यायां श्राद्धकाण्डं सम्पूर्णं ।

विषयः । मन्वाद्युक्तप्रमाणप्रदर्शनेन श्राद्धनिरूपणं ।

No. 1702. पदचन्द्रिका, वा अमरकोषव्याख्या ।

Substance, country-made paper, 13½ × 6¾ inches. Folia, 379. Lines, 5—14 on a page. Extent, 15,160 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Padachandriká alias *Amarakosha-vyákhyá.* A commentary on the Amarakosha. By Ráyamukuṭa.

Beginning. ॐ अध्यास्ते यः सर्व्वं भुव ईश्वर इत्यगोचरो वचसः ।
अहमिति संविद्विषयः पुरुषः स परः पुरातनो जयति ॥
अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धकाधर्म-तिरोधानद्वारा प्रारीप्सितं परिसमापयतीति प्रामाणिकं मतं, अतो निष्प्रत्यूह-प्रारीप्सितपरिसमाप्तिहेतुविशिष्टदेवतासङ्कीर्त्तनादिशिष्टादृष्टमुत्पिपादयिषुर्ग्रन्थ-कारः प्रथमं नमस्कारश्लोकं निबध्नाति । यस्य ज्ञानदयासिन्धोरिति ॥

End. यथा गोधा पुंस्यपि स्त्री पोटा नपुंसकेऽपि स्त्रीत्यादिकमूहनीयं ।

Colophon. इ श्री य क ता मस को पं का पदचन्द्रिकायां लिङ्गादिमङ्गहविवरणं समाप्तं ।

विषयः । अमरकोषव्याख्यानं ।

No. 1703. पाञ्चोलीभगवद्गीताटीका गीतासहिता ।

Substance, country-made paper, 12¼ × 6¼ inches. Folia, 138. Lines, 9—12—14 on a page. Extent, 4,855 s'lokas. Character, Nágara. Date, Sm. 1890. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Páñcholi-bhagavadgítá-ṭíká. A commentary on the *Bhagavadgítá.* Anonymous.

Beginning. सन्तोषञ्च गुरुं वन्दे परं संवित्प्रदायकं ।
शान्तिसिंहासनारूढमानन्दामृतभोगदं ॥

End. उत्तरोत्तरा दृढिर्भूत्वा अव्यभिचारिणी नीतिरिति मे मतिः ।

Colophon. इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे सन्न्यासयोगो नामाष्टादशोऽध्यायः ॥ १८ ॥

विषयः । भगवद्गीताव्याख्यानं ।

No. 1704. वृहन्नारदपञ्चरात्रं ।

Substance, country-made paper, 12½ × 6¼ inches. Folia, 444. Lines, 11 on a page. Extent, 10,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Vṛihannárada Pañcharátra. An enlarged edition of the *Nárada-pañcharátra* of which an edition has been published in the Bibliotheca Indica of the Asiatic Society of Bengal. The Pañcharátras form a class of their own, and are in substance closely allied to the Tantras. They are Vaishṇavite in their character, and relate principally to Vaishṇava rituals, illustrated with tales, stories and descriptive poetry. Their author's names are not given.

Beginning. आसीनमाश्रमे कण्वं तदाश्रमनिवासिनः ।
निःश्रेयसकरं कर्म्म प्रष्टुमारेभिरे मुनिं ॥ १ ॥

End. प्रदास्यति स युष्माभ्यमपवर्गं तपोधनः ।
इत्यध्यायस्त्रयस्त्रिंशत् चर्य्यापादः प्रकीर्त्तितः ॥ २०८ ॥

Colophon. इति श्रीनारदपञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्य्यापादे समाराधनाङ्ग-मन्त्रोद्धारो नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

विषयः । ग्रन्थोऽयं ज्ञानयोगक्रियाचर्य्याख्यचतुर्भिः पादैर्विभक्तः । तत्र ज्ञानपादे १मे,—स्वाश्रमवासिऋषीन् प्रति कण्वमुनेरुपदेशः । २,—हरेर्मत्स्यादिदशविधमूर्त्त्युत्पत्ति-कथनं । ३,—ब्रह्मादिसृष्टिकथनं । ४,—को जीवः संसारी कश्च मुक्त एतद्विवे-चनं । ५,—ब्रह्मलक्षणप्राप्त्युपायकथनं । ६.—ब्रह्मणः सर्व्वतः पाणिपादत्वकथनं । ७,—ब्रह्मप्राप्त्युपायस्य ज्ञानस्योत्पत्तिकथनं । ८,—मुक्तिभेदतत्त्वनिर्णयः । ९,—भूगोलवर्णनं । १०,—भूलोकलक्षणं । ११,—पाताललोकवर्णनं । १२,—भुव-र्लोकादिविस्तारः । इति ज्ञानपादः समाप्तः ॥

योगपादे १मे,—आसनभेदविधिः । २,—नाड़ीस्वरूपकथनं । ३,—प्राणायाम-लक्षणं । ४,—पञ्चभूतस्थानभेदनिर्णयः । ५,—योगलक्षणं । योगपादः समाप्तः ।

क्रियापादे १मे,—विष्णुस्थापनार्थं भूपरीक्षा । २,—ग्राम्यविन्यासः । ३, ४, ५, ६, ७, ८, ९, १०,—विष्णुमन्दिरनिर्म्माणं । ११, १२, १३, १४,—विष्णुप्रतिमा-विधिः । १५,—प्रतिमास्थित्यासनभेदाः । १६,—विष्णुमूर्त्तिभेदाः । १७,—दशा-वतारलक्षणं । १८,—विष्णोः पुनर्मूर्त्तिभेदकथनं । १९,—पूजायां प्रतिमाविशेषस्य उत्तममध्यमाधमत्वनिर्णयः । २०,—प्रतिमामानलक्षणभूषणकथनं । २१,—श्रिया-दिदेवीलक्षणं । २२,—विष्णुपरिवारदेवतालक्षणं । २३,—पूजोपकरणविधिः । २४,—आचार्य्यलक्षणं । २५,—विष्णुप्रतिष्ठोपकरणं । २६,२७,—अधिवासनविधिः । २८, २९, ३०, ३१,—प्रतिष्ठाविधानं । ३२,—श्रियादिदेवीनां पाणिग्रहणं । ३३,—अक्षमालाप्रतिष्ठा । ३४,—गृहार्चास्थापनविधिः । क्रियापदः समाप्तः ।

चर्य्यापादे १मे,—विष्ण्वाराधनाधिकारिनिरूपणं । २,—दीक्षाविधिः । ३,—नित्ययागविधिः । ४,—अग्निकार्य्यविधिः । ५,—उत्सवसमाराधनविधिः । ६,—नीराजनविधिः । ७,—आचार्य्याभिषेकविधिः । ८,—स्नपनविधिः । ९,—स-हस्रकलसाभिषेकविधिः । १०,—ध्वजारोह विधिः । ११,—महोत्सवविधिः । १२,—विष्ण्वाराधने पुष्पहविर्विधानं । १३,—कर्म्मोपादानेज्यास्वाध्याययोगानां पञ्चानां पञ्चकालविधिः । १४,—उत्तमार्चनयोग्यनक्षत्रादिकथनं । १५,—मास-विशेषे मूर्त्तिविशेषार्चनविधानं । १६,—देवद्रव्यापहरणदोषकीर्त्तनं । १७,—जीर्णप्रतिमोद्धारादिविधिः । १८,—प्रायश्चित्तविधिः । १९,—नारायणवलेः प्राय-श्चित्तरूपताकथनं । २०,—ब्रह्महत्यादिपापनाशककर्मकथनं । २१,—चर्य्याधि-कारिव्यवस्था । २२,—मुद्राविधिः । २३,—मन्त्राद्यर्थवर्णनं । २४,—द्वादशाक्षर-मन्त्रकल्पः । २५,—अष्टाक्षरमन्त्रः । २६,—विष्णुगायत्र्यादिमन्त्रोद्धारः । २७,—

मत्स्यादिमूर्त्तिमन्त्रोद्धारः । २८,—अन्नसमयाधिपतिमन्त्रोद्धारः । २९,—श्रियादिपरिवारमन्त्रकल्पनं । ३०,—श्रियादिमन्त्रोद्धारः । ३१,—गणेशोत्पत्तिकथनं । ३२,—मन्त्रमन्त्रविशेषकथनं । ३३,—समाराधनाङ्गमन्त्रोद्धारः ॥

No. 1705. जयसिंहकल्पद्रुमः ।

Substance, country-made paper, 13 × 5 inches. Folia, 694. Lines. 9—11 on a page. Extent, 22,869 s'lokas. Character, Nágara. Date, Sм. 1876. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Jayasiñha Kalpadruma. A Smṛiti compilation on the duties, feasts, fasts and observances meet for householders. By Ratnákara, son of S'rídeva Bhaṭṭa, and a Paṇḍita of Benares. The name of the work is due to its patron Jaya Siñha, son of Vishṇu Siñha who ruled in Mathurá. The father of Vishṇu was Kṛishṇa Siñha; grandfather, Ráma Siñha; great grandfather Jaya Siñha, and great-great-grandfather Jagat Siñha. The last was a descendent of Mána Siñha who traced his ancestry to Prithvíràja of the Kurma or Kachvaha race, and was a king of the Matsya-deva. The work, though modern, is of considerable repute, and often quoted.

Beginning. करीन्द्राननं चारुचन्द्रावतंसं सवद्गण्डपालीमिलद्भृङ्गमालं ।
अपर्णासुतं विघ्नपूगं हरन्तं गणेशं सुरेशं नमाद्यं प्रपद्ये ॥
श्रीजानकीशं शरणागतैकदुःखापहं श्रीगिरिजाधरञ्च ।
स्मृत्वाथ पूज्यौ पितरौ गुरुंश्च श्रीभ्रातरौ सूर्य्यसमानरूपौ ॥
— — — — — — — — ।
तद्वंशे वितते महाभटनुते धर्म्मैकसेतुर्महान्
पृथ्वीराज इति प्रसिद्धमहिमा सत्वा+नामग्रणीः ।
राजा चक्रधुरन्धरः समभवद् यस्याभवद् गोचरो
वाचां यो मनसोऽथ गोचरतरो विष्णुः कृपावारिधिः ॥
तद्वंशे मानसिंहः समभवदतुलः प्रत्यहं दानम+
++दं तान् गजेन्द्रानभिनवतुरगान् याचकेभ्योऽददद् यः ।
यस्योर्व्वीशाननेकानुदधिजलगतान् खड्गशः खैर्बलौघैः
कृत्वा साम्राज्यलक्ष्मीं समवहदमितो भारतं मत्स्यदेशे ॥

मानसिंहाद्भूत्तस्माज्जगत्सिंहो महाबलः ।
जगत्सिंहान्महासिंहो जयसिंहस्ततस्ततः ॥
– – – – – – – – – – ।
राजाग्रणीः श्रीजयसिंहपुत्रः श्रीरामसिंहोऽवनिपालपालः ।
कौर्म्मे कुलेऽभूद्विजितारिवर्गः श्रीरामपादाब्जविलग्नचित्तः ॥
– – – – – – – – – – – – – ।
तत् पुत्रः कृष्णसिंहः प्रथितगुणगणः कृष्णवत्सोत्सवो यो
जातः पृथ्व्यां पृथुश्रीररिगणतिमिरध्वंसने भानुरूपः ।
तस्मात् श्रीविष्णुसिंहः च्यितरिपुगणः पालकः सज्जनानां
राजा राजीवनेत्रः समजनि मथुरा पालिता येन पूर्व्वं ॥
तस्मात् श्रीविष्णुसिंहाख्याद् राजा राजीवलोचनः ।
जातः श्रीजयसिंहोऽसौ चीराब्धेरिव चन्द्रमाः ॥
– – – – – – – – – – – ।
तेन श्रीजयसिंहेन सर्व्वशास्त्रार्थसंविदा ।
सम्प्रार्थितस्त्रियैः कृत्यं कुरुतेऽति सुसङ्ग्रहं ॥
रामाङ्घ्रिप्रवणः सुकर्म्मनिरतः शाण्डिल्यगोत्रोद्भवः
काशीस्थद्विजदेवभट्टतनयः सम्राट् सुविद्यान्वितः ।
संलब्धैर्धनसञ्चयैर्बहुविधैः सर्व्वान् क्रतूनाचरन्
तत्प्रीत्यै व्रतकल्पशाखिनममुं निर्म्मांति रत्नाकरः ॥
– – – – – – – – – – ।
बहवो हि बुधाः सन्ति तन्निबन्धाः सहस्रशः ।
तथाप्यस्य तु वैदग्ध्यं सुहृद्भिः संविचार्य्यतां ॥
वक्ष्यमाणव्रतेषु कालस्य निमित्तत्वादादौ कालस्वरूपं तन्निर्णयस्य उच्यते ॥

End. सर्व्वतोमुखमखं क्रतूत्तमं संविधाय युगवेदिकायुतं ।
देवभट्टजनुषाग्रजन्मना कल्पवृक्षरचना लियं कृता ॥
शाके विक्रमपार्थिवस्य शुभदे व्योमर्षिमप्नेन्दुयुग-
वर्षे शोभनसञ्ज्ञके शिवतिथौ मासे नभस्याख्यके ।
कूर्म्मे श्रीजयसिंहदेवनगरे पुण्येऽम्बिकेशाश्रिते
ग्रन्थः कल्पतरुः समाप्तिमगमत् सञ्ज्ञानवित्तप्रदः ॥
रत्नाकरेण जयसिंहसमर्च्चितेन सद्वाक्यरत्ननिवहैः परिसंगृहीतः ।
ग्रन्थोऽर्थदः सफलकल्पमहीरुहाख्यः श्रीजानकीशपदपद्मयुगेऽर्पितोऽयं ॥

ग्रन्थान् बहून् सुविततान् सुचिरं विभाव्य कष्टेन यः कविवरैरधिगम्यतेऽर्थः ।
निर्मत्सरं बुधवराः परितो विचार्य्य ग्रन्थादुरीकुरुत तं हि विना प्रयासं ॥
++पञ्चकल्पतरवः परं श्रुता जयसिंहवर्म्मनृपतेः समानते ।
कथमन्यथा सुरगणोऽम्बिकापुरे +++सदाध्वरमिषात् समाययौ ॥

Colophon. इति श्रीदेवभट्टात्मजपौण्डरीकयाजिरत्नाकरविरचिते श्रीजयसिंहकल्पद्रुमे अष्टादशः स्तवकः । समाप्तश्चायं ग्रन्थः । संवत् १८७६ ।

विषयः । १ प्रथमस्तवके,—कालस्वरूपनिरूपणं । निमेषादिलक्षणं । चान्द्रसावनसौरमानलक्षणादिकथनं । संवत्सरभेदनिरूपणं । अयननिरूपणं । शुद्धमासनिर्णयः । मलमासनिरूपणं । अत्र कर्त्तव्याकृत्यव्यवस्थादिनिरूपणं । क्षयमासादिनिरूपणं । मलमासादौ गयाश्राद्धादिकरणव्यवस्थाकथनं । मलमासाभिधानव्रतविधानकथनं । अन्यविधमलमासव्रतविधानं । सर्व्वत्र प्रयोगकथनं । (एवं परत्र ज्ञेयं) ।

२ स्तवके,—सङ्क्रान्तिनिरूपणं । तत्र पुण्यकालादिव्यवस्थाकथनं । सङ्क्रान्तिकृत्यनिरूपणं । सङ्क्रान्तिविशेषे दानकथनं । तिथिशब्दार्थनिर्णयः । सामान्यतः सर्व्वतिथिनिरूपणं । एकभक्तकालनिर्णयः । नक्तव्रतकालनिरूपणादिकं । अयाचितव्रतनिर्णयः । दानहोमादिकालनिर्णयः । सामान्यतो व्रतप्रशंसाकीर्त्तनं । तत्र अधिकारिधर्म्मनिरूपणं । द्विराचमननिमित्तक्रियानिर्णयः । व्रतारम्भकालव्यवस्था । दानविभागनिरूपणं । नवरत्ननिरूपणं । पञ्चगव्य-पञ्चपल्लव-सप्तधान्य-सप्तधातु-सर्व्वौषधि-त्रिमधुप्रभृतिनिरूपणं । यक्षकर्द्दमादिलक्षणं । विविधधूपनिर्म्माणप्रकारकीर्त्तनं । व्रते सूतकादिव्यवस्थाकथनञ्च ।

३ये स्तवके,—प्रतिपन्निरूपणं । तत्र प्रतिपदो ध्यानकथनं । संवत्सरारम्भविधिकथनं । तत्र प्रयोगकथनञ्च । एवं परत्र । तिलकव्रतविधानकथनं । आरोग्यव्रतविधिकथनं । विद्याव्रतविधिः । ज्यैष्ठशुक्लप्रतिपदि करवीरव्रतविधानं । आश्विनशुक्लप्रतिपदि अशोकव्रतविधानं । तत्र नवरात्रव्रतारम्भकथनं । तत्कालनिरूपणादिकं । शरद्वसन्तयोः तुल्य एव दुर्गोत्सवः कार्य्य इति व्यवस्थापनं । तन्त्रशास्त्रस्य श्रुतिमूलकत्वसंस्थापनं । कलसस्थापनविधिकथनं । दुर्गोत्सवे पूजायाः प्राधान्यनिरूपणं । प्रतिमापरिमाणादिनिरूपणं । मूर्त्तिस्थापनायां दिङ्निरूपणं । प्रतिमागुणदोषनिरूपणं । पूजाविधिकथनं । ऋग्वेदिनां कलसस्थापनविधिः । कात्यायनानां कलसस्थापनविधिः । बलिदानविधानकथनं । नवरात्रे सूतकादिनिर्णयः । षष्ठ्यादिकृत्यनिरूपणं । विजयप्राप्तिकामेन लोहाभिसारिककर्म्मकर्त्तव्यताविधानं । राजचिह्नपूजनविधिकथनं । नवरात्रपारणादिनिर्णयः । दशमीकृत्यविधिः । विजयप्रस्थानोत्सवविधानकीर्त्तनञ्च ।

विषयः। ४ र्थे स्तवके,—कार्त्तिकशुक्लप्रतिपदि द्यूतविधिकथनं। दीपदानविधिः। मार्गपालीपूजाविधिः। गोपूजाविधानं। गोवर्द्धनपूजाविधानं। मार्गशीर्षशुक्लप्रतिपदि धन्यव्रतविधानं। सामान्यतो द्वितीयाव्यवस्थानिरूपणं। चैत्रशुक्लद्वितीयायामुमापूजाविधिरग्निपूजाविधानञ्च। बलीन्दुद्वितीयाव्रतकथनं। नेत्रव्रतविधानं। ज्यैष्ठशुक्लद्वितीयायां कल्किजयन्तीव्रतविधानं। आषाढ़शुक्लद्वितीयायां रथयात्राविधिकथनं। श्रावणकृष्णद्वितीयायामशून्यशयनव्रतविधानं। कार्त्तिकशुक्लद्वितीयायां यमद्वितीयाविधानकथनं। यमद्वितीयाव्रतविधानञ्च। मार्गशुक्लद्वितीयायां पितृपूजनविधिकथनं। पौषशुक्लद्वितीयायामारोग्यव्रतविधानं। बृहस्पतिवारयुक्तायां तस्यां ब्रह्मपूजनविधानं।

५म स्तवके,—सामान्यतः तृतीयाव्यवस्थानिरूपणं। चैत्रशुक्लतृतीयायां दोलोत्सवकथनं। तस्यामेव गौरीव्रतविधानकथनं। सौभाग्यशयनव्रतविधानं। मन्वादिश्राद्धविधानप्रसङ्गेन मन्वादिनिरूपणं। वैशाखशुक्लतृतीयायां युगाद्यानिमित्तकश्राद्धविधानं। अक्षयतृतीयाव्रतविधानं। अन्यविधाक्षयतृतीयाव्रतविधिकथनञ्च। ज्यैष्ठशुक्लतृतीयायां रम्भाव्रतविधानं। समुद्रस्नानविधिः। श्रावणतृतीयायां विष्णुपूजनविधिकथनं। श्रावणशुक्लतृतीयायां स्वर्णगौरीव्रतविधानं। भाद्रकृष्णतृतीयायां विशालाक्षीयात्राविधिकीर्त्तनं। तत्र शुक्लायां हरितालिकाव्रतविधानकथनं। हरिकालिकाव्रतविधानं। हस्तगौरीव्रतविधानं। कोटीश्वरव्रतविधिः। मार्गशीर्षशुक्लतृतीयायां रम्भाव्रतविधानं। पौषशुक्लतृतीयायां गिरिजापूजाविधानं। अवियोगतृतीयाव्रतविधानं। माघशुक्लतृतीययां गुड़लवणदानविधिः।

६ष्ठे स्तवके,—सामान्यतश्चतुर्थीनिरूपणं। चैत्रशुक्लचतुर्थ्यां गणेशपूजनविधिः। तत्र आश्रमव्रतविधानं। चतुर्मूर्त्तिव्रतविधिः। ज्यैष्ठशुक्लचतुर्थ्यां पार्व्वतीपूजनविधिः। श्रावणशुक्लचतुर्थ्यां सङ्कष्टचतुर्थीव्रतविधानं। सङ्कष्टनाशनव्रतविधिः। पार्थिवगणेशव्रतविधिः। दूर्व्वागणपतिव्रतविधिः। भाद्रचतुर्थ्यां सिद्धिविनायकव्रतविधानं। अत्र चन्द्रदर्शननिषेधः। स्यमन्तकोपाख्यानकीर्त्तनञ्च। आश्विनशुक्लचतुर्थ्यां देव्या अभ्यङ्गादिसंस्कारविधानं। कार्त्तिशुक्लचतुर्थ्यां करकचतुर्थीव्रतविधानं। नागव्रतविधिः। मार्गशीर्षशुक्लचतुर्थ्यां कृच्छ्रचतुर्थीव्रतविधानं। वरचतुर्थीव्रतविधिः। माघशुक्लचतुर्थ्यां वरदाचतुर्थीव्रतविधिः। कुन्दचतुर्थीव्रतविधानञ्च। सोमपूजाविधिकथनं। गणेशचतुर्थीव्रतविधिः। मनोरथविनायकचतुर्थीव्रतविधिः।

७मे स्तवके,—सामान्यतः पञ्चमीनिरूपणं। चैत्रशुक्लपञ्चम्यां श्रीव्रतविधानं। संवत्सरं यावत् लक्ष्मीव्रतविधिकथनं। सौभाग्यव्रतविधानं। पृथिवीव्रतविधिः।

विषयः। षट्पञ्चमीव्रतविधिः। श्रावणशुक्लपञ्चम्यां नागपूजनविधिः। भाद्रे ऋषिपञ्चमीव्रत-विधानं। आश्विनशुक्लपञ्चम्यां शच्या सह नागानां पूजाविधिकीर्त्तनं। उपाङ्ग-ललिताव्रतविधानं। कार्त्तिकशुक्लपञ्चम्यां जयापञ्चमीव्रतविधानं। मार्गशीर्षे नाग-पञ्चमीव्रतविधानं। माघे श्रीपञ्चमीव्रतविधानं। तत्र पञ्चम्यां रतिमदनपूजाविधि-कथनं।

८म स्तवके,—सामान्यतः षष्ठीनिरूपणं चैत्रशुक्लषष्ठ्यां कुमारव्रतविधानकथनं। वैशाखे पुत्रावाप्तिव्रतविधिकथनं। आषाढ़े स्कन्दषष्ठीविधानं। भाद्रे कपिलाषष्ठी-विधानं। तत्र चन्द्रषष्ठीविधानं। कार्त्तिकषष्ठ्यां वह्निपूजनविधिः। मार्गशीर्षषष्ठ्यां स्कन्दार्चनविधिकथनं। चम्पाषष्ठीव्रतविधानं। माघे मन्दारषष्ठीव्रतविधानं। सामान्यतः सप्तमीनिरूपणं। चैत्रशुक्लसप्तम्यां सूर्य्यव्रतविधानं। वैशाखे कमला-सप्तमीव्रतविधानं। शर्करासप्तमीव्रतविधानं। आषाढ़शुक्लसप्तम्यां विवस्वत्पूजा-विधानं। श्रावणे अव्यङ्गसप्तमीव्रतविधानं। पापनाशनीव्रतविधानं। भाद्रकृष्ण-सप्तम्यां पुत्रव्रतविधिः। तत्र शुक्लायां फलसप्तमीव्रतविधिकथनं। अनन्तफलसप्तमी-व्रतविधिः। शीतलाव्रतविधिः। आश्विनशुक्लसप्तम्यां मूलायोगे सरस्वतीपूजा-विधिकथनं। शुभसप्तमीव्रतविधानं। कार्त्तिके शाकसप्तमीव्रतविधानं। मार्गशीर्षे मित्रसप्तमीविधानं। माघकृष्णपक्षे सर्व्वाप्तिसप्तमीव्रतविधानं। तत्र शुक्लायामचला-सप्तमीव्रतविधानं। माघस्नानविधिः। रटन्तीस्नानविधिः। प्रयागस्नानविधिकथ-नादिकं। रथसप्तमीव्रतविधानं। पुत्रसप्तमीव्रतविधिः। जयासप्तमीव्रतविधिः। विजयासप्तमीव्रतं। जयन्तीसप्तमीव्रतं। अपराजितासप्तमीव्रतं। महाजयासप्तमी-व्रतं। नन्दासप्तमीव्रतं। भद्रासप्तमीव्रतं। निकुम्भार्कसप्तमीव्रतं। विजयासप्तमीव्रता-न्तरविधानं। विशोकसप्तमीव्रतविधानं। त्रिवर्गदासप्तमीविधिः। कामदासप्तमी-व्रतविधिः। कल्याणसप्तमीविधिः। द्वादशसप्तमीव्रतविधिः। गोमयादिसप्तमीव्रत-विधिः। उदकसप्तमीव्रतविधिः। सौरव्रतविधानं। सप्तम्यां वारनक्षत्रयोगे योग-विशेषकथनादिकञ्च।

९मे स्तवके,—सामान्यतः अष्टमीनिरूपणं। सर्व्वासु अष्टमीषु भैरवयात्राविधानं। चैत्रकृष्णाष्टम्यां सन्तानाष्टमीव्रतविधानं। अशोकाष्टमीविधिः। ब्रह्मपुत्रस्नानविधिः। वैशाखाष्टमीव्रतविधानं। ज्यैष्ठाष्टम्यां त्रिलोचनपूजाविधानादिकं। आषाढ़ाष्टमी-विधानं। जन्माष्टमीव्रतनिरूपणादिकं। जयन्तीव्रतविधानं। उमामाहेश्वरव्रत-विधानं। दुर्व्वाष्टमीव्रतविधानं। ज्येष्ठाव्रतविधानं। महालक्ष्मीव्रतविधानं। आ-श्विनशुक्लाष्टम्यामुपवासविधानादिकं। अनघाष्टमीव्रतविधिः। कालभैरवपूजावि-धिः। अष्टकाश्राद्धविधानं। पौषशुक्लाष्टम्यां महाभद्रविधिकथनं। फाल्गुन-

विषयः। कृष्णाष्टम्यां जानक्या जन्मतिथिनिमित्तकपूजादिविधानं। बुधाष्टमीव्रतविधानं। सोमाष्टमीव्रतविधानकथनं।

